एन्नाच्चान् दासेन विरचितः

गीताभाष्यरहस्यार्थ संग्रहः

Gītābhāṣyarahasyārtha Saṅgrahaḥ

By Ēnnāccān Dāsaḥ



संस्कृत संशोधन संसत्

मेलुकोटे - ५७१ ४३१

संस्कृत – संशोधन – संसत् ग्रन्थमाला – ७३

येन्नाच्च्यान् दासेन विरचितः

गीताभाष्यरहस्यार्थसंग्रहः

संस्कृत - संशोधन - संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१
२००९

गीताभाष्य रहस्यार्थ संग्रहः

संस्कृत – संशोधन – संसत्

यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

प्रधानसम्पादकः

डा. भाष्यं स्वामी *एम्.ए पिहेच्.डि., डि.लिट्*

निर्देशकः तथा सहकार्यदर्शी

प्रकाशनम्

संस्कृत - संशोधन - संसत्

यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

ISBN : 978-93-80900-06-3

प्रथमसंस्करणम् - २००९

प्रतयः - १५०

मूल्यम् - ३५०-००

अक्षरसंयोजनम् - मुद्रणञ्च

संस्कृत - संशोधन - संसत्

यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

Academy of Sanskrit Research series - 73

GĪTĀBHĀṢYA RAHASYĀRTHA SAṄGRAHAḤ

By

Yennacchaan Dasa

Academy of Sanskrit Research

Melkote - 571 431

2009

GĪTĀBHĀṢYARAHASYĀRTHA SAṄGRAHAḤ
Academy of Sanskrit Research
Melkote - 571 431

Chief Editor
Dr. Bhashyam Swamy *M.A. Ph.D., D.Litt.*
Director & Joint Secretary

Publisher
Academy of Sanskrit Research
Melkote - 571 431

ISBN : 978-93-80900-06-3
First Edition : 2009
Copies : 150
PRICE : Rs. 350-00

Typeset & Printed at :
Academy of Sanskrit Research
Melkote - 571 431

सम्पादकमण्डली

प्रधानसम्पादकः

***डा. भाष्यम् स्वामी,** एम्.ए. पिहेच्.डि. डि.लिट्.*

निर्देशकः तथा सहकार्यदर्शी

संस्कृत–संशोधन–संसत् मेलुकोटे - ५७१ ४३१

सम्पादकौ

***विद्वान्. एस्. नारायणः** एम्.ए. (संस्कृत) एम्.ए. (कन्नड)*

अलङ्कारविद्वान्, विशिष्टाद्वैतवेदान्ताचार्य, रा.भा.वि.

संशोधनाधिकारी

***विद्वान्. हेच्.एस्. हनुमन्तराव्** एम्.ए. (संस्कृत)*

पि.जि. डिप्.इन्. मान्स्क्रिप्टालजि, अलङ्कारविद्वान्, शैवागमप्रवीणः

ग्रन्थपालः

कार्यनिर्वाहक कार्यदर्शी

***श्री एस्. कुमारः,** एम्.काम्*

कुलसचिवः (कार्यविभागः)

Preface

"Gītā" the shortened popular epithet of Bhagavadgītā, one of the Prasthānatrayas, is a nectarine flow of loftiest ideas about human life, from Lord Śrīkṛṣṇa himself. Then what attribute can suffice its efficacy? Man's limitation come to the fore when there is a need of appraisal of God's statements. Yet our saintly commentator Ācārya Rāmānuja who himself a divine - incarnate, has rendered a commentary to Gītā fondly called "Gītābhāṣya." On the same lines of Gītābhāṣya there had been a nice gloss composed by "Ennaccan pillai," in an effort to make the said text more comprehensive aptly titled "Gītābhāṣyārahasāyrtha Saṅgraha." The present edition of this text has been brought out with the help of a palm-leaf manuscript preserved in the Academy; consequently this publication will certainly give filip to the mounting commentaries on "Gītā."

I would like to express my deep felt gratitude to Dr. Bhashyam Swamy, Director for his dedicated efforts in bringing out this publication. I also extend my thankful regards to those involved directly or indirectly in this noble endeavour of introducing a qualitative work to the reader.

(C.N.Seetharam)
President

Foreword

Upaniṣads, Brahmasūtras and Gītā or more precisely called Bhagavadgīta that forms a tripod upon which the whole of Hindu theology has been well and truly set forth. The passage of time that not only has had produced many a great stalwarts along the line, it also made them to compose remarkable works by way of commentaries, glosses to otherwise source texts that are esoterically enshrined. This has been a consistant phenomena through out, consequently we have an enormous corpus of Shastraic literature that keeps growing eternally. This has made the concerned pupilage living in times of publication of the work of the nature under discussion, to have a better grasp of the subject-matter.

The Academy is glad to present its reader with one such work titled "Gītābhāṣyarahasyārtha saṅgraha" as the name itself suggests that this is a subsidiary gloss not directly to Gītā but to the commentary of Rāmānuja on Gītā, popularly known as "Gītābhāṣyam."

Though the name of the author of this work named to be "Ennacchan pillai" not much of him is disclosed in the script. At any rate, this work certainly would add more value to the list of Śrīvaiṣṇava commentaries to Gītā that are already available with us.

I convey my heartily congratulations to Vid. S.Narayana and Vid. H.S. Hanumantha Rao, Vidushi. M.V. Savithri, and all other scholars who have helped in shaping this book to nicety. I also convey my thankful regards to Sri S. Kumar, Registrar, for having provided congenial working staff to complete the project on time.

Bhashyam Swamy

(Dr. Bhashyam Swamy)
Director and Joint Secretary

Introduction

Bhagavad-Gītā has occupied the most pivotal place in the Vedānta Śāstra. The Sanskrit scholars whose contribution in the form of commentaries and opinions has enriched the place of Gītā in the World Literature. In a similar way, Śrī Rāmānujācārya, the propagator of Śrīvaiṣṇavism and Viśiṣṭādvaita philosophy has written his outstanding commentary on Gītā. The simplicity of its language and elegant style has contributed much for its worldwide reputation. His successors Surapuram Ennachchan has written a book titled Gītā Bhaṣyarahasyārtha Saṅgraha, which brings the basic tenets of Gītā to the reach of the common man.

Before writing this book, . Sri Ennachchan has sought apologies from the readers stating that there is nothing to write on Gītā bhāṣya, since it has already been produced by a great genius Śrī Rāmānujācārya. The brilliance of Gītābhāṣya has not been mentioned anywhere in Gītā Bhāṣyarahasyartha Saṅgraha and it is imperative on the part of the readers to go into the original text to know its erudition. The language and literary characteristics are made deliberately simple in order to make it more comprehensive.

The concept of Bhakti based in Gītā is highly emphasised in the Viṣiṣṭādvaitā philosophy. In the course of highlighting Bhakti as a means of salvation the writer has not objected or criticised other sects. Readers who can understand the commentary of Ennachchan on Gītābhāṣya, can easily understand the original text. This book would serve as a beautiful scholarly introduction to Gītābhāṣya and Viśiṣṭādvaitā.

This work which has nice gloss on Gītābhāṣya should facilitate its reader of happy reading. The Academy takes pleasure in publishing this meritorious

work from its Manuscript library collection. This indeed would add more glitter to the already shining list of Śrīvaiṣṇava commentary tradition.

It is deemed that this publication would benefit the scholars as well as research students who are inclined to make further research on the subject. Academy is also proud to possess ancient wisdom recorded on palm-leaf manuscripts that are duly preserved and digitized, for the benefit of posterior generation. Hence our priority should be to protect the treasure of rich knowledge documented on these ancient manuscripts by all means. The Academy welcomes those who are in possession of such ancient priceless treasure to come forward to make way for the preservation and digitization mission.

I am profusely thankful to the Director Dr. Bhashyam Swamy for entrusting the task of editing this work. I am also thankful to my colleague Vidwan S. Narayana, Research officer, S. Kumara Registrar and others for their co-operation and suggestions while editing this work.

H.S. Hanumantha Rao
Editor

प्रस्तावना

भारतीयानां दिव्यज्योतिः भगवता कृष्णद्वैपायनेन महर्षिणा विरचितं महाभारतं समग्रजीवनप्रकाशकम् । भगवतो नारायणस्यैव रूपान्तरम् । तदुक्तं -

कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।
को ह्यन्यो भुवि मैत्रेय महाभारतकृद्भवेत् ।। इति ।

भगवद्गीतामाहात्म्ये अस्य स्तुतिः एवं कृता वर्तते -

नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयप्रदीपः ।। इति ।

तेन विरचितं महाभारतं स्तुतमेवम् -

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ।।

न्यायप्रतिपादनतः सकलवेदश्रुत्यर्थः न्यायप्रस्थानत्वेन प्रसिद्धेन ब्रह्मसूत्रेण निरूपितेपि उपबृंहणतया -

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ।। इत्युक्तन्यायेन सः महाभारतेनैव साध्यते । तस्मिन्नेव महाभारते दुष्टशिक्षणाय शिष्टपरिपालनार्थं सम्पन्नाय कौरवपाण्डयोः युद्धे, अर्जुनाय विषादः समुपागतः । तदा श्रीभगवान् कृष्णः तत्वानि, विवेकबोधिकां नीतिं च अत्यद्भुतशैल्या ऐहिकं आध्यात्मिकं च सर्वमर्थं अर्जुनाय उपदिदेश । स एव महाभारतमध्ये विराजमानः कृष्णार्जुनसंवादरूपः अष्टादशाध्यायात्मकः सप्तशतसंख्यैः श्लोकैः कृतावतारः महाभारते भीष्मपर्वणि विराजामानो भागः । महाभारतसकाशादुद्भूतं गीतारत्नमपि महाभारतप्रतिपाद्यानेवार्थान् प्रकाशयति । गीतामहात्म्ये सुष्ठूक्तम् -

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ।। इति । तत्रैव गीताध्ययनस्य अनेकजन्मार्जितसर्वपापनिवारणक्षमत्वमपि स्पष्टीकृतम् ।

गीताध्ययनशीलस्य प्राणायामपरस्य च ।
नैव सन्ति हि पापानि नानाजन्मार्जितान्यपि ।। इति ।

प्रस्थानत्रयेषु अन्यतमा श्री भगवद्गीता । तच्च प्रस्थानत्रयम् उपनिषदः, भगवद्गीता, ब्रह्मसूत्राणि इति । भगवद्गीतायाः द्वैताद्वैतविशिष्टपरतया भाष्याणि पूर्वाचार्यैः विरचितानि सन्ति ।

तत्र श्रीभगवद्रामानुजाचार्याः ब्रह्मसूत्रणां श्रीभाष्यमिति अन्वर्थसंज्ञया प्रसिद्धं शारीरकमीमांसाभाष्यं, तथा भगवद्गीताभाष्यं, सर्वोपनिषत्तात्पर्यनिर्णायकं वेदार्थसंग्रहं च व्यरचयन् । अत एव च -

'यः श्रुतिस्मृतिसूत्राणां अन्तर्ज्वरमशीशमत्' इति । प्रस्थानत्रयनिर्वाहः स्पष्टीकृतः ।

एते च भाष्यकाराः भगवद्रामानुजाचार्याः तमिल्नाडु प्रान्तीये श्रीमति भूतपुरीनाम्न्यग्रहारे कृतावताराः । 'श्रीपेरुम्बुदूर्' इति द्राविडभाषानाम । किस्ताब्द १०१७ तः, ११३७ पर्यन्तः एषां जीवितकालः । इति गुरुपरम्परावैभवादवगम्यते ।

'चैत्रा (मेषा) र्द्रासंभवं विष्णोः दर्शनस्थापनोत्सुकम् ।
तुण्डीरमण्डले शेषमूर्तिं रामानुजं भजे' ।।

इति च जन्मादिविषयकः श्लोकः । आदिशेषावताररूपा एते हारीतगोत्रलब्धजन्मानः । तातपादा एतेषां केशवसोमयाजिनामानः । प्रख्यातं वंशनामापि आसूरीति । एतेषां मातृभावेन पुण्यवती कान्तिमतीनाम्नी । भूदेवीत्यपि एनां जनाः व्यवहरन्ति स्म । एषा शठमर्षणगोत्रसम्भवस्य श्रीमन्नाथमुनिवंशस्य श्रीशैलपूर्णाख्यस्य गुरोः सोदरी । तद्वंशीयाः 'ताताचार्य' संज्ञया लोके व्यवह्रियमाणाः विलसन्ति । अभिजनमातापितृवर्णनपरोऽयं श्लोकः -

'श्रीमन्महाभूतपुरे श्रीमत्केशवयज्वनः ।
कान्तिमत्यां प्रसूताय यतिराजाय मङ्गलम्' ।। इति ।

वडुकनम्बीति प्रसिद्धानां श्रीमताम् आन्ध्रपूर्णानाम्नामाचार्याणां श्लोकेन -

'कान्तिमतीसुकुमारकुमारं केशवसिंहकिशोरमुदारम् ।
रामानुजमहिराडवतारं मूकान्धानपि मोक्षयितारम्' ।।

इत्यनेन सर्वं स्फुटीकृतम् । एतेषामाचार्याः पेरियनम्बीति व्यवह्रियमाणाः महापूर्णार्याः । प्राचार्याश्च - परमयोगिनो नाथ (नाद) मुनि नाम्नो गुरोः पौत्राः भगवद्यामुनमुनयः । द्रमिडभाषायाम् 'आळवन्दार्' इति प्रसिद्धाः । स्तुताश्च मुक्तकश्लोकेन तच्छिष्यैः यामुनार्यैः एतैः नाथमुनयः -

'नमोऽचिन्त्याद्भुताक्लिष्टज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाधभगवद्भक्तिसिन्धवे' ।। इति ।

भगवद्रामानुजाचार्याश्च -

'यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमाम्यहम्' ।।

इति गीताभाष्यारम्भे स्वगुरू न् यामुनार्यान् नमस्कृतवन्तः । भगवद्रामानुजार्याणाम् आन्तरङ्गिकतत्त्वार्थोपदेष्टारः कांचीपूर्णानामानः 'तिरुक्कच्चि नम्बिकळ्' इति द्राविडभाषायां प्रसिद्धाः । आन्ध्रपूर्णानां श्लोकेनैव श्रीभगवद्रामानुजसिद्धान्तसारसंग्रहः कृतो दृश्यते -

'गुणगुणिनोर्भेदः किल नित्यः चिदचिद्द्वयपरभेदः सत्यः ।
तद्द्वयदेहो हरिरिति सत्यं पश्य विशिष्टाद्वैतं तत्त्वम्' ।। इति ।

एतैः अनुगृहीताः ग्रन्थाश्च १. श्रीभाष्यम् २. गीताभाष्यम् ३. वेदान्तदीपः ४. वेदान्तसारः ५. वेदार्थसंग्रहः ६. शरणागतिगद्यम् ७. वैकुण्ठगद्यम् ८. श्रीरङ्गगद्यम् ९. नित्यग्रन्थः इति आहत्य नवग्रन्थाः ।

गीताभाष्यं अतीव सुन्दरया सरलया शैल्या गीतार्थः यथा पण्डितपामराणामपि सुलभतया ज्ञातुं शक्यते तथा रचितः। गीताया अन्येषु सिद्धान्तेषु तैः तैः कृताः नैके भाष्याणि सन्ति । तदध्ययनादेव ज्ञायते रामानुजीयभाष्यगतं सौन्दर्यं शैली कथमस्ति इति ।

गीताभाष्योपरि श्रीमद्वेदान्तदेशिकैः गीताभाष्यतात्पर्यचन्द्रिका नाम्नी एका व्याख्या कृता ।

श्रीशैलबुक्कपट्टण येन्नाच्चान् दासैः विरचितः गीताभाष्यरहस्यार्थसङ्ग्रहः गीताभाष्यस्य रहस्यार्थान् ज्ञातुं सुलभः ग्रन्थः । एतस्य देशकालादिकं न ज्ञायते । तालपत्रे प्रत्यध्यायम् श्रीशैलबुक्कपट्टण येन्नाच्चान् दासविरचितं अध्यायः द्वितीयः श्रीगीताभाष्यरहस्यार्थसङ्ग्रहो वृत्तः इति लिखितमस्ति तथा अष्टादशाध्यायान्ते स्वेषां नाम नृमृगराजताताख्यदासः इति निगदितम् । यथा -

श्रीकृष्णांघ्रिसरोरुहं निमजमथनं ध्यात्वा तथैवार्जुनम् ।
पूर्वाचार्यपरम्परां नृमृगराजताताख्यदासो नमन् ।। इति ।

एतेन एतेषां नाम नृसिंहराजतातदासः इति येन्नाञ्चान् दासनाम्ना व्यवहरन्तिस्म (व्यवहारे) इति ज्ञायते । तथा -

आनन्दाब्दे वैशाखमासे धवले पक्षे चादिमे ।
गीताभाष्यरहस्यसङ्ग्रहमिमं तत्प्रीतयेऽलीलिखत् ।। इत्यपि लिखितमस्ति ।

आरम्भे - **इह खलु भगवान् सर्वेश्वरः नारायणः स्वयमेव अवाप्तसमस्तकामोऽपि अपारकारुण्यसौशील्यादिगुणपरवशः परमपुरुषार्थजनसार्थं कृतार्थयितुम् उर्व्यां वसुदेवगृहेऽवतीर्य साधुपरित्राणं दुष्कृद्विनाशनं च कुर्वन् पाण्डुतनययुद्धप्रोत्साहनव्याजेन निरतिशयपुरुषार्थलक्षणमोक्षसाधनतया वेदान्तविहितं स्वविषयज्ञानकर्मयोगसाध्यं भक्तियोगम् अवतारयामास गीतोपनिषदा । तामेतां भगवान् भाष्यकारो, ज्ञानसंशयविपर्ययनिवृत्तये श्रीमद्भाष्ये व्याचक्रे । तत्तात्पर्यं श्लोकारूढं कुर्वन् इदमपि श्रीमद्भागवतकैङ्कर्यमिति तथा प्रयते । क्षन्तव्यो ममापराधः ।** इति स्वविनयं प्रकचीचक्रुः ।

प्रकृतप्रकाशनमधिकृत्य -

अस्माकं संसदि विद्यमानस्य एतद्ग्रन्थस्य तालपत्रसहायेन सम्पादनं कृतम् । एतावत्पर्यन्तं अप्रकटितमेवासीत् । तालपत्रस्य संख्या ११६ तेलुगुलिप्यां वर्तते ।

संसदः निर्देशकाः डा. भाष्यं स्वामिनः तथा संसदः अध्यक्षवर्याः श्री टि.एन्. सीताराम् महाभागाः सूक्तप्रोत्साहनद्वारा अस्मान् उपकृतवन्तः । तेषां हार्दाः धन्यवादाः । विदुषी एम्.वि. सावित्री, हस्तप्रतिना प्रतिलिपिं कृतवती । अन्ये विद्वांसः हेच्.एस्. हनुमन्तराव्, श्री जि.एस्. श्रीनाथः, आर्. नारायण अय्यंङ्गार्, गणकयंत्रकार्यकर्त्तारः श्री जवरेगौडः, श्रीमति सौभाग्या, तथा मुद्रणकार्यकर्त्तारौ श्री के.एस्. बेट्टस्वामिगौडः, श्री जि.एन्. बेट्टेगौडः, अन्यश्च मुखपुटविन्यासकारः श्री लोकेश् मैसूरु, अन्येऽन्ये च आवश्यकान् सर्वान् सहकारान् प्रदाय कार्यमेतन्निर्वोढुं महान्तमानुकूल्यमापादितवन्तः इति तेभ्यः हार्दं कार्तज्ञ्यमर्पयामि ।

एस्. नारायणः
सम्पादकः

विषयसूचनी



संसदि संरक्षिते तालप्रती

श्रीः

येन्नाझान् (सुरपुरम्) विरचितः

गीताभाष्यरहस्यार्थसङ्ग्रहः

श्रीमद्यामुनमुनिवर-रामानुजयोगिवेदचूडार्यान् ।
कलये किल यैर्नीता हरिणा गीतातिभोग्यतां नीता ।।

[अवतारिका]

इह खलु भगवान् सर्वेश्वरो नारायणः स्वयमेव अवाप्तसमस्तकामोऽपि अपारकारुण्य-सौशील्यादिगुणपरवशः परमपुरुषार्थिजनसार्थं कृतार्थयितुम् उर्व्यां वसुदेवगृहेऽवतीर्य साधुपरित्राणं दुष्कृद्विनाशनं च कुर्वन् पाण्डुतनययुद्धप्रोत्साहनव्याजेन निरतिशय-पुरुषार्थलक्षणमोक्षसाधनतया वेदान्तविहितं स्वविषयज्ञानकर्मयोगसाध्यं भक्तियोगम् अवतारयामास गीतोपनिषदा । तामेतां भगवान् भाष्यकारो, ज्ञानसंशयविपर्ययनिवृत्तये श्रीमद्भाष्ये व्याचक्रे । तत्तात्पर्यं श्लोकारूढं कुर्वन् इदमपि श्रीमद्भागवतकैङ्कर्यमिति तथा प्रयते । क्षन्तव्यो ममापराधः । तत्र भगवत्प्रवर्तित गीतोपनिषत्प्रस्तावाय आदौ उपोद्घाततया अर्जुनस्य शोकमोहादिकं निरूपयितुं सञ्जय-धृतराष्ट्र-संवादमाह -

धृतराष्ट्र उवाच -

श्रीकृष्णसहायेन युधिष्ठिरस्य जयं, स्वपुत्रस्य पराजयम् अजानन् चक्षुषा हिताहितानभिज्ञेन मनसा चान्धो धृतराष्ट्र सञ्जयं पप्रच्छ इत्यर्थः ।

प्रथमाऽध्यायः

[अर्जुनविषादयोगः]

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ।। १ ।।

धर्मस्य क्षेत्रे - स्थानभूते धर्मनिष्पादक इत्यर्थः ।।

यद्वा - समराध्वरसमुचित इत्यर्थः । **कुरुक्षेत्रे** - पाण्डवानां धार्तराष्ट्राणां च कूटस्थनामोपलक्षितत्वेन बहुमानविषयक्षेत्रे, **युयुत्सवः समवेताः** - योद्धुमिच्छवो मिळिताः परस्परं प्रत्यनीकरूपत्वेन व्यूह्यवस्थिता इत्यर्थः । **मामकाः** - मदीयाः दुर्योधनाद्याः **पाण्डवाः** - युधिष्ठिरादयश्च **किमकुर्वत ?** - किं कृतवन्तः ? **'चैव'** इत्यव्ययद्वयं समस्तभूमण्डलवर्तिनां राज्ञां तत्र समाहारेऽपि वर्गद्वयमेव तदाभूत् इति ज्ञापनाय । अकुर्वत इत्यात्मनेपदेन च स्वस्वार्थनियतता दर्शिता क्रियाफले कर्तृगामिनि तद्विधानात् । सञ्जयेति सम्बोधनेन यथार्थदर्शित्व-यथादृष्टार्थवादित्वाभ्यां वक्तुराप्ततमत्वं दर्शितम् । स हि 'शुद्धभावं गत' इति स्वयमेवाह - अत्र श्लोके **मामकाः** इति प्रथमत एवोक्त्या धृतराष्ट्रस्य सुयोधनविजयबभुत्सा दर्शिता । धर्मक्षेत्रे मिलिताः किं धर्मार्द्रचित्ता युद्धान्निवृत्ताः ? किं वा युद्धं कृतवन्तः ? तत्रापि केषां जयोऽभूदिति ? इति प्रश्नार्थः ।

सञ्जय उवाच -

तत्र **'यत्र योगीश्वरः कृष्णः'** इति साक्षादुत्तरं वक्ष्ये तत्प्रत्यायनार्थं निखिलम् अवतारवृत्तान्तमपि सञ्जय उवाच इत्यर्थः ।

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ।। २ ।।

राजा दुर्योधनः पाण्डवानाम् अनीकं - सैन्यम् । **व्यूढम्** - श्येनमकरादिव्यूहरचनया स्थितं **दृष्ट्वा** अनेन सुयोधनस्य धैर्यभ्रंशहेतुरुक्तः । **तु** शब्दो धैर्यभ्रंशरूपावस्थामपि सूचयति । तदा दर्शनावसर एव । **आचार्यम्** - द्रोणाचार्यं **उपसङ्गम्य** - समीपमभिगम्यत इत्यर्थः । **वचनं** वक्ष्यमाणम् **अब्रवीत्** । किं तदित्यत्राह - पश्येत्यादिभिर्नवभिः श्लोकैः -

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ।। ३ ।।

हे आचार्य! तव शिष्येण । अत एव **धीमता** तत्र तत्र स्थाने तांस्तान् यथोचितं कुशलेन **द्रुपदपुत्रेण** - धृष्टद्युम्नेन **व्यूढां** - श्येनादिव्यूहरचनया स्थापितां **महतीं** पाण्डुपुत्राणां **चमूम्** - सैन्यं **पश्य** ।

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ।। ४ ।।

दृष्टकेतुश्चेकितानः काशीराजश्च वीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ।। ५ ।।

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ।। ६ ।।

अत्र - अस्यां चम्वां **महेष्वासाः** - इषवः बाणः अस्यन्ते क्षिप्यन्ते यैस्ते इष्वासा धनूंषि महान्त **इष्वासाः** येषान्ते तथोक्ताः । **युधि** - युद्धे **भीमार्जुनसमाः** - भीमार्जुनौ प्रसिद्धौ योद्धारौ तत्तुल्याः । अत एव शूरास्सन्तीति शेषः । ते के ? इत्याशङ्कायां तानेव नामतो निर्दिशति - **युयुधान** इत्यादिना । **युयुधानः** - सात्यकिः **महारथ** इति द्रुपदविशेषणं **महान्रथो** यस्येति तदर्थः चकार । उक्तेषु तदन्वयाय । एवं **वीर्यवान्** इति काशीराजविशेषणस्यापि उक्तेष्वन्वयाय चकारः । एवमुत्तरत्रापि यथायोगं ज्ञेयम् । **सौभद्रः** - अभिमन्युः **द्रौपदेयाः** - उपपाण्डवाः अन्ये प्रसिद्धाः । **सर्व एव महारथाः** । एवकारो भिन्नक्रमः सर्वे महारथा एवेत्यर्थः ।

'एकादशसहस्राणि योधयेद्यस्तु धन्विनाम् ।
शस्त्रशास्त्रप्रवीणश्च स महारथ ईरितः' ।।

इत्युक्तलक्षण एवेत्यर्थः । परसैन्यं दृष्ट्वा भीतोऽसि चेत् सन्धिं कुरु इत्याशङ्क्याह -

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते ।। ७ ।।

तत्रत्य योधापेक्षया वैलक्षण्यद्योतनाय **तु** शब्दः **अस्माकम्** - धार्तराष्ट्राणां **ये विशिष्टाः** - समर्थाः **मम सैन्यस्य नायकाः** - युद्धोद्युक्तस्य अस्मद्बलस्य नेतारः **तान्** हे **द्विजोत्तम! संज्ञार्थं** - सम्यग्ज्ञानार्थं संज्ञया परिसंख्यार्थं वा । **ते** तुभ्यं **ब्रवीमि** । **निबोध** - जानीहि । तानेवाह-द्वाभ्यां **'भवान्'** इत्यारभ्य -

भवान् भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ।। ८ ।।

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणास्सर्वे युद्धविशारदाः ।। ९ ।।

समितिञ्जयः - इति कृपस्य विशेषणम् । समितिर्युद्धं तत्र जयशील इत्यर्थः । **सौमदत्तिः** - सौमदत्तपुत्रो भूरिश्रवाः, अन्ये च शल्यकृतवर्मादयः ते कीदृशाश्शूराः ? बहवश्च किञ्च मदर्थे त्यक्तं जीवितं यैस्ते तथोक्ताः । किञ्च नानाविधानि शस्त्राणि प्रहरणानि युद्धसाधनानि येषान्ते तथोक्ताः । किञ्च **युद्धविशारदाः** - युद्धकुशलाः सर्व इत्यनेन न्यूनाधिकभावो न इति व्यञ्जितम् । ततः किमित्यत्राह -

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ।। १० ।।

तत् - तस्मात्, यस्मादुक्तरूपेणावस्थितम् बलद्वयम् । तस्मादित्यर्थः । **अस्माकं** बलमपर्याप्तम् । पाण्डवानां विजय इति शेषः । तद्विजयाय न अलम् इत्यर्थः । समर्थं न भवति इति यावत् । तत्र हेतुमाह-**भीष्माभिरक्षितम्** इति ।

'शक्तोऽहं धनुष्यैते नः हन्तुं सर्वपाण्डवान् ।
यद्येषां न भवेद्गोप्ता विष्णुः कारणपुरुषः' ।।

इत्येवं वादितयोदासीनेन भीष्मेनाभिरक्षितं यत इत्यर्थः । इदं परिदृश्यमानम् एतेषां पाण्डवानां बलं तु पर्याप्तम् । अत्रापि अस्मद्विजय इति शेषः समर्थमित्यर्थः । अत्रापि हेतुः भीमाभिरक्षितम् इति । धार्तराष्ट्रवधेक्षितेन अत्युच्छ्रितसाहसेन भीमेन यतोऽभिरक्षितमित्यर्थः ।

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ।। ११ ।।

सर्वेष्वयनेषु - व्यूहप्रवेशमार्गेषु **यथाभागं** - स्वस्वभागमनतिक्रम्य स्थिता जागरूकतया स्थिताः । **भवन्तः सर्व एव।** परस्परं सर्वे मिळिताः सन्त एव । भीष्ममेवाभिरक्षन्तु यथा युद्ध्यमानः पृष्ठतः प्रवृत्तैः कैश्चित् न हन्येत । तथा भीष्ममेव भवन्तो रक्षन्तु बलेनैव वयं जीवाम इति द्योतनाय हि शब्दः।

तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ।। १२ ।।

पितामहः कुरुवृद्धो भीष्मः, **तस्य** - दुर्योधनस्य **हर्षम् सञ्जनयन्** - सञ्जनयितुं लक्षणहेत्वोः इति शतृप्रत्ययः । **उच्चैः सिंहनादं विनद्य** - कृत्वा ओदनपाकं पचतिवदयं प्रयोगः । **प्रतापवान्** - हेतुगर्भविशेषणमेतत् । प्रशस्तप्रतापवत्वात् इत्यर्थः । **शङ्खं दध्मौ** - शंखाध्मानं कृतवान् । सेनापतेर्युद्धोत्सवं दृष्ट्वा सर्वेषां युद्धोत्सवो जात इत्याह ।

ततः शङ्खश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ।। १३ ।।

ततः - भीष्मोद्योगानन्तरं, **पणवानकगोमुखाः** - वाद्यविशेषाः **सहसैव** - तत्क्षणमेव, **आभ्यहन्यन्त** - नादं संघटनाय अभिहताः । योधैः इति शेषः । **स शब्दः** - शङ्खाद्यखिलवाद्यजन्यश्शब्दः **तुमुलः शब्दितोऽभवत्** ।।

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ।। १४ ।।

श्वेतैः - धवलैः, **हयैर्युक्ते महति** - विजयाभिशंसिनि **स्यन्दने** - रथे स्थितौ, **माधवः** - श्रीकृष्णः **पाण्डवश्च** - अर्जुनश्च, **दिव्यौ** - अपूर्वौ **शङ्खौ, प्रदध्मतुः** - नादितवन्तौ । अत्र सञ्जयेन श्रीकृष्ण इत्यनुक्त्वा माधव इत्युक्त्या तस्य सर्वेश्वरत्वं **श्वेतैर्हयैयुक्त** इति रथस्य विशेषितत्वेन श्वेतवाहन संज्ञकार्जुनसम्बन्धित्वप्रतीतेः । तस्मिन् तयोरवस्थिते रथिसारथिभावेनैव तत्रापि सर्वोत्कृष्टस्य भगवतो निकृष्टान्मानुषमात्रान्निकृष्टतावबोधकसारथित्वव्यञ्जनेन आश्रितवात्सल्यं व्यञ्जितम् । अथ तौ दिव्यौ शङ्खौ नामतो निर्दिशन् अन्येपि स्वांत्स्वान् शङ्खानापूरयामासुः इति सनिर्देशमाह -

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ।। १५ ।।

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ।। १६ ।।

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ।। १७ ।।

द्रुपदो द्रौपदेयश्च सर्वतः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान् दध्मुः पृथक् पृथक् ।। १८ ।।

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो ह्यनुनादयन् ।। १९ ।।

हृषीकेशः - श्रीकृष्णः, हृष्यन्ति हृषयन्तीति हृषीकाणि-इन्द्रियाणि तेषां ईश इति व्युत्पन्नेन हृषीकेशशब्देन भगवतो वक्ष्यमाण युद्धप्रोत्साहजनकत्वं सूचितम् । महाशङ्खमिति तदाकारानुगुण्यव्यञ्जनाय । भीमं भयं कर्म यस्य स तथोक्तः वृकनामाग्निः उदरे यस्य स

तथोक्तः भीमसेन इत्यर्थः । **कुन्तीपुत्रः राजेति** च युधिष्ठिरस्य विशेषणद्वयं भ्रातृसौहार्देन तदनुरञ्जनायैव शङ्खाध्मानं तेन कृतमिति द्योतनाय । **नकुल सहदेवश्च** इत्युक्त्या **सुघोषमणिपुष्पकौ** इति द्विवचननिर्देशस्तयोः यमळतया सहैव प्रवृत्तिद्योतनाय **शङ्खान् दध्मुः पृथक् पृथक्** इत्युक्त्या तेषां प्रत्येकं प्रकर्षो द्योतितः ।

यद्वा एकैकशङ्खाध्मानमेव धार्तराष्ट्रहृदयभेदकमिति बोधनाय तथोक्तिः । **तुमुलस्सघोषो नभश्च पृथिवी च व्यनुनादयन्** प्रतिध्वनिना पूरयन् धार्तराष्ट्राणां तव पुत्राणां हृदयानि व्यदारयत् । यद्यपि घोषस्य शस्त्रवत् हृदय विदारकत्वं नास्ति । तथापि स्वबलविजयत्व-मध्यवस्यतां तन्नाशबुद्धिरेव हृदयभेद इति तात्पर्यम् । अथ अर्जुनेत्यादिना हरिं विज्ञापयामास इत्याह ।

अथ व्यवस्थितान दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ।। २० ।।

हृषीकेशं तदा वाक्यमिदमाह महीपते ।
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ।। २१ ।।

यावदेतान् निरीक्षेऽहं योद्धुकामान् अवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ।। २२ ।।

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ।। २३ ।।

अथ परेषां स्वेषां युद्धोद्योगानन्तरं **व्यवस्थितान्** विशेषेणावस्थितान् योद्धुकामानवस्थितान् इत्यर्थः । **धार्तराष्ट्रान्** भवत्पुत्रान् **दृष्ट्वा कपिध्वजोऽर्जुनः** सौगन्धिकयात्रायां हनूमद्दत्त वरध्वजः । तेन सन्दर्शनमात्रेण रक्षसामिव परेषामप्ययं भयङ्कर इति बोधनाय कपिध्वज इति निर्देशः । **शस्त्रसम्पाते प्रवृत्ते** युद्धार्थं प्रवर्तयितव्ये धनुरायम्य सज्जंकृत्वा वीर्यवान् वीर्यवानपि तदा युयुत्सुपरदर्शनवेलायामेव हृषीकेशं निरतिशयैश्वर्यरूपविशिष्टं भगवन्तम् ।

'अविकारितया हृष्टो हृषीको वीर्यरूपया ।
ईशः स्वातन्त्र्ययोगेन नित्यं सृष्ट्यादिकर्मणि ।
ऐश्वर्यरूपवत्वं हि हृषीकेशत्वमुच्यते' ।

इति अहिर्बुध्न्यसंहितोक्तेः इह वक्ष्यमाणं वाक्यम् आह - **महीपते** इति धृतराष्ट्रस्य सम्बोधनम् । हे **अच्युत!** देशकालगुणेभ्यश्च्युतिरहितः ।

यद्वा आश्रितवात्सल्यविवश । आश्रितान् न च्यावयति अतोऽच्युत इति निरुक्तिः । **उभयोस्सेनयोः मध्ये रथं स्थापय** किमर्थं स्थापनमित्यत्राह - **यावदिति योद्धुकामानवस्थितान्** एतान् धार्तराष्ट्रान् यावत्साकल्येन निरीक्षे यथावत् पश्यामि ।

यद्वा यावच्छब्दो न साकल्यवाचिकं किन्तु यावत्पुरानिपातयोः लडिति निरीक्षणस्य भविष्यत्वद्योतकः । **अस्मिन् रणसमुद्यमे कैस्सह मया योद्धव्यम् ?** सहायभूतैः कैस्सह स्थित्वा मया योद्धव्यं तान् निरीक्षे इत्यन्वयः । एतेन स्वसहायविषयत्वात् अस्य श्लोकस्य योत्स्यमानानपेक्षेहमिति अनन्तरश्लोकेन न पौनरुक्त्यशंकाकार्या दुर्बुद्धेः धार्तराष्ट्रस्य तव पुत्रस्य प्रियचिकीर्षवः प्रियं कर्तुमुद्युक्ताः । अत्र परसैन्ये ये समागताः तान्योत्स्यमानान् अपेक्षे । **सञ्जय उवाच -**

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ।। २४ ।।

भीष्मद्रोणप्रमुखतस्सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ।। २५ ।।

हृषीकेशः जगदुपयुक्तक्रीडावान् कृष्णः -

'क्रीडया सृजति व्यक्तमीशस्सन् सृष्टिरूपया ।
हृषीकेशत्वम् ईशस्य देवत्वं चास्य तत्स्फुटम्' ।।

इत्युक्तेः । गुडाकेशेन आलस्यम् असहमानेन अर्जुनेन 'निद्रालस्ये गुडाका स्यात्' इत्युक्तेः । **एवमुक्तो** रथं स्थापयेति नियोजितः **सेनयोरुभयोर्मध्ये रथं स्थापयित्वा भीष्मद्रोणप्रमुखतः** भीष्मद्रोणप्रमुखानां तत्प्रभृतिनाम् इत्यर्थः । प्रमुखशब्दः आदिशब्द समानार्थः । 'आद्यादित्वात्तसिः' षष्ठ्यर्थक इति भावः । सर्वेषां **महीक्षितां** राज्ञां अनादरे षष्ठी । चकार एवकारार्थः । तथा च राज्ञां पश्यतामेव सतामित्यर्थः । **उवाच** - प्राह-किमिति **समवेतान्** विजयाभिलाषेण युद्धार्थं मिळितान् **एतान् कुरून् पश्य इति** ।

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ।। २६ ।।

श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ।। २७ ।।
कृपया परयाऽऽविष्टो विषीदन्निदमब्रवीत् ।

तत्र समरोचितप्रदेशे सेनयोरुभयोरपि । एकैकस्यामेव सेनायाम् एते प्रायशस्सन्तीति सूचनायापि शब्दः; **पार्थः** - पित्रादीन् अपश्यदित्यर्थः । तान् पूर्वनिर्दिष्टान् **सर्वान् बन्धून्** । न हि अत्र अनागतः कश्चिद्बन्धुः अवशिष्यत इति भावः । **अवस्थितान्** प्राणान् त्यक्तुमेवागत्यस्थितान् शास्त्रलोकयात्रायुक्तमवेक्ष्य । परे या वध्येष्वपि रक्षणीयत्वबुद्धि - संपादकत्वेन उत्कृष्टया **कृपया आविष्टः** व्याप्तः **विषीदन्** बन्धुविनाशोऽवश्यं भविष्यति इति अध्यवस्य शोचन् इदं वक्ष्यमाणम् अब्रवीत् ।

अर्जुन उवाच -

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ।। २८ ।।

सीदन्ति मम गात्राणि मुखञ्च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ।। २९ ।।

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ।

समुपस्थितं - युद्धोद्युक्ततया समीपस्थितं **स्वजनम् दृष्ट्वा मम गात्राणि सीदन्ति** विशीर्यन्ते **मुखं च** - मुखमपि परिशुष्यति । यथाकिञ्चिदपि वक्तुं न क्षमम् ।

तथा शुष्कं भवति । **मे शरीरे** शीर्यमाणेऽपि **वेपथुः** - कम्पः **रोमहर्षः** रोमोद्गोधः उभयोरपि दुस्सहत्वबोधनाय उभयत्र च शब्दः । **गाण्डीवं** धनुः **स्रंसते हस्तात्** अधः पतति । **त्वक्** - चर्म **परिदह्यते** - परितो दह्यते । एतादृश्याम् अवस्थायाम् ।

'कृषिर्भूवाचकः शब्दो ण्यश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' ।।

इत्युक्त महिमशाली भगवानेव रक्षक इति द्योतनाय कृष्णेति सम्बोधनम् ।

न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ।। ३० ।।

निमित्तानि च पश्यामि विपरीतानि केशव ।

चशब्दः एवकारार्थकः । **न च शक्नोम्यवस्थातुम्** - अवस्थातुमेव न शक्नोमि इत्यर्थः । तत्र हेतुः भ्रमतीव इति । तत्रापि हेतुर्निमित्तान् इति **विपरीतानि** अनर्थप्रदानि **निमित्तानि** - शकुनानि **पश्यामि** - अस्याम् अवस्थायां ब्रह्मरुद्रयोः प्रेरकः त्वमेव निर्वाहक इति बोधनाय **केशव इत्युक्तिः** ।

न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ।। ३१ ।।

न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च ।

आहवे युद्धे स्वजनं हत्वा **श्रेयो न च अनुपश्यामि** विजयराज्यलाभयोः सम्भवात् । श्रेयो दर्शनमस्ति इत्यत्राह - **न कांक्षे** इति । **विजयं न कांक्षे राज्यं सुखानि च** तदनुभवजन्य **सुखानि च न कांक्षे** कुत इत्यत्राह -

किं नो वा राज्येन गोविन्द किं भोगैर्जीवितेन वा ।। ३२ ।।

येषामर्थे कांक्षतं नो राज्यं भोगाः सुखानि च ।

न इत्युक्त्या एतादृशं सौख्यं न ममैव अनभिमतं मदीयानामपि इति सूचितम् । राज्ये न भोगैः तदनुभवैः **जीवितेन -** राज्यलाभलब्धधनेन तज्जन्यसुखेन वा इत्यर्थः । **किं -** न किमपि प्रयोजनम् इत्यर्थः । कुत इत्यत्राह - **येषामर्थे** इति । सर्वमपि राज्यादिकं येषामर्थे यदर्थम् ।

त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ।। ३३ ।।

त एव आचार्यादयः प्राणधनादिकमपि अनवेक्ष्य **युद्धेऽवस्थिताः ।** यद्यपि गां विन्दति लम्भयति इति व्युत्पत्त्या एतादृशराज्यसुखलम्भक एव त्वं, तथापि सर्वमेतत् मदनपेक्षितम् इति बोधनाय **गोविन्देति** सम्बोधनम् । इत्यत्राह -

आचार्याः पितरः पुत्रास्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः स्यालाः सम्बन्धिनस्तथा ।। ३४ ।।

अत्रापि पितृव्यादिनामपि ग्रहणार्थं **पितर** इति बहुवचनम् । एवं पितामह इत्यत्रापि तत्सोदराणां ग्रहणाय बहुवचनम् ।

एतान् न हन्तुम् इच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ।। ३५ ।।

घ्नतोऽपि हननोद्युक्तानपि **एतान्** आचार्यादीन् **न हन्तुम् इच्छामि । त्रैलोक्यराज्यस्यापि हेतोः न** हन्तुम् इच्छामि, **किं** पुनः **मही**मात्रप्राप्तये इत्यर्थः । यद्यपि त्वं मधुसूदनत्वात् शत्रुसंहारेऽभिनिविष्टः तथापि नाहमेवं प्रवृत्तः आचार्यादि हननस्य अयुक्तत्वात् । यद्यपि नाततायि वधे दोषो भवति ।

'आततायिनमायांतं हन्यादेवाविचारयन् ।
नाततायिवधे दोषो हन्तुर्भवति कश्चन' ।।

इत्युक्तेः आततायित्वं च घ्नतोऽपि इति वर्तमानार्थकप्रत्यययुक्तेन शब्देन सूचितम् । तथापि **आततायि** वधाभ्यनुज्ञानम् आचार्यादिव्यतिरिक्तविषयम् इत्यस्मत्सिद्धान्त इति भावः ।

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ।। ३६ ।।

धार्तराष्ट्रान्निहत्य नः मम मदीयानां का वा प्रीतिस्स्यात् । किं सुखं स्यात्? ऐहिकं तु यदर्थमेतत् सर्वम् तद्धनेनेनास्त्येव । आमुष्मिकं तु आचार्यादि वधाद्विपरीतफलमिति भावः ।

ननु सामान्यत आततायिवधे दोषाभावोक्तेः । किं व्यवस्था कल्पकम् । प्रत्युतापि वेदान्तपारगम् इत्युक्तम् इत्यत आह - **पापमेवेति एतान् आततायिनोऽपि हत्वा** अस्मान् पापमेव आश्रयेत् तस्मात्पापसम्पादकत्वात् सबान्धवान् धार्तराष्ट्रान् हन्तुं वयं नार्हाः ।

तस्मान्नार्हाः कथं हन्तुं धार्तराष्ट्रान्सबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ।। ३७ ।।

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ।। ३८ ।।

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ।। ३९ ।।

स्वजनं हत्वा कथं सुखी न स्याम । सुखमपि असुकृतसम्पाद्यत्वात् दुष्कृतस्यैव इतः प्राप्तेः इति । अयं भावः । यद्यपि सत्यं त्वदुक्तम् तथापि आततायिवधबोधकशास्त्रम् अर्थशास्त्रम् । तच्च अहिंसा सत्यमस्तेयम् इत्यादि धर्मशास्त्राद्दुर्बलं तस्मात्तद्वधो नास्माभिः कार्य इति । *'मा विद्या तु परा प्रोक्ता तस्या ईशो यतो भवान् । तस्मान्माधव नामासि'* इति निरुक्तनामवत्तया सर्वविद्याप्रवर्तकः त्वमेव अत्र बलाबलं विचारयेति तात्पर्येण माधवेति सम्बोधनम् ।

ननु यथैषां बन्धुवधदोषसमानेऽपि तत्र प्रवृत्तिः तथा तवापि स्यात् इत्यत आह -

यद्यपि इति लोभेन राज्य लोभेन अपहतं नष्टं चेतः मनः तत्करणं विवेकादिकं येषान्ते तथोक्ताः । एते दुर्योधनादयः **'कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्'** । यद्यपि न पश्यन्ति तथापि तं दोषं प्रपश्यद्भिः सम्यग्बलाबलविचारेण शास्त्रतः पश्यद्भिः

अस्मान् पापान् निवर्तितुं कथं न ज्ञेयम् । हे **जनार्दन!** त्वं तु जनान् जीवान् अर्दयति - गमयति । सदसती इति ते व्याख्या । अतः त्वमेव विचारय इत्यर्थः । तस्य दोषत्वमेव प्रपञ्चयति ।

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नम् धर्मोऽभिभवत्युत ।। ४० ।।

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ।। ४१ ।।

प्रणश्यन्ति - कुलानुन्यूत धर्मतया **सनातनाः** अविभिन्नाऽपि **प्रणश्यन्ति** - अनुष्ठात्रभावात् अत्यन्तं लीना भवन्ति इत्यर्थः ।

ननु भवतामपि तत्कुलीनत्वात् तेषामभावेऽपि भवदश्रयेण तेषां धर्माणां स्थितिस्स्यात् इत्यत आह - **धर्म** इति । अस्माकमपि बन्धुवधादौ प्रवृत्ततया धर्मावलम्बनत्वाभावात् धर्मे नष्टं इत्यर्थः । भविष्यतामप्यवलम्बनतानेत्यभिप्रायेण **आह** - धर्मावलम्बनतानेत्यभिप्रायेण कुलं कृत्स्नमिति । अत अपि च अधर्मः कृत्स्नमपि फलम्? अभिभवति आवृणोति इत्यर्थः । अनेन कायिको दोषः उक्तः । अस्तु को दोषः? इत्यत्राह - **अधर्मेति ।** अधर्माभिभवादधर्मकृतम् अभिभवं प्राप्य ल्यब्लोपे पञ्चमी । प्रदुष्यन्ति अतितरां दुष्टा भवन्ति । अनेन मानसिको दोष उक्तः - **'भुवो निर्वृतिप्रदो हि भवान्'** अत्र तु निर्वृतिः नास्तीति कृष्णेति सम्बोधनेन सूचितम् । **वर्णसङ्करः** - वर्णशब्दो जातिपरः । सङ्करशब्दो भावप्रधानः जातिसाङ्कर्यं भवति इत्यर्थः । ततो हि किमित्यत आह -

सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ।। ४२ ।।

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ।। ४३ ।।

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ।। ४४ ।।

स च **सङ्करः कुलघ्नानाम्** अस्माकं कुलस्य च नरकायैव स्यात् । न एतावन्मात्रं पूर्वेषामप्यपकारिणो भवाम इत्याह - **पतन्ति** इति । **हि** हेतौ हि यस्मात् **एषां कुलघ्नानां पितरः लुप्तपिण्डोदक क्रियाः पतन्ति ।** कैः वर्णसङ्करकारकैः, कुलघ्नानां दोषैः । किञ्च जाति धर्माः क्षत्रियत्वादि जातिप्रयुक्ता **धर्माः शाश्वताः** -

वंशपारंपर्यागततयानवच्छिन्नाः कुलधर्माश्च उत्साद्यन्ते । उत्सन्नः कुलधर्मो येषां तेषां नरके रौरवादि भेदभिदुरे नरके नियतं वासो भवतीति अनुशुश्रुम । शास्त्रश्रवणेन निश्चितुम इत्यर्थः । उक्तम् अर्थम् निगमयति ।

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ।। ४५ ।।

महत् दोष परंपराजनकं पापं कर्तुं वयं व्यवसिताः संप्रवृताः । यतः राज्य सुखे **लोभेन स्वजनं हंतुम् उद्यताः ।** यद्येवं त्वं शस्त्रसन्यासपूर्वक बन्धुस्नेहे न तिष्ठसि तर्हि त्वान्ते हन्युः इत्यत आह -

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ।। ४६ ।।

प्रतीकारो विरुद्धा चरणम् । न विद्यते प्रतीकायो यस्य तम् । स्वकृतक्रियायाः प्रतिक्रियाम् अकुर्वन्तम् । अत एवाशस्त्रम् । शस्त्रपाणयः शस्त्रं पाणौ येषां ते तथोक्ताः - **धार्तराष्ट्रा रणे** मां यदि **हन्युः तत् तैः** हननं **मे क्षेमकरं भवेत् -** अतीव कुशलं भवेदित्यर्थः ।

एवमुक्त्वार्जुनस्संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ।। ४७ ।।

अर्जुन एवमुक्त्वा **संख्ये** - युद्धे **सशरम् - चापम्, विसृज्य शोकसंविग्नमानसः ।** शोकेन बन्दुनाशोऽवश्यं भवति इत्यध्यवसाय जनित विषादेन **संविग्नमानसः** अत्यर्थ चलित युद्धाध्यवसायः । 'ओ वीचीभयचलनयोः' इति धातुः रथोपस्थे रथोत्सङ्गे **उपाविशत् ।** प्रायोपवेशादिवोपविष्ट इत्यर्थः ।।

।। श्रीशैल बुक्कपट्टण येन्नाञ्चान् दासन् विलिखिताध्यायः
प्रथमश्रीमद्गीताभाष्यरहस्यार्थसङ्ग्रहो वृत्तः ।।
।। श्रीकृष्णाय नमः ।।

द्वितीयाध्यायः

[अथार्जुनस्य शोकापनोदनविषयः - सांख्ययोगः]

सञ्जय उवाच इति -

यद्यपि सञ्जयवाक्यं न विभिन्नम् । तथाऽपि अध्यायान्तरारम्भरूपतया अन्योक्तिशंकाव्यवच्छेदाय तदुक्तिः ।

तं तथा कृपयाऽऽविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ।। १ ।।

तथा अस्थाने **कृपया** आन्तरविषादेन **आविष्टं** व्याप्तम् । अर्थ वाश्रुभिः पूर्णे अत एवाविति कलुषे ईक्षणीयस्य तं बाह्यशोकेनाप्याविष्टम् इत्यर्थः । **विषीदन्तं** पूर्वोध्यायोक्तरीत्या विषादं प्राप्योपदिष्टं तम् अर्जुनं **मधुसूदनः** श्रीकृष्णः **इदं** वक्ष्यमाणं **वाक्यं उवाच - मधुसूदन** इत्यनेन शोक-मोह-मूल-रजस्तमो-निबर्हणत्वं भगवतो व्यज्यते ।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ।। २ ।।

इदं कश्मलम् ।

'मूर्च्छाकल्पश्शोकः प्रख्यातवंशवीर्यश्रुतं त्वाम् ।
प्रख्यात वंशवीर्य श्रुतत्वम् अर्जुनपार्थपरं तप' ।।

इति सम्बोधनैर्व्यञ्जितम् । **विषमे -** अस्थाने **समुपस्थितम्** दृढमनुगतम् । कुतः तस्माद्धेतोः वक्ष्यमाणरीत्या तत्र हेतुः नास्तीति भावः । कीदृशं कश्मलं **अनार्यजुष्टं** अतत्वेभ्य आराद्दूराध्याता बुद्धिः येषान्ते आर्य विद्वांसः । तद्भिन्ना अनार्याः मूर्खास्तैर्जुष्टं सेवितम् **अस्वर्ग्यम्** स्वर्गमर्हतीति **स्वर्ग्यं -** स्वर्ग साधनमित्यर्थः । स्वर्गशब्दः परलोकमात्रोपलक्षकः नञ् विरोधे । ततश्च तत्साधनविरोधे तद्विरोधसिद्धेः परलोकविरोधीत्यर्थः ।

अत एव अकीर्तिकरं ऐहिकामुष्मिकोभयविरोधित्वम् उक्तम् -

क्लैब्यं मास्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ।। ३ ।।

हे **पार्थ! क्लैब्यम्** - कातर्यम्, **मास्म गमः** - तत् क्लैब्यं त्वयि प्रख्यातवंशवीर्यो **नोपपद्यते** - न सम्भाव्यत इत्यर्थः । **क्षुद्रम्** - अतिक्षुद्रं निरुपाधिकनिर्देशात् । **हृदयदौर्बल्यं** - हृदयदौर्बल्यादिकम् । 'आयुर्घृतम्' इतिवत् कार्यकारणयोः अभेद उपचरितः । त्यक्त्वा क्लैब्यं **त्यक्त्वा उत्तिष्ठ,** युद्धाय उत्तिष्ठ, **परन्तप** - शत्रुतापक । अर्जुन उवाच इति युद्धारम्भस्य भगवदुक्तं परम्परया – परमनिश्श्रेयसहेतुत्वरूपं हितम् अजानन् अर्जुनः पुनः उवाच इत्यर्थः ।।

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ।। ४ ।।

हे **मधुसूदन - अहं** - युक्तायुक्तपर्यालोचन कुशलोऽहं पूजार्हौ - **भीष्मं द्रोणं च इषुभिः** बाणैः **कथं** प्रतियोत्स्यामि । पुष्पादिभिः पूजार्हाणाम् पूजानिवृत्तिरेव साहसम् हननपर्यन्तव्यापारोद्योगस्तु अतिसाहसमिति तुमुन् प्रयोगस्य भावः । अत्र मधुसूदन-अरिसूदनशब्दाभ्यां न हि त्वमेवं सांदीपनादि विषये उद्योगवान्, अपि तु निहीनराक्षसादि विषय एवेति द्योतितम् । तदेव प्रपञ्चयति -

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्षमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान्रुधिर प्रदिग्धान् ।। ५ ।।

महानुभावा हि स्वत एव बहुमन्तव्याः पितामहत्व धनुर्वेदाचार्यत्वादिभिस्तु अतीव बहुमन्तव्या इति बोधनाय **गुरून् महानुभावान्** इत्युभयोपादानं गुरुभक्त्या तद्विरोधिभिः सह योद्धव्यं न तु गुरुभिः इति बोधनाय गुरूनिति प्रथमत उक्तिः **अहत्वा** असंहृत्य अनेन पूर्वोक्तं प्रतियोधनं हननपर्यन्तमिति व्यञ्जितम् । **भोक्तुं** अयं 'तुमुन् तुमुण्वलात्' इति विहितो न क्रियार्थोपपादितः । किन्तु भावमात्रार्थः, **भैक्षं** - भिक्षाचरणं **भोक्तुं** भोगः, तद्रूपो भोग इत्यर्थः । तथा च अयमर्थः । इहास्मिन् लोके गुरुवधलब्धराज्यभोगेभ्यः परमधर्मरूपभिक्षाचरणमेव श्रेयः । प्रशस्तम् । महानुभाव गुरुवधसाध्यपारलौकिक पापफलस्यातिमहत्वादिति । अर्थं अर्थ्यन्ते इत्यर्थाभोगास्तेषु कामोतिमात्रसंयोगो येषान्ते तथोक्ताः । अवर्जनीयो जन्माद्युत्तरपदो बहुव्रीहिः इति वामनवचनात् सप्तमीविशेषणे बहुव्रीहाविति ज्ञापनाच्च । व्यधिकरणो बहुव्रीहिरपि अनुमतः ।

यद्वा अर्थं कामयन्ते अर्थकामाः इति वा समासः अनेन विशेषणेन क्षुधितानां ओदनहरणवत् तादृशानां भोगहरणं पापसम्पादकमिति ध्वनितम् । तादृशान् गुरून्

हत्वा **रुधिरप्रदिग्धान् -** तद्रुधिरोपसिक्तान् - भोगान् यद्यपि भोगानां न रुधिरोपदिग्दत्वमस्ति । तथापि गुरुवधसाध्यभोगानां रुधिरप्रदिग्दः गुरुवधस्मृतिहेतुत्वात् । स्वयं तद्वद्दुर्भोजनाः । तथा च इह लौकिकसुखमपि नास्तीति हृदयम् । पूर्वश्लोकात् कथम् इत्यनुषज्यते कथं भुञ्जीय तद्भोजनं गर्हितम् इति भावः । गर्हायां लडपिजात्योः नित्यतः गर्हमित्यनुवृत्तौ विभाषा कथम्? इलिश्चेति गर्हायां लिङ् ।

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ।। ६ ।।

'यानेव' इत्यत्र एवकारो भिन्नक्रमः **'त'** इत्यत्रान्वितः **यान् न जिजीवामः?** जीवितुं न इच्छामः । येषां व्ययेन जीवनं अस्माकममिष्टम् इत्यर्थः । तथापि **धार्तराष्ट्राः प्रमुखे -** संमुखेन स्थिताः । आत्महननानुगुण्येन स्थिताः नः अस्माकं कतरत् गरीयः किं युद्धकरणं **गरीयः** श्रेष्ठं युक्तम् । किं वा तद्वर्जनम् एतत् अंशद्वयमपि **न विद्मः ।**

यद्वा **कतरत् गरीयः** तद्वत् इत्यर्थः । **न च एतद्विद्म** इत्यत्र एतत् इत्येतत् । एतदुक्तं भवति इत्यत्रैव वक्ष्यमाणार्थकम् । तदेवाह - यद्वेति यदि वा इत्येतदपि यद्वा इत्यनेन अनतिरिक्तार्थकम् । तथा च यद्वा तान् वयं जयेम । यद्वा नः - अस्मान् **धार्तराष्ट्रा जयेयुः** इति । **एतत् न विद्म** इति ।

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वा धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ।। ७ ।।

कार्पण्यं - त्याज्यस्य अपरित्यागः, स एव **दोषः** ते **अपहतः** प्रतिहतः **स्वभावः** धैर्यं यस्य स तथोक्तः । अत एव च **धर्म संमूढचेताः -** धर्मसंमूढं चेतो यस्य क्षत्रियाणां धर्मेऽपि युद्धे अयमधर्म इति मनाः । **त्वा** सर्वज्ञमाश्रितवात्सल्यविवरां त्वां पृच्छामि । **यच्छ्रेयः** प्रशस्तमिति निश्चितम् स्यात् । तत् मह्यं ब्रूहि । व्यक्तम् कथय । रहस्यस्य तत्त्वार्थस्य कथम् उपदिदेश इत्यत्राह - **शिष्य इति ते** भवतः । **अहं शिष्यः** त्वयाऽहं शासानीय इत्यर्थः । **त्वां प्रपन्नं** धर्मबुभुत्सया त्वां शरणागतं **मां शाधि** शिक्षय ।

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ।। ८ ।।

मम इन्द्रियाणामुच्छेषणम् - क्षोभकरं, **शोकम् भूमौ असपत्नं** - निश्शात्रवं **ऋद्धम्** - समृद्धं, **राज्यं सुराणामाधिपत्यं च अव्यापि** । यत् कर्म इदं च कर्तृपदम् । इदं च शोकम् इति पूर्वोक्तेनात्वेति । **अपनुद्यात्** - निवर्तयेत् । तत्कर्म **न** हि **प्रपश्यामि** - न वक्ष्यामि इत्यर्थः ।

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ।
न योत्स्य इति गोविन्द मुक्त्वा तूष्णीं बभूव ह ।। ९ ।।

एवमुक्तरीत्या **उक्त्वा** स्वावस्थाम् आवेद्य **गुडाकेशः** - गुडाका निद्रा तस्या ईशो नियन्ता प्रबुद्धस्वभावोऽर्जुन इत्यर्थः । **हृषीकेशम्** - इन्द्रियाणां प्रेरकम्, अनेन कृष्णेन इन्द्रियक्षोभशान्तिकरत्वं व्यञ्जितम् । **परन्तपः** परन्तपोऽपि इत्यर्थः । **न योत्स्य इति गोविन्द मुक्त्वा तूष्णीं बभूव ह** - निरुत्तर आसीत् । गोशब्दो हि गवार्थको भूम्यर्थकश्च । 'विदज्ञाने,' 'विदुर्लभे' इति च धातुद्वयम् । तथा च शोकापनोदनसमर्थ-वाक्छातीत्वं भूलाभायावतीर्णश्च अतस्त्वमेव अस्याम् अवस्थायाम् त्राता न अन्य इति तात्पर्येण पुनरपि गोविन्दमित्युक्तिः । **ह** इति पारवश्यात् सञ्जयः प्राह -

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ।। १० ।।

सेनयोरुभयोः युद्धाय उद्युक्तयोः स्वपरसेनयोः **मध्ये** अन्तराले अनेन उपदेशावसरो दर्शितः । **विषीदन्तम्** अकस्मान्निरुद्योगं **तं** - अर्जुनम् **प्रहसन्निव** । अधर्मपाराजयादि युद्धनिवृत्तिहेत्वभावेऽपि तन्निवृत्तिं दृष्ट्वा प्रहसन्निव, हृषीकेशत्वात् स्वयमेव धीरम् अर्जुनं प्रक्षोभ्यस्थितोऽस्मि इति स्वकृत्यं पर्यालोच्य प्रहसन्निव इदं *'नत्वे वाहं जातुनासम्'* इत्यारभ्या *'हन्त्वा सर्व पापेभ्यो मोक्षायिष्यामि मा शुचः'* इत्यन्तम् । आत्मपरमात्म याथात्म्य प्राप्त्युपायभूत कर्मयोगादिगोचरं वाक्यम् उवाच इत्यर्थः । यद्यपि मध्ये *'अशोच्यनन्वशोच'* इति श्लोकोऽस्ति । तथापि परिहास व्यक्तीकरणार्थो नोपदेशः । *'अतो नत्वेवाहं'* इत्यारभ्येत्युक्तम् । यद्यपि रहस्यतम तत्वार्थो भगवता नोपदेष्टव्यः । **'नापृष्टः किञ्चिदुच्चरेत्'**- **'पृष्टोऽपि न वदेदर्थं गुह्यं सिद्धान्तमेव च'** इत्युक्तेः तथापि यश्श्रेयः स्यात् इति सामान्यप्रश्नात् शिष्यस्तेहम् इति सम्यगुपसन्नत्वाच्च । तदुपदेशो युक्त इति ध्येयम् । यद्यप्येवमपि स्वं प्रपन्नंप्रतिस्वेन तद्दोषनिरीक्षणेन परिहासो नोचितः, तथापि प्रहसन्निवेति 'इव' शब्दशिरस्कतया तेन निखिलनिगमान्त गह्वर विलीनस्य महतोऽर्थ जातस्यानायासेन तव लब्धिः नास्तीति द्योतनात् सरसत्वमेव तेन फलितम् । प्रहसन् इवेत्यस्य निमित्तमाह -

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ।। ११ ।।

शोच्याश्शोचनीयाः तद्भिन्ना अशोच्याः तान्प्रत्यन्वशोचः यद्यपि अन्वशोच इति सोपसर्गो लङ् स च अनद्यतनार्थः । तथाऽपि शोकस्याध्यतनत्वात्सुप्तिङ् उपप्रहेति व्यत्ययाभ्यनुज्ञानात् भाषः स इत्युपरितनप्रयोगानुगुण्याच्च । अनुशोचसीति विवृतम् । अद्यतनोऽपि चिरानुवृत्त इव प्रतीयत इति बोधनाय लङ् प्रयोगः । **प्रज्ञावादांश्च भाषसे । प्रज्ञा -** प्रकृष्टं ज्ञानं, तद्धि देहात्मनोः स्वभावज्ञानम् । तया कृता वादव्यवहाराः प्रज्ञावादाः पतन्ति पितर इत्याद्याः न हि देहात्मविवेकरहितस्यैवंविधव्यवहाराः सम्भवन्ति । फलितमाह - **गतासूनित्यादि । पण्डिताः -** पण्डा तत्त्वज्ञानं येषां सञ्जाला ते तदस्य सञ्जातमिति तारकादित्वात् इतच् । ऊहापोहक्षमबुद्धिशालिन इत्यर्थः । **गतासून्** देहान्प्रति **अगतासूनात्मनश्च प्रति नानुशोचन्ति ।**

यद्यपि असुशब्दस्य प्राणवाचित्वात् गता स्वगतासु शब्दौ निष्प्राण स प्राण परौ तथाऽपि वक्ष्यमाणविस्तरे । '**अव्यक्तोऽयं अचिन्त्योयम्**' अथ चैनं नित्यजातम् । 'अन्तवन्त इमे देहा' इत्यादिभिः नित्यस्यात्मनोऽनित्यस्य देहस्य च अशोचनीयत्वस्य वक्ष्यमाणत्वात् उक्त एवार्थः । **नानुशोचन्ति** तान्प्रति शोकं न कुर्वन्ति । नित्यत्वादात्मनो न शोकस्थानम् । परिणामस्वभावत्वात् देहा अपि न शोकस्थानम् इति भावः । को देहस्वभावः ? कथम् आत्मा देहातिरिक्तः ? नित्यश्च; कथम् अनयोः अशोच्यत्वम् इत्याशंका पारलौकिक-फलोपायानुष्ठानाधिकारित्वाय देहातिरिक्तत्वेन अवश्यं ज्ञातव्यम् आत्मनस्स्वरूपं प्रथममाह -

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ।। १२ ।।

व्यतिरेकरूपेऽपि वाक्ये अन्वयपर्यवसायित्वद्योतनाय तु शब्दः स च प्रतिवाक्यमन्वेति । ईश्वरस्याऽहं ग्रहःसर्वनियन्तृत्वगर्भः । तथा च अहमित्यस्य सर्वेश्वरो नियन्ता अहम् इत्यर्थः । अतः परमिति तुर्यपादस्थो वर्तमानार्थककालार्थकः अतश्शब्दो जातुशब्दश्च सर्वेषु वाक्येष्वन्वेतितव्यौ । ततश्च सर्वेश्वरोऽहम् अतः वर्तमानकालात्पूर्वकालेऽपि जातु नासम् । अपि तु आसम् । **त्वं** शितव्यस्त्वदुपलक्षितो जीववर्गश्रीनासाविति न अपि त्वासुः, **इमे जनाधिपाः नासन्निति** न अपित्वासन्नेव । अतः त्वमेते च सर्वे **वयमतः परं** वर्तमानकालादनन्तरकाले **न भविष्याम** इति । अपि तु भविष्याम एव । अत्र न त्वेवाहं

जातु नासमिति प्रथमवाक्यं दृष्टान्तार्थम् । यथाहं सर्वेश्वरः कालत्रयवर्तित्वान्नित्यः तथात्वमिमे नराधिपा...... इति ।

ननु यः प्रत्यक्षवेद्ये देहातिरिक्ते जीवे संशेते । स कथं ततो व्यतिरिक्ते अत्यन्तागोचरे परमात्मनि निस्संशयः स्यात् । येन दृष्टान्ततयोपादानं युज्येत । उच्यते न हि अर्जुनो देहातिरिक्तजीवे तदतिरिक्ते परमात्मनि च सन्देहावान् विपरीतज्ञानवान्वा । नारदासित-देवलव्यासादि महर्षिवचनापगतपरमपुरुषस्वभावस्य परंब्रह्म परंधाम पवित्रं परमं भवानिति वदतः तस्य तदयोगात् । किन्तु तत्प्रकारविशेषापरिज्ञानादेव तस्य शोकादिः । अतो यं परमात्मानम् । परमात्मदेशकालस्वरूपानेव भिन्नव्याप्तिरिति निरुक्तिसिद्धम्, तन्नित्यत्वं च सामन्यता जानाति । जीवात्मानं तु लोकदृष्ट्या जन्विनाशादिदर्शनात् । **'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति'** इत्यादि श्रुत्यर्थापातज्ञानाच्च स प्रकारं न जानाति । अतो दृष्टान्ततयोपादानं सम्भवति । अत्र च तत्वोपदेशप्रवृत्तशास्त्रारम्भे त्वमेव त्वां वेत्थयाऽसि सोऽसि इत्युक्ते न भगवतैव स्वस्य शरीरभूतजीवानां च तत्वम् । अहमिति प्रत्यक्त्वेन **त्वमिति** स्वाभिमुख्यचेतनान्तरत्वेन इमे इति स्वपराङ्मुखानेकचेतनत्वेन सर्वे इति एकोपाधिसंगृहीतान् एकव्यक्तित्वेन वयमिति स्वेन सहात्मत्वेनैकवर्गीकृतानन्तव्यक्तित्वेन च निर्देशेन सर्वेश्वराज्जीवानां तेषां परस्परं च भेदः पारमार्थिक इति दर्शितम् । एवं यदात्मनो नित्यत्वं तर्हि जरामरणादिप्रतीतव्यवहाराणां च का गतिः? इत्याशंक्य दृष्टान्तेन तां शंकां परिहरति ।।

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ।। १३ ।।

अस्मिन् देहे वृत्तित्वं सप्तम्यर्थः । प्रत्यक्षतया परिदृश्यमाने द्वौ वर्तमानस्य देहिनः कौमारं यौवनं जरा **यथा** तथा **देहान्तरप्राप्तिः ।** तत्र देहान्तरप्राप्तौ **धीरः** - आत्मनि स्थिरत्वबुद्धिमान् **न मुह्यति -** मोहं न प्राप्नोति । अयं भावः । बाल्याद्यवस्थानाशे हि आत्मन स्थिरत्वबुद्धिर्हि तद्विनाशे निमित्तशोकाभावे हेतुः । सोऽत्रापि समान इति क्रमनिर्देशेन पूर्वावस्थावत्पानरूप-शोकप्रसञ्जकवत् । पूर्वदेहत्यागरूपशोकप्रसञ्जक निर्देशायान्तरशब्दः । यद्यपि अवस्था त्रयस्य देहसम्बन्धित्वात् देहिनोऽस्मिन् देह इत्येवान्वय इति प्रतीयते । तथापि देहान्तरप्राप्तिरित्येतदनुरुध्य इत्थं व्याख्यातम् । न हि देहे

देहान्तरप्राप्तिः परन्तु देहिनः देहित्वादेव कौमाराद्यन्वयस्त्यात्मनो नास्ति इति भावः । आत्मप्रकरणपर्यवसाने वक्तव्योऽर्थः तात्पर्यातिशयोत्सह सूच्यते ।

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ।। १४ ।।

रूपमात्रास्पर्शमात्रेत्यादि प्रयोगान्मात्राशब्दस्तन्मात्रा परः तेन तत्कार्याणि गुणविशिष्टद्रव्याण्युच्यन्ते । तेषां स्पर्शास्सम्बन्धाः स्पर्शशब्दो हि, भावव्युत्पन्नः सम्बन्धस्यैव साक्षात्सुखादिहेतुत्वात् **शीतोष्णसुखदुःखदाः** - शीतोष्णशब्दः प्रदर्शकः शीतोष्णमृदुपुरुषादिरूपाः सुख दुःखदाश्चेत्यर्थः । स्पर्शादिगुणविशिष्टद्रव्याणाम् इन्द्रियाणां च सम्बन्धेषु जातेषु ते सम्बन्धाः शीतोष्णमृदुपरुषरूपास्सन्तः सुखंदुःखं च ददति इत्यर्थः । हे **भारत । कौन्तेय तान् -** तादृशान् मात्रास्पर्शान् **तितिक्षस्व -** धैर्येण सहस्व भरतवंशोत्पन्नत्वेन कुन्तीपुत्रत्वेन च विशिष्टक्षत्रियस्य तव धैर्यमेव उचितमिति ध्वनयितुं तथा सम्बोधनम् । यथा तपश्चर्यायां यागादौ जीवातपक्षुत्पिपासादयो यावत्कर्मसमाप्तिक्षन्तव्याः । तथा युद्धेऽपि शस्त्रपातशत्रुवधादयः क्षन्तव्याः । तस्मात् अवर्जनीयेन्द्रियार्थस्पर्शनिमित्तानां दुःखानां दुष्परिहारत्वात् तितिक्षैव युक्तेति भावः । अत्र सुखांशस्य क्षमानाम अपेक्षयानुत्सेकः । तितिक्षाया हेतुमाह - आगमापायिन इति आगताऽपि अनन्तरक्षण एव निवर्तन्त इत्यर्थः । प्रवाहरूपेण अनुवृत्तावागमापायित्वेऽपि कथं क्षन्तव्या इत्याशंकायां पुनः अनित्या इत्युक्तं बन्धहेतुकर्मनाशे सति निवर्तन्त एव न पुनरायान्ति । अतः प्रवाहनित्या अपि न भवन्ति इत्यर्थः । अतः क्षन्तुं शक्या एवेति भावः । इयं तितिक्षा किमर्थेत्यत आह -

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ।। १५ ।।

यं पुरुषं **धीरं** धैर्यवन्तम् । अत एव **समदुःखसुखं** समे तुल्ये दुःखसुखे यस्य तम् । अवर्जनीयं दुःखं सुखवन्मन्यमानमित्यर्थः । यथा आरोग्यकाम औषधादि क्लेशं सुखसाधनत्वात् सुखवन्मन्यते । यथा वार्थार्थी समुद्रतरणोदितम् । तद्व न्निरतिशयानन्दलिप्सुना तदुपायोनान्तरीय दुःखोऽपि सुखवन्माननीय इति भावः । एते शीतोष्णमृदुपरुषादिरूपामात्रास्पर्शा न **व्यथयन्ति -** न पीडयन्ति **सोऽमृतत्वाय कल्पते ।** 'पुरुषर्षभ' इति विपरीतकामः स एव तादृशः । न तु अस्थानस्नेहपर्याकुलस्त्वमिति भावः । अतस्तितिक्षैव कर्तव्यानशोकादिकमिति फलितम् । यत्वशोच्यत्वनिमित्तमुक्तमात्मानां नित्यत्वम् । तदुपपादयति ।

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ।। १६ ।।

अनयोरिति प्रकृतयोः निर्देशादसत्सच्छब्दादेहात्मपरौ अनयोरित्यङ्गुल्यानिर्देशात् उपलब्धिरुक्ता । **तु** शब्दस्त्वनतिक्रमबोधकः । ततश्च **तत्त्वदर्शिभिः** इत्यस्य यथोपलब्धिदेहात्मयाथात्म्यविद्भिः इत्यर्थः । तथा च श्लोकस्यायमर्थः । **असतो** देहस्य भावस्सद्भावः । **न विद्यते** । स त आत्मन **अभावः** असद्भावः । न विद्यते । उभयोः देहात्मनोरन्तोनिर्णयः । निर्णयन्तत्त्वान्निरूपणस्य निर्णयान्तशब्देन उच्यते । *'अवसिते रम्ये समाप्तावन्त'* इति नैघण्टुकाश्च प्राहुः । दृष्टः -

'अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते ।
तत्तु नाशिन सन्देहो नाशिद्रव्योपपादितम्' ।। (वि.पु.२-१४-२४)

इत्यादि शास्त्रेषु दृष्ट इत्यर्थः । यद्यप्यसतो देहस्य सद्भावो न इत्ययुक्तम् दृष्टविरोधात् । देहस्य सत्वं हि प्रत्यक्षसिद्धम् । एवं स त आत्मनो सद्भावो न विद्यत इत्यप्ययुक्तम् शास्त्रविरोधात् । 'असद्वा इदमग्र आसीत् । असदेवेदमग्र आसीत्' इत्यादिशास्त्रं हि सृष्ट्यग्रिमकाले सर्वस्य असत्वं वदन् आत्मनोऽप्यसत्वमाह - तथापि ज्ञानं यथा सत्यमसत्यमन्यत् । **यदस्ति यन्नास्ति च विप्रवर्येति** तत्त्वविद्भिश्चेतनाचेतनयोः सदसच्छब्दतुल्यार्थयोः सत्यासत्यशब्दयोः अस्तिनास्तिशब्दयोः प्रयोगदर्शनात् । 'अनाशी परमार्थश्च' इति श्लोकेन 'यत्तु कालान्तरेणापीति' श्लोकेन च पूर्वावस्थाप्रहाणपूर्वकावस्थान्तर-प्राप्तिरूपपरिणाम तदभावयोः तमभयशब्दप्रवृत्तिनिमित्तत्वोक्तेः । देहसद्भावप्रत्यक्षस्यात्मनि असत्वावेवक श्रुतेश्च एतत्कालवर्तित्वनामरूप्रहाणाद्यपेक्षयोः अन्यथासिद्धेः न कोऽपि दोषः । अथ पूर्वश्लोके स त इति देहस्य प्रथमं प्रस्तुतत्वेऽपि चरमनिर्दिष्टस्यात्मनः बुद्धिसन्निधानात् प्राप्यविशेषणतया तस्य तदन्तर्गतत्वेन तन्नित्यत्वोक्तेः शोकनिवृत्तिः प्रत्यन्तरं गोपायत्वाच्च । प्रथममात्मनो नित्यत्वमाह -

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति ।। १७ ।।

न विनष्टुं शीलमस्येति - **अविनाशि** । **तत्** - जीवतत्त्वं इति **विद्धि** - जानीहि । तु शब्दस्तु सार्वलौकिकजननमरणादि प्रतीतेः तान्येवानुविनश्यति इति देहसमानयोगक्षेमत्व-श्रुतेश्च अन्यथा सिद्धिं द्योतयति इदमिति पराक्त्वश्रुतेः । सर्वमित्यस्य सर्वमचेतनजातमित्यर्थः ।

अत एव येन इत्यस्य चेतनेन इत्यर्थः । तथा च अयमर्थः । चेतनसमुदायेन अचेतनसमुदायस्तिलतैलदारुवन्ह्यादिवत् यथांशं व्याप्यत इति । तथा च अविनाशीत्यस्योपपादकं येन सर्वमिदं ततमिति । तत्र च इत्थं प्रयोगो ज्ञेयः । आत्मा शस्त्रादिपराधीन **विनाशो** न भवति तद्व्यापकत्वेन ततस्सूक्ष्मत्वात् । यो यदधीन विनाशस्सततस्सूक्ष्मो न भवति । यथा वायु विनाश्यो दीप इति । **अव्ययस्य** विनाशानर्हस्य **अस्य** जीवस्य कश्चिदपि तद्व्यतिरिक्तः कोऽपि पदार्थः विनाशं **कर्तुं नार्हति ।** अतिसूक्ष्मत्वात् खलु विनाश अनर्हत्वम् । तत एव तद्व्यतिरिक्तस्य स्थूलत्वात् । तेन तद्व्याप्य शिथिलीकरणायोगात् । तस्यापि नाशकत्वं न इति । अथ 'नासतो विद्यते भाव' इति प्रतिज्ञातमंशमुपपादयति ।

अन्तवन्त इमे देहा नित्यस्योक्ताश्शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ।। १८ ।।

इमे पराक्त्वेन प्रतिपन्ना **देहाः अन्तवन्तः** - अन्तो नाशः मतुप् नित्ययोगे विनाशस्वभावा इत्यर्थः । कुत इति हेत्वपेक्षायां पक्ष निर्देशार्थत्वेन निर्दिष्टो देहशब्द एव अवयवार्थयोगेन तत्समर्पक इति स नोक्तः । स हि 'दिह उपचय' इत्यस्मान्निष्पन्नः सावयवत्वं देहस्याह - पुनरपि देहस्य विनाशस्वभावताम् उपपादयति - **नित्यस्योक्ताः शरीरिण** इति शरीरि इत्यत्र मत्वर्थीये 'नि' प्रत्ययेन **शरीरिण** इमे इत्यन्विततया षष्ठ्या च सम्बन्धः प्रतीयते । स च कर्महेतुकः । तत्सूचनायैव **इमे** इति कर्मभूमिस्थत्व निर्देशः तेन भूतसम्भूतात्मकत्वमपि लभ्यते तदपि अनित्यत्वे हेतुः शरीरि इति प्रत्यय-प्रकृत्या शीर्यत इति शरीरम् इति व्युत्पत्तिमत्या कर्मावसानविनाशित्वं लभ्यते । अयं तु तत्रैव हेतुः ततश्च सावयवत्वात् भूतसंघातरूपत्वात्कर्मावसानविनाशित्वात् । देहविनाश-स्वभावा इत्यर्थः । अथ आत्मनो नित्यत्वमपि द्वाभ्यां हेतुभ्यां समर्थयते - **अनाशिनोऽप्रमेयस्य** इति । **अनाशित्वात्** - अप्रमेयत्वन्नित्यस्य इत्यर्थः । ततश्च नित्यस्येत्यस्य साध्यपरत्वात् अनाशिन इत्यस्य तत् स्थिरीकरणार्थ हेतुपरत्वात् पदद्वयस्यापि पुनरुक्तिः अप्रमेयत्वं प्रमेयभिन्नत्वम् । तेन प्रमेयतैकस्वभावशरीरादिव्यावृत्तं प्रमातृत्वं लभ्यते । तच्च कर्मफलभोक्तृत्वं, प्रमेयत्वं च कर्मफलभोगार्थत्वम् । तद्भिन्नरूपतत्फलभोक्तृत्व-रूपप्रमातृत्वे कर्मफलभोगार्थोत्पन्न प्रमेयभिन्नतया अनुत्पन्नत्वलाभान्नित्यत्वसिद्धिः । प्रमातृत्वस्य प्रमाश्रयत्वरूपत्वेऽपि ईश्वरदृष्टान्तस्वीकारेण तस्य नित्यत्वसाधकत्वं ज्ञेयम् । तस्मादात्मनां नित्यत्वे न देहानां विनाश स्वभावत्वेन च उभयोरपि शोकस्थानत्वाभावात् इत्यर्थः ।

युध्यस्वशस्त्रपातादि परुषस्पर्शान् स्वगतानन्यगतांश्च सोढ्वा **युध्यस्व** भरतवंशप्रसूतस्य अत्राधैर्यं न युक्तमिति सूचनाय भारतेति सम्बोधनम् । अथ अविनाशित्विति श्लोकोक्तं 'नैनं छिन्दन्ति' इत्यादिना प्रपञ्चयिष्यमाणः शस्त्रादिनाम् आत्मानं प्रति हन्तृत्वमात्मनश्च हन्तव्यत्वं नास्तीति द्रढयति ।

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ।। १९ ।।

एनमुक्तस्वभावमात्मानं प्रति हन्तारं शस्त्रादिरूपं कमपि पदार्थं हननहेतुं यो वेत्ति हन्तृशब्दस्य तृन्नन्तत्वात् । न लोकाव्ययनिष्ठाखलर्थ तृनाम् इति षष्ठी प्रतिषेधादेनमिति द्वितीया । यश्च यो वा एनम् आत्मानं **हतं मन्यते ।** केनाऽपि शस्त्रादि हेतुना हतं मन्यते । ता **उभौ न जानीतः ।** नात्मस्वरूपं जानीतः । कुत इत्यत्राह - **नायमिति ।** अयमिति हेतोः आत्मनश्च तन्त्रेण उपादानम् । अयं हनन हेतुश्शस्त्रादि साधनविशेषः । **न हन्ति** एनम् इत्यनुषज्यते । एनम् आत्मानं न हन्ति । अयमात्मा न हन्यते । अथोक्तैरेव हेतुभिः नित्यस्यात्मनो जननमरणाद्यचेतनधर्मा न सन्ति इति कठवल्ली श्रुतिं पुरस्कृत्याह -

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ।। २० ।।

अयं नित्यत्वेन उक्त आत्मा न जायते नोत्पद्यते न म्रियते वा । 'वा' शब्दश्चार्थे न म्रियते च इत्यर्थः । न केवलं हन्तव्यत्वमेव नास्तीति न । अपि तु जननादिकमपि नास्तीत्यर्थः । प्रत्यक्षतोऽवगते जननमरणे कुतो न स्त इत्यत आह - **'न हन्यते हन्यमाने शरीर'** इति । हननादिवत् जननमरणे अपि देहधर्मत्वात् आत्मनोनस्त इत्यर्थः । श्रुतौ विपश्चिदित्यधीतस्य पदस्य स्थाने कदाचिदिति पाठः कृतः तस्य च अयमर्थः । तत्तत्कालीनैः पुरुषैः तेषु तेषु देहेषु जायते म्रियते इति लटौ वर्तमानतयाऽवगते जननमरणे कदाचिदप्यात्मानं न स्पृशत इति । **नायं भूत्वा भविता वा न भूयः । अयं** जीवः **भूत्वा** कल्पादौ भूत्वा **भूयः** कल्पान्तेन **न भविता ।** अयं भावः भूत्वा भवितेत्यनयोः क्रिययोः प्रत्येकं नञ् द्वयस्य न अन्वयः भूत्वा न भवितेति विशिष्टं न च अप्रतिषिध्यते । इत्थं च 'तोयेन जीवान्व्यससर्ज' इति कण्ठत उक्तस्य जननस्य 'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमिति' प्राकृस्सृष्टेः एकत्वावधारणेन अर्थात् प्रळयकाले उक्तस्य लयस्य च नात्मनि प्रसङ्गः सृष्टेः देहकरणेन विक्षेपमात्रपरत्वात् अवधारणस्य च

नामरूपविभागाभावाभिप्रायत्वात् इति । अथ पूर्वोक्तार्थं सर्वं संकलय्य निगमयति - **अजो नित्य** इत्यादि । **अजः**- उत्पत्तिशून्यः । अत एव **नित्यः** - सृष्ट्यवस्यावगतस्थूल-परिणामरहितः । **शाश्वतः** प्रलयाद्यवस्थावगतसूक्ष्मपरिणामरहितः **पुराणः** - पुराऽपि नवः अपूर्ववत् अनुभाव्य इत्यर्थः ।

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ।। २१ ।।

अत्र **नित्य**मिति परमसाध्यानुवादः **अविनाशिनम् अजमव्ययम्** इति तद्धेत्वनुवादाः । तथा च अविनाशित्वेन अजत्वेनाव्ययत्वेन **च नित्यम् एनम्** आत्मानं यो वेद **स पुरुषः कम् -** कथं **घातयति** देवतिर्यगादिशरीरावस्थितेषु शरीरिषु **कं** कथं घातयति इत्यर्थः । कमिति निर्धारणस्य अनिर्धारितानेकव्यक्तिसापेक्षत्वाद्देवतिर्यगादिशरीरावस्थितम् अशरीरिष्वित्यस्य लाभः । तेष्वात्मानुकम्पा कथं हन्तीति । तथा च एतान् घातयामीत्यनुशोचनम् अज्ञानमूलकमिति भावः ।

ननु नित्यस्यात्मनः साक्षाद्धननासम्भवेऽपि भोगसाधनशरीरविश्लेषसम्भवात् तन्निमित्तः शोकस्स्यादेव इत्यताऽह -

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ।। २२ ।।

जीर्णानि - शिथिलानि, **वासांसि** - वस्त्राणि, **विहाय** नरः **यथा नवानि -** पूर्वापेक्षया शुभ्रतराणि **वासांसि** इत्यनुषज्यते **गृह्णाति । तथा जीर्णानि शरीराणि विहाय अन्यानि नवानि शरीराणि संयाति ।** यद्यपि पूर्वशरीरविशरणानन्तरं कल्याणशरीरप्राप्तिरेव इति न नियमः । अतः पुनरपि शोकानिवृत्तिः । तथापि धर्मयुद्धेशरीरं त्यजतां ततोऽपि शुभतरशरीरप्राप्तिश्शास्त्रसिद्धेति न तत्प्रसक्तिः । पुरा शोका विषये शोको न कार्य इत्युक्तम् । अत्र हर्षविषयत्वात् शोको न कार्य इति विशेष उक्तः । उक्तमेवाविनाशित्वं सुखग्रहणाय द्रढयति -

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ।। २३ ।।

एनम् - आत्मानं, **न छिन्दन्ति** - छेत्तुं न शक्नुवन्ति **पावको** वह्निरेनमात्मानं **न दहति ।** दग्धुं न शोचति । **आपः न क्लेदयन्त्ये**नं क्लेदयितुं नार्हन्ति । 'आपस्त्री भूम्नी' इत्युक्तेः बहुवचनम् । **मारुतः -** वायुर्न शोषयति **शोषयितुं** नार्हति कुत इत्याशंक्य चोदयति ।

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यस्सर्वगतः स्थाणुरचलोऽयं सनातनः ।। २४ ।।

अत्र सर्वत्राहार्थे यत्प्रत्ययः । अयं जीवः अच्छेद्यश्चेदनानर्हः । एवमदाह्यः इत्याद्यं ज्ञेयम् । कुत इत्यत्राह - **सर्वगतं** इति । नात्र विभुत्वमुच्यते । 'एषोऽणुरात्मा' 'वालाग्र शतभागस्य शतधा कल्पितस्य च । भागो जीव' इत्यादि श्रुतिविरोधात् किन्त्वतिसूक्ष्मतया सर्वान्तःप्रवेशयोग्यत्वम् । तेन अन्य सर्ववस्त्वेभ्यः सूक्ष्मतया नैर्व्याप्यनर्हत्वात् । व्याप्यकर्तव्यभेदनाद्यनर्ह इति भावः । उक्तमर्थम् निगमयति । नित्य इत्यादिभिश्चतुर्भिः पदैः । **नित्यः -** सूक्ष्मत्वेन भेदनाद्यनर्हत्वात् आत्मा नित्यः । अत एव **स्थाणुः** स्थिरः । स्वाभाविक परिणामशून्यः **अचलः** औपाधिक परिणाम शून्यः **सनातनः** अनादिः । अथोक्तानां हेतूनां धर्मिग्राहकमानविरोधाभावमाह -

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हति ।। २५ ।।

अयमात्मा **अव्यक्तः**, इन्द्रियैः अग्राह्यः, तदुक्तं मोक्षधर्मे -

'इन्द्रियैर्गृह्यते यद्यत्तत्तद्व्यक्तमिति स्थितिः ।
अव्यक्तमिति विज्ञेयं लिङ्गग्राह्यमतीन्द्रियम्' ।।

इति भेदनादि योग्यानि शरीराणि यैः प्रमाणैः प्रत्याय्यन्ते तैः अयम् अग्राह्यः । अतश्चेदनाद्यनर्ह इत्यर्थः ।

ननु व्यक्त्यभावेऽपि कुसूलबीजादिवत् साजात्यात् तदर्हत्वं स्यात् इत्यत आह - साजात्यग्राहकाभावात् शास्त्रतो वैजात्यस्यैव ग्रहाच्च नैवं शंक्य इति भावः । अतश्च **अविकार्यः -** विकारानर्ह उच्यते । **तस्मात् एनमेवं विदित्वा नानुशोचितुमर्हसि** आत्मानमनुसृत्य शोकं कर्तुं नार्हसि । आत्मस्वरूप वेदिनः तव शोकयोग्यतैव नास्तीति भावः । इत्थं देहातिरिक्तात्माभ्युपगमे शोकनिमित्ताभावम् उक्त्वा 'तुष्यतु दुर्जन' इति न्यायेन नास्तिकदृष्ट्या देहात्मभाववादाभ्युपगमेऽपि तन्नास्तीत्याह -

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो! नैवं शोचितुमर्हसि ।। २६ ।।

अथ इति । पक्षान्तरपरिग्रहार्थः प्रश्नार्थः । अभ्युपगमार्थो वा । **वा** शब्दो विशेषणद्वयसमुच्चयार्थः । **नित्यजातं नित्यं वाऽमृतम् ।** अर्थाच्छरीरमिति लभ्यते ।

एवंभूतम् अनियतजन्ममरणे शरीरमेव आत्मानं **मन्यसे** - मनुषे । तथाविधदेहतयाभिमतस्यात्मनो नाशेऽपि एवमतिमात्रं **त्वं महाबाहो त्वं शोचितुं नार्हसि ।** देहातिरिक्तात्माभ्युपगमे परलोकभयेन शोको युज्यते । देहस्यैवात्मत्वे तदभावात् शोको न युज्यत इति नार्हसि इति वदतो भावः । स्वपरमरणोद्योगरूपस्वल्पनिमित्तस्तु शोकः । महाबाहोस्तवेषत्वरेति सूचयितुं **महाबाहो** इत्युक्तं प्रतिज्ञाया हेतुसाकाङ्क्षत्वात् हेतुं दर्शयति ।

जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ।। २७ ।।

जातस्य - उत्पन्नस्य, **मृत्युः** - नाशो, **ध्रुवः** - अवर्जनीयः, **मृतस्य च** - नष्टस्यापि, **जन्म ध्रुवम् ।** अवर्जनीयम् । नष्टस्योत्पत्तिः उत्तरावस्थाप्राप्तिः । तथा च अवस्थावतः परिणामिद्रव्यस्य जननमरणयोः अवर्जनीयत्वात् शोको न कार्य इति । तदेतदाह - **तस्मादिति । अपरिहार्येऽर्थे त्वं शोचितुम् न अर्हसि ।** यद्धव्यशेषरूपनाशे इदं द्रव्यं नष्टमिति यदि शोचसि तर्हि तस्यैव द्रव्यस्य पुनरपि अवस्थान्तरप्राप्तौ तस्याः अवस्थाया उत्पत्तिरूपत्वात् किमिति न प्रेयस इति पुनरपि नार्हसि इति वदतो भावः । इत्थं जननमरणरूपावस्थयोः अवर्जनीयत्वेन अशोच्यत्वमुक्तम् । अथ तत्तद्वस्तूनां प्रतिनियतस्वभावत्वेन पूर्वोक्तावस्थानां सुखदुःखरूपत्वयोः अन्यतरविवेकानर्हानुपलभ्यमानदशावत्वात् अशोचनीयत्वमाह -

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना? ।। २८ ।।

भूतशब्दो देहपरः । **भूतानि** आत्मत्वेन त्वदभिमतानि शरीराणि **अव्यक्तादीनि** अनुपलभ्यमानपूर्वावस्थानि । **व्यक्तमध्यानि** - उपलब्धमनुष्यत्वादिमध्यमावस्थानि । **अव्यक्तनिधनान्येन** - अनुपलब्धोत्तरावस्थानैव तत्रैवं स्वस्वभावेषु वर्तमानभूतेषु **का परिदेवना** किं निमित्ता परिदेवना । अयं भावः । अदर्शनादि हेयातः पुनश्चादर्शनं गतः । नासौ तव न तस्य त्वं वृथा *किमनुशोचसीत्युक्तन्यायेन* अवस्थात्रययोगिनो निशोच्यत्वम् । तथा हि स्वभावहान्या शोकः कार्यः । तत्र क स्वभावः ? परिणामिद्रव्यस्य किमव्यक्तपूर्वावस्था । तर्हि स्वभावहान्यामनुष्यत्वावस्थैव शोचनीया स्यात् । यदि व्यक्तमध्यावस्था । स्वभावः तर्हि पूर्वपरकालयोः अव्यक्तावस्थान स्यात् । यदि सा च औपाधिकी तर्हि तस्योपाधेः विगमे पुनर्मनुष्यात्वावस्थाया अयत्नसिद्धत्वेन न कथंचिदपि शोचनीयमिति । एवमन्वारुह्य वादं समाप्य स्वसिद्धान्तं तदधिकारि दुर्लभत्वादि कथनेन प्रशंसति ।

आश्चर्यवत्पश्यति कश्चिदेनम् आश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ।। २९ ।।

एवं पूर्वोक्तस्वभावम् । **आश्चर्यवत्** स्वेतरसमस्तवस्तुविसजातीयतया आश्चर्यवदवस्थितो जीवात्मानं **कश्चित्** निर्धारण अयं शब्दः बहुषु जनेषु उपचितपुण्यः कश्चिदेव **पश्यति** इत्यर्थः । अन्यः ततोऽपि बुद्धिमान् कश्चित् आश्चर्यवत्पूर्ववदर्थः । तथैव स्वापगतप्रकारेणैव वदति अन्यस्मै बोधयति अन्यः श्रोता आश्चर्यवदवस्थितम् एनं शृणोति श्रुत्त्वाप्येनं जीवात्मानं कश्चिन्न चैव वेद अत्र चकारादपिशब्दाच्च कश्चिच्छत्कोऽपि न वेदैव पश्यन्नपि न वेदवदन्नपि न वेद स्पृशन्नपि न वेद इत्यर्थः । अयं भावः । लोकेऽपि प्रथमं श्रवणो, ततो मननात् श्रवणायत्तात्मनिश्चयः । ततश्च वचनयोग्यता । तत्रापि चिराभ्यासादिना यथावस्थितवचनयोग्यता । तत्रपि चिराभ्यासादिना यथावस्थितवचनयोग्यता । ततश्च निदिध्यासनादर्शनम् । ततो रत्नतत्त्ववत् चिरनिरीक्षण संस्कारात्सविशेषदर्शनम् । तत्र देहातिरिक्तात्मनो द्रष्टैव तावद्दुर्लभः । किमुत यथावस्थितत्वेन स विशेषद्रष्टा । तस्मिन् सत्यपि वक्तैव दुर्लभः । किमुत सकलरहस्य वक्ता । तस्मिन्नपि सत्यपि श्रोत्रैव दुर्लभः । किमुत बाह्याभ्यन्तरसकलशिष्यगुणसम्पन्नतया यथार्थश्रोता । तथा च आत्मनः तत्त्वतो वेदनं दुःशकमिति । अथ देवादिस्थावरान्तेषु भूतेषु जातिगुणदेशकालादिभिः वैषम्यमुपलभ्यते । देवादिशब्दाश्च तत्तद्देहविशिष्टात्मपर्यन्ताः । तथा तद्वत्तन्नित्यत्वादि वैषम्यमपि सम्भाव्यतेत्यत आह -

देही नित्यमवध्योऽयं देहे सर्वस्य भारत! ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ।। ३० ।।

सर्वस्य देवादि भेदभिन्नस्य देहिनः देह वध्यमानेऽपि इति शेषः । अयं देहो आत्मा नित्यमवध्यः सूक्ष्मत्वेनाच्छेद्यत्वात् अदाह्यत्वादक्लेद्यत्वादशोष्यत्वाच्च इति भावः । भरतवंश प्रसूतस्त्वं बुद्ध्यैव जानीहि इत्याशयेन भारत इत्युक्तम् । **तस्मा**द्देहस्य वध्यत्वेऽपि देहिनो अवध्यत्वात् **सर्वाणि भूतानि** सर्वान् क्षेत्रज्ञान् प्रति **त्वं शोचितुं नार्हसि ।** जात्यादि वैषम्यं तु देवादि देहगतं अपृथक्सिद्धिमात्रात्तद्वाचिशब्दैः आत्मनां व्यवहारः । अतो नात्मवैषम्य प्रसक्तिरिति भावः । एवम् **अशोच्यानन्वशोचस्त्वम्** इत्यारभ्य **न त्वं शोचितुमर्हसि** इत्यंतेन ग्रन्थेन अस्थानकारुण्यम् अपनुद्य इतः स्वधर्मम् इत्यादिना मरणादतिरिच्यत इत्यन्तेन धर्माधर्मधीरपोद्यते ।

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्यादि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ।। ३१ ।।

अपरिभिन्नक्रमः स्वो धर्मः स्वस्य धर्मो वा स्वधर्मः तम् अवेक्ष्यापि न विकम्पितुम् अर्हसि । प्राणिमारणरूपं प्रारब्ध युद्धं कथं कुर्यामिति । विशेषेण कम्पितुं नार्हसि । कुत इत्यत्राह - **धर्म्यादिति ।** निरायुध निवृत्त शरणागतादिषु शस्त्रप्रयोगाभावेन न्यायतः प्रवृत्ततया धर्मादनपताद्युद्धादन्यत् क्षत्रियस्य श्रेयः प्रशस्यतरं कर्म **न विद्यते** न हिंस्यादिति सामान्यशास्त्रं, प्रबलेन विशेषशास्त्रेण बाध्यत इति भावः । पुनरपि युद्धस्य प्राणिमारणरूपस्यापि प्रशंसया धर्मभ्रमम् उन्मूलयति ।

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ।। ३२ ।।

यदृच्छा अप्रयत्नः तया **उपपन्नं** प्राप्तम् पूर्वकृतसुकृतपरिपाकलब्धत्वात् इदानीम् अयत्नसिद्धम् इत्यर्थः । **अपावृतं** निरस्तावरणं निर्विघ्नम् इत्यर्थः । **स्वर्गद्वारं** स्वर्गशब्दो निरतिशयसुखपरः ।

'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं यत्तत्सुखं स्वः पदास्पदम्' ।।

इत्युक्तेः तस्य द्वारम् उभयभूतम्, **ईदृशं युद्धं सुखिनः** सुखशब्दो लाक्षणिकः सुखसाधनपुण्यवन्त इत्यर्थः । **क्षत्रियाः लभन्ते -** प्राप्नुवन्ति । अथ तदकरणप्रत्यवायमाह -

अथ चेत् त्वं धर्म्यमिमं (व) सङ्ग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ।। ३३ ।।

धर्म्यं धर्मादनपेतं **सङ्ग्रामं** युद्धं त्वं न करिष्यसि **चेत्** ततः सङ्ग्रामाकरणात् **स्वधर्मं** धर्मशब्दस्तज्जन्यफलपरः । स्वधर्मानुष्ठानजन्यं निरतिशयसुखम् इत्यर्थः । इत्थम् आमुष्मिकफलाभावमुक्त्वा ऐहिकफलाभावमप्याह -

कीर्तिं चेति हित्वा पापम् - अतिघोरं पापफलं निरयमवाप्स्यसि । यदि संग्रामाकरणमेव निरयहेतुः क्षत्रियस्य । तर्हि सर्वदा तत्प्रसङ्ग इत्याशंकानिरासाय इमम् इत्युक्तिः प्रारब्धमित्यर्थः । प्रारब्धस्य परित्यागः तथैव इति भावः । इत्थं दृष्टादृष्टफलहानिरुक्ता अदृष्टप्रत्यवायश्च दर्शितः । अथ **दृष्टप्रत्यवायमाह -**

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिः मरणादतिरिच्यते ।। ३४ ।।

अनुक्ता सामर्थ्य समुच्चयार्थः । **अपि** शब्दः सामर्थ्यपरः **भूतान्यपि** समर्थान्यसमर्थानि सर्वाणि भूतानि **ते** - तव **अकीर्तिं च** । न च विरोधे । विरुद्धां कीर्तिं दुष्कीर्तिं असामर्थ्यं चेत् इत्यर्थः । कीदृशीम् अकीर्तिमव्ययां देशतः कालतस्संकोचरहितां सर्वदेशकालव्यापिनीम् इत्यर्थः । कथयिष्यन्ति सर्वत्र ख्यापयन्ति इष्टापत्तिम् आशंक्याह - **सम्भावितस्येति** च; शंकापनुत्तये तस्य समर्थैः असमर्थैश्च बहुकृतस्य **अकीर्तिः** अपयशः **मरणान्मृतेः अतिरिच्यते ।** निरय संवादकत्वेन दुःखमूलेत्यर्थः । अकर्तेस्तद्धेतुत्वं च । अकीर्तिर्यस्य कीर्त्येत लोके भूतस्य कस्यचित् पतत्येवाधमलोकान्यावत् शब्दः सकीर्त्यत इति । एवं धर्माधर्मभ्रमः क्षिप्तः । अथ अस्थानस्नेहः क्षिप्यते ।

भयाद्रणादुपरतं मन्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ।। ३५ ।।

येषाम् अतिप्रसिद्धानां कर्णदुर्योधनादीनां **बहुमतो भूत्वा** अतिशूरो वैरीति पूर्वं बहुमतो भूत्वा **लाघवं यास्यसि** इदानीं निवृत्तयुद्धव्यापारतयाग्रपरोऽयम् इत्यभिमान विषयतां यास्यसि ते **महारथाः त्वां रणोद्भयात् उपरतं मन्यन्ते** न तु बन्धुस्नेहात् उपरतं मन्यन्ते । प्रकारान्तरेण पुनरपि अस्थानस्नेहः क्षिप्यते ।

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्? ।। ३६ ।।

ये शूरान् प्रति न वाच्यावादाः । किन्तु कांदिशीकान्प्रत्येव ते **अवाच्य**वादाः पारुष्याश्लीलपरिहासादिवादा इत्यर्थः । तान् **बहून्** बहुविधान् **तवाहिताः** शत्रवो धार्तराष्ट्राः **वदिष्यन्ति** कथं भूताः सन्तः तव महावीरस्य तव सामर्थ्यं निन्दन्तः शूराणाम् अस्माकं पुरत कथम् अयं स्थास्यति? अस्मत्सन्निधानादन्यत्र खल्वस्य सामर्थ्यमिति निन्दां कुर्वन्तः ततो निन्दाश्रवणात् **किंनु दुःखतरं** किमधिकं दुःखमित्यर्थः । गाण्डीवतामर्थ्यादि निन्दाप्रसङ्गे धर्मपुत्रमपि निहन्तुमुद्युक्तस्य तव कर्णादिकृत निन्दा श्रवणं दुस्सहमिति भावः ।।

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ।। ३७ ।।

युद्धे परैर्हन्तो वा स्वर्गं मोक्षं प्राप्स्यसि । **प्राप्स्यसि** - 'प्राज्ञेनात्मना जुष्टस्वर्गेलोके सर्वान् कामान् आप्त्वाऽमृतः समभवत्' इति स्वर्गशब्दस्य मोक्षे प्रयोगात् **जित्वा वा** वाशब्दो भिन्नक्रमः परानिति शेषः । परान् **जित्वा महीं वा भोक्ष्यसे** । उभयथाऽपि धर्मयुद्धेन क्षत्रियस्य श्रेय एवेति भावः । तस्मात् हितसाधनत्वात् **कृतनिश्चयः** उक्तार्थे संशयरहितस्सन् **युद्धाय उत्तिष्ठ, कौन्तेय** कुन्तीपुत्र अनेन विशुद्धक्षेत्रोत्पन्नेन त्वया महीयसः धर्मस्य विच्छेदो न कार्य इति सूचितम् । इत्थम् अस्थानस्नेहकारुण्य-धर्माधर्मभयाकुलत्वम् उपशमितम् । अथ धर्मत्वेन स्थापितस्य युद्धस्य मुमुक्षुविषयानुष्ठान प्रकारमाह -

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ।। ३८ ।।

सुखदुःखे समे कृत्वा तुल्ये अनुसन्धाय **लाभालाभौ जयाजयौ** । समौ कृत्वा इत्यर्थः । तत्प्रयुक्त हर्षशोकादि विकारमनवाप्येत्यर्थः । अनेन साधन सप्तकान्तर्गतानवसादानुद्धर्षौ सूचितौ । तदनन्तरं युद्धाय **युज्यस्व** युद्धार्थं सन्नहनं कुरु । (एवं) **एवं** चेत् **पापं** पुण्यपापरूपं मोक्षप्रतिबन्धकं **न अवाप्स्यसि** - संसारबन्धान्मोक्ष्यसे इत्यर्थः । एवं शोकापनोदन हेतुषु प्रधानकारणम् आत्मयाथात्म्यज्ञानमुपदिश्य तदनन्तरं तच्चिन्तनरूप ज्ञानयोगाभिधानस्य औचित्येऽपि तस्यकर्मयोगसाध्यत्वात् प्रथमं कर्मयोगं वक्तुम् आरभते -

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ।। ३९ ।।

संख्या बुद्धिः । 'बुद्धिर्मतिश्च मेधा संख्या संवित्तिरुपलब्धिः' इति । निघण्टोक्तेः । तया निर्धारणीयम् आत्मत्वं सांख्यं तस्मिन्बुद्ध्या बुद्धिः अभिधेया । तत्साक्षात्काराय शास्त्रनिष्पाद्यो यो निर्णयो वक्तव्य इत्यर्थः । **एषा ते** तुभ्यम् **अभिहिता** नत्वेवहम् इत्यारभ्य 'तस्मात् सर्वाणि भूतानि न त्वं शोचितुमर्हसि' इत्यन्तेन उक्ता । ततःपरं स्वधर्मम् इत्यादिना धर्माधर्मभ्रमास्थान स्नेहयोः अधिक्षेपः कृत इति भावः । **योगे तु** यो **बुद्धिः**, योगशब्दः कर्मयोगपरः तादृशात्मज्ञानसाधनकर्मयोगे यो बुद्धिः तदनुष्ठानविषयिणी या बुद्धिः इत्यर्थः । इमाम् अभिधीयमानां तां बुद्धिं शृणु । **यया बुद्ध्या** युक्तः **कर्मबन्धं** कर्मणा बन्धः तृतीया तत्कृतार्थेन गुणवचनेन इति समासः । संसारबन्धम् इत्यर्थः ।

प्रहास्यसि इत्यक्ष्यसि इमां शृण्वति प्रतिज्ञातां बुद्धिं व्यवसायात्मिका इत्यादिना वक्तुं बुभुत्सा जननाय उपक्रम एव तादृशबुद्धियुक्तस्य कर्मणो माहात्म्यमाह -

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ।। ४० ।।

इह कर्मयोगे **अभिक्रमनाशः** अभिक्रमे उपक्रमे नाशः फल साधन भाव नाशः **न विद्यते ।** उपक्रान्तस्य फल व्यभिचारो न इत्यर्थः । **प्रत्यवायो न विद्यते** उपक्रान्तस्य मध्ये विच्छेदेऽपि प्रत्यवायो नेत्यर्थः । इहेति वक्ष्यमाण बुद्धिविशिष्ट कर्मणो ग्रहणात् नित्य-नैमित्तिकादीनां विच्छेदेन फलं भवति प्रत्यवायश्च भवति । काम्यानां तु नैष्फल्यमेव । प्रत्युत ब्रह्मरक्षस्त्वाद्यनर्थफलसाधनत्वमपि बोधितम् । उक्तमेवार्थं विवृणोति स्वल्पमिति स्वल्पोप्यंशः **महतो भयात्त्रायते** । महत्व विशेषितं भयं संसारभयमेव । इत्थम् इतरकर्म वैलक्षण्यम् अदर्शितम् । अथोपदेष्टव्यतया प्रतिज्ञातां तद्विषयां बुद्धिम् इतरकर्मविषयबुद्धिभ्यो हेतु फलवैषम्येन विशिंषन् उपदिशति ।

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ।। ४१ ।।

इह मुमुक्षुणा अनुष्ठेये नित्यनैमित्तिकादि भेदभिदुरेऽपि कर्मणि **व्यवसायात्मिका** व्यवसायो निर्णयः । तदात्मिका आत्मयाथात्म्य निश्चय पूर्विकेत्यर्थः । अयं भावः । यथावस्थितात्मस्वरूपप्राप्तिर्हि मोक्षः 'परंज्योतिरुपसम्पद्य स्वेन रूपेणाऽभि निष्पद्यते' इत्युक्तेः तादृश पुरुषार्थ प्रेप्सु र्हि मुमुक्षुः स कथमनिश्चीयमाने आत्मयाथात्म्ये तत्प्राप्ति इच्छयाविहितं कर्माऽनुतिष्ठेत् इति । मुमुक्षुणाऽनुष्ठेये कर्मणि या बुद्धिः सा आत्मयाथात्म्य निश्चयपूर्विकैव कामिभिः अनुष्ठेये तं कर्मणि बुद्धिः नैतादृशी । तत्र आत्मनो देहान्तरपरिग्रहार्हस्थिरत्वज्ञानमात्रस्यैव अपेक्षितत्वेन तद्याथात्म्यज्ञानानपेक्षणात् । तथा एका मोक्षरूपैकफलसाधनतयैकाकारा तदुक्तं मनुना 'तद्धिकुर्वन्यथा शक्ति प्राप्नोति परमां गतिम्' इति । अव्यवसायिनां तु आत्मयाथात्म्यनिश्चयरहितानां तु बुद्धयः अनुष्ठेये कर्मणि बुद्धयः अनन्ताः फलानंत्यादनन्ताः स्वर्गपशुपुत्राद्यनन्तफलभेदेन तत्साधनानामपि कर्मणां भिन्नभिन्नशास्त्रार्थत्वेन तद्गोचरबुद्धयोऽपि यावत्फलभेदं बह्वयः इत्यर्थः । किञ्च बहुशाखाश्च अवान्तरफल बाहुल्यात् बहुशाखाश्च । इत्थं काम्यकर्मविषयबुद्धितो मोक्षसाधनभूतकर्मविषयबुद्धेर्वैलक्षण्यम् उपपाद्य तदितर फलवैष्ण्यजननाय काम्यकर्माधिकृतान्निन्दति ।

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीतिवादिनः ।। ४२ ।।

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ।। ४३ ।।

भोगैश्वर्यप्रसक्तानां तयाऽपहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ।। ४४ ।।

विपश्चितः - विविधं पश्यन्ती चित् येषां ते विपश्चितः पृषोदरत्वात् साधुः बहूज्ञाः-तद्भिन्ना अविपश्चितः - अल्पज्ञाः उपनिषत्साध्यस्थिरविवेकशून्या इत्यर्थः । **पुष्पितां -** पुष्पितामेव न तु फलताम् इत्यर्थः । उदर्कफलाभावादापत रमणीयाम् इति यावत् । पुनः कीदृशीं भोगैश्वर्यगतिंप्रतिवर्तमानाम् इति शेषः । भोगः स्वर्गानुभवः ऐश्वर्यं स्वाराज्यं तयोः गतिः प्राप्तिः तां प्रति वर्तमानां काम्यविधिपराम् इति भावः । जन्म कर्मफलप्रदां स्वर्गादिफलावसाने जन्माख्य कर्मफलप्रदां क्रियाविशेष बहुलां तत्तत्फलसाधनतया पृथक्पृथगनुष्ठितैः क्रियाविशेषैः बहुलां बहुशिरस्कां यामिनां वाचं वेदवादरताः, वेदशब्दोऽत्र वेदेषु वेदान्तेष्वित्यत्रैव कर्मभागपरः तत्र ये वादाः पुरुषार्थस्वर्गादिपराः अर्थवादाः तेषु रता आसक्ताः नान्यदस्तीति वादिनः तदासक्त्या तदधिकमन्यत्फलं नास्तीति वदतः कामात्मानः काम्यन्त इति कामाः फलानि तेष्वात्मा मनो येषां ते तथोक्ताः । **स्वर्गपराः** स्वर्गःपरः निरतिशयफलत्वेन परमप्राप्यं येषां ते तथोक्ताः । कामशब्दस्य दृष्टफलपरत्वात्स्वर्गशब्दस्य अदृष्टफलपरत्वाच्च न पौनरुक्त्यं तया अपहृत चेतसां अत्र चेतश्शब्दस्तज्ज्न्यपरः तेन कामात्मान इत्यनेन न पौनरुक्त्यम् । तथा च तया वाचा अपहृतं भोगैश्वर्यान्मुख्येन अपहृतं चेतः ज्ञानं येषां, तेषां भोगैश्वर्य प्रसक्तानां तत्रैव अत्यन्तसक्तानां व्यवसायात्मिका पूर्वोक्ता बुद्धिः समाधौ समाधीयते । तस्मिन्नात्मज्ञानम् इति समाधिर्मनः तस्मिन्नविधीयते । केनचित् हेतुना न क्रियत इत्यर्थः । आत्मयाथात्म्य निश्चय पूर्वकर्म अनुष्ठान बुद्धिः तेषां कदापि न स्यात् इति बोधनाय विधीयत इति वर्तमान निर्देशः ।

ननु काम्यकर्मणां तदधिकृतानां च एवं निन्दने तद्विधायकस्य वेदस्य अप्रामाण्यं स्यात् । न च तदिष्टं प्रेक्षवद्रक्षार्थं प्रवृत्तस्य तदयोगात् विहितस्य त्यागे दोषोक्तैश्च इत्यत आह -

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ।। ४५ ।।

त्रयोगुणाः - त्रैगुण्यं चातुर्वर्ण्यादित्वात् स्वार्थेषु यङ् । गुणाश्च । सत्त्वरजस्तमांसि गुणाः सत्वं रजस्तम इति कोशात् । तत्प्रचुराश्च अधिकारिणः पुरुषाः **त्रैगुण्य**शब्देन लक्षणया उक्तास्तथा च अयमर्थः । **वेदाः त्रैगुण्यविषयाः** सप्तवरजस्तमः प्रचुरतत्तदधिकारविषया इति । तत्तद्गुणानुगुण्येन निकृष्टपुरुषार्थ साधनमेव हिततमा बोधयन्ति । अतः तदुक्तप्रकारेण अनुतिष्ठन्तः तैर्दुष्कर्म परिपाकदशेन स्थावरादि भावं प्राप्य असत्कल्पतया प्रणष्टा भवेयुः । हे **अर्जुन! निस्त्रैगुण्यो** भव । शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नमिति उक्त्या इदानीं सत्व प्रचुरस्त्वं गुणत्रय साम्यो मा भूः इदानीं सत्वप्राचुर्यहृद्योतनायैव विशुद्धवचनेन अर्जुनशब्देन सम्बोधनम् । यद्यपि **निस्त्रैगुण्य** इति गुणत्रय निषेधः प्रतीयते । तथापि नित्य सत्त्वस्थ इति विशेषण स्वारस्यात् न त्रितय निषेधो युक्तः । किन्तु संकीर्णगुणत्रयनिषेध परत्वात् अन्योन्य संकीर्ण गुणत्रयावन्नभवेत्यर्थः । सिद्धं सत्वप्राचुर्यं परित्यज्य विहिताकारणनिषिद्धकरणादिना रजस्तमसो न वर्धय इत्याकूतं **निर्द्वन्द्वः** निर्गतो द्वन्द्वेभ्यः द्वन्द्वशब्दः तन्मूल सकलसांसारिक परः निर्गतसकलसांसारिकस्वभाव इत्यर्थः । नित्यं सत्वस्थ एव सन्नित्यर्थः ।

यद्वा नित्यं रजस्तमोभ्याम् अनभिभवादस्खलितं (तिष्ठ) त्य सत्वम् । अत्र तिष्ठतीति तथोक्तः ।

ननु रजस्तमः प्राचुर्यं न वर्धय । सत्त्व प्राचुर्यमेव वर्धयेति निषेधो विधिष्टा न युज्यते । इदं तमः इदमहं वर्धयामि इति बुद्ध्या तत्र प्रवृत्तत्वात् जीवेन निषेधानुपपत्तेः सत्वतदुपाययोः अज्ञानेन विधिना तत्प्रवर्तनायोगात् इत्यत आह - **निर्योगक्षेम आत्मवानिति** । **योगः** - अप्राप्तार्थं प्रापणं, **क्षेमः** - प्राप्तार्थरक्षणम् । निर्गतो योगक्षेमाभ्यां तथोक्तः । आत्मबहिर्भूतानाम् अर्थानां प्राप्तिं प्राप्तानां रक्षणं च परित्यज्य आत्मवान् भव इत्यर्थः । अत्र आत्मशब्दो न मनः पर, किन्तु स्वरूपपरः; स्वरूपान्वेषणवान् भव इत्यर्थः । ततश्च निषेधस्य योगक्षेम निषेधपरता विधेश्च आत्मस्वरूपान्वेषणपरत्वम् इति उक्त दोष इति भावः । अथ वेदस्य वर्णाश्रमप्रवर चरणादिभेदेन तत्तत्फलाभिलाष्याधिकारि भेदेन च प्रतिनियताधिकारिविषयतया वेदोदितेषु सर्वेषु न सर्वस्याधिकारः । अतः सत्वस्थस्य तव यदहम् तदेवोपादेयम् इति उक्तार्थं स दृष्टान्तं स्पष्टमुपपादयति ।

यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ।। ४६ ।।

सर्वतः - सर्वभागावच्छेदेन **संप्लुतोदके** एतेनस्नानादि प्रयोजनान्तरार्थ परिकल्पितत्वं सूच्यते । **उदपाने** कूपतटाकादौ **यावान् अर्थः** अर्थ्यत इत्यर्थः । प्रयोजनं उपादेयं प्रयोजनं यावदित्यर्थः । अर्थात्पिपासोः इति लभ्यते । तद्वत् **विजानतो ब्राह्मणास्य** त्रैवर्णिकस्य ब्रह्मवेदः तदेव ब्राह्म स्वार्थे 'प्रज्ञादित्वात् इति अण्' अणः पणतीत्यणः, पचाद्यच्, ब्राह्मणस्य अणेः ब्राह्मणः शकन्ध्वादित्वात् पररूपं एतेन क्षत्रियाय उपदेशसमये ब्राह्मणस्य इत्युक्तिः असङ्गतेति शंका परास्ता । **सर्वेषु वेदेषु** तावानेव अर्थः उपादेय इति शेषः । अयंभावः **विजानता** इत्यनेन मुमुक्षुत्वं लभ्यते हेयोपादेयविषयविशिष्टस्यज्ञानस्य मुमुक्षोरेव सम्भवात् अतश्च हेयोपादेयांश संकीर्णेषु वेदेषु मुमुक्षोर्यदेव मोक्ष साधनं तदेव उपादेयं नान्यत् । वेदोदितत्त्वेऽपि मोक्षसाधनव्यतिरिक्तेन मुमुक्षोः अधिकार इति । नन्वेवं मोक्षसाधनेतरसकलपरित्यागे नित्यनैमित्तिकनिषिद्धातिलङ्घनप्राप्त्या कामचाररूपो दोषः प्राप्नोति । किञ्च तावानिति कियानुच्यत इत्याशंक्याह -

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूः मा ते सङ्गोस्त्वकर्मणि ।। ४७ ।।

ते नित्य सत्वस्थस्य मुमुक्षोः तव **कर्मण्येव** नित्यनैमित्तिकादि कर्मण्येव अधिकारः कर्ममात्रमेव त्वयाऽनुष्ठेयमित्यर्थः । एवकारव्यवच्छेद्यमाह - **मा फलेष्विति** । तत्संबन्धितया श्रूयमाणेषु मा अधिकार इत्यनुषज्यते । **मा** इति प्रतिषेधार्थकः शब्दः । अमानोनाः प्रतिषेध इत्युक्तेः । अत्र कर्मणीतिवत् फल इति वक्तव्ये फलेष्विति बहुवचनं कर्मस्वरूपोत्पत्तिपरे वाक्ये स्वरूपेण उत्पन्नानां कर्मणाम् अधिकारवाक्येन फलविशेष सम्बन्धवन्मोक्षाधिकारे मोक्षरूपफलस्यापि संभावितत्त्वात् तत्राप्यन्वयो मा भूदिति बोधनाय कदाचन इत्युक्त्या तदन्वय योग्यताऽपि न इति सूचितम् । कर्मफलानां बन्धरूपत्वात् मुमुक्षोः तत्रान्वयो न युक्तः । कर्मस्वरूपस्य भगवदाराधना कस्य मोक्षहेतुत्वात् तत्परित्यागोऽपि न युक्त इति हृदयम् । कर्मान्वये विशेषं वदन् अर्थान् निष्फलप्रवृत्त्यनुपपत्ति वारयति । **मा कर्मेति** कर्म च फलं च **कर्मफले** तयोः **हेतुर्मा भूः** त्वयाकर्मण्यनुष्ठीयमानेऽपि त्वं तत्र हेतुर्मा भूः तत्राहं कर्ता इत्यनुसन्धानं मा कार्षीः इत्यर्थः । तेन कर्मण्येवाधिकारः इत्यनेन विरोधः । अविरुद्धम् अनुमतंफलं भवत्येव तत्र अहमेव हेतुः इत्यनुसन्धानं मा

कार्षीः इत्यर्थः । तेन **मा फले**त्यनेन न पौनरुक्तम् उभयं भगवदायत्तम् इत्यनुसन्धस्त्येति भावः । अतः फलसङ्गकर्तृता त्यागपूर्वकं मुमुक्षुणोऽपि कर्मणोऽनुष्ठेयत्वान्नयोत्स्यामि इति कर्माननुष्ठानं तव न युक्तम् इत्याह - मा ते इति ते तव **अकर्मणि** युद्धाख्यकर्माननुष्ठाने सङ्गोऽन्वयं मास्तु । एतदेव स्फुटीकरोति ।

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ।। ४८ ।।

हे धनञ्जय! फल द्वाराबन्धकं राज्यादि **सङ्गं** यद्धायनुष्ठानद्वारा बन्धकं, बन्धुसङ्गं च **त्यक्त्वा** योगस्थस्सन् **कर्माणि कुरु -** युद्धादि कर्माण्यनुतिष्ठ ।

ननु योगनिष्ठत्वे निष्पन्दकरणस्य कथं युद्धादिकर्मकरणं तत्राह - **सिद्ध्यासिद्ध्योस्समोभूत्वा** कुर्वीत्यनुषङ्गः युद्धान्तर्गत जयाजययोः **समो भूत्वा** हर्षशोकरहितो भूत्वा **कुरु ।**

ननु उक्ता अनुपपत्तिः । तस्याः कः परिहारस्तत्राह - **समत्वं योग उच्यते ।** योगस्थ इत्यत्र योगशब्देनोच्यते । न तु अन्यत् । तथा च नानुपपत्तिरितिभावः । नन्विदं सामान्यानुसंधानं किमर्थम् उच्यत इत्यत्राह -

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ।। ४९ ।।

बुद्धियोगात् बुद्धिशब्दोऽजहल्लक्षणया तद्युक्त कर्मपरः । तथा च प्रधानफलत्यागविषयतया अवान्तर जयादि फलसिद्धि असिद्धि समत्वविषयतया च निष्पन्नो या बुद्धि योगः तद्युक्तात्कर्मण इत्यर्थः । **कर्म** उक्त प्रकार विधुरमितरत्कर्मदूरेणावरं प्रकारे तृतीया अत्यन्त निकृष्टम् इत्यर्थः । उक्त बुद्धियोग युक्तस्य कर्मणो निरतिशयपुरुषार्थ साधनत्वात् तदितरस्य कर्मणः सांसारिक दुःखमिश्रं क्षुद्रपुरुषार्थसाधनत्वात् इत्यर्थः । हि तस्मात् बुद्धौ उक्तरूपायां **बुद्धौ शरणमन्विच्छ** वासस्थानम् अन्विच्छाकर्मण्यनुष्ठीयमाने तस्यामेव बुद्धौ वर्तस्व इत्यर्थः । कर्मयोग निष्ठा हि अत्र उच्यत इति बुद्धियोगादित्यस्य बुद्धियोग युक्तात्कर्मण इत्युक्तं **फलहेतवः** फलसङ्गादिना कुर्वाणाः पुरुषाः मा कर्मफलहेतुः इत्यत्र पुरुषपरत्वस्य उक्तत्वात् **कृपणः** क्षुद्राः । 'कदर्यकृपणक्षुद्र किं पचान्नमितं पचा' इत्यमरः क्षुद्रत्वं च अत्र संसारप्राप्तिमत्वाश्चेध्यं बुद्धियुक्तास्तु जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् इति वक्ष्यते ।

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्मात् योगाय युज्यस्व योगः कर्मसु कौशलम् ।। ५० ।।

इह कर्मणि क्रियमाणे **बुद्धियुक्तः** बुद्धियोग युक्तः । **उभे सुकृतदुष्कृते** न सुकृतं न दुष्कृतं सर्वे पाप्मान इति पाप्मशब्देन निर्दिष्टे काञ्चन कालाय स निगलवत् बन्धहेतुत्वेन तुल्ये पुण्यपापे **जहाति** त्यजति **तस्मात्**पुण्यपापरूपबन्धनिवर्तकत्वात् योगाय उक्ताय बुद्धियोगाय **युज्यस्व** - सन्नह्यस्व उद्युक्तो भव इत्यर्थः । **कर्मसु** क्रियमाणेषु **योगः कौशलं** सामर्थ्यं सामर्थ्यसाध्य इत्यर्थः । 'आयुर्घृतम्' इतिवत् कार्येकारणशब्द उपचरितः । इत्थं बुद्धियोगस्य बन्धहेतुपुण्यपापनिवर्तकत्वम् उक्त्वाऽथ बन्धनिवृत्तिपूर्वकामृतत्व-प्राप्तिकरत्वमाह -

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ।। ५१ ।।

बुद्धियुक्ता - उक्तबुद्धियोग युक्ता, **मनीषिणः कर्मजं** - कर्मजन्यफलं सांसारिकफलं **त्यक्त्वा जन्मबन्धविनिर्मुक्ता** जन्मना बन्धः स्वच्छन्दत्वहानिः तया विनिर्मुक्ताः ।

यद्वा जन्मैव बन्धः तेन विनिर्मुक्ताः **अनामयं** दुःखासंभिन्नं **पदं** पद्यते गम्यत इति व्युत्पत्या प्राप्यं परमात्मस्वरूपं तत्पर्यन्तं प्राप्यस्वरूपं वा **गच्छन्ति हि** शब्दः प्रसिद्ध्यर्थः । इदं हि सर्वासु उपनिषत्सु प्रसिद्धमित्यर्थः । अथ उक्त प्रकारो हेयोपादेयविभागो युक्ता मन्निरपेक्षः तवैव स्पष्टो भविष्यतीति स चमत्कारमाह -

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ।। ५२ ।।

ते उक्त प्रकारेण कर्मणि वर्तमानस्य तव **बुद्धिः** प्रधानफलत्यागविषयावान्तर-फलसिद्ध्यसिद्ध्योः समत्व विषया च **बुद्धिः** यदा मोक्ष **कलिलं मोहः** अत्यल्पफलसङ्गहेतुभूतः पुण्यपापरूपसांसारिककर्मणा चेतो भ्रमः । तद्रूपं **कलिलं** कालुष्यम् **व्यतितरिष्यति** व्यतिक्रामति समूलं नाशयति फलाभिसन्धिराहित्येन कर्मण्यनुष्ठीयमाने कारुण्याभावात् स्वयमेव नश्यति इति भावः । तथा तथैव श्रोतव्यस्य आप्ततमेभ्यः उपादेयत्वाय **श्रोतव्यस्य** कृते **श्रुतस्य च** त्याज्यत्वाय श्रुतस्य च कृते **निर्वेदं** स्वावमाननं **गन्तासि** अनद्यतनार्थो लृडन्तशब्दः गमिष्यसि इत्यर्थः । अथ व्यवसायात्मकबुद्धिविशेषसंस्कृतस्य कर्मानुष्ठानस्य उद्देश्यं फलमाह -

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ।। ५३ ।।

श्रुतिश्रवणम् । भावोक्तिन् सर्वज्ञात्मत्तः श्रवणम् इत्यर्थः । तेन **विप्रति**पन्नविशेषेण प्रतिपन्ना सकलेतरविसजातीयनिरतिशयसूक्ष्मात्मविषय इत्यर्थः । अत एव **अचला** एकार्थ विषयत्वात् विषयान्तरसंचार रहिता ।

यद्वा **श्रुति विप्रतिपन्नेति** श्रवणनिष्पन्नत्वोक्तेः अचलेत्यस्य मननेन स्थिरीकृता इत्यर्थः । **बुद्धिः समाधे** समाधीयतेऽस्मिन्निति समाधिः मनः तस्मिन् असङ्ग कर्मानुष्ठानेन निर्मलीकृते मनसि **यदा निश्चला** तैलधारावत् अविच्छिन्न स्मृति सन्ततिः रूपास्थास्यति कुतः कैरप्रकम्प्यावर्तते । तदा **योग**मात्मावलोकनम् **अवाप्स्यसि ।** एतेन प्रथमतः शास्त्रतः सत्त्वज्ञानं ततो युक्तिभिः तस्य स्थिरीकरणं ततःस्मृतिसन्ततिरूपम् उपासनं ततः तन्मूलसाक्षात्कार इति क्रमो दर्शितः । अर्जुन उवाच इति । एवमुक्ते बुद्दिस्तास्यति इत्यनेन सूचिता या स्थितप्रज्ञताया योगसाधनभूतायास्स्वरूपं स्थितप्रज्ञस्य अनुष्ठानप्रकारं पृच्छति इत्यर्थः ।

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ।। ५४ ।।

समाधिर्मनः तत्र स्थितिः तद्वशीकरणेन अवस्थानं स्ववशत्वेन स्थापितमनस इत्यर्थः । एतादृशस्य **स्थितप्रज्ञस्य का भाषा** को वाचकः शब्दः भाष्यते अनया इति **भाषा** इति व्युत्पत्तेः तेन **किं** तत्स्वरूपम् इति पृष्टं भवति । प्रकारिभूतप्रवृत्तिनिमित्तविशिष्टस्वरूपपरस्यैव वाचकत्वात् इति द्रष्टव्यम् । **स्थितधीः** स्थितप्रज्ञः **किं प्रभाषेत किम् आसीत व्रजेत किम् ?** अत्र किं शब्दाः क्रियाविशेषणतयान्वीयमानाः क्रियाप्रकारप्रश्नपराः । ततश्च किं प्रभाषेत काऽस्य वाचिकी क्रिया किं प्रचेतका वा कायकीक्रिया किमासीत । ता च मानसीक्रिया इत्यर्थः । एवं हि अस्यकरणत्रयानुष्ठाने पृष्टे तस्य साक्षादुत्तरं वदन् तात्पर्य स्वरूपप्रश्नस्यापि उत्तरं दर्शयति इति श्रीभगवान् उवाच इत्यर्थः ।

प्रजहाति यदा कामान् सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ।। ५५ ।।

दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थिरधीः मुनिरुच्यते ।। ५६ ।।

यस्सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ।। ५७ ।।

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ।। ५८ ।।

स्थितप्रज्ञस्य हि चतुस्रोऽवस्था भवन्ति । १. यतमानावस्था, २. व्यतिरेकावस्था, ३. एकेन्द्रियावस्था, ४. वशीकारावस्था इति । ताश्च अवस्था पूर्वपूर्वापेक्षयोः उत्तरोत्तराः प्रकृष्टाः तान्युत्क्रमेण दर्शयति - **प्रजहाति** इत्यादिभिः चतुर्भिः श्लोकैः आत्मनि प्रकृष्टानुकूल्यावत्यात्मनि आत्मना मनसा तुष्टः कामान्तर प्रहाणेन तत्रैव सञ्जातालं बुद्धिः यदा यद्वा आत्मनि इत्यत्र वृत्तित्वं सप्तम्यर्थः । आत्मनिष्ठेन इत्यर्थः । आत्मप्रवणेन इति यावत् । तादृशेन आत्मना तुष्टस्सन् अन्यतो जातालं बुद्धिस्सन् इत्यर्थः । **मनो गतान्** कामानात्मव्यतिरिक्तान्यथा प्रजहाति । अपुनरंकुरं त्यजति न विवेदात्मनो गात्रं तत्सत्याह्लादमानस इत्युक्त प्रह्लादवत् इति भावः । तदा **स्थित प्रज्ञ** इत्युच्यते । अनेन वशीकार संज्ञाख्या चतुर्थी अवस्थादर्शिता । तथा च पातञ्जलं योगानुशासनसूत्रं दृष्टानुश्रविक विषय वितृष्णस्य वशीकारसंज्ञा वैराग्यम् इति द्रष्ट विषये ऐहिक फले अनुश्रविक विषये आमुष्मिक फले च...... वितृष्णस्य विगताभिलाषस्य वैराग्यं विरागता सवासन रागत्यागः वशीकार संज्ञा इति तदर्थः । दुःखेषु इति दुःख शब्दोऽत्र लक्षणया तन्निमित्तपरः । प्रियविश्लेषादि दुःखनिमित्तेषु तदुत्पादनप्रवृत्तेष्वपि इत्यर्थः । अनुद्विग्नमना अचलित मनाः 'ओ वीचीभयचलनयोः' इति धातोः उभयार्थत्वेऽपि भयस्य पृथगुक्तेश्चलनमेव अत्रार्थः । सुखेषु विततस्पृहः अत्रापि पूर्ववत् सुखशब्दः तन्निमित्तपरः । तथा तन्निमित्तेषु प्रियेषु सन्निहितेष्वपि विगतस्पृहेति कदा कदा समेष्यन्ति इति वाञ्छारहितः वीतराग भयक्रोधः वीतानि वृत्तारागभयक्रोधाः यस्य स तथोक्तः । **रागः** प्राप्तविषयाभिलाषः प्रियविश्लेषाप्रियागमसूचक निमित्तज्ञानजन्याङ्कोपाधिहेतुः अवस्था विशेषोभयं तादृशनिमित्त चेतनान्तर्गत दुःखहेतुस्वमनोविकारः **क्रोधः** इति विवेको द्रष्टव्यः । एतादृशो मुनिरात्ममननशीलः **स्थितधीः** उच्यते अयमपि स्थितप्रज्ञा इत्युच्यत इत्यर्थः । इयं तृतीया एकेन्द्रियावस्था अस्याम् उद्वेगस्पृहादिविरहसाम्येऽपि औत्सुक्यमात्रक्षमवासना शेषस्य भस्मच्छन्नाग्निवत् अवस्थिततत्वात् पूर्वोक्तावस्थातो न्यूनता । यथोक्तं योगशास्त्रे यत्र स्याद्वासना गूढास्ते केन्द्रिय पदा परेति । **यः सर्वत्रेति । यः** पुरुषः **सर्वत्र**

स्नेहयोग्येषु पुत्रादिषु अनभिष्वङ्गः प्रवृत्तिपर्यन्तव्यापाररहितः तेषु उदासीन इत्यर्थः । शुभं च अशुभं च **शुभाशुभं** सर्वोद्वन्द्वो विभाषैकवत् भवति इत्येकवद्भावः । तत्तत् प्रियाप्रियसंश्लेषरूपं प्राप्यापि **नाभिनन्दति** अभितो नन्दनम् **अभिनन्दनम्** अभिनन्दनं तदनुबन्धिपर्यन्तं नन्दनम् इत्यर्थः । **द्वेष्टि तस्य** प्रज्ञाप्रतिष्ठिता । सोऽपि स्थितप्रज्ञ इत्यर्थः । इयं हि व्यतिरेकसंज्ञा द्वितीयावस्था । पृथक्कृत्य धिया निपत्यान्वत्वे समवस्थिता । विपाकावसरः प्रोक्ता व्यतिरेकाभिधापरेति तल्लक्षणम् । अत्र प्रियेषु उदासीनः दैवात् आगत प्रियसंश्लेविश्लेषयोश्च अभिनन्दनादि विरहित इत्युक्त्या उक्तावस्था सूचनात् । अत्र केषाञ्चित् पाकस्यापि सम्भवात् ततोऽपि न्यूनता यदा संहरत इति । अनेन वार्धक रोगाद्यशक्तिप्रयुक्त निवृत्तिव्यावृत्तिः उपसंहरण प्रकारं सदृष्टान्तमाह - **कूर्म** इति । **कूर्मः** यथा बहिर्मुखान्यङ्गानि उपसंहरति तथा इत्यर्थः । कथम् उपसंहार इत्यत आह - **सर्वशः** इति । सर्वप्रकारैः विषयदोषदर्शनादिहेतुप्रकारैः विलोकन भाषण विलास-परिहासादिनिवृत्तिप्रकारैश्च तदेत्यध्याहार्यं तदेव इत्यर्थः । न तु विषयानुभवनन्तरम् इति भावः । तस्य **प्रज्ञा पतिष्ठिता** सोऽपि स्थित प्रज्ञ इत्यर्थः । इयं च **यतमान** संज्ञाप्रथमावस्था तदप्युक्तम् -

'प्रत्याहृत्येन्द्रियग्राममर्थेभ्यो मन आत्मनि ।
योक्तुं यतेत यत्रासौ यतमानाभिधा भ्रमा' ।।

इति प्रथमं बाह्येन्द्रियाणि विषयेभ्यः **प्रत्याहृत्यमन** आत्मन्यवस्थापयितुं यतेत इयं यतमानसंज्ञा । अथ बलादुपसंहृतान्यपि बाह्येन्द्रियाणि सावशेष रागद्वेषादि कलुषितं मनः पुनः पुनरेव प्रेरयेत् स्वयञ्चात्मनि स्थातुं न शक्नुयात् । अतः पक्वावशिष्टरागद्वेषादीन् औदासीन्याऽनभिनन्दनक्रमेण पचेत् इयं व्यतिरेक संज्ञा । ततः पक्केऽपि दोष शेष अनादिविषयवासनानुभवभावितविषयवासनामात्रं आत्मानम् अनुबुभूषन्तीं शेमुषीं प्रति बिभित्सेत् । तत्र निरतिशयानन्दमात्मानं पुरुषद्वेषिण्या योषित इव युवानं प्रदर्श्य क्रमादात्मनि तोषमुत्पाद्य तेन तोष विशेषेण दवीयसा च स्मृति विदूरेण कालेन बाह्य विषयवासना जालम् उन्मूलयितुम् इहेत सेयमेकेन्द्रिय संज्ञा । या पुनः समस्त वासनाविलयादौत्सुक्य-मात्रस्यापि अभावेन परमवैराग्य दशा सा वशीकार संज्ञा ज्ञाननिष्ठा काष्ठा सा योगाख्यमात्मावलोकनं साधयति तच्चावलोकनं परं परया निरतिशयपुरुषार्थ भूतामृतत्वाय कल्पत इति । एवं बोधनाय अवस्थाचतुष्टय प्रदर्शनम् । 'तेनैवस्थित प्रज्ञस्य का भाषा'? इत्यादिना उक्तस्वरूप विषयकप्रश्नचतुष्टयस्यापि उत्तरम् अर्थात् उक्तं भवति ।

आत्मरतित्वं तस्य स्वारूपं आश्चर्यवद्वदति तदेक भाषणं तस्य भाषणं तदनुसन्धानानुकूलमासनं आत्मानं तस्यासनं तत्प्राप्त्यर्थप्रवृत्तिरूपं तस्य प्रजनं च इति इदानीम् उक्तायाः चतुर्विधा या ज्ञाननिष्ठायाम् दुष्प्रापता तत्प्राप्त्युपायं च आह -

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ।। ५९ ।।

अत्र आहारशब्दो न भोजन परः, 'युक्ताहार विहारस्य' इत्याहारस्य योगाङ्गत्वोक्त्या तन्निवृत्त्ययोगात् अतो विषय पर, प्रयुक्तश्च आहारशब्दो विषयपरत्वेन मोक्षधर्मे - 'दशैतानीन्द्रियाख्यानि द्वाराण्याहारसिद्धये' इति । अतो निराहारस्येत्यस्य विषयेभ्यः प्रहाहृतेन्द्रियस्य इत्यर्थः । देहिनः विषयाःरसवर्जं निवर्तन्ते रसो रागः विषयाणां प्रस्तुतत्वात् विषयरागो रस शब्दार्थः । विषयरागो न निवर्तत इत्यर्थः । रसोऽपि अस्य प्रत्याहृतेन्द्रियस्य परं सुखरूपविषयेभ्यः अतिशायित सुखरूपम् आत्मानं दृष्ट्वा स्थितस्य इति शेषः निवर्तत इति । एवम् आत्मदर्शनेन विषयरागस्य निवृत्तिः उक्ता । अथ अनिवृत्ते विषयरागे दुर्जयानि इन्द्रियाणि इत्युच्यते ।

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ।। ६० ।।

विपश्चितः - शास्त्रजन्य हेयोपादेय विवेकवतः । अत एव यततोऽपि यतमानस्यापि **प्रमाथीनि** बलवन्ति, **इन्द्रियाणि** बाह्येन्द्रियाणि, **मनः प्रसभम् -** बलात्कारेण, **हरन्ति -** स्ववशं कुर्वन्ति । ततश्च आत्मदर्शनविषयरागनिवृत्त्योः परस्परसापेक्षत्वात् ज्ञाननिष्ठा दुष्प्रापेति हृदयम् ।

नन्वेवं परस्पराश्रयदूषितेऽर्थे साध्यसाधनभावः । पूर्वं कथम् उपदिष्ट इत्याशंक्याह -

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ।। ६१ ।।

तानि विषयानुरागयुक्ततया दुर्जयानि **सर्वाणि इन्द्रियाणि संयम्य** विषयस्पर्शो यथा न स्यात् । तथा विनिवार्यमत्परः । मदेकप्रवणः । शुभाश्रये मयि निवेशित चेताः युक्तस्समाहितः विषयापेक्षयाऽपि सुखरूपं माम् अवेक्ष्य चित्तसमाधानं कुर्वन् इत्यर्थः । **आसीत** वर्तेत शुभाश्रयमदवलम्बनेन चित्तसमाधाने कृते उपाय विरोधिसर्वकर्म निवृत्या

मनोनैर्मल्ये जाते निर्मलं मन आत्मदर्शनं विनैव इन्द्रियाणि स्ववशानि करोति । अतो नान्योन्याश्रयदोष इति पूर्वोक्त साध्यसाधनभावः उपपन्न इत्याह - **वशे हि यस्येन्द्रियाणि वर्तन्त** इति शेषः । **तस्य प्रज्ञा प्रतिष्ठिता** इत्यन्वयः । एवं अन्योन्याश्रयदोषाप्रसक्तिप्रकारं उपदिश्य पूर्वोक्त अन्योन्याश्रयफलभूतायाः इन्द्रियजयात्मदर्शनयोः असिद्धेः प्रकारमाह -

ध्यायतो विषयान्पुंसस्सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ।। ६२ ।।

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।। ६३ ।।

विषयान् शब्दादीन् **ध्यायतः** शुभाश्रये मयि मनोऽनिवेश्य निमीलनादि मात्र कृत विषयवैमुख्यस्य अनिवृत्तरागतया विषयध्यानं कुर्वत इत्यर्थः । **पुंसः** पुरुषस्य, **तेषु** - विषयेषु, **सङ्गः उपजायते** - अतिप्रवृद्धो भवति । **सङ्गात्कामः सञ्जायते** - सङ्ग एव यां विपाकदशाम् आपन्नः विषयभोगं विनाऽवस्थान वारयति । तादृश्यवस्था जायत इत्यर्थः । **कामात्तस्मात् क्रोधोऽभिजायते** । कामे वर्तमाने विषये च सन्निहिते जायमानः क्रोधः कृत्याकृत्यविवेकान्धतया तादृशायाम् वर्तमानान्मित्रामित्रविभागमन्तरेण सर्वान्प्रति जायते । तस्मात्**क्रोधात् संमोहो** भवति समित्येकीकारे एकीकृतो मोहः सम्मोहः । कृत्याकृत्यविवेकात्मा मोहः इत्यर्थः । **संमोहात्तस्मात्स्मृतिविभ्रमः** प्रस्तृतस्मर्तव्य विषयेस्मृतिभ्रंशो भवति । प्रारब्धे इन्द्रियजयादिके प्रयत्ने विस्मृतिर्भवतीत्यर्थः । **स्मृतिभ्रंशात्** । **तस्माद्बुद्धिनाशः**, आत्मदर्शनोपायानुष्ठानाध्यवसायरूपाया बुद्धेः नाशो भवति इत्यर्थः । **बुद्धिनाशाच्च प्रणश्यति** - प्रणष्टो भवति । अत्र नित्यस्यात्मनो नाशो नाम असत्कल्पत्वं, **तच्च** यथावस्थिताकारानुपलम्बः । स च देहात्माभिमानादिकृतः । तदभिमानश्च देहसम्बन्धरूप-संसारकृत इति प्रणश्यति इत्यस्य संसारनिमग्नो भवति इत्यर्थः । अथ तानि सर्वाणि संयम्य इत्युक्तार्थकरणे परस्पराश्रयपरिहारप्रकारः परमप्रयोजनभूतसंसारनिवृत्तिश्च प्रपंच्यते ।

रागद्वेषविनिर्मुक्तैरिन्द्रियैः विषयांश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ।। ६४ ।।

रागद्वेषविनिर्मुक्तैः रागद्वेषाभ्यां निर्मुक्तैः उक्त रीत्या मनसः शुभाश्रयनिवेशनेन **नैर्मल्ये** सति अयत्नावेव रागद्वेषाभ्यां विनिर्मुक्तैः इत्यर्थः । अत एव आत्मवश्यैः **इन्द्रियैः विषयान् स्वस्वविषयांश्चरन्** - भक्षयन् तिरस्कुर्वन् अनादरं कुर्वन् इति यावत् । 'चर -

गतिभक्षणयोः' इति हि धातुः । अत एव **विधेयात्मा** स्वाधीनमनास्सन् **प्रसादमधिगच्छति** । अन्तःकरणनैर्मल्यं प्राप्नोति प्रसन्नचेतस इति हि वक्ष्यति ।

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठति ।। ६५ ।।

अस्य पुरुषस्य **प्रसादे** सति इति शेषः । मनो नैर्मल्ये निष्पन्न इत्यर्थः । **सर्वदुःखानां** दुःखाज्ञानमलधर्माः प्रकृतेः इत्युक्तरीत्या प्रकृतिसम्बन्धोपाधिकानां सर्वेषाम् **दुःखानां हानिः** निवृत्तिः **उपजायते** । प्रतिबन्धाभावात् शीघ्रमेव जायते । तदेव सहेतुकमाह - **प्रसन्नेति** हि यस्मात्प्रसन्न **चेतसः** प्रसन्नं च तच्चेत इति । समानाधिकरणसमासः । आत्मावलोकनविरोधिदोषरहितस्य मनस इत्यर्थः । **आशु** - शीघ्रमेव **बुद्धिः** - विविक्तात्मविषया बुद्धिः **पर्यवतिष्ठति** । मनः प्रसादस्य सर्वदुःख हानि हेतुत्वम् आत्मदर्शनहेतुत्वात् उपपद्यत इति भावः । अथ 'बुद्धिनाशात् प्रणश्यति' इत्युक्तार्थं विवृण्वन् परमप्रयोजनस्यापि अलाभप्रकारमाह -

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ।। ६६ ।।

अयुक्तस्य युक्त आसीत इति पूर्वोक्त प्रकारेण मनोमय्यनिवेश्य स्वयत्नेन इन्द्रिय नियमने प्रवृत्तस्य **बुद्धिः नास्ति** । वर्तमान निर्देशोऽतिचिरकालप्रयासेनाऽपि असिद्धिं द्योतयति । न चेत् अत्र च अभिन्नक्रमः । एवम् उत्तरत्र **अयुक्तस्य भावना** च बुद्धिफलभूतात्मभावना च नास्ति । **अभावयतः** आत्मभावनाम् अकुर्वतः शान्तिश्च, विषयस्पृहा शान्तिश्च(न) नास्ति। **अशांत**स्यानिवृत्तविषयस्पृहस्य कुतः? **सुखं** - निरतिशयसुखप्राप्तिः कुतः? इत्यर्थः । अनेन प्रत्याहारादिषु पूर्वपूर्वाभावे उत्तरोत्तराभाव उक्तः । अथ इन्द्रियनिग्रहाभावे बुद्ध्यभावस्य पूर्वोक्तस्य प्रकारविशेषमाह -

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ।। ६७ ।।

इन्द्रियाणाम् - बाह्येन्द्रियाणाम्, **चरताम्** - स्वस्वविषयेषु इति शेषः । स्वस्वविषयेषु औन्मुख्यम् उपगच्छतां सताम् इत्यर्थः । **अनु** औन्मुख्यम् अनुसृत्य **यन्मनः विधीयते** - पुरुषेण अनुवर्त्यते । **तत्** - तन्मनः **अस्य** - पुरुषस्य, **प्रज्ञां** - विविक्तात्मविषयाम् बुद्धिम्, **हरति** - अक्षिसंहितदेशं विघटय्य अनभिसंहितदेशं प्रापयति

इत्यर्थः । **विषयप्रवणम्** करोति इति भावः । तत्र अनुरूपं दृष्टान्तपर आह - **वायुः** इति । **वायुः** - प्रतिकूलो वायुः. **अम्भसि** - नीयमानाम् नावमिव यथा मार्गेण नीयमानां **नावंप्रतिकूलो** वायुः । प्रसह्य स्थलान्तरं नयति तद्वदित्यर्थः । अथ प्रक्रान्तम् **इन्द्रियनिग्रहोपदेशम्** उपसंहरति ।

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ।। ६८ ।।

इन्द्रियानुविधायिनो मनसः प्रज्ञा प्रतिष्ठा विरोधित्वं तस्मात् तस्मादित्यर्थः । **यस्य शुभाश्रये** मयि विन्यस्त मनसो यस्य **इन्द्रियाणि** चक्षुरादीनि **इन्द्रियार्थेभ्यः रूपादिविषयेभ्यः** सर्वशः सर्वप्रकारेण **निगृहीतानि** प्रत्याहृतानि तस्य **प्रज्ञा प्रतिष्ठिता** । **पूर्ववदर्थः** । एवम् उपायम् उपदिश्य तत्फलम् उपदिशति ।

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।। ६९ ।।

सर्वभूतानां या निशा सर्वभूत साधारणीया निशा इत्यर्थः । प्रसिद्ध निशाया **देशकालादिभेदेन** विलक्षणत्वात् न सर्वभूतसाधारणमिति । तद्वैलक्षण्य बोधनाय सर्वभूतानाम् इत्युक्तिः । निशावत् अप्रकाशमानत्वान्निशा इत्युक्तिः । आत्मविषया बुद्धिः सः इत्यर्थः ।

यद्यपि बुद्धेः स्वप्रकाशत्वात् न अप्रकाशमानत्वम् उपपादयति । तथाऽपि अप्रसरणसम्भवात् तदुपपत्तिः । **तस्यां निशायां संयमी** इन्द्रियनिग्रहवान् जागर्ति **प्रबुद्धो** भवति । आत्मानम् अवलोकयन् आस्ते इत्यर्थः । संयमोद्धारणे ध्यान समाधीनां **समुदितत्त्वम्** । पुनः त्रयमेकत्र संयमयति इति पातञ्जलं सूत्रं यस्यां बुद्धिप्रकरणत्वात् **यच्छब्दो बुद्ध्यर्थः** । यस्यां बुद्धौ निशायां **भूतानि** - सर्वभूतानाम् इति समास निमग्नोऽपि **सर्वशब्दो निष्कृष्टो**ऽन्वीयते । सर्वाणि भूतानि इत्यर्थः । **जाग्रति** - प्रबुद्धानि भवन्ति । **सा - बुद्धिः** शब्दादिविषयाबुद्धिः इत्यर्थः । सर्वभूतानि इत्यसंयविषयत्वोक्त्या तस्या एव **ग्रहणौचित्यात्** पश्यत आत्मानमिति शेषः । **निशा** - निशेव अप्रकाश अब्रह्मज्ञस्य आत्मन्येव **दृष्टिः न कुत्सितेषु** विषयेष्विति भावः । एवं शब्दाद्यदशनिपर्यवसितात्मदर्शनमयीं सिद्धिम् **उक्त्वा तस्याः** अदूरविप्रकृष्टां शब्दादि विषयदर्शनेऽपि अविकारभावरूपाम् अवस्थाम् आह -

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ।। ७० ।।

आपूर्यमाणम् इति न प्रविशन्तीभिः अद्भिः आपूर्यमाणम् इति विवक्षितम् । न तु स्वेनैव पूरणं प्रवेशाप्रवेशयोः एकरूपत्वम् इत्यर्थः । दाष्टान्तिकनिष्ठस्य आत्मावलोकन तृप्तेः प्रति निर्देशरूपत्वात् अचलप्रतिष्ठं सीमातिलङ्घनादि हेतुभूतबुद्धिहासरहितं समुद्रं आपः न आधेया आपः **यद्वत्प्रविशन्ति** समुद्रप्रयत्नं विनैव यथा प्रविशन्ति इत्यर्थः । **तद्वत् कामाः** काम्यन्त इति कामाः शब्दादिविषयाः सर्वेऽपि यं प्रविशन्ति यं संयमिनं प्रविशन्ति इन्द्रियद्वारा ज्ञानविषयतां यान्ति **स शान्तिम् आप्नोति** । स एव शान्तिम् आप्नोति ।

अयं भावः यथा न आधेयानाम् अपामयत्नतः प्राप्तावपि यथा समुद्रो विकारं न प्राप्नोति । तथा शब्दादिविषयाणाम् अयत्नादिन्द्रियसम्बन्धेऽपि निरतिशय स्वात्मानन्दानुभवनिमग्नतया नश्वरदुःखमिश्रविषयानन्द बिन्दुषु न सज्जत इति । कामाकामायितुं शीलम् अस्य **कामकामी** शान्तिं नाप्नोति इत्यर्थः । किं कामकामिनः सर्वदा शान्तिः न स्यात्? इत्याशंकां निराकुर्वन्नाह -

विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ।। ७१ ।।

यः पुमान् सर्वान्कामान् **विहाय** कामशब्दस्य पूर्वपद तत्र कामेषु **निस्स्पृहः** । अदर्शने स्पृहा रहितः निर्मम उपस्थितेषु ममता रहितश्च **निरहंकारश्च** अनात्मन्यात्माभिमानोऽहंकारः तद्रहिता च अतिवर्तते । **स शान्तिम् अधिगच्छति** । आत्मानं दृष्ट्वा शान्तिम् अधिगच्छति इत्यर्थः । परमप्रयोजनतया प्रकृतां शान्तिम् उपसंहरन् अध्ययनार्थं निगमयति ।

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकाले तु ब्रह्म निर्वाणमृच्छति ।। ७२ ।।

एषा पूर्वोक्तप्रकारा **ब्राह्मी** ब्रह्मप्रापिका **स्थितिः** । नित्यात्मज्ञानपूर्वका असङ्ग कर्मणि निष्ठापूर्वोक्तेति शेषः । एनामुक्तप्रकारविशिष्टां एतां स्थितिं **प्राप्य** - लब्ध्वा **न विमुह्यति** - संसृतिहेतुं मोहं न प्राप्नोति । **अस्यां स्थितौ** पूर्वोक्तायां असङ्ग कर्मनिष्ठायां स्थित्वा सम्बद्ध्य कदा **अन्तकाले** - तु अन्तिमे वयसि **निर्वाणं** - सुखरूपं ब्रह्म **ऋच्छिति** - गच्छति अनुभवति इत्यर्थः ।।

।। श्रीशैलबुक्कपट्टण येन्नाच्चान् दास विरचितं अध्यायः
द्वितीयः श्रीगीताभाष्यरहस्यार्थसङ्ग्रहोवृत्तः ।।

।। शुभमस्तु ।।

तृतीयाऽध्यायः

[कर्मयोगः]

इत्थं परब्रह्मप्राप्तिहेतुभूतां तदैकान्तिकात्यन्तिकभक्तिं वक्तुं तदङ्गभूतं प्राप्तुःआत्मनो याथात्म्यदर्शनं तन्नित्यताज्ञानपूर्वकासङ्गकर्मनिष्पाद्यम् उक्तम् । अथ तत्साधनं प्रपंच्यते । अर्जुन उवाच - प्रागेव समरव्यापारविरतिवासना यन्त्रितः प्रवृत्तिनिवृत्तिसाधनयोः कर्मयोग ज्ञानयोगयोः उपदिष्टयोः निवृत्युपदेशान्तरस्सन् अर्जुन उवाच इत्यर्थः ।

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ।। १ ।।

व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ।। २ ।।

हे जनार्दन! हे केशव! तव कर्मणो **बुद्धिः ज्यायसि मता** संमता चेत्, **घोरे कर्मणि मां किं नियोजयसि इत्यन्वयः** । अयं भावः । कर्मणो ज्ञाननिष्ठाहेतुत्वं ज्ञाननिष्ठायाः आत्मावलोकन साधनत्वं च उक्तम् । ततश्च बुद्धेः कर्मणस्सकाशात् ज्यायस्त्वं भवदभिमतम् इति प्रतिभाति । एवं चेत् **घोरे** आत्मावलोकनविरोधितया भयङ्करे सकलेन्द्रिय व्यापाररूपेकर्मणि मां प्रपन्नं, **मां किं नियोजयसि** - किमर्थम् नियोजयसि । किं प्रयोजनार्थं परिपूर्णस्य तव तद्विरहात् नाऽपि मदनुग्रहार्थं निकृष्टे प्रेरणेऽनुग्रहालाभात् नाऽपि सांसारिकफलप्रदानार्थं जनार्दनेति समाख्यावत्तया जनिनिरासकस्य तव तदयोगात् नाऽपि भूभारभूत धार्तराष्ट्रादि वधंनिमित्तीकृत्यमद्विलम्भार्थम् । ब्रह्मरुद्रादि पितुः केशवस्य तव तदयोगात् इति । व्यामिश्रेण व्याघात ग्रस्ते न सर्वेन्द्रियव्यापारोपरतिरूपा या ज्ञाननिष्ठायाः तद्विपर्ययरूपं कर्म साधनमिति वाक्यं वा व्याघात ग्रस्तं तेन मे मम बुद्धिं मोहयसि इव प्रतिभासि । बुद्धिवैकल्य सम्पादकतया मोहो न द्योतनाय मां मोहयसि इति वक्तव्ये मे बुद्धिं मोहयसीत्युक्तम् । परमकारुणिकस्त्वं न मोहयसि । अहं तु मुह्यामि इति बोधनायेव शब्दः । तत् तस्मात् **'एकं वद** - एकरूपं वाक्यं वद' अव्यामिश्रीं वाक्यं वद इत्यर्थः । निश्चित्येकं वदेति न अन्वयः सर्वज्ञस्य भगवतः प्रागपि अनिश्चयाभावात् । किन्तु उत्तर त्रयेन इत्यनेन येन वाक्येन निश्चित्याहं श्रेयः प्राप्नुयां निस्सन्दिग्धम् अनुष्ठाय श्रेयः प्राप्नुयामि इत्यर्थः । **श्रीभगवानुवाच** - एवं प्रश्ने कृते पूर्वोक्तस्यैव असंकीर्णरूपतां प्रकटयन् भगवानुवाच इत्यर्थः ।

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ।। ३ ।।

अस्मिन् प्रत्यक्षाधिगतविचित्राधिकारवतिलोके **मया** अस्पष्टभ्रम प्रमादविप्रलम्भेन उपदेष्ट्रा तत्तदधिकारभेदवादिना **द्विविधा** ज्ञानकर्मविषयतया द्विप्रकारा **निष्ठा पुरा** पूर्वस्मिन् अध्याये **प्रोक्ता -** प्रकर्षणोक्ता यथाधिकारं विभज्यैव उक्ते इत्यर्थः । परस्परविरुद्धानामपि धर्माणाम् अधिकारिभेदेन व्यवस्था युज्यते । यथा अनघस्य तव अपवर्गसाधने कर्मण्यधिकारः । अनैवंभूतस्य काम्यकर्मणि तथानघमात्रस्य **कर्मयोगे** अधिकारः । **अनघ**तराणां तु **ज्ञानयोग** इति । एतत्तात्पर्यसूचनायैव अस्मिन् श्लोकोऽनघेतिसम्बोधनं तामेव व्यवस्थां स्फुटयति । **ज्ञानेति । संख्याबुद्धिः** विविक्तात्मविषयाबुद्धिः इत्यर्थः । तत्सम्बन्धिनः सांख्याः प्रत्ययार्थः सम्बन्धश्च योग्यता । एवं **योगिनाम्** इत्यत्रापि प्रत्ययार्थः सम्बन्धो ज्ञेयः । ततश्च सांख्यानां ज्ञानयोगार्हाणां विषयाव्याकुलबुद्धीनां ज्ञानयोगेन **निष्ठा प्रोक्ता । योगिनां** योगशब्दः कर्मयोगपरः कर्मयोगार्हाणां विषयव्याकुलबुद्धीनां **कर्मयोगेन निष्ठा प्रोक्ता** इत्यर्थः ।

ननु मोक्षेच्छैव खलु कर्मयोगे पुरुषं प्रवर्तयति सा यद्युत्पन्ना किमव्यवहिते ज्ञानयोगेन प्रवर्तयेरीत्या शङ्कायामाह -

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ।। ४ ।।

कर्मणां शास्त्रीयकर्मणां अनारम्भा**त्पुरुषः नैष्कर्म्यं -** निष्क्रान्तः कर्मयोगो यस्मात् स तथोक्तः पर्यवसित कर्मयोग इत्यर्थः । तस्य भावो नैष्कर्म्यं तत् ज्ञाननिष्ठाम् इत्यर्थः । नाऽश्नुते न प्राप्नोति । तदेव उपपादयति । **न च** इति **सन्यसनादेव -** कर्मसन्यासादेव **सिद्धिं** नैष्कर्म्यं **समधिगच्छति** सम्यक् प्राप्नोति । अत्र नैष्कर्म्यम् इत्यस्य आनुषङ्गे सम्भवत्यपि पुनः सिद्धिशब्दं प्रयुञ्जतोऽयम् भावः । अनभिसंहितफलभगवदाराधन-वेषकर्मसाध्यसिद्धिरूपं हि नैष्कर्म्यं तच्च कारणभूतकर्माभावे कथं स्यात्? अनभिसंहितफलकर्मानुष्ठानाभावे निश्श्रेयसावयिकभगवत्प्रीत्यभावः । तदभावाच्च पापसञ्चयानुपरमः तदनुपरमे च रजस्तमोमयमलानपायः ततष्टा रागद्वेषादीनां दीर्घायुष्वन्तेषु च जीवत्सु न इन्द्रियाव्याकुलता । ततश्च न प्रत्यगर्थ निष्ठा इति तादृशकर्मनिष्ठापरित्यागे ज्ञाननिष्ठा न सेत्स्यति इति । एतत्तात्पर्येणैव समधिगच्छति इति प्रयोगः परमपुरुषाराधनवेषस्य कर्मणस्त्यागे ज्ञाननिष्ठाया दुस्सम्पाद्यत्वमेव दर्शयति ।

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ।। ५ ।।

अत्र प्रथमो हि शब्दः पूर्वोक्तोपपादनार्थः । द्वितीयस्तु **एतच्छेकोक्तोपपादनार्थः ।** प्रकरणारम्भोक्तम् । लोकेऽस्मिन्निति पदद्वयमनुवर्तते । विचित्राधिकारेऽस्मिन्लोके कश्चित् कोऽपि पुरुषः जातु दिवसादिस्थूलकाले वा क्षणमपि ततोत्यल्पतरकाले वा अकर्मकृत् कर्माकुर्वाणः । न हि तिष्ठतिप्रलयव्यतिरिक्तकाले सर्वदापि किञ्चित्कर्मकुर्वाणा एव तिष्ठति इति भावः । कुत एवमित्यत्राह - **कार्यतेहीति । हि** यतस्सर्वः सर्वोऽपि न किञ्चित्करोमि इति व्यवसाययुक्तोऽपि इति द्योतनाय **सर्व**शब्दः, **प्रकृतिजैः** प्रकृतिगतै**र्गुणैः** पुण्यापुण्यकर्मानुगुणप्रवृत्तिभिः सत्वादिभिः कर्मवश्यागुणा ह्येते इति अन्यत्र सत्वादीनांकर्मवश्यत्वोक्ता स्वोचितं **कर्म** प्रत्यवशः **कार्यते** प्रवर्त्यते । ततश्च गुणपरतन्त्रतया कर्मयोगं विना ज्ञानयोगो दुश्शकः । गुण प्रवर्तके प्राचीनकर्मणः कर्मयोगो निवर्तकः । ततश्च तेन ज्ञानयोगप्रवृत्तो विना मिथ्याचारो भवति इत्याह -

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ।। ६ ।।

पुरुषः **कर्मेन्द्रियाणि** वागादीनि, **संयम्य** - विषयेभ्यो निरुध्य, **मनसा -** इन्द्रियार्थान् शब्दादीन् **ज्ञानेन्द्रियार्थान् स्मरन् -** कर्मानुष्ठानाभावेनानिवृत्तपापतया अजितबाह्यान्तःकरणः तानेव ध्यायन्वि**मूढात्मा -** विमूढ आत्मविमुखी कृत **आत्मा** मनो यस्य स तथा **आस्ते -** वर्तेत **स मिथ्याचार उच्यते ।** सङ्कल्पित ज्ञानयोगविपरीताचारतया बुद्धिनाशात्प्रणश्यति इत्युक्तरीत्या विनष्टो भवति इत्यर्थः ।

एवम् आदावेव ज्ञानयोगमारुरुक्षुं विनिन्द्य कर्मयोगिनं प्रशंसति ।

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तस्स विशिष्यते ।। ७ ।।

मनसा आत्मावलोकन प्रवृत्तेन **मनसा इन्द्रियाणि** श्रोत्रादीनि ज्ञानेन्द्रियाणि **नियम्य** आत्मावलोकन विरुद्धेभ्यः शास्त्रीये कर्मणि **नियम्य -** अवस्थाप्य **कर्मेन्द्रियैः -** स्वत एव कर्म प्रवणैः **इन्द्रियैः कर्मयोगमसक्तस्सन्** फलसङ्गादिरहितस्सन् **आरभते -** स विशिष्यतो असम्भाव्यमानप्रमादत्वेन ज्ञानयोगनिष्ठात् **विशिष्यते ।** अथ सुकरत्वनिष्प्रमादत्वदुस्त्यजेत्वादि हेतुभिः कर्मयोगस्यैव ज्यायस्त्वं दर्शयन् ज्यायसी चेत् कर्मण इत्यादेः साक्षात् उत्तरमाह -

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।। ८ ।।

नियतमिति कर्मविशेषणं, तथा च नियमो व्याप्तिः अविनाभावः । तेन विशिष्टं नियतम् अभ्यस्त विषयतयाऽनादिवासनया विना भूतम् इत्यर्थः । अनेन सुकरत्वमुक्तं तादृशं **कर्मत्वं** - प्रकृतिसंसृष्टस्त्वं **कुरु** अनुतिष्ठ कुतः हि यतः **अकर्मणः** - अकर्म कर्मभिन्नं ज्ञानम् । अवधौ पञ्चमीज्ञाननिष्ठायाः कर्मज्यायः अतिशयितं तदेव ज्यायस्त्वमुपपादयति - **शरीरेति ।** अकर्मणः न विद्यते कर्म । कर्मयोगो यस्य असावकर्मा तस्याकर्मणः ज्ञाननिष्ठस्य विनैव कर्मयोगं केवलज्ञाननिष्ठत्वद्योतनाय अकर्मण इत्युक्तिः । **ते** तव **शरीरयात्रापि** ज्ञाननिष्ठोपकारिणी शरीरयात्रापि **न प्रसिद्ध्येत्** - न लभ्येत ।

ननु ज्ञाननिष्ठस्य शरीरयात्रायाः असिद्धा झडिति बन्धनिवृत्या इष्टसिद्धिः इति चेत् मैवम्; न हि साधनानुप्रवेशमात्रात्फलसिद्धिः । किन्तु साधनपूर्त्यैव सा च पूर्तिः नर्त्रिचतुरदिन लभ्या येन त्वदुक्तरीत्या इष्टं सिद्ध्येत् । अपि तु चिरकालसाध्यातावन्तं कालं शरीरं रक्षणीयं तदभावे तु तन्नस्यादेव एतदभिप्रायेणैव न प्रसिद्ध्येत् इति 'प्रा'इत्युपसर्ग प्रयोगः। न च लौकिककर्मणा संपादित द्रव्यै देहधारणसम्भवात् ज्ञाननिष्ठस्य तदर्थमपि न कर्मयोग आवश्यक इति शङ्क्यम् । 'आहार शुद्धौ सत्त्वशुद्धिः' इति श्रुत्या 'ते त्वघं भुञ्जीत' इति वक्ष्यमाणपर्यालोचनया च न्यायार्जिते नैव देहधारणस्य कर्तव्यतया उक्ताशङ्का सिद्धेः । एतदभिप्रायेणैव धारणमित्युक्तिं विना यात्रा इत्युक्तम् ।

नन्वेवं कर्मबन्धनस्य अनिवृत्तिः स्यात् कर्मणामहंकार - ममकारादिमनोवृत्तिगर्भत्वेन इन्द्रियव्याकुलता सम्पादकत्वादित्यत आह -

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गस्समाचर ।। ९ ।।

यज्ञ एव अर्थः । प्रयोजनं यस्य स तथोक्तः । तस्मादन्यत्र आत्मीयप्रयोजन शेषभूते कर्मणि **अयं लोकः** संसारिचेतन वर्गः **कर्मबन्धनः** बध्यते अनेन इति **बन्धनं,** कर्मैव बन्धनं वासना द्वारा यस्य स तथोक्तः । अतः **तदर्थं** स यज्ञ एवार्थो यस्य तत्तथोक्तं **कर्ममुक्तसङ्गः** मुक्तस्सङ्गः फलाभिलाषा येन तथोक्तस्सन् **समाचर** - सम्यक् आचर । अकर्तृत्वानुसन्धानपूर्वकम् आचर इत्यर्थः । प्रयोजनसाधनत्वबुद्ध्यभावेऽपि

'सख्याद्युपचारवत्' भगवदाराधनरूपतया स्वयमेव प्रयोजनमिति बुद्ध्या कुरु इत्यर्थबोधनाय समेत्युपसर्गद्वयोक्तिः उक्तमर्थं निन्दाप्रशंसादिभिः द्रढयति ।

सह यज्ञैः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ।। १० ।।

प्रजापतिः - प्रजानां सर्वेषाम् आत्मनांपतिः शेषी श्रीमन्नारायणः 'पतिं विश्वस्यात्मेश्वरम्' इति तस्मिन्नेव अवयवार्थ पौष्कल्यात् 'प्रजापतेः सभां वेश्म प्रपद्य' इत्युपनिषद्वाक्ये चतुर्भिष्टा इत्यनेन उपबृम्हिते 'एष वै सप्तदशः प्रजापतिः' इति कर्मकाण्डवाक्ये च तस्मिन्प्रयोगाच्च । 'अनुमानात्तदुत्थानं कर्तु कामः प्रजापतिः' इति वराहरूपे भगवति प्रयोगाच्च । **पुरा** सृष्ट्यग्रिमकाले **यज्ञैः सह प्रजाः -** हिरण्यगर्भाद्याः प्रजाः सृष्ट्वा **उवाच -** उक्तिप्रकारमेव आह - **अनेन प्रसविष्यध्वं -** अनेन इत्येकवचनं जात्यभिप्रायम् । एवम् **एष** इत्यत्रापि एतैः **यज्ञैः** इत्यर्थः । **प्रसविष्यध्वम् ।** अत्र 'षूञ्' धातुः न प्रजननमात्र-परः । द्वादशा ह वस्सर्वयज्ञानां तदर्थत्वाभावात् । किन्तु सन्तत्युपलक्षिताभिवृद्धिपरः । आत्मनो वृद्धिं कुरुध्वम् इत्यर्थः । **एष** एते यज्ञाः **वः** युष्माकं यथावदनुतिष्ठताम् **इष्ट-कामधुगस्तु** इष्टानां बहूनां फलानां प्रपूरणं कुर्वन्ति इत्यर्थः । 'दुह प्रपूरणम्' इति धातुः । इष्टेति काम विशेषणात् परमपुरुषार्थस्यापि कामशब्दित फलान्तर्भावः सूचितः । अत्र धुगित्युक्त्या यज्ञानाङ्गो स्थानीयत्वं कामानां क्षीरस्थानीयत्वं सूच्यते । तेन क्षीरसाधनभूताया धेनोः सकाशात् क्षीरं सङ्गृह्य यथा गो स्वामी जनेभ्यो ददाति । तथा यज्ञाराधितोऽहं साधनभूताद्यज्ञात्फलं परिणमय्य युष्मभ्यो ददामीति भगवत्तात्पर्यमिपि सूचितम् ।

ननु अनेन **प्रसविष्यध्वमिति** कथमुपपद्यते । क्षणिकस्य कर्मणो भावि वृद्धिजनकत्वायोगात् । इष्टेति विशेषणलब्धमोक्षसाधनत्वं च दूरनिरस्तम् । ज्ञानस्यैव तद्धेतुत्वात् इत्याशङ्क्य परिहारान् आह -

देवान् भावयताऽनेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।। ११ ।।

हे प्रजाः ! **अनेन** कर्मणा **देवान्** - तदात्मकान् **देवान्** त्वं यज्ञेष्विति 'तदेवाग्निः तद्वायुः तत्सूर्यः तदु चन्द्रमाः' इति च श्रुतिः । वक्ष्यति च 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' इति **भावयत** - आराधयत । तस्मादितःप्रदानं देवा उप जीवन्ति इति श्रुतेः अनेन 'यज देव पूजेत्' इत्यादि धात्वर्थोऽपि सूचितः । ते यज्ञैः आराधिता **देवा वः**

युष्मान् भावयन्तु । अपेक्षित प्रदानेन पुष्णन्तु अत्र देवान् भावयत **अनेन** यज्ञानां देवता प्रसादसंवादकत्वोक्त्या तद्द्वारा क्षणिकस्यापि वृद्धिजनकत्वसंभव इति ज्ञापितम् । **अथ** मोक्षोपयोगित्वं दर्शयति । **परस्परं देवा** यूयं च अन्योन्यं **भावयन्तः** परमुत्कृष्टं श्रेयः मोक्षाख्यम् **अवाप्स्यथ** । अत्र **परस्परं भावयन्तः** इत्यस्य युष्मत्संभावितैः सम्भाविता इत्यर्थः । तेन देवानां **श्रेयः** प्राप्त्यभावात् कथम् इत्याशङ्काऽपास्ता । अथ देवान् भावयतेत्यस्य व्यतिरेके प्रत्यवायमाह -

इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ।। १२ ।।

यज्ञभाविताः - पूर्वपूर्वानुष्ठितयज्ञाराधिताः **देवाः वः** आराधकानां युष्माकं इष्टानुत्तरोत्तरस्वाराधनार्थापेक्षितान् भोगान् **दास्यन्ते -** दास्यन्ति । **तैः** देवैर्दत्तान् स्वाराधनार्थतया **दत्तान् एभ्यो -** देवेभ्यः, **अप्रदाय -** अदत्वा **यो भुङ्क्ते स्तेन एव** चोर एव । चौर्यं हि नाम अन्यदीयेस्वकीयताबुद्धिकरणम् । अयं भावः । देवा हि कर्मभिराराधिता अपि हि विग्रहणार्थमेव फलं प्रयच्छन्ति । यथा राजानष्षड्भागसंग्रहाय स्वाराधकेभ्यः क्षेत्रादिकं तत्र करप्रदानविमुखाः पुरुषा इव हविरादिकम् अप्रयच्छन्तो दण्ड्या एवेति **स्तेन** इत्युक्तमिति । एवकारेण चोरत्वादेव विहिताकरणप्राप्ताधिकारनिवृत्त्या परमपुरुषार्थहानिः इत्युक्तं भवति । एतदेव विवृणोति -

यज्ञाशिष्टाशिनस्सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ।। १३ ।।

यज्ञशिष्टम् - अशितुं शीलं येषां ते तथोक्ता । रागप्राप्तशरीरयात्रा यज्ञाशिष्टेनैव कार्येति नियमवन्तः यज्ञे शिष्टाशिन एव वर्तमाना इत्यर्थः ।

यद्वा - 'सन्त' इत्यस्य साधन इत्यर्थः । सर्व किल्बिषैः अनादिकालोपचितैः पापैः मुच्यन्ते पञ्चसूनादि व्यवच्छेदमात्रं न फलं, किन्तु आत्मयाथात्म्यज्ञानविरोधिभिरपि पापैः मोचनमपि इति बोधनाय सर्वपदम् । इत्थं श्रेयःपरमवाप्स्यथेत्यन्तं विशदीकृत्य स्तेन एवेत्युक्तं विशदयति - **भुञ्जत** इति । ते त्वित्यत्र तु शब्दो भिन्नक्रमः । **ये** तु पुरुषा आत्मकारणात् । अत्र कारणशब्दः, प्रयोजनरूपहेतुपरम् । ततश्च आत्मकारणादित्यस्य आत्मार्थतया इत्यर्थः । पचन्ति विपच्य अश्नन्ति, **ते पापाः -** पापात्मानः 'तद्गुणसारत्वात् तद्व्यपदेशः' । अघमेव भुञ्जते । अघशब्दः तद्धेतुपरः अयंभावः । आत्मार्थं पचमानस्य

पूर्वकिल्बिषः निवृत्त्यभाव एव न; किन्तु उत्तरोत्तरकिल्बिषप्राप्तिरपि इति 'केवलाघो भवति । केवलादि' इति श्रुतिसिद्धमिति उक्तमेवार्थं प्रमाणदर्शनपूर्वकं प्रपञ्चयति ।

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ।। १४ ।।

कर्मब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ।। १५ ।।

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ।। १६ ।।

भूतानि सर्वाणि **अन्नाद्भवन्ति ।** अत्र भूतशब्देन सजीव शरीराणि उच्यन्ते 'भ्रामयन् सर्वभूतानि' इति प्रयोगात् । अन्नाद्भवनं च तेषां अन्नाधीनजीवनत्वं पर्जन्यात् अन्नसम्भवः । **पर्जन्यशब्दः तत्कार्यवर्षलक्षकः ।** वर्षादन्नसम्भव इत्यर्थः । वृष्टेः अन्नमिति हि अन्यत्रोक्तम् । इदमुभयं सर्वलोक साक्षिकम् । **यज्ञाद्भवति पर्जन्यः** अत्रापि पूर्ववत् पर्जन्य शब्दो वृष्टिपरः । इदं च -

'अग्नौ प्रत्ताहुतिस्सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' ।।

इति शास्त्रेण अवगम्यते । **यज्ञः कर्म समुद्भवः** उद्भवत्यनेन इत्युद्भवः, कारणं, कर्मद्रव्यार्जनादि कर्तृव्यापाररूपम् । कर्मसमुद्भवः समीचीनं कारणं यस्य स तथा कर्मजन्य इत्यर्थः । कर्मद्रव्यार्जनादि पूर्वोक्तं कर्मब्रह्मोद्भवं **विद्धि -** ब्रह्मजन्यं विद्धि इत्यर्थः । ब्रह्मशब्दित प्रकृतिपरिणाम भूतशरीरजन्यं विद्धि । प्रकृतेर्ब्रह्मशब्दितत्वं च 'तस्मादेतत् ब्रह्म नामरूपमन्नं च जायते' । 'मम योनिर्महद्ब्रह्म' इत्यादिषु स्पष्टम् । यद्यप्युक्तं कर्म शरीरिसाध्यं न शरीरमात्रसाध्यं तथापि - शरीर्यंशस्याक्षरशब्देन पृथगुक्तत्वात् तथोक्तम् । 'ब्रह्म तच्छरीरम्', 'अक्षरसमुद्भवं', 'जीवसमुद्भवं', 'अमृताक्षरं हरः', 'कूटस्तोऽक्षर उच्यत' इति जीवेऽपि अक्षरशब्दः प्रयुक्तः । यद्यपि प्रकृतिपरिणामरूपं शरीरं न जीवजन्यम् । तथापि न शरीरमात्रस्य तज्जन्यत्वमुक्तम् । किन्तु कर्मसाधनभूतस्यैव । कर्म साधनत्वं च शरीरस्य प्रत्यगात्माधिष्ठितत्वेनैव इति तदुद्भवत्वमुक्तम् । तस्मात् चक्रवदनुवर्तितत्वात् सर्वगतं सर्वाधिकारिगतं ब्रह्म शरीरम् । 'नित्यं सर्वदा यज्ञे प्रतिष्ठितं

स्थापितं यज्ञ मूलम्' इत्यर्थः । एवमुक्तप्रकारेण प्रवर्तितम् । 'सह यज्ञैः' इत्यादौ देवान्भावयतेति स्पृष्टाः प्रजा यज्ञेषु प्रवर्तयता प्रजापतिशब्दितेन भगवता वर्तितं चक्रं 'अन्नाद्भवन्ति' इत्यादिनोक्तं चक्रवत् परिवर्तमानं इह साधने वर्तमाना यो अधिकारी न अनुवर्तयति । परमपुरुष प्रवर्तितानुगुण्येन न प्रवर्तयति । स यज्ञ शिष्टेन देहधारणम् अकुर्वन् चक्राननुवर्ती अघायुः पापारम्भकायुर्युक्तः । अत एवेन्द्रियारामः इन्द्रियाण्येव आराम उद्यानं विहारस्थानं यस्य तथोक्तः । विषयभोगैकरतिस्सन् इत्यर्थः । मोघं जीवति निष्फलज्ञानयोगादिप्रयत्नतया जीवति इत्यर्थः । इत्थं ज्ञानयोगाधिकारिणोऽपि कर्मकर्तव्यताम् उक्त्वा 'त्यागेनैके अमृतत्वमानशुः' इत्यादीनां फलदशाविषयत्वमित्याह -

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते ।। १७ ।।

'तु' शब्दः साधननिष्ठव्यावृत्यर्थः । **यः** - कर्मयोगज्ञानयोगादिनिरपेक्षः **आत्मरतिः** आत्मनि रतिः आभिमुख्यं यस्य स तथा एवकारेण प्रतिबन्धाभावात् स्वत एवात्माभिमुख इत्यर्थः । **आत्मतृप्तः** - आत्मनैव तृप्तः आप्तैकपोषकः । **आत्मन्येव च सन्तुष्टः** आत्म वस्तु विना भोग्यान्तरं नास्ति इति सन्तोषवान् एवम्भूतस्साधननिरपेक्षो यो मुक्तः पुरुषः **तस्य कार्यं न विद्यते** । निष्पन्नात्मदर्शनफलत्वादिति भावः । अत्र अवधारणज्ञानयोग निष्ठस्यापि देहधारणादिकमन्नपानादिभिरेव तस्य कर्तव्यं विद्यत एवेति व्यञ्जितम् । अनेन श्लोकेन अभिप्रेतं हेतुं व्यनक्ति -

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ।। १८ ।।

तस्य - उक्त स्वरूपस्य मुक्तस्य, **कृतेन** अनुष्ठितेन कर्मणा इति शेषः । **अर्थः** - प्रयोजनं **नैव** नास्त्येव प्रयोजनाभावात्कर्तव्यं नास्ति इत्यर्थः । **अकृतेन** - अननुष्ठितेन **इह** - उत्तमपुरुषे **कश्चन** कोऽपि अनर्थो न । नास्ति...... नेत्यस्य विरोधद्योतकत्वात् अर्थविरोध्यनर्थपरत्वलाभः । **अर्थानर्थौ** आत्मदर्शनं तदभावश्च । अत्र पूर्वस्यात्मदर्शनस्य सिद्धत्वात् न साध्यत्वम् । उतरस्य अत्यन्तनिवृत्तत्वात् न निवर्तनीयत्वम् इत्यभिप्रायः । अस्य **सर्वभूतेषु** स कार्येषु आकाशादिषु अचित्पदार्थेषु **कश्चित्**कोऽपि **अर्थव्यपाश्रयः** अर्थशब्दोभाव प्रधानः । प्रयोजनत्वेन आश्रयणीयो न इत्यर्थः । सकलाचिद्वस्तु विमुखत्वेन सर्वेषु प्रकृतिपरिणामभूतेषु प्रयोजनत्वेन स्वीकरणीयस्य कस्यापि अभावात् तत्प्रतिबन्धनिवृत्यर्थमपि कार्यं नास्ति इति भावः ।

तस्मादसक्तस्सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पुरुषः ।। १९ ।।

तस्मात् - साधनायत्तात्मदर्शनस्य कर्मकर्तव्यतोक्तेः असाधनायत्तात्मदर्शनस्य कर्तव्यं नास्ति इत्युक्तेश्च, **असक्तः** - फलसङ्गरहितः । 'कार्यम्' इति शब्दोऽध्याहार्यः कार्यमिति कार्यमित्येव न तु स्वर्गादिफलापेक्षया इत्यर्थः । **कर्म** विहिता प्रतिषिद्धं **कर्म** सततं सर्वदा यावदात्मप्राप्ति **समाचर** - सम्यगाचर । अकर्तृत्वानुसन्धानपूर्वकमनुतिष्ठ हि यस्मात् **असक्तः** - फलसङ्गादिरहितः **कर्माचरन्** उक्तरीत्या अनुतिष्ठन्, **पुरुषः** परं प्रकृतेः **परं** जीवात्मानम् **आप्नोति** । न पुनः कर्माचरणानन्तरम् अन्यत्कृत्वा **प्राप्नोति** इति भावः ।

अथ कर्मयोगस्य ज्यायस्त्वं शिष्टानुष्ठानेन उदाह्रियते ।

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ।। २० ।।

हि शब्दः प्रसिद्धौ राजर्षित्वेन ज्ञानिनाम् अग्रेसरत्वेन प्रसिद्धाजनकादयः । जनकखाण्डिक्यप्रभृतयः **कर्मणैव कर्मयोगेनैव संसिद्धिम्** आत्मप्राप्तिम् **आस्थिताः** श्रिताः ज्ञानयोगशक्ता अपि कर्मयोगेनैव आत्मानं प्राप्ता इति द्योतनाय एवकारः ।

इत्थं मुमुक्षोः ज्ञानयोगानधिकारिणः कर्मयोग कर्तव्यतां तदधिकारिणोऽपि तज्ज्यायस्त्वमुक्त्वाशिष्टतया व्यपदेश्यस्य सर्वथा कर्मयोग एव कार्य इत्याह -

लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हमि ।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।। २१ ।।

एवकारोऽपि शब्दश्च भिन्नक्रमो सङ्गृह्यते अनेनेति सङ्ग्रहो रक्षालोकस्य - सङ्ग्रहो **लोक सङ्ग्रहः** लोकरक्षा इत्यर्थः । तां पश्यन्नपि **कर्तुमर्हसि** कर्मेत्यर्थाल्लभ्यते । कर्मैव **कर्तुमर्हसि** इत्यर्थः । अकरणे लोकोपप्लुवापत्या तज्जनितस्वपापेन ज्ञानयोगोऽपि प्रच्युतस्यादिति उभयभ्रष्टत्वपरिहारार्थं कर्मयोगोऽनुष्ठेय इति भावः । तदेव उपपादयति - **यद्यदिति । श्रेष्ठः** - प्रशस्यतमः 'प्रशस्यस्य श्रः' इत्यनुशासनात् शास्त्रज्ञत्वेन अनुष्ठातृत्वेन प्रसिद्ध इत्यर्थः । **यद्यत् यच्च यच्च कर्म आचरति** अनुतिष्ठति इतरः अशास्त्रज्ञः **तत्तदेव** आचरति इत्यनुषज्यते । **स** श्रेष्ठः **यत्प्रमाणं कुरुते** प्रमाणम् इत्यवधिः उच्यते प्रकृष्टामितिः

प्रमाणमिति व्युत्पत्तेः अवधिश्चांङ्गान्येव विध्यन्ताधिकरणे अवधिपरस्यान्त शब्दस्य इतिकर्तव्यतापरत्वसमर्थनात् । ततश्च यत्प्रमाणमित्यस्य यदङ्गमित्यर्थः । **कुरुते** यदङ्गयुक्तम् अनुतिष्ठति इत्यर्थः । **लोकः** अकृत्स्नविज्ञनोऽपि **तदनुवर्तते** तत्कर्म तादृगङ्गयुक्तमनुतिष्ठति इत्यर्थः । अतश्च लोकरक्षार्थं व्यपदेश्येन त्वया कर्म कर्तव्यमेवेति भावः । अथ निरपेक्षेण लोकक्षेमेऽपि निष्प्रत्यवायेन मयाऽपि लोकरक्षार्थं कर्म क्रियते । किं पुनः त्वया सापेक्षेण सत्प्रत्यवायेन इत्याह -

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ।। २२ ।।

हे **पार्थ ! मे** कर्मवश्यलोकविलक्षणस्य **त्रिषु लोकेषु** वर्तमानस्य इति शेषः । कर्मवश्यानां देवमनुष्यतिरश्चां सजातीयत्वेनावतीर्णस्यापि इत्यर्थः । **कर्तव्यं** नास्ति श्रुतिस्मृत्योरपि मदाज्ञारूपतया तदतिक्रमेऽपि प्रत्यवायाभावान्नियन्त्रन्तराभावात् अवाप्तसमस्तकामत्वाच्च इति भावः । तदेव आह - **नानवाप्तमिति । अनवाप्तम् -** अप्राप्तम् अवाप्तव्यं च विद्यते । अथापि **कर्मणि वर्त एव ।** अथापि इति चकारार्थः । न कदापि कर्मण उपरम्य ज्ञानयोगमनुतिष्ठामि इत्यर्थः । ननु कर्तव्यप्रयोजनयोः अभावे किमर्थं कर्म करोषि इत्यत आह -

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ।। २३ ।।

अहम् - वसुदेवसूनुत्वेनावतीर्णोऽहं **कर्मणि** वंशपारंपर्योचिते **कर्मणि अतन्द्रितः** अनुदासीनः जातु जात्वपि न **वर्तेयम् । यदि** तदा **मम वर्त्म** मम मार्गं **मनुष्या -** अतिमनुष्यत्वमात्र परिकराः अकृत्स्नविदः शिष्टा इत्यर्थः । **सर्वशः** सर्वप्रकारेण यादृश इति कर्तव्यताकं मयानुष्ठितं तादृश इतिकर्तव्यताविशिष्टत्वेन इत्यर्थः । **अनुवर्तन्ते -** अनुवर्तेरन् इत्यर्थः । प्रसङ्गरूपस्यापि सिद्धवत्काराभिप्रायेण वर्तमाननिर्देशः ।

ननु अल्पज्ञैः अनुवृत्तिकरणे शास्त्रज्ञैः न अनुवृत्तिः क्रियत इत्यत्राह -

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ।। २४ ।।

उत्सीदेयुः - दुराचारानुवृत्त्या पुरुषार्थ, हानापुरुषार्थ प्राप्तिरूपविशरणयुक्ता भवेयुः **मदाचारदर्शनं तेषामस्त्येवेति बोधनाय इमे इत्युक्तिः । संकरस्य च कर्ता स्यांन चेत्कर्म**

कुर्याम् इत्यनुषज्यते । सङ्करः - साङ्कर्यं ब्राह्मण धर्मस्य युद्धनिवृत्यादेः क्षत्रियादिभिः अनुष्ठानम्, **इमाः प्रजाः उपहन्याम् -** उपहतिः पश्चादपि कर्मानर्हता । तथा च उपहन्याम् इत्यस्य पश्चादपि कर्मानर्ह यथा भवन्ति, तथा **कुर्याम्** इत्यर्थः । त्वया परित्यागे कृते त्वमेवै तादृशो भवसि इति बोधनाय सत्कुलप्रसूतत्वद्योतनार्थकेन पार्थशब्देन मुहु सम्बोधनं लोकस्य कर्मयोगज्ञानयोगयोः अधिकारप्रकारं विदुषः तदधिकारानुरूपाचरणं लोकसङग्रहप्रकारं च आह -

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तः चिकीर्षुर्लोकसङ्ग्रहम् ।। २५ ।।

अविद्वांसः - अनात्मविदः **कर्मणि सक्ता** अवर्जनीय कर्मसम्बन्धाः ज्ञानयोगानधिकारिण इति समुदायार्थः । **यथा कुर्वन्ति -** येन प्रकारेण अनुतिष्ठन्ति । विद्वानात्मवित् ज्ञानयोगाधिकारिइत्यर्थः । लोक सङ्ग्रहं समीकृत्य ग्रहणं स्वानुष्ठानेन समानाभिप्रायतया स यूध्यतासम्पादनम् इत्यर्थः । तेन प्रकारेण स्वानुष्ठानं दृष्ट्वा येन प्रकारेणान्येपि कुर्यस्तेन प्रकारेण इत्यर्थः । कर्मकर्मयोगं **कुर्यात् ।।**

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान् युक्तस्समाचरन् ।। २६ ।।

अज्ञानामात्मन्यकृत्स्नवित्तया ज्ञानयोगाशक्तानां **कर्म संगिनाम् -** संस्कारवशान्नियतत्वेन कर्मयोगाधिकारिणं **बुद्धिभेदं न जनयेत् बुद्धेः -** भेदबुद्धेः अन्यथाकरणं कर्मयोगादन्यदात्मावलोकनसाधनमस्ति इति बुद्धिविशेषम् इत्यर्थः । न जनयेन्नोत्पादयेत् तर्हि कथं वर्तितव्यम् इत्यत्राह - **ज्योषयेत्** इति । विद्वानात्मनि कृत्स्नवित्तया ज्ञानयोगशक्तोऽपि इत्यर्थः । **युक्तः -** कर्मयोग एवात्मावलोकनसाधनमिति बुद्ध्या युक्तः । **कर्माणि -** सर्वाणि समाचरन् ज्योषयेत्कर्म सङ्गिनः पुरुषानिति शेषः । 'जुष-प्रीति सेवनयोः' इति हि धातुः । तेषां प्रीतिं जनयेत् इत्यर्थः । अथाविदुषो विदुषश्च विशेषं कर्मयोगापेक्षितं च दर्शयति ।।

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ।। २७ ।।

प्रकृतेः गुणैः - सत्त्वरजस्तमोभिः, **सर्वशः -** स्वानुगुणैः सात्विकादिभिः सर्वैः प्रकारैः **क्रियमाणानि कर्माणि** प्रति **अहं कर्ता इति अहंकारविमूढात्मा मन्यते ।**

अहंकारशब्दो अभूततद्भावे च्विप्रत्ययेन व्युत्पन्नः अनहमर्थे प्राकृतेऽहमभिमान इत्यर्थः । देहात्मभ्रम इति यावत् । तेन विमूढः विशेषेण ज्ञात आत्मा यस्य स तथोक्तः ।

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ।। २८ ।।

'तु' शब्दः पूर्वोक्ताधिकार्यपेक्षया वैषम्य द्योतकः गुणकर्मविभागयोः द्वन्द्वान्ते श्रूयमाणो विभागशब्दः प्रत्येकं सम्बध्यते । तथा च **गुणविभागे कर्मविभागे** च इत्यर्थः । **तत्त्ववित् -** गुणप्रकारं कर्म प्रकारं च जानान इत्यर्थः । **गुणाः -** सत्वादयः । **गुणेषु -** कारणभूतगुणापेक्षया अप्रधानतया गुणशब्दितेषु तत्कार्येषु **वर्तन्त इति मत्वा न सज्जते ।** गुणकर्मस्वहं कर्तेति न सक्तो भवति इत्यर्थः ।

प्रकृतेर्गुणसम्मूढास्सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ।। २९ ।।

अकृत्स्नविदः - कृत्स्नं निरवशेषं विदन्ति इति । तथा तद्भिन्ना आत्मदर्शनाय प्रवृत्ता अनधिगतात्मदर्शनाः प्रकृतेः गुणैः सत्त्वादिभिः **संमूढा** यथावस्थितात्मज्ञा न शून्याऽऽह उपसर्जनस्यापि गुणशब्दस्य देवदत्तस्य गुरुकुलमित्यादिष्विव प्रकृतेरित्यनेन अन्वयः । **गुणकर्मसु** कर्मशब्दः क्रियापरः गुणक्रियासु 'सर्वं वाक्यं सावधारणम्' इति न्यायात् गुणक्रियास्वेव इत्यर्थः । कर्मयोगिष्वेव इति यावत् । **सज्जन्ते** नात्मावलोकनाय प्रवर्तन्त इत्यर्थः । तच्च बहुवचनेनापि सूचितम् । तेन कर्मयोगबहुत्वम् उच्यते । तच्च अभ्यास लब्धं **तानकृत्स्नविदः -** आत्मज्ञानाय प्रवृत्तत्वेऽपि यथावस्थितात्मस्वरूपमजानतः अत एव मन्दान् स्वयमाचारनिर्णया समर्थान् ।

यद्वा - विचालनीयत्वकारणधैर्यवत्तया अल्पान्, तथा च नैघण्टुकाः - 'मूढाल्पापटुनिर्भाग्या मन्दा' इति कृत्स्नवित् । यथावास्थितात्मस्वरूपवेतृतया ज्ञानयोगनिष्ठः **न विचालयेत्** कर्मयोग चलितमनस्कान् न कुर्यादित्यर्थः । ते हि मन्दत्वादेव स्वयमर्थं निर्णेतुम् असमर्थाः । श्रेष्ठजनाचारं दृष्ट्वा इत्थमेवकार्यमिति कर्मयोगात्प्रचलितमनस्का भवेयुः, अत श्रेष्ठःस्वयमपि कर्मयोगमनुतिष्ठन् तानपि ज्योषयेत् इति भावः । इत्थं प्रकृतिविविक्तात्मस्वरूपनिरूपणेन आत्मनो न स्वरूपकृतं कर्तृत्वम् अपितु गुणसंसर्गकृतम् इत्यन्वयव्यतिरेकाभ्यां युक्ता युक्तनिश्चयेन तादृशं पुण्यापुण्यकर्तृत्वं गुणेष्वनुसन्धातव्यम् इति 'कर्ता शास्त्रार्थवत्वा'दित्यधिकरणाभिप्रायमुक्त्वा 'परात्तु तच्छ्रुतेः' इत्यधिकरणार्थं तात्पर्यं हृदि निधाय गुणकृतं कर्तृत्वमात्मनां नियामके भगवत्यनुसन्धेयम् इत्याह -

मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ।। ३० ।।

सर्वाणि - स्वकृतानि गुणकृतानि च **कर्माणि मयि** सर्वान्तरात्मभूते सर्वेश्वरे **अध्यात्मचेतसा** अध्यात्मेति सप्तम्यर्थे समासः चेतश्शब्दश्च ज्ञानपरः श्रुतिसिद्धात्म तत्त्वस्वरूपानुसन्धानेन **सन्न्यस्य** - राज्ञा प्रोरितो भृत्य इव तत्प्रेरितोहंकरोमि इति 'स्वशेषभूतेन' इति न्यायेन विन्यस्य अनेन कर्तृत्वत्याग उक्तः । अथ कर्तृत्वे त्यक्तेऽपि कर्मणि यजमानस्य फलाभिसन्धिः स्यात् इति तन्निरासायाह - **निराशीः** - फलाभिसन्धिरहित इत्यर्थः । अयं च पूर्वोक्त कर्तृत्वत्यागे हेतुः । एवमपि ममेदं कर्मेति बोधवताविव अधिकारात्कर्तृता न निवर्तेत इत्यत आह - **निर्मम** इति । **कर्माणि** ममता रहितः, **विगतज्वरः** - अनादिकालप्रवृत्तकर्म सञ्चयैः कथमहं भविष्यामि इत्येवमन्तर्ज्वर रहितः **युध्यस्व** अथ अयमेव प्रधानभूतो रहस्यार्थ इत्याह -

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ।। ३१ ।।

ये - मानवाः शास्त्राधिकारिणः । अत एव धर्मशास्त्र प्रवर्तकमनुसम्बन्धित्व बोधको मानवाशब्दः **मे** सर्वप्रशासितुः **मममतमनु**तिष्ठन्ति शासितुर्मतमेव शास्त्रमिति मत्वा**ऽनुतिष्ठन्ति** । कीदृग्भूताश्**श्रद्धावन्तः** श्रद्धा आस्तिक्यबुद्धिः तदभावे अनुष्ठानायोगादिति भावः । पुनः कीदृशाः **अनसूयन्तः** गुणेषु दोषाविष्करणम् **असूयताम्** अकुर्वन्त इत्यर्थः । तेऽपि **कर्मभिर्मु**च्यन्ते । बन्धहेतुभिः अनादिकालसञ्चितैः सर्वैः **कर्मभिः**मुच्यन्त इत्यर्थः । अत्र तेऽपि इत्यपिशब्दात् ये नराः **अनुतिष्ठन्ति** । ये च अननुतिष्ठन्तोऽपि **श्रद्धावन्तः** ये च श्रद्धाराहित्येऽपि शास्त्रार्थेऽनसूयवः **ते** सर्वे मुच्यन्त इत्यर्थः सूचितः । अथ व्यतिरेकनिन्दया उक्तार्थस्य प्राशस्त्यातिरेक उच्यते -

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ।। ३२ ।।

पूर्वोक्ताधिकार्यपेक्षया वैलक्षण्याय **तु शब्दः** पूर्वोक्तप्रकारं **मे मतं** शास्त्रार्थमभ्यसूयन्तः श्रद्धाराहित्येन **नानुतिष्ठन्ति तान्** सर्वेषु ज्ञानेषु विशेषेण **मूढान्** ज्ञानशब्दः कर्मणि व्युत्पन्नः ज्ञातव्येषु सर्वेषु वस्तुषु यथावस्थितस्वरूपमात्रप्रकारानभिज्ञानित्यर्थः । अत एव **नष्टान्** - पुरुषार्थायोग्यान्, **अचेतसः** चेतशब्दः तत्कार्यचिन्तासाध्यज्ञानपरः न विद्यते चेतो येषां ते तथोक्तान् तान् वस्तुयाथात्म्य निश्चयशून्यान् **विद्धि** - जानीहि इत्यर्थः ।

एवं बहुप्रकारेण कर्मयोगकर्तव्यत्वमभिधायाथ ज्ञानयोगस्य दुःशकत्वमाह -

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ।। ३३ ।।

ज्ञानवानपि ज्ञानमिह यदालम्ब्यज्ञानयोगे प्रवर्तितुम् उत्सहते । तदात्मसाक्षात्कारपर्यन्तं ज्ञानं विवक्षितम् । तस्यैव प्रकृत्यनुकूलप्रवृत्तिविरोधित्वात् तद्वानपि स्वस्याः स्वारसिक्याः स्वभावसिद्धायाः इत्यर्थः । **प्रकृतेः** प्राचीनवासनाया इत्यर्थः । सदृशमनुरूपं **चेष्टते** शब्दादिविषयवासनया तदानुकूल्येन पुनः पुनर्विषयेष्वेव प्रवर्तत इत्यर्थः । ज्ञानवांश्चेत् ज्ञानानुगुणचेष्टाराहित्येन कुतस्तदनुगुणं चेष्टत इत्यत्राह - **प्रकृति**मिति । **भूतानि** अचित्संसृष्टा जन्तवः **प्रकृतिं** वासनामेव **यान्ति** अनुवर्तन्ते अयं भावः । यद्यप्ययं शास्त्रजन्य याथात्म्यज्ञानवान् अथापि परोक्षमद्यतनन्तज्ज्ञानं अनादिप्रवृत्ताचित्संसर्गकृतापरोक्षा भङ्गुरदेहात्मभ्रमजनिताम् अत्यन्तोपचितां वासनां छेत्तुं न समर्थमिति । तदेवाह - **निग्रह** इति । **निग्रहः** शास्त्रकृतं नियमनं, **किं करिष्यति** न किञ्चिदपि करिष्यति इत्यर्थः ।

अथ वासनाया स्वानुरूपचेष्टा हेतुत्वं कथमित्याशङ्क्यद्वारा विशेषं दर्शयति -

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ।। ३४ ।।

वीप्सा सर्वेन्द्रियसङ्ग्रहार्था । अर्थशब्दो विषयपरः । तथा च **इन्द्रियस्सेन्द्रियस्यार्थे** श्रोत्रादीनां ज्ञानेन्द्रियाणाम् । **अर्थे** शब्दादौ वागादीनां कर्मेन्द्रियाणाम् अर्थे वचनात् आदौ च **रागद्वेषौ** अनुबुभूषारूपो रागः तदनुभवे प्रतिहते द्वेषश्च **व्यवस्थिता** विशेषेणावस्थितौ अवर्जनीयतया वासनानुगुणप्रवृत्तिसंपादका स्थितौ इत्यर्थः । ततः किमित्यत आह - **तयोः** इति । **तयोः** रागद्वेषयोः **वशं नाधिगच्छेत्** नाशहेतुभूतां तदधीनतां परिहरेत् इत्यर्थः । तद्वशगमने कथं विनाश इत्यत आह - **तौ हि** इति 'हि' यस्मात् तौ **रागद्वेषौ** । अस्य ज्ञानयोगे प्रवृत्तस्य **परिपन्थिनौ** दुर्जयौ शत्रू ज्ञानाभ्यासम् वारयत इत्यर्थः ।

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ।। ३५ ।।

स्वधर्मः - स्वस्य धर्मः शक्यत्वं षष्ठ्यर्थः । स्वेनावलम्बितुं शक्यो धर्म इत्यर्थः । प्रकृतिसंसृष्टस्य सुशकः कर्मयोग इति यावत् । विगुणोप्यङ्गवैकल्य युक्तोऽपि **स्व**

अनुष्ठितात् । सादृगुण्येन अनुष्ठितात् । परधर्मात् अत्रापि पूर्ववत् समासः षष्ठ्यर्थश्च बोध्यः । तथा च परेण स्वीकर्तुं शक्यज्ञानयोगाख्याद्धर्मादित्यर्थः । **श्रेयान्** - प्रशस्यतरः वैगुण्यमात्रं स्वरूपविच्छेदाद्वरम् इति भावः । अनुष्ठित शब्दस्य भूतार्थप्रत्ययान्तत्वात् भूतत्वस्य जाति क्रान्तवा रूपत्वात् प्रागनुष्ठानं पश्चात् विच्छेदश्च सूचित इति । **स्वनुष्ठितात्** इत्यनेन सप्रमादत्वसूचनात् तदतिरिक्तस्य श्रेयस्त्वम् उपपादितं विगुणस्य कर्मणः फलाभावात् कथं श्रेयस्त्वम् इत्याशङ्कां परिहरति - **स्वधर्म** इति । प्रकृतिसंसृष्टतया व्याप्रियमाणेन्द्रियस्य स्वस्य शक्ये **धर्मे निधनं** अप्राप्तफलतया देह नवृत्तिः **श्रेयः** प्रशस्तम् । अयं भावः । यद्यपि कर्मयोगो विगुणः तथा च अङ्गवैगुण्यात् फलाभावः । तथापि जन्मान्तरे सगुणानुष्ठानं सम्पाद्य फलंजनयत्येव अन्तरायोपहतत्वे खलु स्वरूपविच्छेदात् फलाभावः स्यात् । इन्द्रियाणाम् अनुभूतविषयसजातीयविषयसमर्पणेन कर्मयोगस्वरूपस्य अत्यन्ताविच्छेदाप्रवृत्तेः । यद्येवं कर्मयोगस्य श्रेयस्त्वं तर्हि ज्ञानयोगस्यापि स्यात् । तत्रापि एवं वक्तुं शक्यत्वात् इत्यत आह - **पर धर्म** इति । **भयावहः** - प्रकृति संसृष्टस्य तद्वत् स्वेच्छयोपादातुम् अशक्यत्वात् स्वरूपेणैव विच्छिन्नस्य जन्मान्तरेऽपि फलसम्भव इति भावः ।

अर्जुन उवाच -

सदृशं चेष्टत इत्यत्र ज्ञानवानपि वासनानुसारेण प्रवर्तत इत्युक्तम् । तदयुक्तम् वासना हि इच्छाद्वारेण प्रवर्तिता ज्ञानमिच्छतः तद्विरोधिवासनाविषयानुभवे इच्छाभावाद्वारा निष्पत्तेः इत्यर्जुनः पृच्छति इत्यर्थः । तदेवाह -

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ।। ३६ ।।

अथ शब्दः प्रश्नार्थकः । 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्टथो अथ' इत्युक्तेः । **अयं** ज्ञानवान् इति निर्दिष्टः ज्ञानयोगाय प्रवृत्तः पुरुषः चेतनः वासनयापि इच्छां विना न प्रवर्तत इत्येतदर्थद्योतनाय **पूरुष**शब्दः **अनिच्छन्नपि** बलान्नियोजित इव वायूदकादि बलान्नियोजतो यथा **अनिच्छन्नप्या**चरति । तथा केन **प्रयुक्त** आचरति इति प्रश्नार्थः ।

श्रीभगवानुवाच - 'इन्द्रियस्येन्द्रिस्येत्या'दिना संग्रहेणोक्तमेवार्थं प्रपञ्चयन् प्रयुत्तरं श्रीभगवानुवाच इत्यर्थः -

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ।। ३७ ।।

रजोगुणसमुद्भवः सम्यगुद्भवत्यनेन इति समुद्भवः कारणं रजोगुण एव कारणं यस्य स तथोक्तः **कामः -** आत्मधर्मभूतज्ञानवस्थाविशेषः विषयानुभववासना बीजानां कामाद्यङ्कुरोत्पादने रजोगुणस्य सलिलसेकवत्सहकालत्वं पुरस्कृत्य रजोगुणसमुद्भव इत्युक्तं प्रकृतिगुणस्य रजसः कथमात्मनि कामाद्यारम्भकत्वमिति न च शंकनीयं औष्ण्याश्रयाहारसंयोगात् करतलादौ स्फोटादिव गुणाश्रयप्रकृतिसंसर्गात् आत्मनि तदुद्‌बोधोपपत्तेः इति हृदयम् । एवंक्रोधेऽपि बोध्यं एष पापाचरणे हेतुः केन प्रयुक्तः पापं चरतीति प्रश्नोत्तरत्वात् । यद्यपि कामस्यैव स्वगतिप्रतिरोधे क्रोधरूपत्वेन परिणामात्क्रोध एष इति वाक्यभेदे न पुनरुक्तिवैय्यर्थ्यम् । तथापि स्फुटप्रतिपत्यर्थं अवस्थाभेदपुरस्कारेण पृथगुक्तं क्रमेण तौ विशिनष्टि - **महाशन** इत्यादि । महत् अशनं भोग्यं यस्य **महाशनः** । ज्ञानाय प्रवृत्तस्यापि स्वाभिमुख्येन आकर्षकत्वात् तद्भोग्यविषयादेः महत्वं माहात्म्यान्यान् कार्यतया यस्य स तथोक्तः । **क्रोध** कार्यस्य पाप्मनो महत्वं 'क्रुद्धोहन्याद्‌गुरून्' इत्यादौ प्रसिद्धं एनं विशेषणद्वयसिद्धं प्रकारयुक्तम् । **एनं -** कामं क्रोधं च **वैरिणं** ज्ञानयोगविरोधिनं **विद्धि** यद्यप्येतौ वैरिणौ विद्धि इति वाच्यम् । तथापि अवस्थाभेद एव उभयोः न स्वरूपभेद इति । ज्ञापनायैनमित्युक्तम् । 'इन्द्रियस्य' इति श्लोकोक्त रागद्वेषावेव अत्र कामक्रोध शब्दनिर्दिष्टौ इति न पूर्वोक्त विरोधः । वैरित्वप्रकारमेव आह -

धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च ।
यथोल्बेनावृत्तो गर्भस्तथा तेनेदमावृतम् ।। ३८ ।।

प्रथमो यथा शब्दः 'काकाक्षि न्यायेन' पूर्वत्र उत्तरत्र च अन्वेति **वह्निधूमेन यथा व्रीयते । आदर्शो -** दर्पणम् । **मलेन -** मालिन्येन च शब्द आव्रियत इति पदस्य आकर्षणार्थः । **यथा आव्रियत** इत्यर्थः । **उल्बेन -** जरायुणा, **गर्भः -** गर्भस्थशिशुः **यथा आवृतः** तथा तेन कामे न क्रोधः कामस्यैव अवस्थाविशेष इति काममात्रस्य निर्देशः । इदं जन्तुजातमावृतम् । अत्रावरणस्य सहजत्वं निवृत्तस्यापि पुनः पुनरनुवर्तनं निवर्तयितुम् अशक्यत्वं च द्योतयितं दृष्टान्तत्रयं आवरणप्रकारमेव आह -

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ।। ३९ ।।

ज्ञानमस्यास्तीति ज्ञानी, तस्य स्वाभाविक ज्ञानवत इत्यर्थः । 'विज्ञान घन' इति श्रुत्या हि अस्य ज्ञानं स्वाभाविकम् इत्युक्तम् । **ज्ञानम्** - आत्मविषयं ज्ञानं **कामरूपेण** - कामाकारेण **नित्यं** - अनादिकालप्रभृत्यात्मसाक्षात्कारपर्यन्तं **वैरिणा**-विरोधिना, **अनलेन** - माणवकेऽग्नि शब्दवत् **अनल** शब्दः कामे गौणः अग्निवद्विषयविभागपर्याप्तिशून्येन इत्यर्थः ।

यद्वा अनलेन योग्यैर्लब्धैरर्थैः अलम्भावरहितेन अत एव **दुष्पूरेण** - दुष्करः पुरःपूरणं यस्य स तथोक्तः । तेन -

'तृष्णा खनिरगाधेयं दुष्पूरा किं न पूर्यते ।
या महद्भिरपि क्षिप्तैः पूरणैरेव खन्यते' ।।

इत्युक्तस्वभावेन इत्यर्थः । आवृतं विषयव्यामोहजननेनावृतम् इत्यर्थः । अथ कैः उपकरणैः अयमात्मज्ञानमात्मज्ञानमावृणोति इत्यत आह -

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ।। ४० ।।

इन्द्रियाणि - श्रोत्रादीनि बाह्येन्द्रियाणि अन्तरिन्द्रियस्य मनसः पृथक् निर्देशेन 'गोबलीवर्द' न्यायावताराात् । **मनः** - अन्तरिन्द्रियं, **बुद्धिः** - अपुरुषार्थेषु पुरुषार्थाध्यवसायः । **अस्य** देहिनः **अधिष्ठान**मुच्यते । पूर्वोक्त स्वभाव कामाश्रयता संपादकमुच्यत इत्यर्थः । अधितिष्ठति स्वतन्त्रमपि परतन्त्रं करोति कामयेनमिति व्युत्पत्तेः इति भावः । एतदेव विशदयति - वेदितैः इति । **एष** कामः - **एतैः** इन्द्रियादिभिः **देहिनं** प्रकृतिसंसृष्टं जीवं **विमोहयति** । 'अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः' इत्युक्त विविधमोहाकुलं करोति । किं कृत्वा ज्ञानमावृत्य भोग्ये आत्मनि भोग्यता बुद्धिं व्यपोह्य भोग्येषु भोग्यताभ्रमं जनयित्वा इत्यर्थः । अथ कामस्य अधिष्ठानोपकरणभूतेषु इन्द्रियादिषु उक्तेषु प्रथममिन्द्रियाणां नियमनं कामजयोपायतया उपदिशति ।

तस्मात् त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ।। ४१ ।।

यस्माद्विषयाभिमुख्य जननद्वारा आत्मावलोकनवैमुख्य सम्पादकः कामः **तस्मात्** इत्यर्थः । **त्वं** प्रकृतिसंसृष्टतया इन्द्रियव्यापारप्रवणस्त्वं **आदौ** - मोक्षोपायारम्भसमये

अनेन **नियम्येत्**यनेन अत्यन्तोपरतिपर्यन्तनियमनं न विवक्षितम् इति सूचितम् । **ज्ञानविज्ञाननाशनं** - ज्ञानं देहातिरिक्तः कश्चिदात्मा अस्ति तावदात्मस्वरूपविषयज्ञानं विज्ञानं तस्मैवात्मस्वरूपस्य अणुत्व नित्यत्व ज्ञातृत्व भोक्तृत्वादिभिः भेदकधर्मैः विविच्यज्ञानं तयोः **नाशनं** निवर्तकं; करणे ल्युट् । **एनं** - कामरूपं **पाप्मानं** वैरिणं **पाप्मा** भ्रातृव्य इति श्रुतिः । निषेधविषयतया ज्ञान विरोधित्वेन अनिष्टफलत्वाच्च, वैरिणम् इत्युक्त्वा पाप्मानमित्युक्तिः प्रजहि नाशय समूलं नाशयेत्यभिप्रायेण प्रेत्युपसर्गः । एवं विरोधि भूतानाम् इन्द्रियाणां नियमनमुक्तम् । अथ मनोबुद्ध्यादीनां नियन्तव्यत्वे तारतम्यात् उत्तरोत्तरं नियन्तृत्वे प्राधान्यमाह -

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ।। ४२ ।।

इन्द्रियाणि - बाह्येन्द्रियाणि, **पराणि** - ज्ञानविरोध इति सर्वत्र योज्यं प्रधानानि इत्यर्थः । इन्द्रियेषु विषयव्यापृतेषु विषयासन्निधानाद्वा प्रत्याहाराद्वा उपरतेष्वपि मनसि विषयप्रवणे आत्मज्ञानासम्भवादिति भावः । **मनसस्तु** - अन्तरिन्द्रियादपि **बुद्धिः** - अध्यवसायरूपा बुद्धिः, **परा** प्रधाना । यद्यपि मनसि विषयविमुखे तद्गोचराध्यवसायो न प्रभवति । तथापि यद्यच्छया निद्रालस्यादिभिः **मनसस्त्वर** सतः विषयैक शरणत्वाभावेऽपि दुराग्रहादिमात्रेण विपरीतः यः परः ज्ञानविरोधे प्रधानभूतः स पूर्वोक्तः । काम एव यच्छब्द प्रतिसम्बन्धितया निर्दिष्टोऽपि स इति तच्छब्दः तन्त्रेण पूर्वोक्तकामावबोधको भवति इति न पुनः तद्वाचि पदा प्रयोगः । यद्यपि इन्द्रियादीनां विषयान्तर वैमुख्य सिद्धे विषयेच्छात्मककामसत्वेऽपि न ज्ञान विरोधः । आत्मानुभवेच्छया तत्रैवाध्यवसायमनः प्रावण्योपपत्तेः । तथापि जाता सा आत्मेच्छा कादाचित्काल्पसत्वमूला विषयेच्छातु अनादिकालप्रचित प्राचिनकर्मोद्भावित निरन्तरानुवृत्त रजोमूला, तस्मात् आत्मेच्छा यावद्दर्शनाध्यवसायादिकं करोति । तावद्विषयेच्छाप्रबलविषयाध्यवसायाधिकमेव करोति इति कामः । सर्वस्मात्पर इति कामस्याध्यवसायादि निरपेक्षोत्पत्तिकत्वरूपवैषम्यद्योतनाय तु शब्दः पूर्वानुगुण्यैः 'तसिल्' प्रत्ययः । सार्वविभक्तिकः **इन्द्रियाणि पराण्याहुः** इत्यत्राहुः इत्यनेन -

'इन्द्रियाणां हि चरतां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पादादितोदकम्' ।।

इति मनुवचनं स्मारितम् । सदृशं चेष्टते इत्युपक्रान्तज्ञानयोग स प्रमादतोपसंहारद्वारा मनसः कर्मयोगेऽवस्थानम् अभिधाय अध्यायार्थम् उपसंहरति ।

एवं बुद्धेः परं बुध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ।। ४३ ।।

एवम् उक्तरीत्या **बुद्धेः** - परं **बुध्वा** कामं बुद्धेऽपि ज्ञानविरोधेपधानं बुध्वा आत्मानं मनः **आत्मना** - बुद्ध्या **संस्तभ्य** - कर्मयोगेऽवस्थाप्य, **कामरूपं** - कामस्वरूपं, **दुरासदम्** - अननुष्ठित कर्मयोगैः अनिरस्तपापैः अनिगृहीत सुदृढकरणैः वशीकर्तुम् अशक्यम्, **शत्रुं** ज्ञानविरोधिनं, **जहि** - विनाशय, अचेतनस्यापि कामस्य हिंसनीयत्वाभिप्रायेण शत्रुमित्युक्तिः ।।

।। श्रीशैल बुक्कपट्टण येन्नाचान् दासविलिखितेऽध्यायः ।
तार्तीयः श्रीगीताभाष्यरहस्यार्थसंग्रहो वृत्तः ।।

❋ ❋ ❋

चतुर्थोऽध्यायः

[ज्ञानयोगः]

एवं तृतीयेन अशक्तस्य शक्तत्वेपि अप्रसिद्धस्य च कर्मयोग एव कार्यः । प्रसिद्धस्य शक्तस्याशक्तस्य वा स्वार्थं लोकरक्षार्थं च स एव कार्य इत्यधिकारि चिन्तनं कर्मयोगात् ज्ञानयोगस्य वैशम्यचिन्तनं च कृतम् । अथ कर्तव्यतयोक्तस्य कर्मयोगस्य प्रामाणिकत्वं ज्ञानमिश्रत्वं स्वरूपं तद्वैविध्यं ज्ञानांशप्राधान्यं प्रासङ्गिक भगवदवतारवृत्तान्तश्च इति षडर्थानाह - **'श्रीभगवानुवाच'** इति । अपृष्टोऽपि भगवान् परमकारुणिकतया वक्तव्यांशं स्वयमेव उवाच इत्यर्थः ।

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ।। १ ।।

अव्ययं सर्वज्ञे मयि स्थितत्वात् च्युतिरहितम् । **इमं योगं** - कर्मयोगम्, **अहं** 'यस्सर्वज्ञस्सर्ववित्' इत्युक्त स्वभावोऽहं मन्वन्तरादौ महाकल्पारम्भे भारत समरारम्भे वा मदन्यः कश्चिज्ज्ञाता वक्ता दुर्लभ इति भावः । **विवस्वते** - सर्ववेदात्मने सूर्याय **प्रोक्तवान्** - सपरिकरमुक्तवान् **विवस्वान् मनवे** 'यद्वै किं च मनुरवदत्तद्भेषजमि'ति सकलजगद्भेषजभूतवचनतया प्रसिद्धाय **मनवे प्राह**-स्वोपदिष्टप्रकारेणास्खलिततयाऽह मनुश्च **इक्ष्वाकवे** राजर्षिष्वतिप्रसिद्धायेक्ष्वाकवे **अब्रवीत्** ।

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ।। २ ।।

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ।। ३ ।।

एवं 'विवस्वन्मन्विक्ष्वाकु' न्यायेन पित्रादि क्रमेणोपदेशक्रमान्यूनानतिरेकेण परंपरा प्राप्तम् इक्ष्वाकोः अर्वाचीनधार्मिकादिद्वारा अस्खालित्येनाधिगतं **इमं** योगं **राजर्षयः** अगाध - मनसो लौकिकार्थद्रष्टारोश्वपतिजनकाम्बरीषप्रभृतयः **विदुः** लब्धवन्तः अनुष्ठितवन्त इत्यर्थः । **स** पूर्वैः अनुष्ठितः सम्प्रदायविच्छेदेन प्राप्तः **योगः** कर्मयोगः इह विचित्राधिकारे जगति महतादीर्घेणकालेन नष्टः अदर्शनं प्राप्तः । व्यास-भीष्मादिभिः कैश्चिदेवातनुष्ठीयमानतया स्फुटमप्रतिपन्नः स एवास्खलितस्वरूपः पुरातनः पूर्वोपदिष्ट **एव योगः प्रोक्तः** ।

प्रकारभेदमन्तरेणैव प्रोक्तः पुरातनोद्येति निर्देशाभ्यां कालभेदमात्रमेव । न तु प्रकारभेद इति ध्वनितम् । तथोक्तौ हेतुमाह - **भक्तोऽसि ।** शास्त्रोपदिष्टमहत्वानुसन्धानेन प्रीति मानसि सखसि अवतार सौलभ्यविशेषेण प्रणयविस्रंभवान् असि इति । अस्माद्धेतोः प्रोक्तवानित्यन्वयः । सख्यभक्त्यादि गुणविशिष्टायैव उपदेष्टव्य इति कोयं निर्बन्ध इत्यत आह-**रहस्य**मिति **हि** यत् एतत् उक्तं वक्ष्यमाणं च अर्थ जातं **उत्तमं रहस्यम्** रहस्यत्वात् अभक्तायनोपदेष्टव्यम् । उत्तमरहस्यत्वान्मदन्येन वक्तुं न शक्यमिति भावः ।

अर्जुन उवाच - कर्तव्यता दृढीकरणार्थं कथायां प्रसङ्गात् उपस्थितस्य भगवदवतारस्य याथार्थ्यं ज्ञातुम् अर्जुन उवाच इत्यर्थः ।

अवरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ।। ४ ।।

अत्र परापरशब्दौ कालसंख्योत्कर्षापकर्षविषयौ । तथा च अयमर्थः । **भवतो जन्म अपरम्** - अदूरविप्रकृष्टं **विवस्वतः** सूर्यस्य **जन्मपरं** - अत्यन्तविप्रकृष्टम् । इदानींतनस्त्वमेव **आदौ** पूर्वकाले प्रोक्तवान् इत्येतदसम्भावनीयम् **कथं विजानीयां** यथार्थं विजानीयाम् । अत्र अयमाशयः **विवस्वते** - पुरा प्रोक्तमेव अद्य ते **प्रोक्तवान्** इत्युक्त्या वक्तुः तदानीन्तनस्य अद्य पुनर्जन्म सूचितम् । तज्जन्म किं देवमनुष्यादि सजातीयम् उत विजातीयं किन्त्वत्कृतदेहपरिग्रहाः शैलूषादिदेहपरिग्रहवन्मिथ्या उत सत्यः तज्जन्म किं पारमेश्वरस्य भाव परित्यागेन उत अपरित्यागेन स च देहः किं त्रिगुणात्मकः उत अप्राकृतः तज्जन्मनि च सङ्कल्पमात्रमेव हेतुः उत पुण्यपापे किं वा तज्जन्मपुण्यपापविपाक काले उत धर्मग्लानिकाले तच्च जन्म किं सुखाद्युपभोगार्थम् उत साधुपरित्राणार्थम् इति एतत्सर्वमभिप्रेत्यैव कथमिति शब्दप्रयोगः ।

श्रीभगवानुवाच - एवं प्रश्न तात्पर्यं जानन् श्रीकृष्णः जन्मप्रकार देह याथात्म्यजन्महेतुतत्कालतत्प्रयोजनान्युवाच इत्यर्थः ।

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ।। ५ ।।

च इत्यत्र 'च' शब्द इवार्थः । तथाहि अयमर्थः । **हे अर्जुन । तव च** - तवेव **मे** मम **बहूनि** जन्मानि **व्यतीतानि** विचित्राकारेण अतीतानि, **सर्वाणि** अहं **वेद** सर्वज्ञत्वात् ।

न त्वं वेत्थ जानासि परान् हन्मि इत्येतावन्मात्रं जानासि इति बोधनाय **परंतपेति** पुनरपि सम्बोधनम् । अत्र सत्यभूतार्जुन जन्मनां दृष्टान्तीकरणात् भगवज्जन्मनां सत्यत्वमुक्तम् । एवं जन्म प्रतिभासा इत्यनुक्त्वा जन्मानि इत्युक्त्या च सत्यत्वं व्यंजितं **तान्यहं वेद** नत्वं वेत्थ इत्युक्त्या स्वेतर दुर्ज्ञेयत्वकथनाद्देवादिविसजातीयत्वं दर्शितम् । अथ प्रकारादि प्रश्नानाम् उत्तरमाह -

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ।। ६ ।।

अपि सन्निति पदद्वयम् **अव्ययात्मा** इत्यत्रापि अनुषज्यते । **अजोऽपि सन्** कर्मकृतजननरहितोऽपि सन् जननम् अन्यथाभावः । अनेन स्वरूपतः शरीरद्वारा च अन्यथा भाववतः अचितो बद्धबद्धजीवाच्च वैलक्षण्यं दर्शितम् । **अव्ययात्मा** - अव्ययः क्षतिरहितः आत्मा - स्वभावो यस्य स तथा तादृशोऽपि सन् अव्यय इत्यत्रत्यो नञ् अत्यन्ताभावपरः । तेन कदाचित् ज्ञानसंकोचवतो मुक्ताद्यावृत्तिः सिद्धः । **भूतानाम् ईश्वरोऽपि सन्** अचित्संसृष्टानां सर्वेषां चेतनानां नियन्तापि सन् अनेन नित्येभ्यः परं वैलक्षण्यमुक्तम् । एतद्विशेषण त्रयेणापि देवादिविसजातीयत्वं दर्शितम् । तज्जन्मपारमेश्वरस्य भावापरित्यागेन इत्यपि दर्शितम् । सन्नपि इति पदद्वयेन तत्तदवतारेषु तासु तासु अवस्थासु च पारमेश्वरस्वभावस्य स्वेच्छया तिरोधानमेवेत्यपिसूचितम् । **स्वाम्** - स्वकीयां प्रकृतिं स्वभावं 'प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे' इति नैघण्टुकाः । जीवसाधारण त्रिगुणप्रकृतिव्यवच्छेदाय स्वामिति स्वासाधारण्योक्तिः । **अधिष्ठाय** - परिगृह्य अत्रोपाश्रित्येति वक्तुं शक्यत्वेऽपि अधिष्ठाय इत्युक्त्या प्रकृतिशब्दस्य नित्यालिङ्गास्वभावसंसिद्धिः इति एकायनब्राह्मणोक्तदिव्यविग्रहपरत्वमपि सूचितम् । अनेन देहः किं त्रिगुणात्मकः उत अप्राकृतः इति प्रश्नस्याप्राकृत इत्युत्तरं दत्तम् । आत्मनो माया आत्ममाया स्वकीयेन संकल्पेन इत्यर्थः । **माया** शब्दो ज्ञान परः । 'माया तु वयुनं ज्ञानम्' इति नैघण्टुकाः । 'संख्यातादेव मायया मायया वेत्ति तत्त्वतः' इति श्रौतस्मार्तप्रयोगाश्च अत्र द्रष्टव्याः । **सम्भवामि** - अवैकल्येन भवामि । अनेन तज्जन्महेतुः सत्संकल्प एव न पुण्यपापे इति दर्शितम् ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।। ७ ।।

'युगे युगे' इति युगानि यमस्य वक्ष्यमाणत्वात् **यदा यदेति** वीप्सा तदन्तर्वर्ति कालर्नियमपराजीववत् पुण्यापुण्यविपाककृतो वा मन्वन्तरादिरूपो वा कालनियमो नेति वीप्साशयः । **धर्मस्य -** अलौकिकश्रेयस्साधनस्य कृत्स्नस्य **ग्लानिः** ईषद्वैकल्यं **यदा यदा भवति । अधर्मस्य** नञ् अत्र विरोधे अवैदिकागमोक्तस्य वर्णाश्रमव्यवस्थाशून्यस्य अकर्तव्यस्य कर्मण **अभ्युत्थानमुद्गमः ।** यदा यदा भवति इत्यनुषङ्गेपि न अन्वयः । अथ अत्रापि वीप्सा ज्ञेया । तदा तदेत्यर्थः । **आत्मानम्** अवतारविग्रहविशिष्टं स्वरूपम् **अहं सृजामि -** व्यक्तीकरोमि । **नान्यो** मम सृष्टेत्यहमिति वदतो भावः । **धर्मग्लानिमपि** न सहे किं पुनर्विच्छेदं अधर्मस्योद्गममात्रमपि न सहे किमुत शाखोपशाखिनामिति । ग्लान्यभ्युत्थानशब्दाभ्यां व्यञ्जितम् । अनेन तज्जन्म किं पुण्यपापविपाककाले उत धर्मादिग्लान्यादिकाल इति प्रश्नस्य उत्तरमुक्तम् भवति ।

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ।। ८ ।।

साधुशब्दो अत्र दुष्कृच्छब्दप्रतियोगित्वेन निर्देशात् सुकृतिनश्च । न चलति निजवर्णधर्मतो । यः वर्णाश्रमाचारवता इत्याद्युक्त सद्वृत्ताः श्रीवैष्णवाः तेषां **परित्राणम्** अनिष्टनिवृत्तिपूर्वकइष्टप्रापणं तस्मै वैष्णवाग्रेसराणां च भगवदनुभवलाभाभावेव इष्टानिष्टे । तथा च मत्समाश्रयण पूर्वक मल्लाभाय इति **परित्राणाय** इत्यस्यार्थः । **दुष्कृतां** तद्विपरीतानां भागवतविषयकापराधकृताम् इत्यर्थः । **विनाशाय च** चकारो चयार्थः । साधुपरित्राणमेव उद्देश्यं दुष्कृद्विनाशकरणं तु आनुषङ्गिकम् इत्यर्थः । **धर्म संस्थापनार्थाय** धर्मस्य परिक्षीणस्य स्वाराधनात्मकस्य धर्मस्य संस्थापनम्सम्यक् स्थापनम् । उद्देश्यभूत-स्वपर्यन्ततयास्थापनं तदेवार्थः । प्रयोजनं तस्मै **युगे युगे** प्रतियुगं कृतादिनियमो नास्ति इति बोधनाय वीप्सा **सम्भवामि -** अवतरामि । मच्छक्तैस्त्वं रणे शान्तः परिपूतो भविष्यसि इत्युक्तरीत्या वैपरीत्य हेतुभूतराक्षसप्रकृतिशरीरग्रन्थिनिवर्तनरूपस्य दुष्कृद्विनाशनस्यापि धर्मसंस्थापनशब्देन क्रोडीकरणसंभवात् । **धर्मसंस्थापनाय** इत्यत्र चकाराप्रयोगः । अनेन अन्तिमप्रश्नद्वयस्य उत्तरमुक्तं प्रासंगिकस्यावतार याथात्म्यकथनस्य प्रकृतमोक्षोपयोगित्वम् आह -

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ।। ९ ।।

मे - साधुपरित्राणाद्यर्थम् स्वसंकल्पेनावतीर्णस्य **मम दिव्यम् -** 'बहुस्यां प्रजायेय' इति संकल्पित जन्मविलक्षणं **जन्म** जननं **कर्म च** दिव्यमित्यत्रापि अनुषज्यते । कर्म

शब्दश्च न जन्म हेतु परः । किन्तु चेष्टित परः । दिव्यं चेष्टितं चेत्यर्थः । एवम् 'अजोऽपि सन्नव्ययात्मा' इत्युक्तप्रकारेण तत्त्वतः याथार्थ्येन संशयविपर्ययौ । यथा न भवेतां तथा इत्यर्थः । **यो वेत्ति** - जानाति **स देहं** वर्तमानदेहं त्यक्त्वा । यो वेत्ति स पुनर्जन्मनैतीति वेदितृत्वावस्थापेक्षया पुनर्जन्म प्रतिषेधेन देहमित्यस्य वर्तमानदेहमित्यर्थः लाभः । **पुनर्जन्म नैति** पुनरुत्पत्तिं न प्राप्नोति । अनेन अनिष्टनिवृत्तिः उक्ता । अथ इष्ट - प्राप्तिरुच्यते । **मामेति** इति दिव्यजन्म चेष्टित ज्ञानेन उपासन विरोधिपापनिवृत्तौ जातायां पुष्कलोपासननिष्पत्तेः । 'विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि' इत्युक्तरीत्या निरतिशयानन्दरूपं मां तस्मिन्नेव जन्मनि प्राप्नोति इत्यर्थः । इतोवदतस्यभावो भव इति बोधनाय **अर्जुन** इति सम्बोधनम् । मामेति इत्येतदेव विशदयति ।।

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ।। १० ।।

ज्ञान तपसा - ज्ञानमिह पूर्वप्रस्तुतमवताररहस्य ज्ञानं तदेव तपश्शरीरशुद्धि हेतुत्वात्, तेन **पूता** - विध्वस्तसमस्तपापाः **बहवो मामुपाश्रिताः ।** यथोक्त प्रकारेण पुष्कलमद्ध्यान निष्ठाः । अत एव **वीतरागभयक्रोधाः** - रागाविषयान्तररागः । तदभावे च तन्मूलः क्रोधः, तल्लाभालाभव्यतिरिक्तेष्टानिष्टनिवृत्तिविरहेणैव किञ्चिदपि भयमिति मन्मया ज्ञानविषयीभूतेन **मया** प्रचुराः तादात्म्यविकारयोः अनुपपत्या प्राचुर्यार्थ एवायं मयट् **मद्भावं** - ममस्वभावं अपहतपाप्मत्वादिकं **आगताः** - प्राप्ताः । एवं साधुपरित्राणाध्यर्थ स्वेच्छापूर्वकावतारवर्णनमुखेन उपासनोपयोगि सौलभ्यं दर्शितम् । अथ तस्यैव काष्ठा प्राप्तां दशाम् आह -

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ।। ११ ।।

ये - पुरुषाः, **यथा** - येन प्रकारेण पूर्वोक्तानुष्ठाननियमप्रकारम् अनादृत्य येन प्रकारेण इत्यर्थः । **मां प्रपद्यन्ते** - स्वापेक्षितपतित्वपुत्रत्वनृसिंहवराहवामनादि प्रक्रियया मनोरथविषयं कृत्वा प्रपद्यन्ते । **तान्** पुरुषान् **तथैव** तेनैव प्रकारेण **अहं भजामि** सेवकान् प्रति सेव्यस्य भजनं सुलभदर्शनमेव । तथा च तदवेक्षित स्वरूपेणैव स्वात्मानं दर्शयामि इत्यर्थः । अनेन तत्तन्मनोरथम् अनुसृत्य प्रवृत्युक्त्या सौलभ्यं व्यञ्जितम् । तदेव कैमुत्येन स्थापयति । **ममेति । हे पार्थ ! मनुष्याः** - स्त्रीपुरुषविभागानादरेण

सर्वे मनुष्याः सर्वशः स्वापेक्षितैः सर्वप्रकारैः **मम वर्त्म** अत्र मार्गवाच्यपि वर्त्मशब्दस्सौलभ्योपदेश प्रकरणानुरोधेन सर्वसाधारण विग्रह चेष्टा सौशील्यादि स्वभावपरः प्रयुक्तश्च मार्गवाचि शब्दः स्वभावपरत्वेन पूर्वैः कोऽयं पन्था यदसि विमुख्यो मन्दभाग्येमयी इत्थमिति, इत्थम् अध्यायार्थतयाभिजातेषु षट्स्वर्थेषु प्रसज्ञकं प्रासङ्गिकं चोक्त म् ।।

अथ प्रकृतस्य कर्मयोगस्य ज्ञानाकारिताप्रकारं वक्तुं उपोद्घातमाह - काङ्क्षतं इत्यादिभिः षड्भिः श्लोकैः तत्र प्रथमं कर्मयोगाधिकारिणो दुर्लभत्वमाह -

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ।। १२ ।।

कर्मणां - देवताराधनरूपकर्मणां, **सिद्धिम्** - फलसिद्धिम्, **काङ्क्षन्तः** - काङ्क्षमाणः मनुष्याः इति विशेष्यं पूर्वश्लोकात् अनुषज्यते । कर्मफलम् कांक्षमाणाः सर्व एव मनुष्याः इत्यर्थः । मुमुक्षूणामपि आदौ त्रिवर्ग प्रावण्यस्यैव सत्वादिति भावः । **इह देवताः** - इह देवतात्वेन ये प्रतीयन्ते इन्द्रादयः ता देवता इत्यर्थः । **यजन्ते** - आराधयन्ति, 'सर्वं वाक्यं सावधारणम्' इति न्यायेन ता एव यजन्ते न तु तदन्तरात्मानं सर्वफलप्रदातारं सर्वकर्मफलभोक्तारं माम् इत्यर्थः । कुत इत्यत्राह - **क्षिप्रं हि** इति । **हि** - यस्मात् **क्षिप्रं** कालविलम्बमन्तरेण **मानुषे लोके** अस्मिन्नेव लोके **कर्मजा सिद्धिः** - फलसिद्धिः **भवति** अयं भावः । यद्यपि महति फलेस्थिते क्षुद्रफलाकांक्षा न भवति । तथापि क्षिप्रप्राप्तयेऽस्मिन्नेवलोके प्राप्तये च त्रिवर्गप्रावण्यात् क्षुद्रत्व-नश्वरत्व-दुःखमिश्रत्वादि दोषपुञ्जानादरेण पशुपुत्रादिफलं कांक्षमाणः सर्वान्तर्यामिणं मां विहाय सर्वेऽपि क्षुद्रदेवता यजन्ते न तु कश्चिदपि मां यजते । अत्तो मदुक्तप्रकारेण कर्मयोगाधिकारी दुर्लभ इति । नन्वेवम् अक्षीणशेषपापसंचयवत्वेन सर्वेषाम् अविवेकित्वात् क्षिप्रफलापेक्षिततत्वाच्च । कस्यापि मुमुक्षाभावान्मोक्षशास्त्रमेवामानंस्यादित्याशङ्क्य विरोधि तादृश पापक्षय हेतुमाह -

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ।। १३ ।।

चातुर्वर्ण्यम् - स्वार्थे षञ्, चत्वारो वर्णा इति **गुणकर्मविभागशः** - 'गुणविभागेन कर्मविभागेन इत्यर्थः । **गुणाः** - तमश्शूद्रे, रजः क्षत्रे, ब्राह्मणे सत्त्वमुत्कटम्' इत्यादिषु विभज्योक्ता **गुणाः** - 'तद्विभागेन कर्मशमोदमः तपश्शौचम्' इत्युपक्रम्य ब्राह्माम्

कर्मोत्यादिना वक्ष्यमाणं कर्म तद्विभागेन **मया सृष्टम्** - सृष्टिम् ततः करिष्यामि 'त्वामाविश्य प्रजापते' इति वचनात् । व्यष्टि सृष्टिकर्तुः । परस्य तदन्तर्गतचातुर्वर्ण्य स्रष्टृत्वम् । प्रजापति द्वारा ज्ञेयं सृष्टमित्युपलक्षणं रक्षितम् उपसंहृतं चेत्यर्थः । देवतान्तराधीनेषु क्षुद्रफलेष्वपि स्वस्यैव हेतुत्वमिति भावः । **तस्य** विचित्र सृष्ट्यादेः **कर्तारमपि माम् अकर्तारं विद्धि** । एकस्यैव कर्तृत्वं तदभावश्च कथम् इत्याशङ्क्य परिहरति ।

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बद्ध्यते ।। १४ ।।

कर्माणि - विषमसृष्ट्यादिरूपाणीमानिकर्माणि, **मां न लिम्पन्ति** - मां न सम्बध्नन्ति मत्प्रयुक्तत्वे खलु ततो मम सम्बन्धः तानि तु विचित्र सृष्ट्यादीनि **कर्माणि न** मत्प्रयुक्तानि । किन्तु सृज्यानां पुण्यपापरूपकर्म विशेष प्रयुक्तानि । अतः पुण्यापुण्यतरतमाभावानुगुणसुख-दुःखादिविषमसृष्टितारतम्यदर्शनकृतविशेष निर्णये । यथा विचित्रेषु अङ्कुरेषु क्षितिजलादेः सामान्यतः कारणत्वं अङ्कुरवैचित्र्यै तु तत्तद्बीजवैचित्र्यस्य विशेषतः कारणत्वं तथा सृष्ट्यादौ तु सामान्यतः कारणत्वेन प्राप्तिं कर्तृत्वं मुख्यं वैचित्र्यप्रयोजकत्वाभावेन अकर्तृत्वम् औपचारिकमिति न विरोध इति भावः । इत्थम् एकधा कर्तृत्व तदभावयोः विरोधाभावम् उक्त्वा प्रकारान्तरेणापि तमाह - **न मे इति कर्मफले** विचित्र सृष्ट्यादि कर्मफले **मे न स्पृहा** । किन्तु सृष्टानां क्षेत्रज्ञानामेव एवं च प्रवाह अनादिवासना.... ल....तत्तदिच्छानुरूपं तत्पुण्यपापानुगुणं प्रयच्छामि । न तु स्वेच्छानुरूपं स्वातन्त्र्यमात्रेण अतः फले निस्स्पृहत्वं पुरस्कृत्य अकर्तृत्वम् उक्तमिति । कर्तारमपि माम् अकर्तारं विद्धि इत्यस्य न विरोध इति भावः । इति उक्त प्रकारेण सृष्ट्यादि कर्तृत्वेऽपि फलसङ्गादिराहित्येन अकर्तारं मां योऽभिजानाति स कर्मभिः कर्मयोगारम्भविरोधिभिः **कर्मभिः न बध्यते** । तैर्मुच्यत इत्यर्थः । एवं श्लोकद्वयेन यथोक्त कर्मयोगारम्भविरोधिपापक्षयहेतुरुक्तः ।

अथ कर्मयोगं शिष्टानुष्ठानप्रदर्शनेन द्रढयन् अर्जुनं प्रत्यनुशास्ति ।

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ।। १५ ।।

माम् इत्यनुषज्यते । **एवं** कर्तृत्वाकर्तृत्वादिनोक्तप्रकारेण **मां ज्ञात्वा** - विधूतपापतया **मुमुक्षुभिः पूर्वैः** विवस्वन्मन्वादिभिः **कर्म** - कर्मयोगः, **कृतम्** - अनुष्ठितम् । **तस्मात्** शिष्टैः अनुष्ठितत्वात्त्वं सुगृहीतात्मतद्विषय याथात्म्योपदेशस्त्वं **पूर्वैः** शिष्टैः **कृतम्** अनुष्ठितम् ।

पूर्वतरं तदानीमेव मया उक्ततया पुरातनं कर्म उक्तलक्षणं कर्मयोगं **कुरु** - अनुतिष्ठ । अथ **तव** कर्म प्रवक्ष्यामि इति वक्ष्यमाणस्य कर्मणो दुर्ज्ञेयतामाह -

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ।। १६ ।।

अथ कर्मण्यकर्मेत्यादिना वक्ष्यमाणप्रकारेण कर्माकर्मरूपांशद्वयवति कर्मयोगे किं रूपं कर्मफलाभिसन्धिरहितं भगवदाराधनात्मकं कर्म कीदृशम् किम् अकर्मकर्मभिन्नं ज्ञानमकर्म शब्दार्थः । कर्तुरात्मनो याथात्म्यज्ञानमित्यर्थः । तत् किं रूपम् इति । इत्थं **कवयः** क्रान्तदर्शिनः विद्वांस इत्यर्थः । **'मोहिताः** विप्रकीर्णैश्शास्त्रैः' इति शेषः । अज्ञानान्यथा ज्ञानवन्त इत्यर्थः । तत् अंशद्वयवत्वात् अन्तर्गतज्ञानं कर्मयोगं **ते** - तुभ्यं **प्रवक्ष्यामि** मोहनिवृत्तिः यथा स्यात् तथा प्रकर्षेण वक्ष्यामि । **यत्कर्म ज्ञात्वा** - मदुक्तरीत्या **ज्ञात्वा अशुभात्** दुःखमिश्रात्संसारात् **मोक्ष्यसे** अनुष्ठानद्वारात्मावलोकनं सम्पाद्य निःश्रेयसं प्राप्स्यसि इत्यर्थः । कुतोऽस्य दुर्ज्ञेयत्वम् इत्यत आह -

कर्मणोऽपि हि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ।। १७ ।।

हि शब्दो हेत्वर्थः । **हि** - यस्मात् **कर्मणोऽपि बोद्धव्यं** कर्मण इति षष्ठी, सम्बन्धसामान्ये **गहना कर्मणो गतिः** इत्यत्रत्यगतिशब्दोपकृष्यते । न च स्वरूपपरः । ततश्च कर्मणः स्वरूपमपि बोद्धव्यम् इत्यर्थः। **बोद्धव्यं च विकर्मणः** विशब्दो वैविध्यार्थकः । नित्यनैमित्तिककाम्याकारेण तत्साधनद्रव्यार्जन रक्षणतदुपाय प्रवृत्त्याद्याकारेण वैविध्यमापन्नं कर्मविकर्मतस्यापि स्वरूपं **बोद्धव्यम्** इत्यर्थः । मुमुक्षोः फलभेदादिकृत वैविध्यपरिहारेण मुक्तैकफलतया एकशास्त्रार्थानुसन्धानस्य कार्यत्वाद्विकर्मणरूपमपि बोद्धव्यमेव इति भावः । **अकर्मणश्च बोद्धव्यम्** । अकर्म आत्मज्ञानं तत्स्वरूपमपि बोद्धव्यम् । **गहनेति** । तस्मात् **कर्मणो गतिः** स्वरूपं गहनाद्दुष्प्रवेशात् दुष्प्रवेशत्वं च ज्ञान त एव ततश्च गहनेत्यस्य दुर्विज्ञानेत्यर्थः ।

इत्थम् उपोद्घातं परिसमाप्य बोद्धव्यम् प्रकृतमाह -

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ।। १८ ।।

कर्मण्यकर्म यः पश्येत् इति कर्मणो बोद्धव्यमुच्यते । **अकर्मणि च कर्म यः** इति ज्ञाने बोद्धव्यमुच्यत इति विवेकः । अकर्म अत्र कर्मेतरत् ज्ञानम् । ततश्च कर्मणि क्रियमाणे अकर्म आत्मज्ञानं **यः पश्येत्** ज्ञानविशिष्टस्यैव कर्मण उपायतया विहितत्वेन परस्परात्मकत्वेनाभिन्नशास्त्रार्थत्वात् इत्यर्थः । अकर्मणि आत्मज्ञाने विद्यमान एव **यः कर्म पश्येत्** कर्तृभूतात्मयाथात्म्यज्ञानपूर्वकस्य कर्मण एव उपायत्वोक्तेः इति भावः । **सः** कर्मणो ज्ञानविशिष्टत्वं ज्ञानस्य कर्मविशिष्टत्वं च यः पश्यति सः इत्यर्थः । **बुद्धिमान् -** प्रशस्तबुद्धिः 'भूमनिन्दाप्रशंसासु' इत्युक्तेः । प्रशंसायां 'मतुप्' **मनुष्येषु** विचित्रप्रवृत्यर्हदेहवत्सु **स युक्तः ।** मोक्षार्हः **कृत्स्नकर्मकृत्** स इत्यत्रापि अनुषज्यते । स एव कृत्स्नशास्त्रार्थानुष्ठाता इत्यर्थः । ज्ञानविषयत्वेन प्रतिपन्नस्य कर्मणः कथं ज्ञानैक्यमित्यत आह -

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ।। १९ ।।

यस्य - मुमुक्षोः, **सर्वे -** द्रव्यार्जन प्रभृतयः, **समारम्भाः -** सम्यगारभ्यन्ते अनुष्ठीयन्त इति **समारम्भाः -** नित्यनैमित्तिक काम्यकर्मात्मिकाः क्रियाः, **कामसंकल्पवर्जिताः,** कामश्चसङ्कल्पश्च - कामसङ्कल्पौ ताभ्यां वर्जिताः, द्वन्द्वान्ते श्रुतो वर्जितशब्दः प्रत्येकं सम्बध्यते । **कामवर्जिताः -** सङ्कल्पवर्जिताश्च इत्यर्थः । कामः प्रकरणात् फलसङ्गः समित्येकीकारे कल्प्यते - आरोप्यते अन्यधर्मोन्यत्रानेनेति कल्पो भ्रान्ति ज्ञानं देहरूपेण परिणतया प्रकृत्या आत्मानमेकीकृत्य अनुसन्धानं सङ्कल्पः तद्वर्जिताः तद्रहिताः प्रकृतिविविक्तात्मस्वरूपानुसन्धानवन्त इत्यर्थः । **तं पंडितम्** ऊहापोहक्षमबुद्धिं तमेव ज्ञानाग्नि दग्ध कर्माणं ज्ञानं कर्मान्तर्गतात्मयाथात्म्यज्ञानमेव । **अग्निः तेन दग्धं** निश्शेषनिवृत्तं कर्म यस्य तं कर्म शब्दोऽत्र प्राचीनकर्मपरः नैष्फल्यप्रसङ्गविद्याम् आह - आत्मन्यनिवर्त्यत्वाभ्यां क्रियमाण कर्मानन्तर कर्मणोः ग्रहणायोगात् । **बुधाः -** प्राप्यस्य प्राप्तुश्च आत्मनः प्रापकस्य कर्मयोगस्य च असन्दिग्धाविपर्यस्त स्वरूपज्ञाः **आहुः -** अतो ज्ञानाकारत्वम् उपपद्यत इति भावः । तदेव विवृणोति ।

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ।। २० ।।

कर्म च फलं च **कर्मफले** तयोः आसङ्गोभिष्वङ्गः कर्मण्यसङ्गः । स्वकर्तृत्वबुद्धिः **फले आसङ्गः** फललिप्सा तदुभयं त्यक्त्वा **नित्यतृप्तः** नित्ये स्वात्मन्येव तृप्तः निराश्रयः

पामरैः आश्रीय्यत इत्याश्रयशब्देनास्थिराप्रकृतिरुच्यते । निर्गतस्तस्या इति तथोक्तः प्रकृतावाश्रयणीयत्वबुद्धिशून्य इत्यर्थः । **स** एवंभूतो **यः सकर्मणि** विषये **अभिप्रवृत्तोऽपि** आभिमुख्येन प्रवृत्तोऽपि तदेक विषयतया प्रवृत्तोऽपि इत्यर्थः । किञ्चित्किञ्चिदपि कर्म नैव करोति कर्मापदेशेन ज्ञानाभ्यासमेव करोति इत्यर्थः । एवमुक्तस्यापि अर्थस्य दुर्ज्ञानत्वाद्विशदप्रतिपत्त्यर्थं पूर्वं बहुषु प्रदेशेषु अभिहितानां संकलय्य प्रतिपत्यर्थं अस्यै वार्थस्यादर्शणीयत्वार्थं च पुनरपि कर्मणो ज्ञानाकारत्वमाह -

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ।। २१ ।।

आशीः फलाभिसन्धिः निर्गतस्तस्यास्तथोक्तः । **यतचित्तात्मा** आत्मशब्दो मनः परः **चित्त**शब्दश्च तस्यैव बुध्यहंकार सह पठितावस्थाविशेष परः । अध्यवसायाभिमान चिन्तावृत्तिभेदान्मनस एव वैविध्यमाहुः प्राज्ञाः । तथा च नियमनियमितावस्थायुक्तं मनो येन सः **यतचित्तात्मा** इत्युच्यते । विषयान्तरशून्यमना इति फलितार्थः । **त्यक्तसर्वपरिग्रहः** सर्वेषां परिग्रहः **सर्वपरिग्रहः** सर्वशब्दः प्रकृति-प्राकृत भोग्यभोगोपकरणादिपरः तेषां परिग्रहः स्वीकारः 'पर्याप्तौ च परिवारे आलवाले परिच्छदे । पत्नी स्वीकार शपथ मूलेष्वपि परिग्रहः' इति वैजयन्ती । आत्मैक प्रयोजनतया प्रकृति-प्राकृतादिषु स्वकीयत्वाभिमानशून्य इत्यर्थः । केवलं ज्ञाननिष्ठादिकमन्तरैव **शारीरं** - शरीरसम्बन्धि, शरीरिणो दुस्त्यजम् इत्यर्थः ।

यद्वा - **शारीरम्** - बुद्धिव्यापारभूतफलसङ्गादिराहित्यात् शारीरशब्द व्यपदिष्टम् अथवा शरीरधारणैकप्रयोजनत्वात् स्वर्गाद्यप्रयोजनत्वाच्च । **शारीरम् कर्म,** कर्मयोगं मनोनियमनातिशयसापेक्षज्ञानयोगादिव्यवच्छेदाय कर्मयोगे शारीरमित्युक्तिः । **कुर्वन्** अनुतिष्ठन् **किल्बिषं** संसारं **न आप्नोति ।** किल्बिषहेतुत्वात्संसारस्य किल्बिषमित्युक्तिः । एतदेव आत्मावलोकनसाधनमिति भावः ।

ननु कर्मयोगो न आत्मावलोकनोपयोगी तस्य शारीरत्वोक्त्या शरीरधारणार्थ-द्रव्यार्जनादिषु प्रवृत्तिः अवर्जनीया स्यात् । तत्प्रवृत्ति विघातिषु क्रोधः स्यात् विहितायां च प्रवृत्तौ मोघप्रयत्नतया सन्तापः स्यात् । तल्लब्धौ प्रहर्षश्चस्स्यात् ।

अतः प्रत्युतात्मावलोकनविरोधिसमस्तवैरि समुत्थापक इत्यत्राह -

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ।। २२ ।।

यदृच्छया - अयत्नेन, स्वप्रयत्नमन्तरेण इत्यर्थः । **यो लाभः -** शरीरधारणहेतु-भूतवस्तुलाभः । **तेन सन्तुष्टः -** सम्यक् तुष्टः, यदा यत्किञ्चित् शरीरधारणार्थवस्त्वागमः । तदा ततोतिशयितेषु माधुर्यादिविशिष्टेषु प्रवर्तितव्यम् इति भावः । **द्वन्द्वातीतः** शीतोष्णमृदुपरुषादिद्वन्द्वान्यतिक्रान्तः । एतच्च मात्रा स्पर्शास्ति इत्यत्रोक्तम् **विमत्सरः -** विगतमात्सर्यः परेष्विति शेषः । यथा आतपादिनिमित्तसन्तपनादिषु स्वकर्मनिरूपणेन न क्रोधः । अपितु छत्रादिभिः आतपनिवारणमात्रमेव क्रियते । तद्वत् परेषु अनिष्टो यतेषु स्वानिष्ठपरिहार एवकार्यः । न परेषु क्रोधः कार्य इति भावः । **समः -** सिद्धावसिद्धौ च युद्धादि कर्मसु जय सिद्ध्यसिद्ध्योः तुल्यचित्तस्सन्नित्यर्थः । कृत्वापि सामर्थ्यात्कृत्वाऽपि कर्मेति लभ्यते । कर्मकृत्वाऽपि इत्यर्थः । **न निबध्यते** न संसारं प्राप्नोति बन्धहेतुफल संगाद्यभावादिति भावः । एवं त्यक्त्वा-कर्मफलासङ्गं त्यक्तसर्वपरिग्रहः इत्यादिभिः बुद्धिपूर्वपरित्याग उक्तः । इदानीं यज्ञाद्यर्थं द्रव्यार्जनं व्यापृतस्यापि स्वरसत एव संगाभावादिकं वदन् अनन्तस्यापि विरोधि कर्मणः कर्मयोगप्रभावान्निवृत्तिमाह -

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ।। २३ ।।

ज्ञानावस्थित चेतसः - ज्ञाने - आत्मज्ञाने **अवस्थितं -** पूर्वोक्तैः बुद्धिपूर्वसंग त्यागादिभिः सुदृढं स्थितं चेतो मनो यस्य तस्य इदानीम् अनियन्तव्य मन इत्यर्थः । अत एव **गत संगस्य** निरतिशय भोग्यतानुसन्धानास्त्वयमेव सवासनं निर्गतसंगस्य । अत एव **मुक्तस्य** सर्वपरिग्रहैः निर्मुक्तस्य अनेन सर्वपरिग्रहा न त्याज्याः । किन्तु तैरेव अयं मुक्त इति भावः । **यज्ञाय -** यथावस्थित कर्मयोग निष्पत्तये **आचरतः -** जितसमस्तजेतव्यतया निष्प्रत्यूहं प्रवर्तमानस्य **समग्रं -** निःशेषं **कर्म ।** बन्धहेतुभूतं प्राचीनम् आत्मसाक्षात्कार विरोधि पुण्यापुण्यरूपं **प्रविलीयते -** क्षीयते ।

इत्थं प्रकृतिवियुक्तात्मस्वरूपानुसन्धानयुक्ततया कर्मणो ज्ञानाकारत्वमुक्तम् । इदानीं सुक्स्रुवहविरादिपरिकरविशिष्टस्य नित्यनैमित्तिकादिरूपस्य परब्रह्मभूत परमपुरुषात्मकतानु-सन्धानयुक्ततया ज्ञानाकारताम् आह -

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ।। २४ ।।

ब्रह्महविः इति ब्रह्म भूतं यद्धविर्निर्दिश्यते तद्विशेषणं **ब्रह्मार्पण**मिति पदं तस्य च **अयमर्थः** । अर्प्यते अनेन इत्यर्पणम् करणे ल्युट् । स्रुगादिः इत्यर्थः । ब्रह्मस्वरूपमर्पणं स्रुगादियस्य हविषः तद्ब्रह्मार्पणं ब्रह्मात्मक स्रुगादि सांधनमित्यर्थः । तत्किं **ब्रह्म हविः** ब्रह्मात्मक हविश्चरु पुरोडाशादि **ब्रह्माग्नौ -** ब्रह्मात्मकाग्नौ ब्रह्मणा हुतम् । ब्रह्मात्मकेन कर्त्राहुतं यद्यप्यर्पण हविरग्निशब्दवद्विशिष्य कर्तृवाचिशब्दो नास्ति । तथापि तृतीयया कर्तोपस्थाप्यते । कर्तरि तस्या अनुशिष्टत्वात् । यद्यपि सा कर्तरीव करणेऽपि अनुशिष्टाकर्तृकरणयोः इति । तथापि **ब्रह्मार्पणम्** इत्यर्पणपदेन करणस्योक्तत्वात् कर्तुरेवापेक्षितत्वात् कर्तर्येव तृतीयेत्युक्तार्थ लाभः । अत्र इतीत्यध्याहार्यम् । 'इति' इत्थं ब्रह्मकर्मसमाधिना ब्रह्मात्मकं **कर्म -** ब्रह्मकर्म, तत्र **समाधिः** अनुसन्धानं यस्य तादृशेन तेन कर्त्रा **ब्रह्मैव गन्तव्यम् -** ब्रह्मात्मकतया ब्रह्मभूतम् आत्मस्वरूपम् गन्तव्यमिति भावः । अत्र स्रुक्-हविः-अग्न्यादीनां ब्रह्मात्मकत्वत्वं ब्रह्मकार्यत्वात् तच्छरीरत्वाद्वा ज्ञेयं तथा च श्रुतिस्मृती । 'सर्वं खल्विदं ब्रह्म तज्जलान्' इति 'तत्सर्वं वै हरेस्तनुः' इति च ।

एवं कर्मणो ज्ञानाकारतां प्रतिपाद्यकर्मयोगभेदान् आह -

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ।। २५ ।।

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्ये इन्द्रियाग्निषु जुह्वति ।। २६ ।।

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ।। २७ ।।

द्रव्ययज्ञाः तपोयज्ञा योगयज्ञास्तथाऽपरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ।। २८ ।।

अपरे योगिनः कर्मयोगिनः । **दैवमेव** यत्कर्मदेवसम्बन्धि तद्देवसम्बन्धि कर्म च देवार्चनमेव **यज्ञं पर्युपासते** - सेवन्ते । तत्रैव निष्ठां कुर्वन्ति इत्यर्थः । अत्र एवकारस्वारस्यात् सर्व एवैते पक्षावैकाल्पिका इति लभ्यते । यद्यपि 'देवताभ्यर्चनं चैव

समिधाऽदानमेव च' इति मनुना देवाभ्यर्चनस्य नित्यकर्मत्वोक्तेः । सर्वकर्मयोगिनाम् एतदविशिष्टमेव इति न अत्र वैकल्पिकत्वम् उपपत्तिमत् । तथापि तन्मात्रनिष्ठायाः साधारण्येन एतदनुपपत्तिः । **अपर** इति वक्ष्यमाण कर्मयोग्यपेक्षया । न तु ब्रह्मार्पणमिति पूर्वश्लोकोक्ताधिकार्यपेक्षया तत्र कर्मयोगभेदावेक्षिततत्तत्कारक विशेषभेदानुपलक्षणात् । **अपरे कर्मयोगिनः** ब्रह्माग्नौ ब्रह्मात्मकेऽग्नौ **यज्ञं** यज्ञसाधनं हविः यज्ञेन यज्ञसाधनेन सृगादिना जुह्वति ब्रह्मार्पणम् इत्युक्त न्यायेन 'यागे होमे च निष्ठां कुर्वति' इत्यर्थः । अत्र **यज्ञेन** इति **जुह्वति** इति च निर्देशात् कर्मावान्तरभेदयागहोमयोः निष्ठायाः विशेष्योक्तेः पूर्वस्माद्भेदः ब्रह्मार्पणम् इत्यस्य तद्विशेषं विषयत्वं च व्यज्यते । अव्ये कर्मयोगिनः श्रोत्रादीनि श्रोत्रत्वक्चक्षुरादीनि इन्द्रियाणि संयमाग्निषु संयमः विषयेभ्यो नियमनं स एवाग्निः तस्मिन् जुह्वति संयमनेन श्रोत्रादीन्द्रियाणां निर्व्यापारत्व लक्षणभस्मसात्करणात् संयमस्याग्नित्वं प्रति इन्द्रियं संयमन भेदात् संयमाग्निषु इति बहुवचनम् । यद्यपि इन्द्रियनियमनं सर्वयोगिसाधारणमिति न अस्य वैकल्पिक पक्षान्तरत्वम् । तथापि प्रयत्नमात्रस्यैव अत्र विवक्षणात् पक्षभेदो ज्ञेयः शब्दादीन् शब्दस्पर्शरूपरसगन्धान् विषयान्विशेषेण बन्धकान् अर्थान् तदुक्तम् । **वि**शब्दो हि विशेषार्थः, सिनोतिः बन्ध उच्यते । विशेषेण सिनोति इति विषयः इति । अन्ये कर्मयोगिनः इन्द्रियाग्निषु जुह्वति, अत्र विषयाणां होमो न समर्पणम् । अपि तु नियमनं तच्च दूरीकरणं तत्संनिधिपरिहार इति यावत् ।

यद्वा विषयाणाम् होमः तेषाम् अकिंचित्करत्वापादनं होमेन हविषामपि । तथा त्वापादनमेव क्रियते । एतेन श्रोत्रादीनि इन्द्रियाणि इत्यनेन पौनरुक्त्यम् । तत्र विषय-सन्निधि परिहारः अत्र सन्निहितानाम् अकिञ्चित्करत्वमिति भेदः । अपरे कर्म योगिनः सर्वाणि इन्द्रियकर्माणि, इन्द्रियशब्दोऽत्र श्रोत्रादीनि इति पूर्वत्र विशेषनिर्देशात् 'गोबलीवर्द'नयेन वागादिकर्मेन्द्रियपरः तेषां कर्माणि वचनादानादीनि प्राणकर्माणि उच्छ्वास निश्वासादीनि प्राणसंवादादि सिद्धेन्द्रियव्यापारादि हेतुसूक्ष्मव्यापारा वा ज्ञानदीपिते देहातिरिक्त परिशुद्धात्मस्वरूपानुसन्धानात्मकज्ञानेन दीपिते तदर्थं प्रज्वलित इति यावत् । आत्म-संयमयोगाग्नौ आत्मशब्दोऽत्र मनः परः, तस्य संयमो नियमनम् । स एव योगसाधनत्वाद्योगः तस्य योग इति वा प्राप्तिः इत्यर्थः । स एव अग्निः तत्र जुह्वति अकिञ्चित्कराणि कुर्वन्ति इत्यर्थः । **द्रव्ययज्ञाः** - अत्र पूर्वधान्तस्थोपर शब्दः प्रत्येकं सम्बध्यते । द्रव्यैः यज्ञो येषां ते तथोक्ताः 'व्यधिकरणो बहुव्रीहिः' । यद्वा द्रव्यसाध्यतया द्रव्यात्मका यज्ञा येषां इति विग्रहः । यज्ञ शब्दो अत्र देवपूजापरः 'यज देवपूजासंगतिकरणदानेषु' इत्यनुशासनात्

द्रव्यशब्दसामर्थ्यात् न्यायार्जितद्रव्यसाध्ययागदानहोमवन्तः सर्वे संगृहीताः । अत एव बहुवचनं यद्यपि **दैवमेवापरे यज्ञम्** इत्यनेन पुनरुक्तिः । तथापि अर्चन-दान-यागहोमानां द्रव्यसाध्यानां चतुर्णां तपोयज्ञादिभ्यो व्यावृत्तये न्यायार्जितद्रव्यसाध्यत्वज्ञापनाय च न पुनरुक्तिः ।

यद्वा पूर्वम् अर्चनस्वरूपस्य यज्ञत्वमुक्तम् इह तु द्रव्यार्चनादेः इत्यपौनरुक्त्यम् । अपरे तपो यज्ञाः तपः शास्त्रीयो भोगसंकोचः स यज्ञो येषां ते तथोक्ताः । तथापरे **योगयज्ञाः** योगशब्दोऽत्र न समाधिपरः कर्मनिष्ठा प्रकरणत्वात् । किन्तु सङ्गतिपरः 'योगस्सन्नहनोपायध्यानसङ्गतियुक्तिषु' इत्यनुशासनात् । सा च पुण्यतीर्थाभिगमन-तन्निवासादिरूपा स यज्ञो येषां ते तथोक्ताः । स्वाध्यायज्ञानयज्ञाश्च स्वाध्यायाश्च ज्ञानं च स्वाध्यायज्ञाने स्वाध्यायो वेदाभ्यासः ज्ञानमपि साहचर्यात् तदर्थज्ञानमेव । तथा च स्वाध्याययज्ञाः ज्ञानयज्ञाश्च इत्यर्थः । स्वाध्यायाभ्यासशीलाः तदर्थज्ञानमननशीलाश्च इति यावत् । तथा अपर इत्यन्वयः । तथा **यतयः** - यतनशीलाः **शंसितव्रता** शांसितमकुण्ठितम् व्रतंसकल्पो येषान्ते तथोक्ताः ।

अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणः ।। २९ ।।

तथा एवमेव **अपरे** कर्मयोगिनः **प्राणायामपरायणाः** प्राणायामेषु निष्ठां कुर्वन्ति इत्यर्थः । प्राणस्यायामो निग्रहः प्राणायामः कीदृग्भूतास्ति नियताहारा । जात्याश्रयादुष्टमिताहारवन्तः । ते च प्राणायामनिष्ठाः पूरक, रेचक, कुम्भक, प्राणायाम भेदेन त्रिप्रकारास्तान् कर्मेण आह - 'अपाने जुह्वति' इत्यादिना केचिदिति शेषः । **प्राणम्** ऊर्ध्वप्रवृत्तप्राणम् **अपाने जुह्वति** - अपानेप्रक्षिपन्ति । अतः प्रविष्टं कुर्वन्ति इत्यर्थः । पूरकं कुर्वन्ति इति यावत् । एवम् अपानमधस्थितं वायुं प्राणे जुह्वति । ऊर्ध्वप्रवृत्तं कुर्वन्ति । रेचकं कुर्वन्ति इति यावत् । एवं **प्राणापानगती** - प्राणगतिम् अपानगतिं च इत्यर्थः । रुद्ध्वानिरुध्यवायोः ऊर्ध्वाधोगमननिवारणं कृत्वा इत्यर्थः । प्राणान् प्राणवृत्तिभेदान् प्राणेष्वेव **जुह्वति** तन्नियमने प्रयतन्ते कुम्भकं कुर्वन्ति इति यावत् । अथ किमेतेषाम् उच्चावचकर्मयोगभेदनिष्ठानाम् अवान्तरफलभेदोऽस्ति किं प्राणायामादिनिष्ठानां यज्ञादिकं त्याज्यम् इत्याशङ्काद्वयं निराकरोति ।

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ।। ३० ।।

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।

एते द्रव्ययज्ञ प्रभृतिषु प्राणायामपर्यन्तेषु कर्मयोग प्रभेदेषु प्रवृत्ताः सर्वेऽपि **यज्ञविदः ।** असंकोचेन महायज्ञादिनित्यनैमित्तिकादि सर्वयज्ञस्वरूपविदः तन्निष्ठा इत्यर्थः । **यज्ञक्षपितकल्मषाः -** यज्ञैः क्षपितं - नाशितं कल्मषं वृजिनं येषान्ते तथोक्ताः । यज्ञानां तन्नाशकत्वं च 'धर्मेण पापमपनुदति' इति श्रुति सिद्धम् । **यज्ञशिष्टामृतभुजः -** यज्ञशिष्टामृतेन शरीरधारणं कुर्वन्तः 'भुज-पालनाभ्यवहारयोः' इति हि धातुः । **सनातनं ब्रह्म यान्ति ।** अथ कर्मयोगावान्तरभेदनिष्ठानां सामान्यधर्मभूतनित्यनैमित्तिकादि-परित्यागेनर्थमाह -

नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ।। ३१ ।।

अयज्ञस्य न विद्यते अनुष्ठेयो यज्ञो यस्य स तथा तस्य अयं लोकः प्राकृतलोकः तत्सम्बन्धी त्रिवर्गः पुरुषार्थो नास्ति - न विद्यते । **अन्यत्ततो** विलक्षणः अप्राकृतः लोकः इत्यनुषज्यते । **कुतः ?** तस्माद्धेतोः परमपुरुषार्थो दूरापास्त इत्यर्थः । सद्वंशप्रसूतस्य **एव** तदलाभो न युक्त इति बोधनाय **कुरुसत्तम** इति संबोधनम् । इत्थं कर्मयोगावान्तर-भेदानुपदिश्य तन्निष्ठानामपि साधारणानां नित्यनैमित्तिकानाम् अवश्यानुष्ठेयत्वं तत्परित्यागे प्रत्यवायश्चोक्तः । अथास्यैवार्थस्योपसंहारः क्रियते ।

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ।। ३२ ।।

बहुविधाः - बह्व्यो विधाः प्रकाराः येषां ते बहुविधाः । **यज्ञाः -** द्रव्ययज्ञा इत्यादिना निर्दिष्टाः कर्मयोगाः **ब्रह्मणः** यथावस्थितस्य आत्मनो **मुखे -** उपाये 'मुखं तु वदने मुख्ये ताम्रेद्वाराभ्युपाययोः' इत्यभिधानात् । आत्मप्राप्त्युपाये कर्मयोगे **विततः** अवान्तरभेदवत्तया विस्तृताः आत्मयाथात्म्यप्राप्तिसाधनतया स्थिता इत्यर्थः । **तान् -** अन्तर्गतज्ञानतया ज्ञानाकारान् उक्त समस्तप्रकारान् **सर्वान् -** अवान्तरभेदसहितान् कर्मयोगान् कर्मजाननुष्ठीयमाननित्यनैमित्तिककर्मनिष्पन्नान् **विद्धि -** जानीहि । तथा ज्ञानस्य फलमाह - **एवमिति ।** एवम् उक्तरीत्या **ज्ञात्वा** सपरिकरं कर्मयोगस्वरूपम् अवगम्य **विमोक्ष्यसे ।** आत्मावलोकनप्रतिबन्धकैः इति शेषः । **एवम्** अन्तर्गतज्ञानतया कर्मयोगस्य ज्ञानाकारत्वमुक्तं कर्मज्ञानरूपांशद्वयवति । तस्मिन् ज्ञानांशस्य प्राधान्यमाह -

श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तपः ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ।। ३३ ।।

अत्र ज्ञान यज्ञशब्दो न ज्ञानयोगपरः 'कर्मज्यायो हि अकर्मणः' तयोस्तु कर्मसन्न्यासात् कर्मयोगो विशिष्यत इति पूर्वोत्तरविरोधापातात् । किन्तु कर्मयोगांशपरः । न च एवं ज्ञाने परिसमाप्यते । 'न हि ज्ञानेन सदृशम्' 'ज्ञानं लब्ध्वा परां शान्तिम्' । 'येन भूतान्यशेषेण द्रक्ष्यसि' । इत्यादि विरोध इति शङ्क्यम् । तेषामपि कर्मयोगान्तर्गततज्ज्ञानांश-परत्वस्य वक्ष्यमाणत्वात् द्रव्यमयाद्यज्ञात् । अत्र **यज्ञशब्दः** तदंशकर्मपरः अव्यवसायसाध्यत्वेन द्रव्यप्रचुरात्कर्मरूपांशात् इत्यर्थः । **श्रेयान्** प्रशस्यतरः श्रेयस्त्वमेवाह - **सर्व**मिति । **सर्वं कर्म** अंशभूतं सर्वमपि **कर्म अखिलं** कर्म व्यतिरिक्तमुपादेयं साधनान्तरमपि **ज्ञाने** कर्मयोगान्तर्गतज्ञानांश **परिसमाप्यते** । सर्वैः कर्मभिः तदितरसाधनांतरैरपि ज्ञानांश एव साध्यत इत्यर्थः । तदेवाभ्यस्य मानं प्राप्य ज्ञानावस्थामापद्यत इति भावः । कर्मयोगः स्वांशभूतज्ञाने साक्षात्कारलक्षणसाध्यदशाम् आपन्नो भवति इति पर्यवसन्नार्थः ।

अथ उपदिष्टमेव ज्ञानं तत्तद्विपाकावस्थायां वैशद्याय ज्ञानिभ्यः पुनः पुनः श्रोतव्यम् इत्याह -

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ।। ३४ ।।

तत् 'अविनाशि तु तद्विद्धि' इत्यारभ्य 'एषा ते अभिहिते'त्यन्तेन मयोपदिष्टम् आत्मज्ञानं **विद्धि** तादृशात्मयाथात्म्यज्ञानपूर्वके कर्मयोगे वर्तमानतया परिपाकहेतुमापन्नस्त्वं पुनः पुनः जानीहि । केन प्रकारेण ज्ञातव्यमित्यत आह - **प्रणिपातेन** इत्यादि प्रकर्षेण नीचैः पतनं प्रणिपातः साष्टाङ्ग प्रणाम इत्यर्थः । अयं तु प्रश्नाङ्गभूतः तेन परिप्रश्नेन **परिप्रश्नः** - स्वबुद्धिमत्तानिगूहनेन अजानत इव साक्षात् प्रष्टव्यानभिधानेन तदनुबन्धिविषय प्रश्नः तेन सेवाचिरानुवर्तनं तया च **विद्धि** इत्यन्वयः ज्ञानिभ्यस्सकाशात् इति शेषः । **ते** प्रणिपातादिभिः उपसन्नाय तुभ्यं **तत्त्वदर्शिनः** साक्षात्कृतात्मस्वरूपाः । **ज्ञानम्** - आत्मयाथात्म्यज्ञानम् **उपदेक्ष्यन्ति** - कर्मयोगान्तर्भूतस्यात्मयाथात्म्यज्ञानस्य विपाकानुगुणं कालेन वेदनीयस्य साक्षात्कारावस्थायाः चिह्नं दर्शयति ।

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ।। ३५ ।।

यत् ज्ञानं ज्ञात्वा **पुनः** भूयः एवं देवोऽहं, मनुष्योऽहम् इत्याद्यभिमानरूपं **मोहं** - भ्रमं **न यास्यासि** - न प्राप्नोषि । कुत इत्याशङ्क्य फलनिर्देशपूर्वकं ज्ञानस्य सामर्थ्यमाह -

येन इति । आत्मनि मायातिजनसमानाधिकरणे सप्तम्यो न वा परस्परमाधाराधेय भाव बोधिके । किन्तु पृथक्पृथगन्विते - तथा च अयमर्थः । अशेषेण इत्युपलक्षणतृतीया । तथा च देवाद्यशेषाकारेण उपलक्षितान् इत्यर्थः । भूतानि अचित्संसृष्ट क्षेत्रज्ञान् आत्मनि स्वात्मनि **द्रक्ष्यसि** - प्रकृतिसंसर्गेण विषमतया प्रतिपन्नानि **भूतानि** - परिशुद्धतया ज्ञाते स्वात्मनि निदर्शनभूते 'स्थालीपुलाक' न्यायेन **द्रक्ष्यसि** इत्यर्थः । स्वसमानाकारमेव पश्यसि इति यावत् । **अथो** - अनन्तरं परिशुद्धस्वस्वरूपेण सह प्रकृतिसंसर्गनिमित्तदेवमनुष्यादि-विषमाकारवतां क्षेत्रज्ञानां समत्वं दृष्ट्वा अनन्तरम् इत्यर्थः । **मयि** सर्वेश्वरे मयि **द्रक्ष्यसि** - सर्वभूतानि तानि द्रक्ष्यसि स्वात्मानं परांश्च मत्समान्पश्यसि इत्यर्थः । 'पुमान्न देवो न नरो न पशुनः न च पादपः । नायं देवो न मर्त्यो वा' ।। 'विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिनः' ।। 'निर्दोषं हि समं ब्रह्म' - 'निरञ्जनः परमं साम्यमुपैति' 'तादृगेव भवति' 'ब्रह्म वेद ब्रह्मैव भवति', 'मम साधर्म्यमागताः' इत्यादिकम् इह भाव्यम् ।

इत्थं ज्ञानांशस्य प्राधान्यमुक्तम् । अथ तस्य विरोधिनिवर्तकत्वमाहात्म्यमाह -

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ।। ३६ ।।

चेत् शब्दो यदि शब्दसमानार्थोऽपि शब्दसहितो यद्यपि इत्यर्थकः, अपि चेत् यद्यपि त्वम् **पापकृत्तमः** - पापकृद्भ्यः **सर्वेभ्यः** उत्कृष्टोऽसि । अथापि इत्यध्याहार्यं **सर्वं वृजिनम्** । अनादिकालप्रवृत्ततया अपरिमितं पापं **ज्ञानप्लुवेन** - ज्ञानरूपेण प्लुवेन **सन्तरिष्यसि** - सुखेन तरिष्यस्यैव । अत्र ज्ञानस्य प्लुवत्वोक्त्या वृजिनस्य समुद्रत्वं ज्ञानेन विना दुस्तरत्वं च सूचितम् ।

ननु कथमेकेन ज्ञानेन अनादिकालप्रवृत्ततयानन्तपापनिवृत्तिः । कथं वा - 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इत्युक्तस्वभावस्य पापस्य निवृत्तिः इत्यत आह -

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ।। ३७ ।।

समिद्धः - सम्यक्दीप्तः प्रवृद्ध इति यावत् । अनेन निश्शेषदाहकत्वसामर्थ्यं व्यञ्जितम् । अग्निरेधांसि समिधः । **यथा भस्मसात्कुरुते** - भस्मीभूतानि कुरुते अकार्यकराणि

कुरुते इत्यर्थः । **तथा ज्ञानाग्निः -** आत्मयाथात्म्यज्ञानरूपोऽग्निः सर्वकर्माणि जीवगतान्यनादिकाल-संचितान्यनंतानि पुण्यकर्माणि **भस्मसात्कुरुते ।** पूर्ववदर्थः । 'ना भुक्तं क्षीयते' इत्यादिकं तु प्रारब्धविषयं न संचितविषयमिति भावः । **अत्रैधांसि** इति बहुवचनं एकस्याप्यनेक निवर्तकत्वं संभवति इत्यर्थ सूचनाय समुद्रतरणदृष्टान्तः पुनः प्रवेशाविरोधीति पुनः कार्यकरत्वप्रसङ्गप्रतिषेधाय 'काष्ठभस्मसात्करण'दृष्टान्तकथनं वह्निदृष्टान्तलब्धसामर्थ्येनाऽपि पाप निवर्तकत्वमाह -

नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ।। ३८ ।।

हि यस्मात्, **ज्ञानेन सदृशं -** तुल्यं **पवित्रम् -** पापशोधकम् **इह -** जगति **न विद्यते ।** क्षेत्रज्ञस्य ईश्वर ज्ञानाद्विशुद्धिः परमामतेत्युक्तेश्वर ज्ञानादर्वाचीनेषु ज्ञानरहित-कर्मपुण्यस्थानादिकेषु परिशुद्धात्मज्ञानतुल्यं पापनिवर्तकं नास्ति इत्यर्थः ।

ननु इदानीं तथाविधं ज्ञानं कुर्याम् इत्यभिसन्धिमतोऽपि तन्न जायते । अतः तस्य पुंव्यापाराविषयत्वेन न विधेयत्वम् इत्याशङ्क्याह - **तदिति । तत्** कर्मयोगान्तर्गतं परिपाकावस्थं ज्ञानं **योगसंसिद्धः** प्रत्यहमनुष्ठीयमानज्ञानाकारकर्मयोगेन संसिद्धः । पक्वकषायत्वलक्षणयोग्यतामापन्नः स्वयं तदानीं उपदेशमन्तरैव आत्मनि इदानीं तद्रहितेप्यात्मनि **कालेन -** विलम्बेन विन्दति । यद्वा **आत्मनि विन्दति** आत्मसाक्षिकं विन्दति इत्यर्थः । ज्ञानस्वरूपस्य साक्षात्प्रयत्नागोचरत्वेऽपि तन्मूलभूतोक्ताकार कर्मयोगद्वारा पुरुषकृतिसाध्यत्वात् विधेयत्वम् उपपद्यत इति नोक्तशङ्का इति भावः । अथ पूर्वश्लोकोक्तार्थं पूर्वोत्तरार्थाभ्यां व्युत्क्रमेण दर्शयति ।।

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।। ३९ ।।

अज्ञश्च अश्रद्धधानश्चेति वक्ष्यमाणत्वात् **श्रद्धावान्** इत्यतः पूर्वज्ञ इति पदं पूरणीयम् । ततश्च ज्ञः उपदेशाल्लब्धज्ञानः श्रद्धावानुपदिष्टज्ञानविवृद्धौ त्वरमाणः **तत्परः** - तदेव परम् उपादेयतया अभिसन्ध्यास्पदं यस्य स तथोक्तः । तत्रैव नियतमनाः **संयतेन्द्रियः** नियमितबाह्येन्द्रियः **ज्ञानं** लभते । उक्तलक्षणविपाकदशापन्नं ज्ञानं प्राप्नोति इत्यर्थः । **ज्ञानं लब्ध्वा** तथाविध ज्ञानं लब्ध्वा **अचिरेण** - अविलम्बेन **परां शान्तिं** परं निर्वाणम**धिगच्छति** प्राप्नोति । श्रद्धावत्वं ज्ञानलाभे हेतुः ज्ञानलाभादिकं तु पवित्रत्वं इति विवेकः । उक्त एवार्थो व्यतिरेकेण स्थाप्यते ।

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ।। ४० ।।

अज्ञश्च उपदेशलब्धशास्त्रजन्यज्ञानरहितः, अत एव **अश्रद्दधानं** प्रकृष्टकांक्षया तत्र ज्ञाने त्वरारहितः । **संशयात्मा** - संशय्यतेऽनेन इति संशयः । संशय हेतुः; तादृश आत्मा यस्य सः तथा संशये आत्मा इत्येति वा एतादृशः **विनश्यति** । नित्यस्यात्मनः कथं नाश इत्याशङ्क्य विनश्यति इत्यस्य तात्पर्यमाह - **नायमिति** । **संशयात्मनः** पूर्ववद्विग्रहः लोक्यत इति **लोकः** पुरुषार्थः अयं लोकः प्राकृतः पुरुषार्थः धर्मादित्रिवर्ग इत्यर्थः । नास्ति **न परः** अस्तीत्यनुषज्यते । परमपुरुषार्थोऽपि नास्ति इत्यर्थः । **न सुखं** अनन्तसुखदुःखोपभोगरूपनिःश्रेयसनिरययोःसन्धिग्धमनसः सन्तापबाहुल्यात्तात्कालिक सुखमपि नास्ति इत्यर्थः ।

यद्वा पुरुषार्थयोग्योऽहम् इत्येतादृशाभिमानहेतु सुखलेशोऽपि नास्ति । यद्वा संशयात्मनो देहातिरिक्तात्मनि निश्चयाभावात् ऐहिकामुष्मिकपुरुषार्थयोः तज्जन्ययोः अभावात्सुखलवोप्यस्य नास्ति इति पूर्वोक्तपुरुषार्थराहित्योपसंहारपरं न सुखमित्येतदिति ज्ञेयम् ।

आध्यायप्रधानार्थम् उपसंहरति -

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ।। ४१ ।।

योगसंन्यस्तकर्माणं - योगः 'कर्मण्यकर्म यः पश्येत्' इत्यादिना उपदिष्टो बुद्धियोगः तेन सन्यस्तः सम्यग्ज्ञितरामस्तः कर्तृत्वादि त्यागगर्भज्ञानाकारता संपादनेन तिरस्कृतस्वीकारं कर्म यस्य स तथोक्तः । तं **ज्ञानसंभिन्नसंशयं** ज्ञानेन-यथोपदिष्टज्ञानेन **संभिन्नः** - समूलं निकृत्तस्संशय आत्मनो देहातिरिक्तत्वादि संशयो यस्य स तथोक्तः । **तं आत्मवन्तं** आत्मा मनः स अतिशयेन यस्यास्ति इति स आत्मवान् तं अतिशायने मतुप् । अतिशयत्वमविचाल्यत्वं उपदिष्टार्थे दृढावस्थितमनसम् इत्यर्थः । **कर्माणि** बन्धहेतुभूतानि - प्राचीनानि कर्माणि **न निबध्नन्ति** न संसृतिबन्धबीजानि भवन्ति इत्यर्थः ।

एवं विस्तरेण उपपाद्योपसंहृतोऽर्थोर्जुनं प्रति कर्तव्यतया निगम्यते ।

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनाऽऽत्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ।। ४२ ।।

तस्माद्वक्तव्यार्थस्य सविस्तरम् उपपादितत्वात् । यद्वा संशयस्य अनर्थहेतुत्वोक्तेः । अज्ञानसम्भूतं विशेषादर्शनजनितं हृत्स्थं-हृदिशल्यमिवार्पितं यद्वा हृत्स्थम् आन्तरं संशयम् अत्र आत्मन इत्यन्वेति । विषयत्वं षष्ठ्यर्थः आत्मविषयं संशयम् इत्यर्थः । **ज्ञानासिना** अत्रापि 'काकाक्षि'न्यायेन आत्मन इत्यन्वेति । आत्मविषयज्ञानमेव **असिः** - खड्गः । तेन देवदत्तस्य गुरुकुलमितिवत् पृथग्भूतमप्यात्मन इति पदं समानान्तर्गतेन ज्ञानपदेन सम्बध्यते । सर्वज्ञमदुपदिष्टात्मज्ञानासिना इत्यर्थः । **छित्वा समूलम्** उन्मूल्ययोगं मयोपदिष्टं कर्मयोगम् **आतिष्ठ** - अनुतिष्ठ । **उत्तिष्ठ** युद्धायोत्तिष्ठ । भरतकुलप्रसूतस्य अर्जुनस्य स्वधर्मभूतयुद्धार्थसमुत्थानमेव कर्मयोगार्थसमुत्थानमिति बोधनाय भारतेति संबोधनम् तेनैव महायोगिवंशप्रसूतत्वान्मोक्षोपाय योग्यत्वमपि सूचितम् ।।

।। श्रीशैलबुक्कपट्टण येन्नाच्चान् दासविलिखितेऽध्यायः ।

श्रीमद्गीताभाष्यरहस्यार्थसंग्रहो वृत्तः ।।

❀ ❀ ❀

पञ्चमाऽध्यायः

[कर्मसंन्यासयोगः]

इत्थं तृतीयचतुर्थयोः अध्याययोः कर्मयोगस्य ज्यायस्त्वं तस्य ज्ञानाकारतापूर्वकस्वरूपभेदः अंशद्वयवति, तस्मिन् ज्ञानांशस्य प्राधान्यं च उक्तम् । इदानीं पञ्चमे तस्य आत्मप्राप्तिसाधनत्वेज्ञानयोगापेक्षया शैघ्र्यं कर्मयोगांतर्गत अकर्तृत्वानुसन्धानप्रकारं च उक्त्वा तन्मूलज्ञानं च शोध्यते ।।

अर्जुन उवाच - 'तद्विद्धि प्रणिपातेन' इत्युक्तमनुसन्दधानः अनुक्तमपेक्षितमंशं जिज्ञासुः अर्जुन उवाच इत्यर्थः ।।

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ।। १ ।।

कर्मणाम् इत्येतत्पदं 'काकाक्षि'न्यायेन संन्यासशब्देन योगशब्देन च अन्वेति । हे **कृष्ण ! कर्मणां सन्यासं ज्ञानयोगं शंससि ।** द्वितीयेऽध्याये मुमुक्षोः प्रथमं कर्मयोग एव कार्यः, कर्मयोगेन मृदितान्तःकरणकार्यस्य ज्ञानयोगेन आत्मावलोकनं कार्यमिति ज्ञानयोगं शंससि इत्यर्थः । पुनः कर्मणां योगं च शंससि 'कर्म ज्यायो हि अकर्मणः' इति कर्मयोगं च प्रशंससि इत्यर्थः । **एतयोः** - कर्मयोग-ज्ञानयोगयोः **एकं यच्छ्रेयः** आत्मप्राप्तिसाधनभावे सौकर्यात् शैघ्र्याच्च श्रेष्ठं **सुनिश्चितम्** - श्रेष्ठत्वेन सुनिश्चितम् निर्धारितम् । **तत् मे -** मह्यं **ब्रूहि -** वद इत्यर्थः । अत्र मुक्तिरूपैकफलसाधनत्वात् 'विकल्पो विशिष्टफलत्वात्' इति न्यायेन विकल्पे प्राप्ते तद्व्यावर्तनाय सौकर्यादियोगाच्छ्रेयस्त्वोक्तिः ।

श्रीभगवानुवाच - अथ अधिकारिविशेषनियततया द्वयोः अव्यवहित साधनत्वम् उपपादयन् तदुपमृदितकषायस्यापि सौकर्याच्छैघ्र्याच्च कर्मयोगस्यैव सुकरतां द्रढयन् श्रीभगवानुवाच इत्यर्थः ।

संन्यासः कर्मयोगश्च निश्श्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ।। २ ।।

सन्यासः - कर्मसंन्यासः, ज्ञानयोगः, **कर्मयोगश्च निश्श्रेयसकरौ** निरपेक्षमोक्षसाधनभूतौ निरपेक्षसाधनत्वबोधनाय चकारः । ननु तर्हि द्वयोरपि अनियमेनोपादेयत्वात् किमर्थं कर्मयोगप्रशंसा क्रियत इत्यत्राह - **तयोस्त्विति ।** उक्ताशङ्काव्यावृत्यर्थः । **तु शब्दः** तयोः ज्ञानयोगकर्मयोगयोर्मध्ये **कर्मसंन्यासात् ज्ञानयोगात् कर्मयोगः -** कर्मयोग एव **विशिष्यते** अति शेते इत्यर्थः ।

विशेषे को हेतुः ? इत्याकाङ्क्षायां हेतुमाह -

ज्ञेयस्स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ।। ३ ।।

यः - कर्मयोगी, **न द्वेष्टि न काङ्क्षति** इत्येतौ व्युत्क्रमेण व्याख्येयौ । **न काङ्क्षति** - काङ्क्षा अत्र बाह्यविषयाभिलाषः, तस्या एव हेयत्वात् । कर्मयोगांशभूतात्मानुभवतृप्तः तद्व्यतिरिक्तम् । किमपि न काङ्क्षति इत्यर्थः । अत एव **न द्वेष्टि** - प्रतिहन्यमानाया आकाङ्क्षाया एव द्वेषहेतुत्वात् । तदभावे तदभाव इत्यर्थः । **तत एव निर्द्वन्द्वः** - द्वन्द्वसहः द्वन्द्वस्वरूपनिवृत्तेः असम्भावितत्वात् रागद्वेषवतो हि द्वन्द्वसहनमशक्यम् । निरपेक्षस्याद्वेषस्य तु तत्सुशकमेव इति भावः । **स नित्यसंन्यासी** - यः कर्मयोग्ये तादृशः स एव ज्ञानयोगनिष्ठ इत्यर्थः । **तत्र हेतुमाह - हि** इति । हे **महाबाहो । हि** - यस्मात् **सुखं** क्रियाविशेषणम् । एतत् **सुखं** यथा भवति तथा **बन्धात्** - संसारबन्धात् **प्रमुच्यते** । सुखं प्रमुच्यत इत्युक्त्या कर्मयोगस्य सुकरत्वद्योतनात् श्रेयस्त्यहेतुरुक्तो भवति । अथ 'निश्श्रेयसकरावुभौ' इत्युक्तम् कर्मयोगज्ञानयोगयोः आत्मप्राप्तिसाधनत्वे नैरपेक्ष्यं विशदयति ।।

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितस्सम्यगुभयोर्विन्दते फलम् ।। ४ ।।

सांख्यं योगश्च **सांख्ययोगौ** अत्र सांख्ययोगशब्दौ न कापिलतन्त्रहैरण्यगर्भतन्त्र-परौ अप्रस्तुतत्त्वात् । किन्तु संख्यया-बुद्ध्यावधारणीयमात्मतत्त्वं सांख्यं योगः कर्मयोगः । तथा च ज्ञानयोगकर्मयोगौ इत्यर्थः । बालाः तत्साम्यादौपचारिकोऽयं शब्दः । अनिष्पन्न-ज्ञाना इत्यर्थः । **न पण्डिताः** - अपण्डिताः न गनैतादिवन्नसमासः । सदाचार्य प्रसादेनाधिगम्यं ज्ञानं पाण्डित्यं तद्रहिता इत्यर्थः । **पृथक्प्रवदन्ति** - पृथक्पृथक्फले साधनभूतौ इति प्रवदन्ति । कर्मयोगो ज्ञानयोगमेव साधयति; न तु साक्षादात्मावलोकनं कस्मिंश्चिदपि अधिकारिणि ज्ञानयोगस्तु एक एव निरपेक्ष आत्मावलोकनं साधयति इति वदन्ति इत्यर्थः । **एकम्** - अन्यतरत् **सम्यगास्थितोऽपि** यथावदाश्रितः **उभयोः फलं विन्दते** - प्राप्नोति । उभयोः आत्मावलोकनैकफलकत्वेन ऐकरूप्यादुभयात्मकत्वाच्च । सम्यगेकैनाश्रयेणापि उभयफलं सिध्यति इत्यर्थः । भिन्नफलत्वेन पृथक्त्वाभिधायिनां निन्दां कृत्वा एकफलत्वेन ऐक्याभिधायिनः प्रशंसति ।।

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ।। ५ ।।

संख्या आत्मज्ञानं तद्विदस्सांख्याः तद्वेदेत्यणः । यद्वा संख्या बुद्धिः ज्ञानयोगः तत्सम्बन्धिनः सांख्याः तस्येदमित्यण् । ज्ञानयोगनिष्ठा इत्यर्थः । तैः **यत्स्थानं** यत्फलं स्थीयते अस्मिन् इति व्युत्पत्तेः प्राप्यते । **तत्** - तत्फलं **योगैरपि** योगशब्दोऽत्र लक्षंणया युज्यन्त इति कर्मणि घञ् प्रत्ययेन वा योगनिष्ठपरः-कर्मयोगनिष्ठैः इत्यर्थः । **गम्यते** प्राप्यते सांख्ययोगशब्दयोः उपायपरत्वे बहुवचनानुपपत्तिः इति । इत्थं व्याख्यातम् । एकं एकस्यात्मावलोकनफलकत्वेन वैकल्पिकम् अङ्गाङ्गिभाव इतरेतरयोगरहितयोः उपाययोः एरेकफलकत्वे 'विकल्पो विशिष्टफलत्वात्' इति न्यायेन वैकल्पिकत्वमेव इति भावः । सांख्यं च योगं च - ज्ञानयोगं कर्मयोगं च इत्यर्थः । **'यः पश्यति स पश्यति'** उक्तरीत्या यो जानाति स एव पण्डित इत्यर्थः । ननु उक्तं ज्ञानयोगकर्मयोगयोर्वैकल्पिकत्वम् अनुपपन्नम् । उभयोः अत्यन्ततुल्यत्वेऽपि विकल्पः तुल्यत्वं च कर्मयोगो विशिष्यत इत्युक्तम् । इत्याशङ्क्य सौकर्य-शैघ्र्याभ्यां वैशेष्यं फलस्य अत्यन्ततौल्येन विकल्पश्चोपपद्यत इत्यभिप्रेत्याह -

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ।। ६ ।।

तु शब्दोऽन्य वैषम्य द्योतनाय **संन्यासः** - ज्ञानयोगः । अयोगतः योगमन्तरेण कर्मयोगं विना इत्यर्थः । **आप्तुम्** - प्राप्तुं सम्पादयितुम् इत्यर्थः । **दुःखम्** दुःष्करः कर्मयोगं विना ज्ञानयोगस्वरूपमेव दुर्लभमित्यर्थः । **दुःख**मिति नपुंसकत्वं च शक्यम् अञ्जलिभिः पातुम् वाता इत्यत्र शक्यशब्दवद्द्रष्टव्यं **योगयुक्तः** - कर्मयोगयुक्तः । मुनिरात्मविषयक-मननशीलः **न चिरेण** - विलम्बनेन गनैतादिशब्दवत्सुप्सुपेति समासः । ज्ञानयोगमन्तरेण इति बोधनाय न चिरेणेत्युक्तम् । ब्रह्मपरिशुद्धात्मस्वरूपम् **अधिगच्छति** - प्राप्नोति साक्षात्कुरुत इत्यर्थः । दुःखसाध्यत्वात् विलम्बितफलाज्ज्ञानयोगः । कर्मयोगस्तु सुखसाध्यत्वादविलम्बितफल इति घट्टार्थः । कर्मयोगस्य सुखसाध्यत्वे शीघ्रफलाधिगमे च हेतुमाह -

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ।। ७ ।।

योगयुक्तः - कर्मयोगयुक्तः, **विशुद्धात्मा** - कर्मयोगनिष्ठस्य शास्त्रीयकर्तानुष्ठानेन रजस्तमसोः निवृत्तौ तन्मूलरागद्वेषादि कषायस्यापि निवृत्तेः । **विशुद्धमनाः** अत एव **विजितात्मा**ऽपि जितमनाः स्वाभ्यस्ते कर्मणि व्यापृतेः सुशकत्वात् इति भावः । अत एव **जितेन्द्रियः** - वशीकृतबाह्येन्द्रियः । सर्वेन्द्रियकूटस्थे मनसि जिते बाह्येन्द्रियाणां जयस्य सिद्धत्वात् इति भावः । **सर्वभूतात्मभूतात्मा** तत्र प्रथमोभूतशब्दः देवादि देहपरः । द्वितीयस्तु क्रियापरः । तथा च अयं विग्रहः सर्वेषां देवादिभूतानाम् आत्मभूत आत्मा यस्य स तथोक्तः । सर्वदेवादिशरीरवर्त्यात्मात्मकस्वात्मवान् इत्यर्थः । यद्यपि सर्वदेहवर्त्यात्मनां भिन्नत्वात् सर्वभूतात्मभूतात्मकत्वम् अयुक्तम् । तथापि स्वरूपैक्यस्यानुक्तेः साम्यस्यैवोक्तेर्नायुक्तता ।

ननु सर्वभूतात्मभूत आत्मेत्युक्ते ऐक्यमेव प्रतीयत इति चेत् मैवम्; सर्वेषु गेहेषु अयमेव व्रीहिः इत्युक्ते स्वगेहवर्तिव्रीहिणां यथा समानाकारत्वं तथा अत्रापि समानाकारत्वस्यैव प्रतीतेः इति नानुपपत्तिः कुर्वन्नपि न लिप्यते । आत्मसाक्षात्काराख्यफलविरोधिना केनचिन्न लिप्यते । अतो न चिरेणात्मानम् अवाप्नोति इत्यर्थः । यतः सौकर्यात् शैघ्र्याच्च कर्मयोग एव श्रेयान् । अतः तदपेक्षितम् शृणु ।।

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ।। ८ ।।
प्रलपन् विसृजन् गृह्णनुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ।। ९ ।।

युक्तः कर्मयोगनिष्ठः, **तत्त्ववित्** - तदन्तर्गतात्मज्ञानवान् **नैव किंचित्करोमि इति मन्येत** । किं कुर्वन्नप्येवं मन्येत इत्यत आह - **पश्यन्** इत्यादिना । **पश्यन्** - चक्षुषा रूपं पश्यन्, **शृण्वन्** - श्रोत्रेण शब्दं शृण्वन्, **स्पृशन्** - त्वचा शीतोष्णादि स्पर्शान् साक्षात्कुर्वन्, **जिघ्रन्** - घ्राणेन गन्धं साक्षात्कुर्वन्, **अश्नन्** - रसनया मधुरादि रसनानुभवन्, इत्थं ज्ञानेन्द्रियव्यापारा उक्ताः । अथ कर्मेन्द्रियव्यापारानाह - **गच्छन्नि**त्यादिना । **गच्छन्** - गमनं कुर्वन् अयं पादेन्द्रियव्यापारः । अथ पाण्यादिकर्मेन्द्रियव्यापारान् **प्रलपन्** इत्यादिना । **वक्ष्यन्** - गमनवेळा सह भूतान्प्राणव्यापारान् मध्ये दर्शयति - **स्वपन्नित्यादिना ।** यद्यपि **स्वापः** तमोवृत्तिविशेषे न प्राणव्यापारः । तथाऽपि प्राणाधीनत्वात् तद्व्यापारत्वं **श्वसन्** - श्वासं कुर्वन्, अयं मुख्यप्राणव्यापारः **प्रलपन्** - अयं वागिन्द्रियव्यापारः,

विसृजन् - विसर्गं कुर्वन् अयं पायूपस्थयोर्व्यापारः । तथा च उक्तम् - 'पायूपस्थे विसर्गार्थम् इन्द्रिये तुल्य कर्मणि' इति । **गृह्णन्** - ग्रहणं कुर्वन् अयं प्राणेन्द्रियव्यापारः । अपानव्यापारो अनेनैव दर्शितः । 'तदपानेनाजिघृक्षेत्' इत्यारभ्य 'स एषो नश्यग्रह' इत्युक्तेः । उन्मिषन् अत्रोन्मीलनं कुर्वन्, निमिषन् अमीलनं **कुर्वन् एतौ** व्यानाख्यप्राणविशेषव्यापारौ ।

ननु सर्वमेवं कुर्वतः; कथं तथानुसन्धानम्? इत्यत आह - **इन्द्रियाणि** इति । इन्द्रियशब्दोऽत्र प्राणस्येन्द्रियप्रवृत्यादि हेतुतायाः प्राणसंवादादिषु प्रसिद्धत्वादजहल्लक्षणया प्राणस्यापि लक्षकः । एवम् इन्द्रियार्थशब्दोऽपि प्राणव्यापार लक्षकः । तथा च इन्द्रियाणि चक्षुरादीनि ज्ञानेन्द्रियाणि वागादीनि कर्मेन्द्रियाणि प्राणश्च स्वस्वविषयेषु वर्तन्ते । **प्रवर्तन्त** इति धारयन् अनुसन्दधानो नाहं किञ्चित् करोमीति मन्येत । नन्वेवम् अनुसन्धानमेवायुक्तं 'कर्ता शास्त्रार्थवत्वात्' इति आत्मनः कर्तृत्वस्थापनादिति चैवं; सत्यमुक्तं कर्तृत्वमात्मनः । अथापि ज्ञानस्वरूपस्य तस्य प्राचीनकर्ममूलेन्द्रियसम्बन्धकृतं न स्वाभाविकम् इति तादृशानुसन्धानाविरोधः ।

ननु फलाभिसन्धिपूर्वकेऽपि कर्मणि क्रियमाणेनैव किञ्चित्करोमि इति भावनासम्भवात् दोषो न स्यात् । स्वाभाविकस्य आत्मन कर्तृत्वस्य औपाधिकत्वानुसन्धानेन वा किं प्रयोजनम्? तथाऽनुसन्धाानेऽपि प्रकृतिसंसर्गो देहात्मभ्रमे निमज्जयेदेवैनम् इत्याशङ्काम् अपाकरोति -

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ।। १० ।।

ब्रह्मशब्दोऽत्रेन्द्रियाकारेण परिणतप्रकृति परः भवति । हि प्रकृतिकार्येऽपि ब्रह्मशब्दप्रयोगः । 'तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते' इति । तथा च इन्द्रियाद्याकारेण परिणतायां प्रकृतौ कर्माणि पश्यन् शृण्वन् इत्येवं निर्दिष्टानि बहुविधानि कर्माणि आधाय तत्रैव कर्तृत्वानुसन्धानं कृत्वा **सङ्गं त्यक्त्वा** - फलाभिसन्धिं परित्यज्य **यः करोति - कर्माणि** इत्यनुषज्यते । अत्र करोति इत्युक्त्या आत्मनः कर्तृत्वमेव । अभिमतम् । अत्र **करोति** इत्युक्तं तु करोमि इति पश्यति इत्युक्तं **ब्रह्मण्याधाय कर्माणि** इति च उक्तम् । तथा च एवं करोमि अथ च नैव किञ्चित्करोमि इति यः पश्यति इत्यर्थः । **स एवम्** अनुष्ठायैवमनुसन्धानवान् पापेनदेहात्माभिमानरूपेण **पापेन न लिप्यते** - न सम्बध्यते । प्रकृतिसंसर्गवानपि न सम्बध्यत इत्यर्थः । देहात्माभिमानपापत्वं च '**योऽन्यथा सन्तमात्मानम्**

अन्यथा प्रतिपद्यते । 'किं तेन न कृतं पापं चोरेणात्मापहारिणा' । इति प्रमाणसिद्धम् । अत्र प्रकृतिसंसृष्टस्यापि तदात्मानुसन्धानरूपपापसम्बन्धे निदर्शनमाह - **पद्मेति । अम्भसा** - उदकेन **पद्मपत्रं** यथा न लिप्यते तथा इत्यर्थः । अयं भावः पद्मपत्रस्य जन्मस्थित्यादि सर्वमम्भस्यैव दृष्टम् । तथापि न तत्कार्यक्लेदादीति । तथा प्रकृत्यधीनभोगस्थित्यादि सत्येप्यस्य न तत्कार्यदेहात्मभ्रमादि निमित्तबन्ध इति । एवमुक्तार्थं दृढीकरणाय शिष्टाचारं दर्शयति -

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये ।। ११ ।।

अत्र केवलैः इति इन्द्रियप्रयुक्तं विशेषणं कायादावपि वचनलिङ्गविपरिणामाभ्यां योज्यम् । कायशब्दश्च वागादिकर्मेन्द्रियाणाम् उपलक्षकः । तथा च अयमर्थः; केवलेन **कायेन** दुर्व्यापाराप्रवृत्तेन शरीरेण वचनादानादि कर्मरहितैः वागादिभिश्च इत्यर्थः । तथा केवलेन **मनसा** - फलाभिसन्धिरहितेन मनसा तथा केवलया **बुद्ध्या** - बुद्धिः कृत्याध्यवसायः केवलत्वम्-निषिद्धागोचरत्वं **केवलैरिन्द्रियैरपि** - अत्र इन्द्रियशब्दो ज्ञानेन्द्रियपरः, 'धर्मश्श्रुतो वा दृष्टो वा' इत्युक्तेऽपि तत्राभिनिवेश्यशून्यैश्चक्षुरादि इन्द्रियैरपि योगिनः कर्मयोगनिष्ठाः, **सङ्गं त्यक्त्वा** - स्वर्गादि फलसङ्गं त्यक्त्वा, **आत्मशुद्धये** स्वतश्शुद्धस्यापि आत्मनोऽनादिकालसञ्चित आत्मतत्त्वसाक्षात्कारविरोधि कर्मरूपायाः अशुद्धिः तन्निवृत्तये **कर्म कुर्वन्ति** - अनुतिष्ठन्ति । एकस्यैव कर्मणो बन्धहेतुत्वं तन्निवर्तकत्वं च कुत इत्याशङ्क्य फलसङ्गतदभावरूपसहकारिविशेषात् संभवति इति सुविशदमाह -

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ।। १२ ।।

युक्तत्वं समाहितचित्तत्वं तच्च फलान्तरविरक्ति पूर्वकम् आत्म प्रामाण्यं तथा च अयुक्त इत्यस्य आत्मव्यतिरिक्तफलेषु चपल इत्यर्थः । **कर्मफलं** - स्वर्गादिकं कर्मजन्यं फलम् । अत्र फलमात्रस्य त्यागोक्त्यात्मशुद्धये कर्मानुष्ठाय इत्यंशः सूच्यते । **नैष्ठिकीम्** - निष्ठायां भवतीति नैष्ठिकीतां स्थिराम् इत्यर्थः । **शान्तिम्** - निर्वृतिम् आत्मानुभवरूपं सुखम् इत्यर्थः । **आप्नोति-अयुक्तः** तद्भिन्नः आत्मव्यतिरिक्तेषु च फलः **कामकारेण** कामकारः कामकृतप्रेरणं तेन **फले सक्तः निबध्यते** । नितरां बध्यते अविच्छिन्नसंसारी भवति इत्यर्थः । इत्थं शरीराश्रितेषु इन्द्रियप्राणादिषु कर्तृत्वं न्यस्य केवलमात्मशुद्धये कर्म कुर्वीतेत्युक्तम् । अथ शरीर एव कर्तृत्वन्यास उच्यते ।

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ।। १३ ।।

देही-प्रकृतिसंसृष्टे जीवः, **वशी** - देहादि पारतन्त्र्यरहितः । यद्वा **वशी** - अभिमानबलात्काराद्यविषयः सन्निति शेषः । **नवद्वारे** - पुरे मुख्यैश्चक्षुरादिभिः सप्तभिः द्वारैरवाग्भ्यां द्वाभ्यां द्वाराभ्यां च सहिते पुरे 'तदिदमस्मिन् ब्रह्म पुरे' 'पुरमेकादश द्वारम्' इत्यादिषु पुरशब्दनिर्दिष्टे देहे सर्वकर्माणि **मनसा** - आत्मनः प्राचीनकर्ममूलदेहसम्बन्धप्रयुक्तं न स्वरूपप्रयुक्तमिति विवेक्तुं क्रमेण मनसा **संन्यस्य** - तादृक्कर्मकर्तृत्वं शरीरेऽनुसन्धायेत्यर्थः । **नैव कुर्वन्** - देहाधिष्ठानप्रयत्नमकुर्वन् न कारयन् परिस्पन्दादिनापि अप्रवर्तयन् प्रयत्नाश्रयत्व-शरीरपरिस्पन्दादि हेतुत्वयोरौपाधिकत्वादिति भावः । **सुखमास्ते** - कर्तृत्वाभिमानादिप्रयुक्त-क्लेशादिरहित आस्ते इत्यर्थः । अत्र **पुर** शब्दितस्य शरीरस्य **नवद्वारेति** विशेषणं सावयवत्वसच्छिद्रत्वादि व्यञ्जनद्वारा आत्मनः तद्राहित्यं व्यञ्जयद्देहात्मनोः विवेकं बोधयति तन्वादिशब्दाप्रयोगेन **पुर** इति निर्देशेन च शरीरं पुरमिव इन्द्रियाणि पुरानिव परमात्मानं स्वामिनमिव स्वात्मानं भृत्यमिव पश्यतो भवति स्वास्थ्यम् इति व्यञ्जितम् । इत्थं औपाधिकस्य रूपस्य उपाधिषु संन्यास उक्तः । अथ स्वस्मिन् अनुसन्धेयं स्वाभाविकं रूपमाह -

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ।। १४ ।।

प्रकर्षेण भवति इति **प्रभुः**, 'विप्रसंभ्योड्वसंज्ञायाम्' इति डुः । अकर्मवश्यो जीव इत्यर्थः । **लोकस्य** देवादिप्रकृतिसंसर्गवतः **कर्तृत्वं** प्रयत्नादिरूपं कर्तृत्वं, **कर्माणि** - शरीरेन्द्रियादि चेष्टाश्च, **न सृजति** - न उत्पादयति । उत्पादयति चेत् आत्मनां सर्वत्रैकरूप्यात् तदप्येकरूपं स्यात् देवत्वादिजातिमत्पिण्डपरिग्रहदशायां तद्विलक्षणमेव दृश्यत इति भावः । **न कर्मफलसंयोगम् ।** अत्रापि सृजति इत्यनुषज्यते । संयुज्यत इति संयोगः अनुभव इत्यर्थः । कर्मफलस्यानुभवमपि सृजति इत्यर्थः ।

ननु कर्तृत्वादिकं जीवो न सृजतीति चेत् कः तर्हि सृजति ? इत्यत्राह - **स्वभावस्तु** इति । **स्वभावस्तु** - प्रकृतिवासनादेवाद्यकारपरिणतप्रकृतिसंसर्गकृतदेहात्माभिमान-जनितवासना इत्यर्थः । **प्रवर्तते** वासनैव तथा प्रवर्तत इत्यर्थः । तप्तायःपिण्डस्य वह्निसंसर्गाद्दाहकत्ववत् वासनाख्योपाधिसम्बन्धादात्मनः कर्तृत्वम् औपाधिकमित्यर्थः । अत्र यदि चेतनस्यात्मनो **न कर्तृत्वं** स्वाभाविकं; तर्हि तद्गुणस्य वासनायाः कथं तत्,

यदि तत्रापि औपाधिकं कः ? तत्र उपाधिः, यद्यात्मा अन्योन्याश्रयः, यदि अन्यदनवस्थित्ये तदाशङ्कापरिहाराय तु शब्दः अन्योन्याश्रयानवस्थादिकं 'बीजाङ्कुर' न्यायात्सुपरिहारमिति भावः । अथ आत्मनो कर्तृत्वं वासनायाः कर्तृत्वं विवृणोति -

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।। १५ ।।

पाप - सुकृतशब्दौ तत्साध्यदुःखसुखपरौ । **आदत्ते** इति न स्वीकार उच्यते । परगतयोः तदयोगात् । अतो अपनोदनमेव तस्यार्थः । तथा च अयमर्थः । **कस्यचित्** स्वसम्बन्धितयाभिमतस्य पुत्रादेः **पापम्** - पापकार्यम्, दुःखं **नादत्ते** - नापनुदति । **न चैव सुकृतम्** - अत्रापि कस्यचिदित्यनुवर्तते । योग्यतावशात्प्रतिकूलतयाऽभिमतस्येति लभ्यते च अभिन्नक्रमोप्यर्थः । प्रतिकूलस्य **सुकृतं** - तत्कार्यं सुखमपि नादत्त इत्यर्थः । कुत एवम् इत्यत आह - **विभुरिति** । नात्र विभुत्वमनवच्छिन्नपरिमाणवत्वं तस्याणुत्वेन श्रुतिसिद्धत्वात्, नापि प्रभुत्वं तर्हि प्रभुरित्येव उच्येत अनुपयुक्तत्वाच्च । किन्तु देवादिसर्वदेहान्तःप्रवेशक्षमतया नियतदेशत्वं तेनागन्तुकेषु मित्रामित्रादिषु सम्बन्धित्वं लभ्यते । प्रतिकूलत्वमनुकूलत्वं च आगन्तुकानां देहानामेव न तु आत्मन इति सूचितम् । **तेन** - आत्मनां सम्बन्धिनः प्रतिकूलस्य च अभावात् सुखदुःखाद्यपनोदनमपि वासनाकृतमेव इति भावः । तर्हि स्वभावविरुद्धवासनायाः कथम् अवकाशः इत्यत्राह - **अज्ञानेन** इति । **अज्ञानेन** - ज्ञानविरोधिना कर्मणा न च अत्र विरोध्यर्थक इति भावः । **ज्ञानं** धर्मभूतज्ञानम् **आवृतम्** - ईषद्वृतम् सङ्कुचितमित्यर्थः । तेन अज्ञानकृतज्ञानावरणेन **जन्तवः** - देवादिदेहसंयोगवन्तः जीवाः **मुह्यन्ति** - देहात्माभिमानरूपं मोहं प्राप्नुवन्ति । तदुक्तं वैष्णवेपुराणे -

'अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते ।
यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वगा' ।।

संसारतापानखिलानवाप्नोत्यतिसन्ततानि ।। इति । इत्थं तृतीयाध्यायोक्ताकर्तृत्वानुसन्धानप्रकारविशेषानुक्त्वाऽथ चतुर्थाध्यायोक्तस्य ज्ञानविशेषस्य विशोधनं क्रियते ।

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ।। १६ ।।

तदज्ञानम् - ज्ञानसङ्कोचम् अनादिकालसञ्चितकर्म सञ्चयरूपमज्ञानम् आत्मनो ज्ञानेन विषयत्वं षष्ठ्यर्थः । आत्मविषयका ज्ञानेन इत्यर्थः । अज्ञानेन ज्ञानमावृतं चेत् कथं **ज्ञानेन** तस्य नाश इति शङ्कापनोदाय **तु** शब्दः; ज्ञानस्वभावस्तु -

'सर्वं ज्ञानप्लवेनैवं वृजिनं सन्तरिष्यसि ।
ज्ञानाग्निः सर्व कर्माणि भस्मसात्कुरुतेऽर्जुन' ।।

'न हि ज्ञानेन सदृशं प्रवित्रमिह' इत्याद्युक्तोर्थो ज्ञापितः तेनेति भावः । येषां नाशितम्, तेषां तत् आदित्यवदित्युक्त्या यथावस्थितप्रकाशकत्वं लभ्यते । 'न त्वेवाहम्' इत्यादौ उक्तमात्मबहुत्वं नोपाधिकृतम् इति व्यञ्जनायाऽत्र येषां तेषामिति बहुत्वोक्तिः । अथ आत्मानुभवसौधसोपानस्य ज्ञानस्यारोहण क्रमं दर्शयति -

तद्बुबुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ।। १७ ।।

तद्बुद्धयः - तच्छब्दः, पूर्वश्लोकोक्तज्ञानपरः **बुद्धिः** - अध्यवसायः, तत्र ज्ञाने बुद्धिः येषां ते तत् **बुद्धयः** - तथाविध आत्मदर्शनाध्यवसाया इत्यर्थः । **तदात्मानः** तद्विषयमनसः अनेन द्रष्टव्यतत्वाध्यवसायानन्तरभाविनीदर्शनार्थप्रवृत्तिः दर्शिता **तन्निष्ठाः** - तत एव तस्मिन् निष्ठाः आभिमुख्यं येषां ते तथोक्ताः अनेन तदनन्तरभाविनी विषयान्तरवैमुख्य-सम्पादिका परिशीलनदशोक्ता **तत्परायणाः** । अयन शब्दः कर्मणि ल्युडन्तः । प्राप्यपरः । तदेव परम् अयनं प्राप्यं येषां ते तथोक्ताः । तदेव परमप्रयोजनमिति मन्वाना इत्यर्थः । **ज्ञाननिर्धूतकल्मषाः** । एवम् अभ्यस्यमानेन ज्ञानेन निर्धूतः निश्शेषवारितः । **कल्मषः** - अनादि सञ्चितकर्मसञ्चयो यैः ते तथोक्ताः । अपुनरावृत्तिं स्वस्वरूपेणावस्थितमात्मानम् इत्यर्थः । न विद्यते पुनरावृत्तिः यदवस्थादात्मनः तथेति व्युत्पत्तेः औपाधिक समस्ताकारनिवृत्तिरूपावस्था तु न पुनरावृत्तिरूपावस्था भवति इति भावः । **गच्छन्ति** - प्राप्नुवन्ति तत्साक्षात्कुर्वन्ति इत्यर्थः । कीदृशोऽयं साक्षात्कार इत्यपेक्षायां 'सर्वभूतान्यशेषेण' इति प्रागुक्तमेव व्यनक्ति ।।

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ।। १८ ।।

विद्याविनयसम्पन्ने इति । न ब्राह्मणविशेषणं निर्विशेषण गवादि सह पाठात्; किन्तु विद्येत्यादि विशिष्टे ब्राह्मणपरं ब्राह्मणशब्दः केवल ब्राह्मणपरः । विद्या शास्त्रजन्यं ज्ञानं, विनयो निरहङ्कारता तत्सम्पन्ने **ब्राह्मणे** तद्रहिते केवलब्राह्मणत्वजात्याक्रान्ते, अनेन पूज्यत्वापूज्यत्वरूपगुणवैषम्यमुक्तम् । **गवि** - धेनौ, **हस्तिनि** - गजे अत्र आकार वैषम्यमुक्तम् । **शुनि चैव श्वपाके च** - श्वपाकश्चण्डालः । अत्र वृत्या वैषम्यमुक्तम् । एवं

विषमाकार तत्तद्देहवर्तिषु आत्मसु **पण्डिताः** - ऊहापोहक्षमबुद्धिमन्तः । आत्म याथात्म्यविद इत्यर्थः । **समदर्शिनः** - समं द्रष्टुं शीलं येषां ते तथोक्ताः । विषमाकारस्तु देहाद्यात्मना परिणतप्रकृतेः, नात्मनः, आत्मा तु सर्वत्र ज्ञानैकाकारतया सम इति पश्यन्ति इत्यर्थः । इदानीं **समदर्शनम्** - न कालान्तरभाविफलसाधनमात्रम्; किन्तु निश्श्रेयसकल्पां क्लेशनिवृत्तिमिहापि दिशति इति समदर्शिनां प्रशंसा क्रियते ।

इहैव तैर्जितस्सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ।। १९ ।।

येषां - पण्डितानां, **मनः** साम्येस्थितं-निरुपाधिकात्मस्वरूपं ज्ञानैकाकारतया सममित्येवं प्रकारेण, **साम्ये स्थितं** - प्रतिष्ठितं तैरिहैव साधनावस्थानदशायामेव सर्गः सृज्यत इति **सर्गः** संसारः तस्यैव कर्मभिः सृज्यत्वात् **जितः** परास्तः; मुक्तप्रायस्य इत्यर्थः ।

ननु आत्मन्येव स्थितिः संसारजयहेतुः भवति । न तत्साम्ये स्थितिः तत्राह - **निर्दोषं हि** इति । **हि** यस्मात् **निर्दोषम्** - निवृत्तप्रकृतिसंसर्गदोषम् आत्मवस्तु **समम्,** तस्मात् समत्वत एव **ब्रह्म** - असंकुचितशुद्धात्मस्वरूपं ब्रह्मसाम्याद्ब्रह्म इत्यर्थः । ततः किम् इत्यताह - **तस्मादिति** साम्ये स्थितत्वादेव इत्यर्थः । **ते ब्रह्मणि स्थिताः** - आत्मसु ज्ञानैकाकारतया साम्यमेवाऽनुसन्दधाना मुक्ता एव इत्यर्थः ।

अथ येन प्रकारेण अवस्थितस्य कर्मयोगिसमदर्शनरूपो ज्ञानविपाको भवति । तं प्रकारं दर्शयति ।

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ।। २० ।।

प्रियम् - यादृश देहस्थस्य कर्मवासनया **यत्प्रियं** तत्प्राप्य **न प्रहृष्येत्** - हर्षं न गच्छेत् । एवम् **अप्रियम् प्राप्य नोद्विजेत्** - उद्वेगं न गच्छेत् । प्रियाप्रियरूपकारणागमे कथं हर्षोद्वेगरूपकार्याभाव इत्यत आह - **स्थिरेति । स्थिरे** आत्मनि **बुद्धिः** यस्य स तथा **असम्मूढः** समित्येकीकारे अस्थिरेण शरीरेण स्थिरम् आत्मानम् एकीकृत्य मोहस्सम्मोहः तत्र स्थितः सम्मूढः, तद्भिन्नो **असम्मूढः** तादृश भ्रमरहितः इत्यर्थः । स्थिरबुद्धित्वासम्मूढत्वे च कथं स्याताम् इत्यत आह - **ब्रह्मवित्** इति । तत्त्वविदुपदेशेन ब्रह्मवित्; ततो **ब्रह्मणि स्थितः** तत्रैव अभ्यासक्तः अयम्भावः । ब्रह्मशब्दः परिशुद्धात्मस्वरूपपरः, ततश्च आत्म

याथात्म्यविच्चेत् देहात्मभ्रमनिवृत्त्या स्थिरबुद्धिः भवति इति देहात्माभिमानं त्यक्त्वा स्थिरात्मावलोकनप्रियानुभवे पर्यवस्थितो स्थिरे प्रियाप्रिये प्राप्यापि **हर्षोद्वेगौ न प्राप्नोति** । अथ हर्षोद्वेगौ अकुर्वतः समदर्शित्वप्रयुक्तम् । निरतिशयसुखं स्वयमापतति इत्याह -

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यस्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ।। २१ ।।

स्पृश्यन्त इन्द्रियैः इति । स्पर्शाविषयाः बाह्याश्चते स्पर्शाश्चते तथोक्ताः । तेषु आत्मव्यतिरिक्तविषयेषु इत्यर्थः । **असक्तात्मा** - असक्तमनाः तदनुभवमनपेक्षमाण इत्यर्थः । **आत्मनि** - अन्तरेस्वात्मनि विषये **सुखम्** - उपदेशादिजन्यस्वरूपयाथात्म्यज्ञानमूलं सुखं **यः विन्दति** - लभते । अक्षयसुखस्य अयं प्रारम्भ इति भावः । **सः ब्रह्मयोगयुक्तात्मा योगः** - सन्नहनम् - पुनः - पुनरभ्यासः ब्रह्मणो योगो ब्रह्मयोगः, ब्रह्माभ्यासः तत्र युक्त आत्मा मनो यस्य तथोक्तः प्राकृतशब्दादिभोग्यचिन्ता विहाय विशुद्धात्माभ्यासपर इत्यर्थः । **अक्षयं** - च्युतिरहितं **सुखम्,** साक्षात्कारानन्तरभावि **सुखम् अश्नुते** - अनुभवति ।

ननु अनादिकालं बाह्यस्पर्शरसिकस्य कथं तत्परित्यागः ? इत्याशङ्क्याह -

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ।। २२ ।।

स्पर्शोऽत्र सम्बन्धः, संस्पर्शः सम्यक् सम्बन्धः दृढसम्बन्ध इत्यर्थः । विषयेन्द्रिययोः इति शेषः । तस्माज्ञायन्त इति । **तथा भोगाः** सुखविशेषाः **हि** प्रसिद्धौ मूर्खैः दृढपरिगृहीतत्वेन प्रसिद्धिः बोध्या **ते दुःखयोनयः** - दुःखस्य हेतवः उपादानकारणस्य कार्याविनाभाववदत्रापि अविनाभाव इति बोधनाय योनिशब्दः । दुःखोदर्का इत्यर्थः । दुःखयोनित्वं स्वध्यवसायमिति बोधनाय एवकारः । **आद्यन्तवन्तः** - उत्पत्तिविनाशशालिनः नित्ययोगे मतुप्; सर्वाभ्यधिकः प्राकृतो हिरण्यगर्भभोगोऽपि स्वमानेन शतसंवत्सरपरिमिततया अल्प एवेति भावः । क्षणरुचिबुद्बुदादिवत् अवान्तरस्थितिकाल एव तरतमभावमापन्नः आद्यन्तवत्वं सर्वत्राविशिष्टमिति द्योतनायाद्यन्तग्रहणं **तेषु** भोगेषु **बुधः** उपरमोपयुक्तदुःखमिश्रत्वाल्पत्वास्थिरत्वज्ञानवान् न रमते । किन्तु क्रमादुपरमत इति भावः । अयमर्थः । प्रेम्णा उपदिष्ट इति द्योतनाय **कौन्तेयेति** सम्बोधनम् । इत्थं बाह्यस्पर्शेष्वसक्तस्य आत्मनि सुखं विन्दतः प्राकृतभोगेषु दोषो दर्शितः । अथ तथाविध स्वात्मसाक्षात्कारे तदधीनसुखेन च योग्यतामाह -

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ।। २३ ।।

प्राक्छरीरविमोक्षणात् प्रयाणकालात्प्राक्काल इत्यर्थः । आशरीरपातात्कामक्रोधौ दुर्जयौ इति ज्ञापितम् । इहैव साधनानुष्ठानवेलायामेव साक्षात्कारवेलायां तत्प्रसंगाभावात् इति भावः । **कामक्रोधोद्भवं** उद्भवत्यनेन इत्युद्भवः कारणं कामक्रोधौ उद्भवो यस्य तं तथोक्तम् । **वेगम् -** वेगो मनोवाक्कायानाम् एकाकारप्रवृत्तिः । काम वेगं, क्रोधवेगश्चेत्यर्थः । कामवेगोऽनुचितविषयाभिध्यानम् । नरपतिशुद्धान्तप्रवेशादिः क्रोधवेगः परहिंसाद्युपायचिन्तन-परुषभाषण प्रहारादिः **सोढुं शक्नोति -** निरोद्धुम् उत्सहते स नरः युक्तः । सततसमाधिलाभपरः आत्मानुभवार्ह इत्यर्थः । **स सुखी -** स एव शरीरविमोक्षोत्तरकालम् आत्मानुभवरूप-सुखभाग्भविष्यति इत्यर्थः । अथ विन्दत्यात्मनि यस्सुखम् इत्युक्ताम् उपायदशां प्रपञ्चयति -

योऽन्तस्सुखोऽन्तरारामस्तथान्तज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ।। २४ ।।

अत्र **अन्त**शब्दो बाह्यविषयव्यतिरिक्तात्मपरः आत्म्यैव वा आत्मन्येव वा सुखं यस्य **सोऽन्तस्सुखः अन्तरारामः -** आत्मारामः, **आरामो** हि भोगस्थानभूतश्छायापल्लव पुष्पफलादिभिः स्वैर्गुणैः सुखवर्धकः तद्वत् स्वगुणैः अपहतपाप्मत्वज्ञानानन्दादिभिः स्वविषयवादकरण ग्रन्थकरणादि क्रीडोत्थापकैः आत्मैव सुखवर्धक इत्यारामशब्दः प्रयुञ्जतो भावः एवं विशेषणद्वयेन भोग्यं भोगस्थानं च आत्मैव इत्युक्तम् । अथ भोगोपकरणमपि स एव इत्याह - **तथा** इति । अत्र **ज्योति**शब्दो ज्ञानवचनः आत्मैकज्ञान इत्यर्थः । 'सर्वं वाक्यं सावधारणम्' इति न्यायात् अन्येषां तु भोग्यानां स्वरूपादुपकरणस्य भिन्नत्वात् । उपकरणमपि **तदर्थतया** ज्ञातव्यम् । अत्र तु नैवमिति भावः । **यः** एवम्भूतो यः इत्यर्थः । **स योगी ब्रह्मभूतः** पूर्वं शरीरात्माभिमानाद्देवमनुष्यादि भूतोऽयम् इदानीं तन्निवृत्या यथावस्थिता संकुचितज्ञानादि स्वरूपेणावस्थित इत्यर्थः । **ब्रह्म निर्वाणम्** निर्वाणमनिर्वृतिः ब्रह्मणि निर्वाणम**धिगच्छति** आत्मानुभवसुखं प्राप्नोति इति यावत् । इत्थं पञ्चभिः श्लोकैः क्रमात् समदर्शित्वरूपज्ञानविपाकसिद्ध्यर्थं हर्षोद्वेगनिवृत्तिः बाह्यविषयनिस्सङ्गत्वं तदर्थदोषदर्शनं कामक्रोधवेगनिवारणम् आत्मन्येव सर्व विधभोग्यताकल्पनं चेति पञ्चार्थाः उक्ताः । अथ समदर्शित्वेन्तरङ्गसाधनं सर्वभूतहितेः अतत्त्वं प्रागुक्तद्वन्द्वसहत्वादिस्मरणपूर्वकम् उपदिश्यते -

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानस्सर्वभूतहिते रताः ।। २५ ।।

छिन्नद्वैधानिवृत्तशीतोष्णादि द्वन्द्वाः नियमेन तेषामेव द्विधाभावात् **यतात्मानः** आत्मशब्दोऽत्र मनःपरः नियन्तव्येषु तस्यैव प्राधान्यात् नियमनं च उचित विषयेव स्थापनम् । तथा च आत्मन्येव नियमितमनस इत्यर्थः । **सर्वभूतहिते रताः** सर्वेषां भूतानां स्वव्यतिरिक्तानां हिते रताः; आत्महित इव निरताः ।

'श्रूयतां धर्मसर्वस्वं श्रुत्या चाप्यवधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्' ।। इत्युक्त निष्ठा गरिष्ठा इत्यर्थः ।

ऋषयः - द्रष्टारः परिशुद्धाऽन्योन्यसदृशात्मस्वरूपसाक्षात्कारवन्त इत्यर्थः । अत एव **क्षीणकल्मषाः -** प्रहिणात्मप्राप्तिविरोधिकल्मषाः । **ब्रह्म निर्वाणं -** ब्रह्मणि निवृतिम् आत्मानुभवसुखं लभन्त इत्यर्थः । एवं षड्भिःश्लोकैः समदर्शित्वसाधकम् अनुष्ठानप्रकारमुक्त्वा तत्र शीघ्रप्रवृत्यर्थं फलस्याविलम्बितत्वम् उच्यते ।

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विजितात्मनाम् ।। २६ ।।

कामक्रोधाभ्यां विमुक्तानां विशेषेण मुक्तानां निश्शेषविनष्टकामक्रोधानाम् इत्यर्थः । क्रोधनिवृत्युक्तेः सर्वभूतहितेरतत्त्वं सूचितम् । **यतीनाम् -** यतनशीलानां तेन न प्रहृष्येत् इति श्लोकद्वयार्थ उक्तः । **यत चेतसां** नियमितमनसाम् अनेन योऽन्तरित्याद्यर्थोऽनूदितः । **विजितात्मनाम् -** जितमनसाम् अनेन ये हि इति श्लोकार्थोऽनूदितः । अतोऽनुवाद-रूपत्वान्न पुनरुक्तिः इति ध्येयम् । **ब्रह्म निर्वाणं** आत्मानुभवरूपं सुखम् **अभितो वर्तते -** आसन्नकालं वर्तत इत्यर्थः । हस्तोद्धृतदण्डादिग्राह्यफलवद्वर्तत इत्यर्थः । कर्मयोगं स्वलक्ष्यभूतयोगशिरस्कम् उपसंहरति ।

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ।। २७ ।।

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यस्सदा मुक्त एव सः ।। २८ ।।

बाह्यान् स्पर्शान् - आत्मव्यतिरिक्तान्विषयान् **बहिः कृत्वा -** बाह्येन्द्रियव्यापारं सर्वम् उपसंहृत्येत्यर्थः । **चक्षुः -** करणकार्यैक्यादेकवचनम् चक्षुषी इत्यर्थः । **भ्रुवोः अन्तरे -** मध्ये कृत्वा इत्यनुषज्यते । नासाग्रन्यस्तनयनोभूत्वा इत्यर्थः ।

'इदं नासाग्रन्यस्तनयनस्संवृतास्यस्युनिश्चलः ।
ध्यायीत मनसा देवमुरोविष्टभ्यजाग्रत' ।। इति ।

श्लोकोक्त संवृतास्यादीनाम् उपविश्य आसने युञ्ज्यादित्युक्तासनस्य च प्रदर्शकं **नासाभ्यन्तर**चारिणौ नासयोर्दक्षिणवामयोरभ्यन्तरे चरितुं शीलं ययोस्तौ **प्राणापानौ** - उच्छ्वासनिश्वासौ **समौ कृत्वा** न दीर्घम् उच्छ्वसन्नापि निःश्वसन्नित्युक्तदशायापन्न इत्यर्थः । **यतेन्द्रियमनोबुद्धिः** - इन्द्रियाणि बाह्येन्द्रियाणि मनोन्तरिन्द्रियं बुद्धिः अध्यवसायः यत आत्मावलोकनेतर प्रवृत्यनर्हइन्द्रियमनोबुद्धयो यस्य स तथा स्पर्शानित्यत्र प्रवृत्तिनिवारणम् । अत्र तत्फलभूतावृत्यनर्हत्वम् इत्यपुनरुक्तिः । तत एव निगतेच्छाभयक्रोधः इच्छा शब्दः कामपरः मोक्षपरायणः मोक्षैकप्रयोजनः । मोक्षः परम् अयनं प्राप्यं यस्येति व्युत्पत्तेः मुनिः - मननशीलः, आत्मावलोकन शील इत्यर्थः । ज्ञानसामान्यवाचिनोऽपि धातोः प्रकरणादौचित्याञ्च । विशेषपरत्वं य एवंभूतः सदा मुक्त एव सिद्धदशायामिव साधनदशायामपि **मुक्त एव** - मुक्तप्राय एव इत्यर्थः ।

उक्तस्य सपरिकरस्य कर्मयोगस्य सुकरतां पुनः प्रकारान्तरेण स्थिरीकरोति ।।

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ।। २९ ।।

यज्ञतपसाम् - यज्ञानां तपसां च इदं दानादीनामपि प्रदर्शनं **भोक्तारम्** अनेन कर्मयोगस्य भगवदाराधनात्मकत्वं व्यञ्जितम् । **सर्वलोकमहेश्वरम्** - सर्वलोकानां महान्तम् ईश्वरं **सर्वभूतानाम्-सुहृदम्**-सर्वभूतहितैषिणं **मां ज्ञात्वा** एतादृशं मां **यज्ञतपसाम् भोक्तारं ज्ञात्वा** - महेश्वरसार्वभौमप्रियसखसेवायाम् इव मत्प्रियमदाराधनात्मककर्मयोगेऽपि सुखेनैव प्रवृत्तिः इति सूचनाय विशेषणद्वयं **शान्तिमृच्छति** - मनःक्लेशशान्तिमृच्छति, सुखेन तत्र प्रवर्तत इत्यर्थः ।।

।। श्रीशैलबुक्कपट्टण येन्नाञ्चान् दास विलिखितेऽध्यायः
पाञ्चमिकः श्रीमद्गीताभाष्यरहस्यार्थसङ्ग्रहोवृत्तः ।।

❀ ❀ ❀

षष्ठाऽध्यायः

[योगाभ्यासयोगः]

इत्थं सपरिकरं कर्मयोगमुक्त्वा तत्साध्यं समाधिलक्षणयोगं वक्ष्यन् अभ्यासमपि तात्पर्यलिङ्गमभिप्रयन् पूर्वोक्तार्थमनुवदति -

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ।। १ ।।

अत्र श्लोके पूर्वार्धेन कर्मयोगस्य ज्ञानाकारतायाः पूर्वोक्तायाः अनुवादः, उत्तरार्धेन तस्य नैरपेक्ष्य दृढीकरणमिति विवेकः । **कर्मफलं** तत्तत्कर्माधिकारवाक्येषु तत्तत्कर्मसम्बन्धित्वेन श्रुतं स्वर्गादिफलं **अनाश्रितः** - अनपेक्षमाणः **कर्म** कर्मैव **कार्यम्** इतिशब्दोऽध्याहार्यः कार्यशब्दश्च क्रियत इति व्युत्पत्या प्रयोजनवाची कर्मैव प्रयोजनमित्येवम् इत्यर्थः । **यः करोति** यो अनुतिष्ठति 'भोक्तारं यज्ञतपसाम्' इत्युक्तरीत्या सुहृद्भूतपरमपुरुषसमाराधनरूपं कर्मैव प्रयोजनं नान्यत्प्रयोजनमवेक्षणीयमिति । **यः करोति स संन्यासी** स एव ज्ञानयोगनिष्ठः **योगी च** कर्मयोगनिष्ठश्च पृथगुभयसाध्यम् आत्मावलोकनफलमेकेनैव साध्यत इति भावः । उभयनिष्ठत्वम् औपचारिकमिति हृदयम् । **न निरग्निर्न चाक्रियः** इति । अत्र अग्निशब्दः तत्सम्बन्धि यज्ञपरः अक्रियशब्दश्च क्रियानिवृत्तिमुखेन क्रियातिरिक्तनिष्ठपरः । तथा च चोदितयज्ञादिकर्मस्वप्रवृत्तः क्रियातिरिक्त-ज्ञाननिष्ठश्च न तस्य केवल ज्ञाननिष्ठैव न कर्मयोगनिष्ठा कर्मयोगनिष्ठस्य तु उभयमप्यस्ति इत्यर्थः । उक्तलक्षणे कर्मयोगे ज्ञानयोगोऽप्यस्ति इत्याह -

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन ।। २ ।।

यं योगं संन्यासमिति ज्ञानयोगमिति **प्राहुः** - आत्मयाथात्म्यविदः प्राहुः । **तं** संन्यासयोगं **विद्धि** - कर्मयोगं विद्धि, समुदायवाचकाश्शब्दाः एकदेशेऽपि प्रयुञ्जन्त इति न्यायेनायं प्रयोगः कर्मयोगान्तर्गतं विद्धि इत्यर्थः । तदुपपादयति **न हि** इति । सङ्कल्पशब्दोऽत्र 'न रूढ्या कुर्याम्' इत्यादि सङ्कल्पविषयः । तस्य त्यागे कर्मकरणस्यैव अयोगात् । किन्तु एकीकृत्य कल्पनं **सङ्कल्पः ।** स च देहात्मगोचरः ततश्च **असंन्यस्तसंकल्पः** - संन्यस्त सङ्कल्पभिन्नः । अनात्मन्यात्माभिमानत्यागमकुर्वाणः

कश्चन प्रागुक्त कर्मयोगनिष्ठेषु कोऽपि कर्मयोगी न भवति इत्यर्थः । तथा च आत्मज्ञाने देहात्माभिमानत्यागिन एव कर्मयोगित्वात् तत्र ज्ञानयोगोऽन्तर्भूत एवेति भावः । कर्मयोग एव अप्रमादेन योगं साधयति इत्याह -

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ।। ३ ।।

योगम् आरुरुक्षोः आत्मावलोकनं प्राप्तुमिच्छोः मनेरात्ममननशीलस्य मुमुक्षोः इत्यर्थः । **कर्म** कर्मयोगः आमोक्षात्कर्मकर्तव्यमेव इति भावः । **योगारूढस्य तस्यैव -** एवकारोभिन्नक्रमः, **तस्य -** योगारूढस्यैव इत्यन्वयः । प्रतिष्ठितयोगस्यैवेत्यर्थः । शमः **कर्मकारणमिति ।** पूर्वोक्त्याशमशब्दो नेन्द्रिय निग्रहपरः । किन्तु कर्मनिवृत्तिपरः । कर्मनिवृत्तिः **कारणमुच्यत** इत्यर्थः । यद्यपि प्रतिष्ठितयोगस्य न किञ्चित्कार्यमस्ति । अतः **शमः कारणमुच्यत** इति न सङ्गतम् । तथापि नात्र योगारूढस्य कर्मनिवृत्तिविधौ तात्पर्यम् । किन्तु ततः पूर्वं तदनिवृत्तौ तात्पर्यमिति हृदयम् । कदा अयं प्रतिष्ठितयोगो भवति इत्यत आह -

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ।। ४ ।।

अत्र प्रकरणादयं योगीति लभ्यते । यावदात्मावलोकं कर्मयोगे वर्तमान इति तस्यार्थः । **इन्द्रियार्थेषु कर्मसु** इति शब्दौ न विशेषणविशेष्यभावमापन्नौ न शब्दद्वयप्रयोगात् । किन्तु स्वतन्त्रौ ततश्च **इन्द्रियार्थेषु -** इन्द्रियाणामर्थाः प्राकृतविषयाः तेषु कर्मशब्दश्च यो हि यदिच्छति तस्य 'तस्मिन् तत्साधने वा कार्यताबुद्धिः' इति न्यायात् कर्मशब्दः तत्साधनकर्मपरः - तेषु च **नानुषज्यते -** विषयेषु नानुषज्जते । तत्साधनेषु च नानुषज्जत इत्यर्थः । अत्र नानुषज्यत इत्युक्तम्; न तु सृजतीति अनेन बलाज्जायमानं न निवर्तयति । किन्तु स्वयमेव न जायत इति सूचितम् । यदा हि इत्यत्र **हि** शब्दो भिन्नक्रमः । स च तदा इत्यनेन अन्वेति तथा हि इत्यर्थः । तदैव न तु सङ्गकाल एवेति भावः । **सर्वसङ्कल्पसंन्यासी -** आत्मावलोकनेन निश्शेषनिवृत्तभ्रमो **योगारूढ उच्यत** इत्यर्थः । अतो विषयाननुषङ्गाभ्यासरूपं कर्मयोगमेव **आरुरुक्षुः** कुर्यादिति भावः ।

श्लोकद्वयाभिप्रेतमर्थं विवृणोति -

उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।। ५ ।।

बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ।। ६ ।।

अत्र **आत्मनेति ।** तृतीयान्तं मनःपरं करणतृतीयास्वारस्यात् द्वितीयान्तं तु स्वविषयम् **उद्धरेत् अवसादयेत्** इति क्रियाद्वयस्वारस्यान् विषयाननुरक्तमनुरक्तत्वं च उच्यते । 'बन्धाय विषयासक्तं मुक्त्यै निर्विषयं मनः' इत्युक्तम् । तथा च अयमर्थः[१] । **आत्मना** विषयाननुरक्तेन मनसा **आत्मानम् उद्धरेत्** योगारूढतापादनेन संसारसागरादुत्तारयेत् न आत्मानमवसादयेत् आत्मना इत्यनुषज्ञते सामर्थ्याच्च विषयानुरक्तेन इति लाभः **नावसादयेत्** न पुनः अधो नयेत् इत्यर्थः । आत्मोद्धरण-तदवसादनयोः द्वयोः मनो हेतुः इत्येतत्प्रपञ्चयति । **आत्मैवेति** अत्र प्रथमान्तं मनः परं षष्ठ्यन्तं स्वात्मपरम् **आत्मैव बन्धुः** अन्येबन्धवोपवर्गविरोधित्वात् अबन्धव इत्येवकाराभिप्रायः । आत्मैव **रिपुः - शत्रुः** अत्राप्यन्ये आत्मप्रवृत्त्यनुकूलतया अशत्रव इति भावः । एकस्यैव एकं प्रति बन्धुत्वंरिपुत्वं च व्याहतमिति शङ्कां परिहरति **बन्धुः** इति । **आत्मा** मनस्तस्यात्मनो **बन्धुः कस्य येन आत्मैवात्मना जितः** ; येन पुरुषेण आत्मैवात्मना जितः स्वात्मनैव स्वमनोजितं विषयेभ्यो विनिवर्तितम् । तन्मनः तस्य पुरुषस्य बन्धुः इत्यर्थः । **अनात्मनः** अजितात्मनो विषयेभ्यो निवर्तत मनस इत्यर्थः । आत्मैव मन एव शत्रुवत् **शत्रुत्वे वर्तते ।** स्वनिःश्रेयसप्रतिबन्धे वर्तत इत्यर्थः । इत्थं प्रतिष्ठितयोगत्वावस्था तदाहरणोपायश्चोक्ता अथ योगप्रक्रियां वक्तुं तदारम्भदशा ज्ञाप्यते ।

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानावमानयोः ।। ७ ।।

अत्र सप्तम्यन्ते पदेन समाहितपदे नान्विते । किन्तु जितात्मन इति पदेन, **शीतोष्णसुखदुःखेषु तथा मानावमानयोः जितात्मनः** तेषु विषयेषु विकृतमनसः हर्षोद्वेगादि विकाररहितमनस इत्यर्थः । **प्रशान्तस्य** - बाह्येन्द्रियव्यापारोपरतस्य यद्वा सन्निहितेऽपि फलेऽभिसन्धिरहितस्य आत्मा परम् अत्यर्थं **समाहितः** विशदमनुसन्धानयोग्यो जातः । इत्थम् इन्द्रियविजयो द्वन्द्वसहत्वं च उक्तम् । **अथ** तयोः हेतुरुच्यते ।

---

१. अयम्भावः इत्यपि पाठमस्ति ।

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ।। ८ ।।

ज्ञानं पारलौकिकसमस्तकर्मापेक्षितदेहात्मव्यतिरिक्तत्व धीः **विज्ञानं** विविच्य ज्ञानं मोक्षाधिकारिणो विशेषेणापेक्षित नित्यत्वनिरतिशयानन्दत्व धीः ताभ्यां तृप्तमनाः **कूटस्थः** कूटशब्दः कूटसाम्यात् परिशुद्धात्मस्वरूपपरः तस्मिन् तिष्ठति इति तथोक्तः । यथा कूटः आगन्तुक विनश्वरायःपिण्डादि संश्लेषप्रवाहे वर्तमानोऽपि स्वरूपशैथिल्यं न आप्नोति । तथा देवाद्यागन्तुकशरीरसंश्लेषप्रवाहपतितोऽपि जन्मादि विकारान्न प्राप्नोति इति विशुद्धात्मा कूटशब्देन उपचरितः तत्सत्वं नाम ज्ञानैकाकारस्वात्मानुसन्धानपरत्वम् । अत एव **विजितेन्द्रियः** - जितबाह्याभ्यन्तकरणः **लोष्टो** मृत्पिण्डः, **अश्मा** - प्रस्थर, **काञ्चनं** - हिरण्यम् एतानि स्वरूपाकारकारणादिभिः अत्यन्त विषमाण्यपि समानि त्याज्यत्वोपादेयत्वयोः तुल्यानि यस्य स तथा प्रकृतिविविक्तस्वरूपनिष्ठतया प्राकृतेष्वैकरूप्येण भोग्यत्वबुद्धिमानिति भावः । य एतादृशो योगी कर्मयोगी स **युक्त इत्युच्यते** - आत्मावलोकनरूपयोगार्ह इत्युच्यत इत्यर्थः । अचेतनविषये उक्तं समदर्शित्वं चेतनेष्वपि दर्शयति -

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ।। ९ ।।

सुहृदः वयोविशेषानङ्गीकारेण हितैषिणः बन्धुशब्दमित्रशब्दाभ्यां पित्रादि स वयः पराभ्यां पृथक् निर्देशात् उक्तार्थलाभः । सवयसो हितैषिणो मित्राणि क्रीडादिरूप प्रियैषिणो मित्राणि इत्यर्थः । अरयः कृत्रिमशत्रवः सहजशत्रूणां द्वेष्यशब्देन निर्देशात् । निमित्ततो न अर्थेच्छवः इति यावत् । हेत्वभावे हितैषित्वाहितेषित्वोभयशून्या उदासीनाः जन्मत एव तदुभयशून्या मध्यस्थास्सहजशत्रवो द्वेष्याः जन्मत एव हितैषिणः पित्रादयो**बन्धवः** तेषु साधुषु साधारण्येन श्लाघ्यत्वार्हधर्मशीलेषु **पापेषु च** । तथा निन्द्यत्वाश्रयेषु च **समबुद्धिः** आत्मैकप्रयोजनतया सुहृदादिभिः प्रयोजनाभावात् विरोधाभावाच्च समदर्शिर्विशिष्यते । योगार्हत्वे विशिष्यत इत्यर्थः । सुहृदादिषु **समबुद्धि**त्वस्य दुष्करत्वाद्विशिष्यत इत्युक्तम् । पूर्वोक्तयोगाभ्यासार्हदशापेक्षयास्या दशायाः काष्ठा प्राप्तत्वमपि विशिष्यत इत्यनेन सूचितम् । अथ अध्यायप्रधानार्थ भूतयोगाभ्यासविधिः उच्यते ।

योगी युञ्जीत सततं आत्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ।। १० ।।

योगी - उक्तप्रकार कर्मयोगनिष्ठः, **सततं** - प्रतिदिवसं योगयोग्यतया विहित सत्वोत्तरकाले सर्वदा **आत्मानं युञ्जीत** - समाधियुक्तं कुर्वीत आत्मावलोकननिष्ठं कुर्वीत इत्यर्थः । कीदृशः **रहसि स्थितः** - बाह्यस्थित जनरचितशब्दश्रवणानर्हे एकान्ते स्थितः पुनः कथंभूतः **एकाकी** - तत्रापि शिष्य सब्रह्मचर्यादिसन्निधिरहितः । किञ्च **यत चित्तात्मा** - नियमित चिन्तारूपवृत्तिमन्मनाः **निराशीः** - निरपेक्षः आत्मव्यतिरिक्तेषु विषयेषु अभिलाषरहितः **अपरिग्रहः** - न विद्यते परिग्रह आत्मव्यतिरिक्तस्य बुद्धया स्वीकारो यस्य स तथोक्तः । तत्र ममताशून्य इत्यर्थः । इत्थमन्तरुपकरणनियमनम् अभिधाय बाह्योपकरणनियमनमाह -

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरम् ।। २२ ।।

शुचौ - परिशुद्धे शुद्धिः तत्रासङ्कुचिताग्राह्यानिरुपाधिकनिर्देशात् । तथा च पाषण्डपतितादिभिः अधिष्ठितत्वेन च प्राप्तौ शुद्धिरहितत्वं स्वतश्शुद्धत्वं च सूचितम् । **देशे** एतादृशे क्वचित्प्रदेशे आस्यते उपविश्यते अत्र इत्या**सनम्** अधिकरणे ल्युट् दार्वादिनिर्मितं पीठम् इत्यर्थः । तत्कीदृशं **नात्युच्छ्रितम्** - अत्यन्तौन्नत्यरहितं **न अतिनीचम्** - अतिनिम्नतारहितं पुनः कीदृशं **चेलाजिनकुशोत्तरम्** - चेलं च अजिनं च कुशाश्च उत्तरम् एकैकस्योपरि यत्र तत्तथोक्तम् । अत्र पीठस्य कठिनत्वात्मृदुत्वार्थं चेलं निस्सङ्गत्वार्थमजिनं शुद्धयर्थं कुशा इति विवेकः । एतादृशमासनं स्थिरं यथा भवति तथा **प्रतिष्ठाप्य** सम्यक्स्थापयित्वा **आत्मन** इत्येतदुत्तरश्लोकस्थेन मन इत्यनेन अन्वेति ।

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ।। २२ ।।

तत्र पूर्वोक्ताकारवत्यासने **उपविश्य** - आत्मनः स्वस्यमनः एकाग्रमव्याकुलं कृत्वा **यतचित्तेन्द्रियक्रियः** नियमितान्तरबाह्येन्द्रियव्यापारः । अत्र मन एकाग्रं **कृत्वा** इत्युक्त्या यतचित्तेन्द्रियक्रिय इति चिन्तावृत्तिशब्दोक्त्या च योगे सात्विकमनोवृत्तेर्नेनिर्वृत्तिः इति व्यञ्जितम् । **आत्मविशुद्धये** आत्मनो **विशुद्धिः** - कर्मसम्बन्धनिवृत्तिः तस्यै आत्मनोऽशुद्धिः कर्मसम्बन्ध इत्यशुद्धाः ते समस्तास्तु देवाद्याः कर्मयोनय इत्यत्र व्यक्तं योगं **युञ्ज्यात्** - आत्मावलोकनं कुर्यात्, 'ओदनपाकं पचति' इतिवत् अयं प्रयोगः ।

इत्थं देशादिबाह्योपकरणानां नियमनविशेषमभिधायान्तरतमयोः कायमनसोः कर्तव्यनियमविशेषमाह -

समं कायशिरोग्रीवं धारयन्नचलं स्थिरम् ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ।। १३ ।।

प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः ।
मनस्संयम्य मच्चित्तो युक्त आसीत मत्परः ।। १४ ।।

कायश्च शिरश्च ग्रीवा च **कायशिरोग्रीवं** 'प्राण्यङ्गत्वात् एकवद्भावः' । अत एव क्लीबत्वम् । सममचलं स्थिरमिति त्रितयं क्रियाविशेषणत्वेन अन्वेति । यथा समंभवति यथा च अचलं भवति यथा स्थिरं तथा धारयन् कायशब्दः कुशीदशब्दोक्तमध्यकायपरः । तस्य समत्वोक्त्या आर्जवोपस्थितिद्वारा उरोविष्टम्भोव्यञ्जितः अचलमित्यनेन सुनिश्चल इत्युक्त निष्कम्पत्वलाभः स्थिरम् इत्यनेन पश्चाद्धारण प्रयत्ननिवृत्तिहेतुसापाश्रयत्वाभिव्यक्तिः स्वं नासिकाग्रं संप्रेक्ष्य परनासिकाग्र संप्रेक्षणनिवृत्तये स्वमिति । यद्यपि मनस्यन्तर्मुखेनासिकाग्र निरीक्षणं दुश्शकम् । तथाऽपि चक्षुषो दृष्टेः सन्निपातमात्रमिह विवक्षितं नासिकाग्रप्रेक्षणस्य कार्यं दर्शयति - **दिशश्चानवलोकयन्निति ।** दिक्छब्दोवस्थितसकलबाह्यपदार्थानवलोकनं कर्तुमित्यर्थः । लक्षणहेत्वोः इति हेत्वर्थे शतृप्रत्ययः **प्रशान्तात्मा** योगोपयुक्तनिर्वृति मन्मना इत्यर्थः । **विगतभीः** - प्रतिबन्धाभावान्निर्भयः **ब्रह्मचारिव्रते** ब्रह्मचर्ये **स्थितः** । ब्रह्मचर्यं च योषित्सुभोग्यता बुद्धिवर्जनम् इत्युक्ते स्थितः **मनस्संयम्य** स्वात्मावलोकनपरं मनो यथा मत्पर्यन्तं स्यात्तथा नियम्य **मच्चित्तः मत्परः** - मदनुवृत्तिपरः **युक्तः** - तदुपयुक्तावधानवान् **आसीत्** । जीवात्मयोगप्रकरणे मच्चित्तो मत्पर इति परमात्मचिन्तनं किमर्थमित्यत आह -

युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ।। १५ ।।

एवं मच्चित्तो मत्पर इत्युक्त क्रमेण **सदा** - सर्वदा **आत्मानम्** मनः **युञ्जन्** सर्वेश्वरे मयि नियमयन्, **नियतमानसः** - निश्चलमानसः **निर्वाणपरमाम्** - निर्वाणपरमाम् निर्वाणस्य परमां चरमवस्थां निवृत्तेः परमकाष्ठारूपां **मत्सस्थां** मयि संस्था सम्यक्स्थितिः यस्याः तां **शान्तिं** शुभाश्रयस्थितिं आशनायादि षडूर्मिराहित्यरुपशान्तिसम्पादकत्वात् शान्तिम् **अधिगच्छति** प्राप्नोति । इत्थं योगे प्रवृत्तस्य मनोनैर्मल्यहेतुभूतां मनसो भगवति शुभाश्रये **स्थितिम्** अभिधायान्यदपि योगोपकारकमाह -

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ।। १६ ।।

अत्यश्नतः - अतीवाश्नतः अधिकाशनस्य योगो नास्ति, **न चैकान्तमनश्नतः** च शब्द एवकारार्थः नैवास्ति इत्यर्थः । अत्यशनात्यन्तानशनयोः धातुवैषम्यसम्पादकत्वेन चित्तैकाग्रविरोधित्वात् इति भावः । न चातिस्वप्नशीलस्य अतिनिद्रासक्तस्य योगो न इत्यर्थः । तस्य तादात्विकेश्वरसृष्ट विषयादिभिः मनश्चाञ्चल्यहेतुत्वादिति भावः । **जाग्रतः** अत्राप्यतीत्यनुषज्यते अतिजाततरणं तम उद्रेकहेतुरिति भावः । एवमति विहाराविहारयोः अति चेष्टा चेष्टयोरपि विरोधित्वं ग्राह्यम् ।

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ।। १७ ।।

युक्तशब्दो मितार्थकः मिताहारविहारस्य इत्यर्थः । विहारशब्दस्यसञ्चारपरः युक्तचेष्टस्य श्रमहेतुरायासश्चेष्टाशब्दार्थः । **युक्तस्वप्नावबोधस्य । स्वप्नो** निद्रा **अवबोधो** जाग्रत्तायुक्तौ तौ यस्य तथोक्तस्य **योगो भवति दुःखहा -** सकलदुःखहानिकरः योगसंपंन्नो भवति इत्यर्थः ।

'उदरस्यार्थमन्नस्य तृतियमुदकस्य तु ।
वायोस्सञ्चरणार्थं तु चतुर्थमवशेषयेत् ।।
तावदेव हि तपो यावद्धातुवैषम्यमापद्यत' ।।

इत्यादिकं इह भाव्यम् । अत्यशनादेर्योगविरोधित्वान्मिताहारादेर्योगोपयोगित्वमित्येक एवार्थो व्यतिरेकतोऽन्वयतश्च श्लोकद्वयेन समर्थित इति ध्येयम् । एवं परिकरोक्त्यनन्तरं योगदशां प्रदर्शयितुं पूर्वोक्तयोगदशा परामृश्यते ।

यदा विनियतं चित्तमातुमन्येवावतिष्ठते ।
निस्स्पृहस्सर्वकामेभ्यो युक्त इत्युच्यते तदा ।। १८ ।।

यदा - यस्यामवस्थायां **चित्तम्** - प्रयोजन चिन्तापर्यवसितं मनः आत्मन्येव निरतिशय सुखरुपतया निरतिशयप्रयोजनभूते आत्मन्येव विनियतं विशेषेण नियतं क्षुद्रप्रयोजनान्तरपरिहारेण नियतम् **अवतिष्ठते** - निश्चलं तिष्ठते **सर्वकामेभ्यः** निर्गता स्पृहा यस्य तादृग्विधस्सन् सर्वकामेषु निरपेक्षस्सन्नुत्यर्थः । आत्मन्यवस्थितमनास्सयुक्त इति । तदा तस्यामवस्थायाम् उच्यते योगार्ह उच्यत इत्यर्थः । अथ योगदशामाह -

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ।। १९ ।।

निवृत्तो वातो यस्मिन् देशे स **निवातः** तत्र तिष्ठति इति । तथोक्तः **दीपः यथा नेङ्गते** । निरत्राचेतने चेष्टार्थकत्वासम्भवाच्चलनार्थकः । तथा च न चलतीत्यर्थः । **यतचित्तस्य** निवृत्तसकलेतरमनोवृत्तेः **योगं युञ्जतः** - आत्मविषयक साक्षात्कारं कुर्वत इत्यर्थः । **योगिनो** योगनिष्ठस्य **आत्मनः** नेमे समानाधिकरणे षष्ठ्या किन्तु व्यधिकरणे तथा च **योगिनः** य आत्मा तस्य इत्यर्थः । अत्र योगिन इत्युक्तेऽपि पुनरात्मन इति वैय्यधिकरण्येन निर्देशः निरस्त समस्तवृत्यन्तरपरिशुद्धात्मस्वरूपप्रदर्शनाय सोपमा यथा नेङ्गत इति निर्दिष्टत्वनिश्चलत्वप्रकारः । शैत्यं हि यत्सा प्रकृतिर्जलस्येतिवत् उपमाशब्दानुरोधेन स्त्रीलिङ्गनिर्देशः । तथा च उपमाशब्दो दृष्टान्तगतसाधर्म्यपरः; तच्च निश्चलत्वे सति सप्रभत्वं दीपनिष्ठप्रभायाः प्रति धर्मोऽत्र धर्मभूतज्ञानं तद्वद् आत्मनः सप्रभनिवातस्थदीपस्येव निश्चलत्वं स्वप्रभाभूतस्य धर्मभूतज्ञानस्य संसरणदशायामपि इन्द्रियद्वारा बहिः प्रसरणवद्विविधप्रसरण निवृत्तिः स्मृता । समाधिदशादर्शिभिः योगिभिः इति शेषः । पुनरपि योगदशैव आदरातिरेकायनिरतिशयपुरुषार्थत्वेन प्रतिपाद्यते ।

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ।। २० ।।

योगसेवयायोगोपासनया सेवाभक्तिः उपास्थिरिति पर्यायः । योगाभ्यासेन हेतुनेति यावत् चिन्तावृत्तिमन्मनश्चित्तं यत्र योगे निरुद्धम् उत्तरोत्तरप्रवृत्तिः यथा स्यात्तथा **निरुद्धं सत् उपरमते** अतिशयितसुखं सन्निहितो योग एवेति रमते उपसर्गाणाम् अर्थनियमाभावादिति भावः । **यत्र चैवे**त्येवकारो भिन्न क्रमः आत्मनि इत्यत्रान्वेति । **यत्र** प्रयोगे **आत्मना** मनसा आत्मा **सम्पश्यन्** आत्मन्येव **तुष्यति । आत्मानं पश्यन् तुष्यति** इत्येतावतैव सामञ्जस्ये पुनरात्मनि इति वचनम् अन्यनिरपेक्षत्वद्योतनाय । एवकारस्तु तस्यैव निरतिशयप्रीतिरूपत्वलाभाय ।

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ।। २१ ।।

अतीन्द्रियम् - इन्द्रियाण्यतीत्य वर्तमानम् । अत एव बुद्धिग्राह्यम् । **आत्मबुद्ध्यैक ग्राह्यं आत्यन्तिकम्** - पुनर्दुःखसम्भेद रहितं यत् सुखं तत् यत्र योगे **वेत्ति** - अनुभवति ।

यद्वा यत्तदिति पिण्डितं प्रसिद्ध्यतिशयार्थकम् आत्मनि तुष्यति इत्येतदेवकारानुगुण्याद् इतरसुखनिवृत्तिपरम् । इदन्तु स्वरूपसुखानुभवपरमित्यपौनरुक्त्यम् । अयं योगीस्थितः यत्र इत्यनुषज्ञते । यत्र स्थितस्सन्नित्यर्थः । **तत्त्व**शब्दो न प्रामाणिकत्वपरः । किन्तु तस्य भावः तत्त्वमिति यौगिकः । तथा च **तत्त्वतः** तद्भावादित्यर्थः । योगदशावस्थितस्य भावश्च तद्दशावस्थानं तस्मान्न चलति । तस्यैव निरतिशयसुखरूपत्वादिति भावः ।

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थिते न दुःखेन गुरुणापि विचाल्यते ।। २२ ।।

तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ।। २३ ।।

यं योगं लब्ध्वा ततः तस्माद्योगादधिकम् अतिशयितं **लाभं न मन्यते ।** योगदशायां लाभान्तरप्रतिसन्धानस्यासम्भावितत्वात् । **लब्ध्वा** ततोधिकं **लाभं न मन्यत** इत्युक्त्या योगविरतिकालेष्वपि तस्यैव अभिलाषपदत्वं व्यञ्जितं यस्मिन् योगेस्थितः प्रतिष्ठितः । गुरुणा दुर्भरेण 'गुरुस्तु गीष्पतौ श्रेष्ठ गुरौ पितरि दुर्भर' इति नैघण्टुकाः । दुःखेनापि पुत्रोत्पत्तिविवक्तिभ्यां नापरं सुखदुःखयोः इत्युक्तगुणवत्पुत्रवियोगादिदुःखेनापि **न विचाल्यते ।** योगप्रतिकूलमवसादं न गच्छति इत्यर्थः । वियुज्यते अनेन इति वियोगः करणे घञ् । दुःखसंयोगस्य दुःखसम्मन्धस्य वियोगं निवृत्तिहेतुम् ।

यद्वा दुःखसंयोगस्य **वियोगो** यत्रेति व्यधिकरण बहुव्रीहिः । दुःखसंयोग-प्रत्यनीकमित्यर्थः । **तंयोगं** योगसंज्ञितं **विद्यादि**त्युक्तेः रविकिरणानुगृहीतानि कमलानि कमलानि भवन्ति इत्यत्रेव स एव **योगो** - योगगुणपौष्कल्यवानित्यर्थो व्यञ्जितः । स योगः निश्चयेन अयमेव निरतिशयपुरुषार्थ इति **निश्चयेन अनिर्विण्ण-चेतसा** दृढचेतसा योक्तव्यः आरम्भदशायां कर्तव्य इत्यर्थः ।

'मनसा क्लिश्यमानस्तु समाधानं न कारयेत् ।
अनिर्वेदं मुनिर्गच्छन्कुर्यादेवात्मनो हितम्' ।। इति हि उच्यते । अथ ममताहङ्कारपरित्यागादिकं प्राग्विप्रकीर्णोक्तं सुखग्रहणाय सङ्कलय्य आह -

सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ।। २४ ।।

शनैश्शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ।। २५ ।।

सङ्कल्पप्रभवान् - सङ्कल्पजान् **कामान्** - काम्यन्त इति कामाः विषयाः तान् पुत्रपौत्रादीन् इत्यर्थः । सङ्कल्पप्रभावानिति विशेषणेन सङ्कल्पप्रभवाः स्पर्शजाः शीतोष्णादयोप्यन्ये कामाः इति सूचिताः । मनसेति करणतृतीय्यान्तं पदं काकाक्षिन्यायात्कामत्यागे इन्द्रियग्रामनियमने च अन्वेति । तथा च तान् **सर्वान्** - कामान् मनसा **अशेषतः** - निरवशेषां त्यक्त्वा कर्मोपाधिकशरीरान्विताः पुत्रादयोनात्मस्वरूपान्विता इत्यनुसन्धानेन त्यक्त्वा इत्यर्थः । (पद) सर्वानशेषत इति पदद्वयस्वारस्येन न प्रसदिष्येरित्युक्तरीत्या स्पर्शचेष्टापि शीतोष्णादिषु हर्षोद्वेगौ त्यक्त्वेत्यपि सूचितम् । **मनसैवेन्द्रियग्रामम्** - इन्द्रियवर्गं समन्ततः सर्वस्माद्विषयात् विनियम्य दृढं नियम्यधृति **गृहीतया धृतिः** - प्रक्रान्तार्थेऽशिथिलत्वं तया गृहीतया **बुद्ध्या** - विवेकविषयया बुद्ध्या **शनैश्शनैः उपरमेत्** - बाह्यविषयलाभार्थं मानसोद्योगं वारयेत् इत्यर्थः । **मनः** आत्मसंस्थं **कृत्वा** तथो वरमनन्तरमात्मनि **मनः** प्रतिष्ठितं **कृत्वा किञ्चिदपि न चिन्तयेत् ।** आत्मव्यतिरिक्तम् अनुकूलं प्रतिकूलम् उदासीनं च न चिन्तयेत् इत्यर्थः । अथ पूर्वोक्तमेव दुर्ग्रहत्वद्योतनायाऽवधानाय च प्रपञ्चयति ।

यतो यतो निश्चलति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ।। २६ ।।

चञ्चलं - स्वभावतः चपलम् अत एव **अस्थिरम्** - आत्मन्यस्थिरं **मनः यतो यतो निश्चलति** यस्माद्यस्माद्विषयान्निश्चलति प्रयोजनतया हेतौ पञ्चमी बन्धा विषय संमन्थार्थं नितरां चलति । यद्वा येन येन इन्द्रियद्वारेण निश्चलतीत्यर्थः । यद्वा 'सार्वविभक्तिकस्तसिः' । यं यं विषयमभिमुखीकृत्य चरति इत्यर्थः । ततस्ततो तस्मात् तद्विषयादिन्द्रियाच्च ।**एतन्मनः नियम्य आत्मन्येव** - निरतिशयसुखसंभावनया **आत्मन्येव वशं नयेत् ।** वशीकरण हेतुं निरतिशयसुखरूपत्वमेवाह -

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ।। २७ ।।

योगिनमकल्मषम् शान्तरजसं प्रशान्तमनसं - ब्रह्मभूतमेनमिति हेतुहेतुमद्भावेन अन्वयक्रमः । योगोऽनुष्ठेयतया अस्यास्तीति योगी तम् । अत एव **अकल्मषम्** -

गतकल्मषं योगस्य स्वविषयस्य निवर्तकत्वं च पञ्चगव्यप्राशनादेरिव सङ्कल्पायत्तं बोध्यम् । अत एव **शान्तरजसं** निवृत्तरजोगुणतया आत्मनि निश्चलमनसम् । अत एव **प्रशान्तमनसम् ।** अनात्मानात्मीयेभ्यः उपरत मनसम् । अत एव ब्रह्मभूतं बृहत्वं प्राप्तं 'स च आनन्त्याय कल्पते' इति श्रुत्युक्तविधया धर्मभूतज्ञानद्वारा बृहत्त्वाश्रयम् एनम् **उत्तमं सुखं** वैषयिकसुखापेक्षयाभ्यधिकं स्वरूपानुभवरूपं **सुखम् उपैति**-प्राप्नोति हिर्वेतौ स चोत्तरत्रान्वेति हि शब्दोक्तहेतुत्वं सूचयन् फलपर्यवसायित्वमाह -

युञ्जन्नेवं[1] सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ।। २८ ।।

एवं योगी युञ्जीतेत्यारभ्योक्त क्रमेण **आत्मानं युञ्जन्** योगयुक्तं कुर्वन् अत एव विगतकल्मषः । निरस्तप्राचीनसमस्तपापः **ब्रह्म संस्पर्शं** संस्पर्शशब्दो अनुभवलक्षकः ब्रह्मानुभवरूपमित्यर्थः । यद्वा **संस्पर्शो** बुद्ध्या सम्बन्धः । अर्थस्तु पूर्ववत् **अत्यन्तं** अन्तो अवधिः निरवधिम् इत्यर्थः । **सुखं** - आनन्दं **सुखेन** - अनायासेन **अश्नुते** - प्राप्नोति । इत्थम् आत्मलाभसुखं यावत्तावद्ध्यानम् उदाहृतमित्युक्तलक्षणः फलपर्यन्तो योगाभ्यासविधिरुक्तः । अथ चतुर्थायोगी प्रतिपाद्यते -

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ।। २९ ।।

समदर्शित्वरूपयोगविपाकस्य सर्वप्रकारेण तारतम्याच्चतुर्विधत्वं तत्र प्रथमं प्रकारमाह - **सर्वेति । योगयुक्तात्मा** - योगयुक्तमनाः यद्वा योगसमाधिगतात्मस्वरूप इत्यर्थः । अत एव **सर्वत्र समदर्शनः । सर्वत्र** स्वस्मिन् व्यतिरिक्तेषु च समं दर्शनं यस्य स तथोक्तः । स्वात्मनः स्वव्यतिरिक्तात्मनां च ज्ञानैकाकारतया साम्यात् वैषम्यस्य प्रकृतिगतत्वाच्चेति भावः । तदेव समदर्शित्वं प्रपंचयति । **सर्वभूतस्थमित्या**दिना आत्मानं **सर्वभूतस्तं सर्वभूतानि च आत्मनि** स्वात्मनि **ईक्षते** - पश्यति । यद्यपि भूतस्याचित्संसृष्टपरत्वे तद्वियुक्तपरत्वे च स्वात्मनः तत्स्थात्वानुपपत्तिः । आधाराधेयभावानन्वयादचिन्मात्रपरत्वन्त्वयुक्तम् । आत्मनो विभुत्वानङ्गीकारादेत्कत्वाभावाच्च । तथाऽपि सत्यं भूतहितम् इत्यादिवच्चेतनपरत्वमेव स्वीक्रियते । स्वात्मनः तत्स्थत्वं च तत्समानाकारत्वम् । तथा च सर्वभूतस्थमित्यस्य सर्वभूतसमानाकारम् इत्यर्थः । सर्वाणि भूतान्यात्मसमानाकाराणि च

---

१. एवं युञ्जन् इति मुद्रित पुस्तके ।

ईक्षते एक जातीयेषु पदार्थेषु एकव्यक्तिदर्शनेनैव 'स्थालीपुलाक'न्यायेन तज्जातीयं सर्वमपि तथात्वेन अनुसंहितं भवति इति तात्पर्यम् । एवं प्रकृतिपरिणामविशेषरूपदेहगतत्वात् वैषम्यस्य तत्संबन्धप्रयुक्तदेवादिभेदनिरसनेन ज्ञानैकाकारतया साम्यानुसन्धानमुक्तम् । अथ तस्यैव देवादिभेदहेतुभूतपुण्यपापतारतम्यविधूननेन परमात्मना परमसाम्यानुसन्धानमुच्यते ।

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ।। ३० ।।

यस्समदर्शित्वरूपयोर्विपाकपर्वसु - पूर्वपर्वापेक्षया अतिशयितपर्वनिष्ठो यः सर्वत्र स्वात्मन्यात्मसु **च मां पश्यति** - मत्समत्वं पश्यति । **सर्वं च मयि पश्यति** - सर्वमपि मत्समं पश्यति विधूतपुण्यपापस्यात्मवस्तुनः श्रुत्यादि सिद्धं परमसाम्यं पश्यन्य एवं पश्यति इत्यर्थः । **तस्याहं न प्रणश्यामि** 'णश अदर्शन' इति हि धातुः । तस्य मत्समत्वेन आत्मानम् अनुसन्दधानस्य **अहं न प्रणश्यामि** नादर्शनमुपयामि साम्यादर्शनं नोपयामि इत्यर्थः । तादृशत्वानुसन्धानस्याभावो निषिध्यत इति भावः । **स च** मत्साम्यात् स्वात्मानं मत्समम् अवलोकयन् सोऽपि **मे** सर्वसाक्षात्कारिणो मम **न प्रणश्यति** - नादर्शमुपैति । इयं द्वितीया विपाकदशा । अथ तृतीयामाह -

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ।। ३१ ।।

यो - योगी समदर्शी सन् **सर्वभूतस्थितं** - सर्वेषु भूतेषु अन्तर्यामितया **स्थितं माम् एकत्वमास्थितः** समाधिदशायामेव स्वस्यापि सर्वभूतस्थितत्वेन तदेकप्रकारत्वानुसन्धानं कुर्वाणः । 'मत्तस्सर्वमहं सर्वं मयि सर्वमिति प्रह्लादानुसन्धान' न्यायेन अनुसन्दधान इत्यर्थः । **भजति** - मत्साम्यावलोकनमपि मद्भजनमिति भावः । **स योगी** सर्वथा वर्तमानोऽपि सर्वकारेण **वर्तमानोऽपि** व्युत्थानकाले यथा तथा वर्तमानोऽपि इत्यर्थः । लौकिकक्रियासु व्याकृतोऽपि इति यावत् । **मयि वर्तते** बुद्ध्या मयि वर्तत इत्यर्थः । मामेव पश्यति इति यावत् । पूर्वत्र साम्यानुसन्धानमात्रमुक्तम् । इह तु व्युत्थानकालेऽपि तदनुवृत्तिरुक्तेति पूर्वस्माद्विशेषः । अथ प्रबलदुःखहेत्वागमेऽपि निर्विकारत्वापादिकां कर्मज्ञानतारतम्य प्रयुक्तसुखदुःख तारतम्य निवृत्यनुसन्धानरूपां योगविपाक काष्ठारूपां चतुर्थीं विपाकदशामाह -

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ।। ३२ ।।

सर्वत्र इत्येतादात्मौपम्येन इत्यत्र च 'काकाक्षिन्यायेन' अन्वेति । तथा च **सर्वत्र आत्मौपम्येन** आत्मतौल्येन स्वात्मनोऽन्येषां च ज्ञानैकाकारतया तौल्येन इत्यर्थः । **सर्वत्र** स्वात्मनि स्वव्यतिरिक्तेषु आत्मसु च यदि सुखं यदि वा दुःखं तत्समं यः पश्यति अयम्भावः । आत्मा तु देहविलक्षणत्वेन ज्ञानैकाकारत्वेन च सर्वत्र समः । ततश्च स्वात्मन्यन्येषु च **सुखं दुःखं वा यदि भवति** तत्र परदुःखादेः यथा परस्यासम्बन्धः । तथा स्वदुःखादेरपि असम्बन्धात्समं **यः पश्यति स योगी परमो मतः** । जीवात्मयोग काष्ठाङ्गत इत्यर्थः ।

अर्जुन उवाचेति । प्रागुक्तमेव योगसाधनं विशदं ज्ञातुं पुनरर्जुन उवाच इत्यर्थः ।

योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम् ।।

हे मधुसूदन ! रजस्तमोमयप्रबलविरोधि निरसनशीलः **त्वया** सर्वज्ञेन त्वया **साम्येन** - देवादिभेदेन जीवपरभेदेन च एतावन्तं कालं विलक्षणतयाऽनुभूतेषु आत्मसु ज्ञानैकाकारतया परस्पर **साम्येन** अकर्मवश्यत्वरूपेश्वरसाम्येन च **यो अयं योगः प्रोक्तः** । **तस्य** साम्येन उक्तस्य योगस्य स्थितां **स्थितिं** - चिरानुवृत्तिं **न पश्यामि** कुतः ? **चञ्चलत्वात्** बहुकालम् आरभ्यात्यन्तविषमाकारतया अनुभूतेषु साम्येन उक्तस्य योगस्य स्थितिर्दुश्शकेति भावः । **अहं न पश्यामि** अनादिकालप्रवृत्तोक्त भेदानुसन्धानवान् अचितचित्तोऽहं न पश्यामि इत्यर्थः ।

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।। ३४ ।।

कथं स्थिरास्थितिः न स्यादित्याशङ्कायाम् उपपादक हेत्वर्थो । 'हि' शब्दः तथा हि इत्यर्थः । हे **कृष्ण ! मनः चञ्चलं** अनवरताभ्यस्तविषयेष्वेव चपलमित्यर्थः । अत एव **प्रमाथि** प्रमथनशीलं तत्र हेतुः **बलव**दिति बलत्वात् प्रमथि इत्यर्थः । क्वचित्स्थापयितुं पुरुषे प्रयतति तं व्याकुलीकृत्य अन्यत्र स्वयं सञ्चरतीत्यर्थः । **तस्य** अभ्यस्त विषयेषु चपलस्य मनसः निग्रहमनभ्यस्तविषये आत्मन्यवस्थापनं **वायोरिव निग्रह**मित्यनुषज्यते । प्रतिकूलवायोः निग्रहमिव **दुष्करमहं मन्ये** । दुष्करत्ववचनं न प्रतिक्षेपार्थम् । किन्तु उपाय संप्रश्नार्थमिति ज्ञापनाय मन्ये इत्युक्तिः ।

श्रीभगवानुवाचेति । अर्जुनेन कण्ठोक्तम् अनुवदन् बुभुत्सितम् उपायं श्लोकद्वयेन भगवानुवाच इत्यर्थः ।

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ।। ३५ ।।

असंशयम् इति शब्दः सत्यमिति शब्दवदर्धाङ्गीकारे हे **महाबाहो! चलं मनो दुर्निग्रहम्** इति । **असंशयम्** - सत्यमेव **अभ्यासेन तु** - **तु** शब्दो वैषम्यार्थकः **अभ्यासेन** आत्मनः पुनः पुनः परिशीलनेन **वैराग्येन च** - तदितरवैतृष्ण्येन च **गृह्यते** - निगृह्यते । मनो निगृह्यत एवेत्यर्थः । अयं भावः । आत्मनो नित्यत्वामलत्वानन्दत्वादि-गुणाकरत्वात् तदतिरिक्तविषयाणां दुःखोदर्कत्वास्थिरत्वादिदोषाविष्टत्वाच्च । आत्मेतरवैराग्य-पूर्वकं पुनः पुनरात्मपरिशीलने कृतचलस्वभावमपि मन आत्मनि स्थापयितुं शक्यमेव इति प्रेमपूर्वकमेव अयमुपायः कथित इति बोधनाय **कौन्तेय** इत्युक्तम् । 'उपायेन तु यच्छक्यं न तच्छक्यं पराक्रमैः' इति न्यायेन बलेन मनोनिग्रहे शक्य इति बोधनाय महाबाहो इति च उक्तिः । एतस्य अहं पश्यामि इत्युक्तमर्थं विषयविशेषेण व्यवस्थापयति ।

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ।। ३६ ।।

मनो निग्रहप्रकरणादात्मशब्दो मनः परः **असंयतः** न सम्यक् नियमितः **आत्मा** मनो येन अजितमनसा इत्यर्थः । **योगो दुष्प्रापः** - प्राप्तुमशक्य इति **मे** सर्वज्ञस्य मम **मतिः** । अनेनोक्तार्थस्य असन्दिग्धत्वं व्यञ्जितम् । **वश्यात्मना तु** अभ्यासवैराग्यादि परिकरभूतेन कर्मणावश्यमनसा **यतता** - यतमानेन योगमभ्यस्यता । **उपायतः** - अन्तर्गतज्ञानेन मदाराधनात्मकेन कर्मणा उपायभूतेन **अवाप्तुं** यथावत्प्राप्तुं **शक्यः** ।

अर्जुन उवाच इति । न इह अभिक्रमनाशोऽस्ति इत्यादिना कर्मयोगमाहात्म्यमुक्तम् । तच्च सिद्धिकरणत्वं सिद्धिश्च शिथिलस्यापि योगस्य चिरतरपुण्यलोकावाप्तिः पुनर्योगि-कुलसम्भवः । तद्द्वारा पुनर्योगपौष्कल्यं ततश्चापवर्ग इत्येनंरूपा आत्मावलोकनरूप-योगाङ्गत्वात्कर्मयोगस्य तदेतदङ्गिन एव माहात्म्यमिति मत्वा तदेव श्रोतव्यसर्वप्रकारान्वितं प्रपञ्चेन श्रोतुमर्जुनः पप्रच्छ इत्यर्थः । तदेवाह -

अयतिश्श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ।। ३७ ।।

श्रद्धयोपेतः श्रद्धाशब्दः तत्साध्ययोगलक्षकः । यद्वा **उपेत** शब्द एव कृतयोगाधिगमपरः । ततश्च **श्रद्धयोपेतः** श्रद्धया योगे प्रवृत्तः **अयतिः** - यतिः प्रयत्नतः दृढतराभ्यास इत्यर्थः । तद्रहितः **अयतिः** हेतुगर्भं विशेषणं अयतित्वादित्यर्थः । **योगाच्चलितमानसः** पुष्कलयोगं कर्तुमननुगुणचित्त इत्यर्थः । **योगसंसिद्धिमप्राप्य** अनाप्त्वायोगनिष्पत्तेः पूर्वमेव **कां गतिं गच्छति** - कामभोगमोक्षनिरयेषु कतमाङ्गतिं **गच्छति कां गतिम्** इति सामान्येन निर्दिष्टं विवृणोति ।

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ।। ३८ ।।

उभयविभ्रष्टः - स्वर्गापवर्गफलद्वय**विभ्रष्टः** - भिन्नाभ्रमिव पूर्वस्मान्महतो मेघाच्छिन्नः परं महान्तं मेघमप्राप्य मध्ये विशीर्णोमेघशकल इव **नश्यति । कच्चित्** - कथमुभयविभ्रष्टत्वमित्यपेक्षायां तद्विवृणोति - **अप्रतिष्ठ** इत्यादिना - **अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि** इत्युत्तरत्र ब्रह्मपथप्रतिकोटितया निर्देशादप्रतिष्ठ इत्यत्र कर्मणेति लभ्यते । तथा च सांसारिकफलसाधके कर्मणि प्रतिष्ठाशून्य इत्यर्थः । कर्मस्वरूपानुष्ठानप्रयासात् आकिञ्चिन्यूनत्वम् । किन्तु अभिसन्धिवैषम्यान्निष्फलत्वं प्रवृत्तमित्यत्र तिष्ठ इत्युक्तिः । **ब्रह्मणः पथि** ब्रह्मप्राप्युपायभूते योगे **विमूढः** -विमोहवान् मोहशब्दोऽत्र मोहकार्यपरः तच्च योगभ्रंशः भ्रष्टो भवति इत्यर्थः ।

एतं मे संशयं कृष्ण च्छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य च्छेत्ता नह्युपपद्यते ।। ३९ ।।

किमयं नश्यत्युत नेत्येतं **संशयम्** - अशेषतः निरवशेषतः । अपुनरङ्करमित्यर्थः । **च्छेत्तुमर्हसि** निवर्तयितुं योग्योऽसि । **हि** यस्मात् अस्य संशयस्य **च्छेत्ता त्वदन्यः** सर्वज्ञात्वत्तोन्योनोपपद्यते । अन्येषां करणाधीनक्रमभाविकतिपयविषयगोचरज्ञानत्वेनैतत्संशय निवर्तनासामर्थ्यादिति भावः । एतत्संशयप्रशमनेन निर्वृतिप्रदत्वं भूमौ भगवत एव इति बोधनाय **कृष्ण**पदस्य द्विरुक्तिः । बाहुबलमपि तवैव इति बोधनाय महाबाहो इति ।

श्रीभगवानुवाच इति । उभयपुरुषार्थान्वयमुखेन उभयविभ्रष्टतां परिहरन् श्रीभगवानुवाच इत्यर्थः ।

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ।। ४० ।।

हे पार्थ ! तस्य श्रद्धया योगे प्रवृत्तस्य तस्मात्प्रच्युतस्येत्यर्थः । **इह** स्वर्गाद्यनुभवेनैव विनाशो विद्यते । मुमुक्षोः पुण्यस्य पापत्वेन निर्देशवत् स्वर्गाद्यनुभवस्य **इह** शब्देन निर्देशो बोध्यः । अमुत्रमोक्षानुभवे **विनाशो नैव विद्यते ।** प्रतिहतिः न विद्यत इत्यर्थः । तदेव व्यतिरेकमुखेन उपपादयति - **न हि** इति । **तात** इत्याश्वासनार्थं **कल्याणकृत्** शुभकृत् शुभतमयोगे प्रवृत्त इत्यर्थः । अनन्तकालसञ्चित - सुकृतसाध्यत्वाद्योगोपक्रमस्य पूर्वमपि दुष्कृताभावः । तदानीमपि योगे प्रवृत्तः तथाविध एवेति सूचनाय सामान्यतः कल्याण कृदित्युक्तम् । **कश्चित् -** कश्चिदपि दुर्गतिं न हि **गच्छति -** अनिष्टं न प्राप्नोति, उभयविभ्रष्टता परिहाराय उक्तमुभयान्वयित्वं प्रपञ्चयति ।

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ।। ४१ ।।

पुण्यकृताम् - लोकान् तेषां प्राप्यान् लोकान् इत्यर्थः । **प्राप्य** यादृग्भोगापेक्षया प्रारब्धे योगे तस्माच्चरितः । तादृग्भोगांस्तत्र भुक्त्वेत्यर्थः । **शाश्वतीस्समाः -** बहून्वत्सरान् **उषित्वा -** तत्र स्थित्वा यावद्भोगवैतृष्ण्यं तावत्पर्यन्तं स्थित्वा इत्यर्थः । **शुचीनाम्** योगयोग्यान्तःकरणशुद्धिमतां **श्रीमतां** योगयोग्यात्मतया अध्यात्मज्ञानसम्पन्नानां **गेहे -** गृहे, **योगभ्रष्टः -** प्रक्रान्तयोगभ्रंशवान्, **अभिजायते** सर्वत्र योगमाहात्म्यमेव हेतुः ।

ननु परमपुरुषार्थापेक्षया प्रारब्धो योगः तन्माहात्म्यं कथमत्र सर्वत्र हेतुस्स्यात् । धर्मार्थसम्पादितद्रव्यस्य भोगार्थविनियोगवत् उपपत्तेः असाङ्गत्याभावात् ।

इत्थं योगोपक्रमे भ्रष्टस्य जन्मोक्ता । अथ परिपक्वयोगस्य निष्पत्तेः पूर्वं ततो भ्रष्टस्य जन्माऽह - **अथवेति ।**

अथवा योगिनामेव कुले महति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ।। ४२ ।।

व्यवस्थित विकल्पकार्थोऽयम् । **अथवा** शब्दः परिपक्वयोगः । ततश्चलितश्चेत् इति शेषः । **धीमताम्** उपदेष्टृत्वयोग्यज्ञानसाम्पन्नानां **योगिनां** योगं कुर्वतामेव **महति कुले** अभिजायत इत्यनुषङ्गः । **यत् ईदृशं जन्म** - योगमाहात्म्याल्लब्धं पूर्वोक्तम् उभयविधं **जन्म लोके** - प्राकृतजने, योगाप्रवृत्तजने **दुर्लभतरम्** - अतीव दुर्लभमित्यर्थः ।

नन्वस्तु तस्य दुर्लभतमत्वं किम् ? आयातमपवर्गस्य पूर्वदेहारब्धस्य योगस्य शिथिलत्वात् योगिकुलजन्ममात्रस्य अपवर्गासम्पादकत्वात् इत्यत्राह -

तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ।। ४३ ।।

तत्र शुचीनां श्रीमतां गेहे यज्जन्मधीमतां योगिनां च गेहे यज्जन्म तस्मिन् जन्मनि इत्यर्थः । पौर्वदेहिकम् पूर्वदेहसम्बन्धिनं **तं** योगविषयम् संसारविषयबुद्धियोगस्यापि पूर्वदेहे सम्भवात् तद्व्यावर्तनाय तम् इत्युक्तिः । **बुद्धिसंयोगं** योग निष्पादकबुद्धि संयोगं जन्मान्तरे संस्कारप्रमोषस्य दृष्टत्वात्तद्राहित्यबोधनाय समित्युक्तिः लभते प्राप्नोति । **भूयः** पुनः **ततः** बुद्धिसंयोगात् **संसिद्धौ** योगसिद्धौ **यतते** यस्यां सिद्धावन्तरायो न भवति तस्यां सिद्धाविति बोधनाय समिति सुप्तप्रबुद्धवद्यतत इति भावः ।

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ।। ४४ ।।

सः - योगभ्रष्टः **तेन** - बुद्धियोगेन पुनः तत्र यत्नवान् **तेन** - योगविषयेण **पूर्वाभ्यासेन** अवशोऽपि **ह्रिय्यते** योग एव ह्रिय्यत इत्यर्थः । **हिः** प्रसिद्धौ भरतभीष्मादिषु प्रसिद्ध एव अयमर्थ इति भावः । अत्र श्लोकेषु पार्थ कुरुनन्दन शब्दाभ्याम् उभयकुलविशुद्ध्यादि सूचकाभ्याम् अर्जुनस्य शुचीनां श्रीमताम् इत्याद्यन्वयः सूचितः ।

योगस्य जिज्ञासुरपि अप्रवृत्तयोगः तज्जिज्ञासुरपि इत्यर्थः । ततश्चलितः पुनः तमेवापेक्षमाण इति यावत् । चलितस्य योगस्य पुनस्समाधानं कर्तुम् उद्युक्त इति पर्यवसितोऽर्थः । यद्यपि न लोकात्ययनिष्ठा खलर्थ तृणामिति षष्ठीनिषेधाद्योगस्य इत्यनुपपन्नम् ।

तथापि सम्बन्धसामान्यषष्ठी स्वीक्रियत इति न दोषः । शब्दब्रह्मतिवर्तते । ब्रह्मशब्दोऽत्र प्रकृतिपरः तस्याः एव अतिवर्तनीयत्वात् । तस्याश्च भोग्यभोगोपकरण-भोगस्थान रूपपरिणामवत्वबोधनाय शब्देत्युक्तिः । देवमनुष्यपृथिव्यंतरिक्षस्वर्गादि-शब्दाभिलाषयोग्यां प्रकृतिम् इत्यर्थः । शब्द सहितं ब्रह्म शब्दब्रह्मेति समासो ज्ञेयः **अतिवर्तते** प्रकृतिबन्धात् निर्मुक्तः । देवमनुष्यादि शब्दाभिलाषानर्हं ज्ञानानन्दैकतानम् आत्मानं प्राप्नोति इत्यर्थः । एवं योगभ्रष्टस्य पुनस्संसिद्धौ यत्न पर्यन्तमुक्तम् ।

अथ तत एव तस्यात्मप्राप्तिलक्षणपरमपुरुषार्थयोगो अभिधीयते; प्रयत्नादिति -

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्विषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ।। ४५ ।।

तत इत्येतदुत्तरत्र स्थितमपकृष्यते । यत एवं योगमाहात्म्यं तत इत्यर्थः । **संशुद्धकिल्बिषः** पुराकृतैः सुकृतैः साधित्त पापः । अत एव **अनेकजन्मसंसिद्धः** अनेकैर्जन्मभिः सम्यग्योगयोग्योनिष्पन्नः प्रयत्नात् ल्यब् लोपे पञ्चमी । इन्द्रियनियमनप्रयत्नं प्राप्य यतमानः अधिकं यतमानः **परां गतिं** योगं योगसाध्यम् आत्मप्राप्तिं वा **याति** - चलितोऽपि पुनर्याति इति बोधनाय **तु** शब्दः । एवंविधं माहात्म्यं तपःप्रभृतिषु न कस्यापि अस्ति । अतः तपस्वीप्रभृतिभ्योऽपि कर्मयोगी सप्ताधिक इति योगं योगिनं च प्रशंसन् जीवात्मयोगोपदेशमुपसंहरति ।

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ।। ४६ ।।

योगी उक्तरीत्या कर्मयोगानुष्ठानपरः **तपस्विभ्यः** चान्द्रायणादि केवल तपसा पुरुषार्थं साधयद्भ्यः **अधिकः** तथा **ज्ञानिभ्यः** आत्मज्ञानं विना देवतान्तरचन्द्रसूर्यादि ग्रहादिविषयज्ञानेनैव पुरुषार्थं साधयद्भ्यः **कर्मिभ्यः** - केवलैः अश्वमेधाधि कर्मभिः पुरुषार्थं साधयद्भ्यः च **अधिकः**, तस्मात् हे **अर्जुन! त्वं योगी भव**-कर्मयोगी भव । एवं सर्वस्मादाधिक्ये जीवात्मयोगिनः उक्ते तत्रैव अयं पर्याप्तमतिः स्यादिति मत्वा भूमविद्यायामिव ततोप्यतिशयितपुरुषार्थसाधनं तदङ्गिनं स्वविषयभक्तियोगं मध्यषट्केन प्रतिपादयितुं स्वयमेव प्रस्तौति ।

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ।। ४७ ।।

योगिनामिति षष्ठीपञ्चम्यर्थे योगिभ्य इत्यर्थः । एवं सर्वेषामपि इत्यत्र तसि पञ्चम्यर्थेव परमात्मोपासकस्य **योगिनो** वक्ष्यमाणस्य पूर्वोक्तयोगिष्वनन्तर्गतत्वेन ततो निर्धारणानुपपत्या निर्धारणषष्ठ्यनुपपत्तेः **अपि सर्वेषां** तपस्विप्रभृतिभ्यः सर्वेभ्योऽपि स युक्ततमो मे मत इत्यन्वयः । **युक्ततमः** अधिकः यद्वा सर्वेभ्योऽयं अतिशयितोपाययुक्त इत्यर्थः । स क? इत्यपेक्षायां आह - **मद्गतेन** इत्यादिना । **मद्गतेन** भक्त्यतिशयात् मयि प्रवृत्तेन अन्तरात्मना बाह्येन्द्रियशरीराद्यपेक्षया अन्तस्स्थितेन मनसा **श्रद्धावान्** मत्प्राप्तौ त्वरावान् **मां** निरतिशयभोग्यभूतं **मां यो भजते स योगी** योगिभ्यः सर्वेभ्यस्तपस्विभ्यश्च **युक्ततम** इति **मे मत** इत्यर्थः ।।

।। इति श्रीशैलबुक्कपट्टन येन्नाच्चान् दासनिर्मितोऽध्यायः षष्ठः ।
श्रीमद्गीताभाष्यरहस्यार्थसंग्रहो वृत्तः ।।

सप्तमाऽध्यायः

[विज्ञानयोगः]

इत्थं प्रथमेन षट्केन परमप्राप्यस्य भगवतः प्राप्त्युपायभूतं तदुपासनं वक्तुं तदङ्गभूतमात्मज्ञानपूर्वककर्मानुष्ठानसाध्यं प्रत्यगात्मनो याथात्म्यदर्शनमुक्तम् । इदानीं मध्यमषट्केन प्राप्यभूतपरमपुरुषस्वरूपं तदुपासनं च उच्यते ।

श्रीभगवानुवाच इति -

पूर्वश्लोके **भजते यो माम्** इति प्रस्तुतं स्वात्मानं भजननिर्वृत्तये यथावस्थितम् उपदिशामि इति भगवानुवाच इत्यर्थः ।

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ।। १ ।।

मयि सर्वेश्वरे मयि **आसक्तमनाः** आभिमुख्येन सक्तमनाः मां विना स्वयं कार्याक्षम इति । मय्येव दृढं बद्धमना इत्यर्थः । तथा **मदाश्रयः** मदनुभवैकधारक इत्यर्थः । **योगं युञ्जन्** - योगं कर्तुं प्रवृत्तः । **असंशयम्** । **यथा** तथा **समग्रं यथा** भवति तथा येन ज्ञानेन **ज्ञास्यसि तच्छृणु** - ज्ञानस्य सप्रकारावबोधनाय यथा इत्युक्तम् । **असंशयं** समग्रमित्युक्तम् किञ्चिद्विशदयति -

ज्ञानं तेऽहं सविज्ञानम् इदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यत् ज्ञातव्यमवशिष्यते ।। २ ।।

सविज्ञानं - विज्ञानेन सहितं, **ज्ञानम्** - उभयलिङ्गत्वेन उभयविभूतिविशिष्टत्वेन च विविक्तं ज्ञानं विज्ञानं तेन सहितमिदं **ज्ञानम् अशेषतः वक्ष्यामि** । यत् ज्ञानं **ज्ञात्वा** ज्ञानं ज्ञात्वेत्योदन पाकं पचतीतिवत् द्रष्टव्यः । भूयः पुनः इह श्रोतव्ये मयि **ज्ञातव्यं न अवशिष्यते** ।

यद्वा ज्ञानं सविज्ञानमिति पदाभ्यां स्वरूपनिरूपकनिरूपितस्वरूपधर्मविशिष्टतया स्वस्य ज्ञानस्य वैविध्यमिति दर्शितम् । अवश्यज्ञातव्यसमस्ताकारविशिष्टम् इह उपदिशामि इति भावः । एतेन ज्ञानप्रशंसा कृता । पुनरपि प्रकारान्तरेण प्रशंसामाह -

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ।। ३ ।।

मनुष्यशब्दो न जातिपरः; 'तदुपरि' इत्यधिकरणे देहिनाम् उपासनाधिकारस्योक्तेः । अतो यतनयोग्यमात्रपरः सिद्ध्यर्थतया यतनयोग्यानां **सहस्रेषु कश्चिदेव सिद्धये । यतति** - यतते । **यततामपि सिद्धानाम्** - सिद्धिपर्यन्तं यतमानानां मां **कश्चिद्वेत्ति** - कश्चिदेव विदित्वा सिद्धिपर्यन्त यतते तत्त्वतः विदित्वा यतमानानां सहस्रेषु कश्चिदेव तत्त्वतो विदित्वा **सिद्धये** - यतते । एतेन न कश्चिदपि तत्त्वतो वेत्ति इति दुर्लभतरत्वं व्यञ्जितम् ।

अथ इतःप्रभृति **न त्वहं तेषु ते मयि** इत्यन्तेन स्वयाथात्म्यम् उपदिशन् प्रथम कार्यकारणरूपाद्विलक्षणत्वं तच्छेषत्त्वोक्तिमुखेन दर्शयति -

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ।। ४ ।।

भूमिः, आपः, अनलः, वायुः, खं - आकाशः, **मनः । बुद्धिः** - महत्तत्वं **अहङ्कार** इति । एवंप्रकारेण **भिन्ना प्रकृतिः** इयं मे मदीया मच्छेषभूतेत्यर्थः । अत्र भूतोक्त्या तन्मात्राणां मनश्शब्देन इन्द्रियवर्गस्य बुद्ध्यहङ् कारयोश्च प्रकृतिशब्देन अव्यक्तस्य च उक्तत्वात्कृत्स्नस्य चतुर्विंशतिभेदभिदुरस्य अचित्तत्त्वस्य भगवच्छेषतोक्ता ।

अथ चिद्वैलक्षण्यप्रदर्शनाय चेतनस्य तच्छेषत्वमाह -

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ।। ५ ।।

इयमष्टधा प्रोक्ता प्रकृतिः अपरा अनुत्कृष्टा अप्रधानभूतेत्यर्थः । इतस्तु अस्याः प्रकृतेः सकाशात् **अस्यां** - विसजातीयां **तु** शब्दोऽत्यन्तवैलक्षण्यद्योतनार्थः । तच्च भोग्य-भोक्तृत्वभावेन **जीवभूतां** जीवात्मिकां **मे पराम्** - उत्कृष्टां प्रकृतिं **विद्धि यया** प्रकृत्या **इदं जगत्** - कृत्स्नम् अचेतनं **जगद्धार्यते** जागरे सङ्कल्पवशात् स्वापे स्वरूपतश्च **धार्यत** इत्यर्थः । इत्थं समष्टिरुक्ता; अथ व्यष्टिसृष्टिमाह -

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।

एतच्छब्दः पूर्वोक्तप्रकृतिद्वयपरामर्शकः । तथा च **सर्वाणि भूतानि** ब्रह्मादिस्तम्ब-पर्यन्तानि चिदचिन्मित्राणि भूतान्युच्चावचभेदभिदुराणि **सर्वाणि एतद्योनीनि** - चेतनाचेतनात्मकमदीयप्रकृतिद्वययोनीनि इति । इत्थं **उपधारय** - निश्चिनु । अनेन निर्विकारस्यापि जीवस्य देवादिशरीरेन्द्रिय तदधीनज्ञानक्रिया भोगादिविशिष्टवेषापेक्षया प्रकृतित्वं प्रदर्शितम् इत्यवधेयम् इति श्लोके प्रकृतिशब्देन चेतननिर्देशस्य न अनुपपत्तिः । अथ समष्टिव्यष्ट्योः सङ्कलितयोः कार्यत्वं दर्शयति -

अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।। ६ ।।
मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ।

तथा - तथा सति प्रकृतिद्वयस्यापि मदीयत्वात् कृत्स्नभूतानां तदुभय योनित्वाच्चेत्यर्थः । **अहं** - अहमेव **कृत्स्नस्य** - चिदचिन्मिश्रस्य **जगतः प्रभवः** - उत्पत्तिस्थानं, **प्रलयः** - लयस्थानं च प्रकर्षेण भवति इति अस्मिन्निति **प्रभवः** - प्रकर्षेण लीयतेऽस्मिन्निति **प्रलयः** । भवनस्य लयस्य च प्रकर्षः नामरूपविभागार्हावस्था तदनर्हावस्था च ।

"प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी ।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि" ।। (वि.पु.६-४-३९)

इत्यादिकमिह भाव्यम् । एवं जगत्कारणत्वेन विभूतियोगेन च सर्वस्मात्परत्वम् अभिधाय उभयलिङ्गत्वेनापि परत्वमभ्युपेत्याह - **मत्त** इति । **मत्त** इति पञ्चम्यन्तम् **अन्यदि**त्यनेन अन्वेति । मत्तोऽन्यत्परं किञ्चिदपि नास्ति । अहमेव **परतर** इत्यर्थः । ज्ञानभक्त्यादि-कल्याणगुणयोगेन अहमेव परतर इत्यर्थः । अथ पूर्वोक्त सर्वोपादनत्वप्रयुक्त न विकारत्वदोषपरिहारार्थं पृथक्सिद्धप्रकृतिपुरुषादि विवादनिरसनार्थं च सर्वाधारत्वमुखेन सर्वशरीरत्वमुच्यते ।

मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।। ७ ।।

इदं सर्वं चिदचिद्वस्तु जातं **सूत्रे मणिगणा इव प्रोतं** सूत्रमणि दृष्टान्तसामर्थ्येन अनुप्रवेशः आश्रयाश्रयिभावश्च सूचितः । सूत्रदृष्टान्तेन भगवत एकस्यैव आधारत्वमनुप्रविष्टस्य गूढत्वं आधेयाधीनस्थितिविरहश्च सूच्यते । सूत्रदृष्टान्तप्रसक्त बहिर्व्याप्त्यभावपरिहाराय **प्रोतम्** इत्युक्तम् । एतेन सर्वस्यापि प्रपञ्चस्य भगवच्छरीरतया तत्प्रकारत्वात्प्रकारवाचि शब्दानां प्रकारिपर्यन्तत्वात् सर्वसामानाधिकरण्यनिर्देशः सम्भवति इत्यभिप्रेत्य तद्द्वारा सर्वात्मकत्वमाह -

रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ।। ८ ।।

यद्यपि रसादिशब्दानां न सामानाधिकरण्यनिर्देशस्सम्भवति निष्कर्षकशब्दत्वात् व्यधिकरणनिर्देशात् । अत्रापि निष्कर्षकत्वं व्यञ्जितं द्रव्यवाचित्वाभावेन न शरीरवाचित्वमपि रसादीनाम् । तथापि परमात्मशरीरभूतद्रव्यप्रकारत्वेन परमात्मप्रकारत्वात् । प्रकारवाचिनां

प्रकारिपर्यवसानस्य जातिगुणादि साधारण्याद्रसोहम् इत्याद्युपपत्तिः । तत्प्रकारद्रव्यप्रकाराणां तत्प्रकारत्वं काठिन्यतान्यो बिभर्ति इत्यादिषु सिद्धमिति भावः । अपुनः उदकतत्वे अहं रसः प्रधानो गुणः तेजस्तत्वात् अब्रूपपरिणामस्य पूर्वकत्वात् उत्पन्नरसप्रधानत्वात् रस प्राधान्यं **प्रभाऽस्मि शशिसूर्ययोः ।** प्रभा स्वाश्रयातिरिक्तप्रसारितेजोद्रव्यविशेषः । तयैव चन्द्रसूर्ययोः जगदुपकारकत्वात्तस्याः तत्र प्राधान्यं **प्रणवः सर्ववेदेषु** प्रणवाद्या मुने! वेदा इत्यादिना प्रणवस्य वेदमूलत्वोक्तेः । वेदेषु प्रणवस्य प्राधान्यं शब्दः **खे** - खम् - आकाशः तस्य शब्दः तस्य प्राधान्यं रसवज्ज्ञेयं **पौरुषं नृषु** - नृषु पुरुषेषु **पौरुषं** - पुंस्त्वं स्त्रीनपुंसके व्यावृत्तः सत्वादि स्वभावविशेषः ।

यद्वा पौरुषं सामर्थ्यं कर्तृत्वशक्तिः इत्यर्थः । तयैव कर्तुरात्मनः कारकान्तरेभ्यः प्राधान्यम् । अत्र पक्षे नृषु जीवेष्वित्यर्थः ।

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ।। ९ ।।

पृथिव्याम् - भूमौ, **पुण्यो गन्धः** - सुरभि गन्धः, यद्वा तुलसी गन्धः तेनैव हि पृथिव्यास्सत्त्वोन्मेषे सुखे वा हेतुता इति । तत्र प्रधान्यं **विभावसौ** अग्नौ **तेजः** दाहकत्वशक्तिः **अस्मि । सर्वभूतेषु** भूतशब्दः शरीरपरः सर्वशब्दो ब्रह्मादि संग्रहार्थः । तेन ब्रह्मादिषु शरीरेषु इत्यर्थः । **जीवनं** प्राणनं प्राणस्थितिहेतुर्वा **तपस्विषु** - तपःप्रधानेषु मुनिषु तपोऽस्मि ।

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ।। १० ।।

सर्वभूतानां सनातनं बीजं प्रकृतिं प्रधानशब्दितं **मां विद्धि ।** यद्वा **सर्वभूतानां** सर्वेषां परिणामि द्रव्याणां **सनातनम्** अस्खलितं **बीजं** स्वकार्यपरिणामसामर्थ्यम् । अथवा **सर्वभूतानां** जङ्गमस्थावरभूतानां **सनातनं** बीजं प्ररोहकारणं **बुद्धिमतां** ज्ञानिनां **बुद्धिरस्मि** - अध्यवसायोऽस्मि । **तेजस्विनाम्** - प्रतापशीलानां **तेजः** पराभिभवसामर्थ्यम् ।

बलं बलवतां चाऽहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ।। ११ ।।

कामरागविवर्जितम् - काम्यन्त इति कामाः तेषां राग इच्छा तद्विवर्जितम्, **बलं बलवताम्** - धारणादिशक्तिः **कामराग**वशात्स्वकार्ये प्रवृत्तस्य बलस्य परपीडादि हेतुत्वात्

धर्मोपयुक्तशरीरधारणादि बलग्रहणाय कामरागविवर्जितम् इत्युक्तम् । **भूतेषु** - देवमनुष्यादिरूपेणावस्थितेषु जन्तुषु **धर्माविरुद्धः कामः** स्वदारप्रीत्यादिः सर्वत्र रसोऽहम् इत्यादिषु उक्तं सामानाधिकरण्यं 'न राजा राष्ट्रम्' इत्यादिवन्निर्वाह्या निर्वाहकत्वनिबन्धनं गौणम् । किन्तु सर्वस्यापि मदुत्पन्नत्वाच्छेषत्वान्मत्प्रकारत्वाच्च । मुख्यमेव एतदेव उपपादयन् 'कैमुतिकन्यायेन' उपसंहरति ।

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ।। १२ ।।

ये च सात्विका भावाः ये च राजसास्तामसाश्च देहेन्द्रियादिरूपतयाऽवस्थिताः ।

यद्वा 'प्रहर्षः प्रीतिरानन्दः सुखम् सं शान्तचित्तता' (म.भा.मो.२१९-२७) इत्यादयो ये सात्विकाभावाः । 'अतुष्टिः परितापश्च शोको हानिस्तथाक्षमा' (म.भ.मो.२१९-२८) इत्यादयो राजसा भावाः अविविक्तम् । 'तथा मोहः प्रमादस्वप्रतन्द्रित' (म.भा.मो.२१९-२९) इत्यादयो ये च तामसा भावाः । **तान्** सर्वा**न्मत्त एवेति विद्धि** - मत्त उत्पन्नानि इत्येव **विद्धि न त्वहं तेषु** - तेषु अहं तदा यत्तत्स्थितिको न अन्यत्र शरीरकृतोपकारश्शरीरिणोऽस्ति मम तु तादृशो न इत्यर्थः । केवललीलैव प्रयोजनमिति भावः । **ते मयि** - मत्प्रकारतया मय्येव अवस्थिता इत्यर्थः ।

अथ प्रकृत्या स्वतिरोधिमुपदिशति -

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ।। १३ ।।

गुणमयैः - सत्त्वादिगुणमयैः **त्रिभिः भावैः** - सात्विक-राजस-तामसभावैः मोहितमिदं **सर्वं जगत्** एभ्यः त्रिभ्यो भावेभ्यः **परम्** - उत्कृष्टं, अत एव **अव्ययं** - सदैकरूपं **मां न अभिजानाति ।** अत्र गुणमयैः इति सुखदुःखमोहात्मकगुणमयत्वोक्त्या दुःखमिश्रत्व-नश्वरत्व-सातिशयत्वानि भावानां दर्शितानि, ततः परत्वोक्त्या तत्प्रत्यनीकाकारत्वं स्वस्य दर्शितम् । निरतिशयज्ञानानन्दस्वरूपं स्वप्रकाशमपि मां गुणत्रयमयप्रकृतिपरवशं ब्रह्मादिस्तम्बपर्यन्तम् तन्नाभिजानाति इत्यर्थः ।

ननु सर्वोत्कृष्टे त्वयि स्थिते भोक्तृवर्गस्य ब्रह्मादिस्तंबपर्यन्तस्य कथं निहीनेषु गुणमयेषु भावेषु मोहः ? उत्कृष्टापकृष्टसन्निधाने उत्कृष्ट एव भोक्तृवर्गस्य पक्षपातादित्यत आह -

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।। १४ ।।

दैवी - देवेन भगवता क्रीडार्थमुपात्ता देवो हि नारायणः 'दिव्यो देव एको नारायणः' इति श्रुतेः दिव् क्रीडायाम् इत्युक्तत्वाच्च **गुणमयी** - सत्त्वादिगुणत्रय प्रचुरमायाविचित्रकार्यकरी प्रकृतिः **मम माया** मदीया दैवीति देवसम्बन्धित्वेन उक्तयां ममेति । श्रीकृष्णेन स्वसम्बन्धित्वस्य उक्त्या स्वस्यदेवशब्दितस्य नारायणस्य च भेदभ्रमो व्युदस्तः । अन्यथा भूतस्य वस्तुनोऽन्यथाकरणशक्तित्वान्माया इत्युक्तिः । यमान्मदीया **माया तस्माद्दुरत्यया** दुरतिक्रमास्वच्छन्दचेष्टितेन अघटितघटनासमर्थेन सर्वेश्वरेण **मया** प्रवर्तिततयानीश्वरैः मदितरैः मत्प्रवृत्तिं विना दुर्लङ्घ्येत्यर्थः । ये च **मामेव प्रपद्यन्ते ते एतां मायान्तरन्ति** यच्छासादलङ्घनीयं निगलं तन्निवृत्तिरपि तेनैव कार्या नत्वन्येन इति व्यञ्जनाय मामेव इत्येवकारः । तर्हि माया तरणीय सर्वे किमिति त्वां न प्रतिपद्यन्त इत्याशङ्क्य सुकृतित्वदुष्कृतित्वे प्रपदने-अप्रपदने च कारणे इति वदन् तारतम्यमपि दर्शयति ।

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः ।। १५ ।।

दुष्कृतं पापं येषाम् अस्ति इति ते तथोक्ताः ते **मां न प्रपद्यन्त** इत्यर्थः । **ते** पुनः दुष्कृत तारतम्याच्चतुर्विधा इत्याह - **मूढाः नराधमाः, मायया अपहृतज्ञाना आसुरं भावमाश्रिताः** इत्येतैः निर्देशैः । यद्यपि चतुर्विधाः इति नोक्तम् । तथापि उत्तरश्लोके तथा निर्देशादत्रपि तथा कल्प्यमिति बोध्यम् । **मूढाः** - मोहं प्राप्ताः मत्स्वरूपापरिज्ञानात् प्राकृतेष्वेव भोगेषु सक्ताः मच्छेषतैकरसमात्मानं भोग्यजातं च स्वशेषतया मन्यमानाः इत्यर्थः । **नराधम**शब्देन मूढत्वापहृतज्ञानत्वयोः मध्यमावस्थोच्यते । 'रीङ्क्षये' इत्यस्मात् 'ड' प्रत्यये टिलोपे ततो न शब्देन नैकशब्देन 'सुप् सुपा' इति समासे निष्पन्नत्वात् नरशब्दस्य विनाशरहितत्वमर्थः । आत्मनां विनाशश्च धर्मभूतज्ञानसंकोचः तद्वैधुर्यं च सामान्यतो ज्ञानवत्वम् । तथा च **नराधमा** इत्युक्ते सर्वलोक प्रसिद्धेतिहासपुराणादिभिः मत्सामान्यज्ञानसत्वेऽपि सौलभ्य अपरिज्ञानादौन्मुख्यरहिता विवक्षिताः । **माययाऽपहृतज्ञानाः** मायाशब्दोऽत्र बाह्यकुदृष्टियुक्तिपरः; तासामपि विचित्रमोहशक्तिसम्पादकत्वेन मायाशब्दितत्वात् ताभिः अपहृतं ज्ञानं मद्विषयं मदैश्वर्य विषयं च येषान्ते तथोक्ताः । **आसुरम्** - आसुरसम्बन्धिनभावमभिप्रायम् **आश्रिताः**। यथा आसुरा भगवन्तम्

अतिशयितशक्तिं जानन्त एव तद्विषये द्वेषम् आचरन्ति । एवं निपुणतमप्रक्रिया प्रमाणतर्कैः अबाध्यत्वेन निश्चितमपि मदैश्वर्यं ये द्विषन्ति ते तथोक्ताः, मूढप्रभृतयः उत्तरोत्तराः पापिष्ठाः इत्यर्थः ।

चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।। १६ ।।

सुकृतिनो मां भजन्ते - प्रपन्ना भवन्ति । **ते च चतुर्विधाः** - सुकृततारतम्येन फलेच्छाभेदाद्विश्वास साधारण्येऽपि चतुःप्रकाराः उत्तरोत्तराभ्यधिकाः इत्यर्थः । तानेव चतुरो दर्शयति - **आर्त** इत्यादिना । **आर्तः** - आर्तिमूलपूर्वस्थितिशैथिल्यवान् भ्रष्टैश्वर्यः पुनः तत्प्राप्तिकामः इत्यर्थः । **जिज्ञासुरर्थार्थी** इति पाठेऽपि पाठक्रमाद्बलवताऽर्थक्रमेण **अर्थार्थी** जिज्ञासुरिति क्रमो ज्ञेयः प्रथमोऽर्थशब्दः प्रार्थनीयभोगविशेषपरः । तदर्थी अप्राप्तभोगवांछावान् इत्यर्थः । **जिज्ञासुः** आत्मेच्छुः तथापि आत्मज्ञानस्वरूप एव इत्यात्मेच्छुः जिज्ञासुः इत्युच्यते । **ज्ञानी च** भगवच्छेषतैकरसम् आत्मस्वरूपं जानन् नगरं प्रविविक्षुः छाया तरुमूलस्वापविलम्बं यथा न सहते तथा तदनुभवविलम्बमसहमानो भगवन्तमेव अनुभवितुमवेक्षमाणः । एवं भक्तभेदम् अभिधाय प्रतिबुद्धस्य श्रैष्ठ्यमाह -

तेषां ज्ञानी नित्ययुक्तः एकभक्तिर्विशिष्यते ।

एकभक्तिरिति - नित्ययुक्तः । सर्वदा तद्योगवान् इत्यर्थः । **ज्ञानिनः** प्रापको भगवानेव प्राप्य इति फलदशायामपि तद्योगोऽनुवर्तत इति भावः । अनेनार्तार्थिनोः उपाय परिग्रहदशायां तन्नास्ति इति ध्वनितम् । एवं प्रकृति विविक्तात्मस्वरूपप्राप्तिच्छया मां भजतोऽपि ज्ञेयम् । एकस्मिन्भक्तिर्यस्य **एकभक्तिः** इति व्यधिकरणबहुव्रीहिः । अत्रापि उपास्यफलयोः अभेदात् ज्ञानेन **एकस्मिन्नेव** भक्तिः इतरेषां त्रयाणां तु स्वाभिलषिते तत्साधनेमयि चेति नैकभक्तित्वम् । अतो नित्ययुक्तत्वादेकभक्तित्वाच्च ज्ञानी **विशिष्यत** इत्यर्थः । इतश्च हेतोः ज्ञानी विशिष्यत इत्याह -

प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।। १७ ।।

हि यस्मात् **अहं ज्ञानिनः अत्यर्थं प्रियः** अर्थशब्दोऽभिधेयपरः । तथा च **अत्यर्थम्** - अभिधेयम् अतिक्रम्य प्रियः अयम्भावः । अभिधेयातिक्रमणं च अभिधेयान्तराद्वैलक्षण्यं तच्चेतरपदार्थवदभिधातुम् अशक्यत्वम् । ततश्च **ज्ञानिनोऽहं** यथा **प्रियः** तथा सर्वज्ञेनापि

न मया वक्तुं शक्यत इति भावः । **स च** ज्ञान्यपि **मम प्रियः ।** तथैव मम प्रियः । तस्माद्विशिष्यत इति । अत्र ज्ञानिनामत्यर्थप्रियत्ववचनात् अन्येषां त्रयाणां किञ्चित्प्रियत्वं व्यञ्जितम् । तदेव विवृणोति ।

उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितस्स हि युक्तात्मा मामेवानुत्तमां गतिम् ।। १८ ।।

सर्व एवैते उक्ताश्चत्वार **एवैते** उदारावत् अन्याः मत्तोऽपि वदान्याः अहं हितेभ्यो यत्किञ्चिदेवापेक्षितं ददामि ते तु मह्यं सर्वस्वं ददति इति भावः । **ज्ञानी तु आत्मैव** इति अध्याहार्यः शरीरस्यात्मा यथाधारक तद्वत् धारक एवेति **मे मतम् ।** अस्मत्सिद्धान्त स्त्रय्यन्तसिद्धान्तसिद्धो भवतु वा मा वा मम सिद्धान्तस्त्वयमेव इति भावः ।

ननु श्रुतिष्वनन्यात्मत्वं तपोद्घोषितं 'पतिं विश्वस्यात्मेश्वरम्' इति तत्कथं ज्ञानिनः तवात्मत्वम् इत्यतः तदुपपादयति **आस्थित इति ।** 'हि हेतौ' हि यस्मात् **स -** ज्ञानी **युक्तात्मा** - युक्त इति 'आशंसायां भूतवच्च' इति कर्तरि क्तः युक्तः । योगमाशंसमानः आत्मा मनो यस्य स तथा मां विना आत्मधारणासम्भवं मन्यमान इत्यर्थः । मदनुसन्धानाभावेर्थान्तरानु-सन्धानेऽसमर्थ स्वभाव इति यावत् । **मामेव** उपायभूतं मामेव **अनुत्तमां** निरतिशयां न विद्यते । उत्तमा यस्या इति व्युत्पत्तेः । **गति**शब्दो गन्तव्य परः । मामेव परमप्राप्यमास्थित इत्यर्थः । मदपेक्षयान्यत् फलान्तरलवमपि नास्थित इति बोधनायैवकारः । अतः तेन विना ममापि आत्मधारणेन इति स मदात्मेति भावः । ऐश्वर्यादिकामाः सर्वेऽपि मत्स्वरूपस्य अतिशयहेतवः । **ज्ञानी तु** मत्स्वरूपसत्ता हेतुरिति श्लोकद्वयस्य फलितार्थः । पुनरपि उक्तज्ञानवत्वस्य अनेकजन्मसाध्यफलत्वेन दुर्लभया ज्ञानिनः श्रैष्ठ्यं दर्शयति -

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ।। १९ ।।

बहूनाम् - अनेकेषाम् **जन्मनाम्** - पुण्यजन्मनां जन्मबहुत्वमात्रस्य ज्ञानवत्त्व प्रयोजकत्वे अतिप्रसङ्गादिति भावः । अत एव ये जन्मकोटिभिः सिद्धाः तेषाम् अन्ते अत्र संस्थितिः इति । 'जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत' ।। (ई.सं.१७) इति च । सिद्धाः क्षीणपापानाम् इत्युक्तम् । अन्ते ज्ञानवान् सन्निति शेषः । ज्ञानी भूत्वा इत्यर्थः । ज्ञानमेवाभिनीय दर्शयति । **वासुदेवस्सर्वमिति ।**

यद्वा **वासुदेवः सर्व इति मां प्रपद्यत** इत्यन्वयः । **सर्वं** प्रापकं प्राप्यं 'पिता माता भ्राता निवासश्शरणं सुहृद्गतिर्नारायणः' (सु.६) इत्युक्तरीत्या आधारकः पोषको भोग्यश्चेति यो मां प्रपद्यते, **महात्मा** महामनाः **सुदुर्लभः** - दुर्लभतरः फलान्तरमपेक्ष्यापि भगवदुपासकस्य दुर्लभत्वात् ततोऽप्यतिशयद्योतनाय सुशब्दः तस्य ज्ञानिनो दुर्लभतरत्वमेव प्रतिपादयति ।

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ।। २० ।।

काम्यन्त इति कामाः । फलानि **तैस्तैः** तदुपासितदेवताभिः दातुं शक्यैः फलैः इत्यर्थः । **हृतः** - मत्स्वरूपविषयज्ञानाः, **अन्यदेवताः** - द्वितीयान्तमिदं मद्व्यतिरिक्ताः केवलेन्द्रादिदेवताः **प्रपद्यन्ते** कथं भूतास्सन्तः स्वया स्वकीययो प्राचीनस्वकीयानुभवजनितया प्रकृत्या स्वभावेन पापवासनया इत्यर्थः । **नियताः** - अदृष्टव्यभिचारसम्बन्धाः नित्यान्विताः इत्यर्थः । **तं तं नियममास्थाय** - नियमशब्दः सङ्कल्पपरः विश्वासगर्भफलप्रदत्ववरणं कृत्वा इत्यर्थः । एवं देवतान्तरफलान्तरसक्ता अपि - तत्तदाराधन तत्तत्फलयोश्च शैथिल्ये सति 'अलाभे मत्तकाशिन्या दृष्ट तिर्यक्षु कामिता' इति न्यायेन अनर्थहेतुषु निषिद्धेषु उपायेषु फलेषु निमज्ञेयुः इति भयात् परमकारुणिकोऽहमेव तत्तदाराधनहेतु श्रद्धाविघ्नशान्तिं तत्फलं च प्रयच्छामि इति श्लोकद्वयेन आह -

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ।। २१ ।।

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हितान् ।। २२ ।।

यो यो भक्तः यां यां तनुं वस्तुतो मत्तनुभूतां देवतां **श्रद्धया** आस्तिक्यबुद्ध्या **अर्चितुमिच्छति** - आराधयितुम् इच्छति । **तस्य तस्य** भक्तस्य तामेव **श्रद्धां** तद्देवताराधनोपयुक्त **श्रद्धामेव अहम् अचलां विदधामि** - मत्तनुविषययैवैषा **श्रद्धा** इति । अहं तां निर्विघ्नं करोमि इत्यर्थः । अत्र आदित्यादिदेवानां भगवत्तनुत्वे 'यस्यादित्यश्शरीरं' (बृ.उ.५-९-१३) 'पूःप्राणिनः सर्वविव' इत्यादि श्रुतिस्मृतीमानम् । यद्यपि इन्द्रादीनां देवानां स्वातन्त्र्येण भजनमेव अत्र विवक्षितम्; न तु तनुत्वेन । तथा च तनुशब्दस्य न प्रयोजनम् । इह तथापि नरपतेः आत्माज्ञानेऽपि तच्छरीरप्रसाधनकर्त्रे नरपतेः आत्मैव यथा फलं ददाति तथा इहापि इति बोधनाय **यां यां** देवताम् इत्यनुक्त्वा,

यां यां तनुमित्युक्तम्, स तया इत्यत्रापि तच्छब्दे वीप्सा बोध्या; **सः** - स भक्त इत्यर्थः । **तया** अचलत्वेन मया स्थापितया **श्रद्धया** युक्तः तस्य इन्द्रादेः आराधनम् **ईहते** - इच्छति । यद्यपि पूर्वत्रान्यदेवताः यां यां तनुम् इति स्त्रीलिङ्गशब्देन निर्दिष्टैव अत्र तच्छब्देन ग्राह्या । तथा च पुल्लिङ्गानुपपत्तिः । अथापि 'देवान्देवयज' (भ.गी.७-२३) इति वक्ष्यमाणमनुसृत्य तेन अनिर्देशः ।

यद्वा तस्याः आराधनमित्येव च्छेदः अतो नोक्तानुपपत्तिः । **हितानि** इत्यत्र इतिभिन्नपदम् अव्ययम् मयैव **विहितान्** - दत्तान् तानेव हि कामान् स्वाभिलषितानेव हि कामान् । ततः मत्तनुभूताग्नि इन्द्रादिदेवताराधनात् लभते । तेषां देवानां कञ्चुकस्थानीयत्वान्न फल प्रदानसामर्थ्यम्, अपि तु स्वस्यैव इति बोधनाय मयैव इत्येवकारः । यदि भगवत्प्रसादात् तेषामपि फलसिद्धिः । तर्हि भगवदुपासकेभ्यः तेषां को विशेष इत्यत आह -

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ।। २३ ।।

'तु' शब्दः उक्ताशङ्का व्यावर्तनाय अल्पेषु इन्द्रादिषु तदधीनफलेषु च मेधा येषान्ते **अल्पमेधसः** । यद्वा अल्पाराध्यफलगोचरत्वात् अल्पा मेधा येषान्ते अल्पमेधसः; 'नित्यम् असिच् प्रजामेधयोः' इत्यसिच् तेषाम् इन्द्रादि मात्रयाजिनां **तत्फलम्** अभिलषितम् इन्द्रादिसायुज्यादिरूपफलमन्तवद्भवति, कुत इत्यत्राह - **देवानिति** । **देवयजः** मद्व्यतिरिक्तेन्द्रादि देवाराधकाः **देवान्यान्ति** तथा तत्समानभोगरूपस्य तत्सायुज्यस्य मद्दत्तस्यापि इन्द्रादिवत्परिमित कालत्वादन्तवत्त्वमिति । साक्षात्स्वोपासकस्य तु नायं दोष इत्याह -**मद्भक्ता** इति । मय्येव भक्तिमन्त इत्यर्थः । **मां यान्ति** - निरतिशयानन्दस्वरूपं **मां यान्ति** - मत्स्वरूपस्य निरतिशयत्वात्कालानवच्छिन्नत्वाच्च । मत्सायुज्यं प्राप्तस्य नान्तवत्त्वमिति वैषम्यबोधनाय अपि शब्दः ।

यद्वा -

"भगवन्तं समुद्दिश्य तदेकशरणा नराः ।
कदाचिन्न च हीयन्ते कर्मस्वभिरता अपि" ।। इति शाण्डिल्यसंहितोक्त न्यायेन फलान्तरार्थिनामपि मो भविश्रम एव न च्युतिः इति बोधनायाऽपि शब्दः ।

ननु फलान्तरदेवतान्तरवासनायाः त्वद्विषयज्ञानप्रतिबन्धयुक्तः । त्वत्साक्षात्कारे सति कथं तत्सिद्धिः अस्ति खल्विति कारुण्यात् सर्वसमाश्रयणीयत्वाय भूमौ अवतीर्णस्य तव साक्षात्कारः सर्वस्य ततश्च पूर्वोक्तो विशेषो दुर्भण इत्यत आह -

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ।। २४ ।।

अव्ययम् - अजहत्स्वभावम्, **अनुत्तमम्** - न विद्यते उत्तमो यस्मात्स तथोक्तः **तं परम्** अनवधिकातिशयं मम भावं निरतिशयसौलभ्यरूपम् । स्वभावम् **अजानन्तः** अव्यक्तमितः पूर्वमनभिव्यक्तम् । **व्यक्तिमापन्नम्** - इदानीं कर्मवशादभिव्यक्तिमापन्नं जन्म विशेषं प्राप्तम् इत्यर्थः । **मां** - वसुदेवसूनुम् **अबुद्धयः** - बुद्धिशून्यास्सन्तो **मन्यन्ते** परमात्म तदवतरणादि श्रवणमननरहितावैलक्षण्यज्ञापक लिङ्गदर्शने तदूहापोहशक्तिविकलाः । प्राकृतमिव मां मन्यन्त इत्यर्थः ।

ननु यदि भगवान् सर्वसमाश्रयणीयत्वाय स्वस्वभावम् अजहदेवावतीर्णः । तर्हि कथं तादृक्स्वभावम् न प्रकाशयति इत्यत आह -

नाहं प्रकाशस्सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ।। २५ ।।

योगमायासमावृतः - योगशब्दः सम्बन्धपरः, स च सम्बन्धिनमनन्तर्भाव्य न बोधकः । सम्बन्धी च मनुष्यत्वादि संस्थानवेषभाषादिरेव । तथा च मनुष्यत्वादि संस्थान योगाख्यमायया विचित्रसामर्थ्येन **समावृतः** - सम्यक् आवृतः । **अहं सर्वस्य न प्रकाशः** परस्वभावेन इति शेषः । तर्हि तवैव अयं दोष इत्यत आह - **मूढोऽयम्** इति । **अयं लोको** - जनः मूढः मयि मनुष्योऽयमिति मोहमापन्नः **मामजमु**त्पत्तिशून्यम् **अव्ययम्** - स्वरूपतो धर्मतश्च विकाररहितं न अभिजानाति । किन्तु तदानींतन पुरुषान्तरवत्कर्माधीनजन्मानं ज्ञानसङ्कोचादिमन्तं जानाति इत्यर्थः । अयं भावः - मया तु सर्वेषाम् अभिगम्यत्वायैव मनुष्यत्वादिकमात्तम् तत्तु दुर्मतीनां परित्यागहेतुरेव अभूत् । न च पारमेश्वरस्वभावः सर्वो मयातिरोहितः । लोकोत्तरकर्म तेजःप्रभृतीनां प्रकाशनात् । किन्तु **मूढोऽयं लोको** यत्किञ्चित्साधर्म्याद्घनावृते मयूखमालिनि खद्योतभावमिव अधिगच्छति इति । अयं लोको न अभिजानाति इत्येतावता वर्तमानमात्रपरत्वं नाशङ्कनीयम् । किन्तु त्रैकाल्यवर्तिन्यपि भूतानि न जानन्ति इत्याह -

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ।। २६ ।।

अत्र **समतीतानि** इति पृथङ्निर्दिष्टत्वात् भूतानि इत्येतत् क्षेत्रज्ञपरम् । **अहं** सर्वज्ञोऽहं **समतीतानि वर्तमानानि भविष्याणि च भूतानि वेद** जानामि **मां तु कश्चान** मयानुसन्धीयमानेषु कालत्रयवर्तिषु क्षेत्रज्ञेषु कश्चन कोऽपि न वेद । यथावन्न जानाति अतो ज्ञानी दुर्लभ इत्यर्थः । अथ ज्ञानिनो दौर्लभ्याय कालत्रयवर्ति सर्वभूतसाधारणं भगवदज्ञानकारणमाह -

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यान्ति परन्तप ।। २७ ।।

इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्थिष्ठति इति **इच्छाद्वेषसमुत्थम् ।** तेन पूर्वपूर्वजन्मसु यद्विषयौ इच्छाद्वेषावभ्यस्तौ, तद्वासनया पुनरपि जन्मकाले तद्विषयावेव इच्छाद्वेषौ भवतः । वासनायाः स्वकारणस्वभावविषयत्वात् । ततश्च जननकाले वासनावशात् जनिताभ्याम् इच्छाद्वेषाभ्याम् उद्धितेन **द्वन्द्वमोहेन** मुह्यन्तेनेन इति मोहः **द्वन्द्वाख्यो** मोहो द्वन्द्वमोहः शीतोष्णादिरूपेण अभोग्ये इदं भोग्यम् । अद्वेष्ये इदं द्वेष्यम् इति मोहजनकेन **सर्वभूतानि** सर्गे उत्पत्तिकाल एव **संमोह**मुक्तरूपं मोहं **यान्ति ।** अतः **सर्वाणि भूतानि** पूर्वाभ्यस्त विषयसंश्लेषविश्लेषयोः इच्छाद्वेषवन्ति न मत्संश्लेष विश्लेषयोः । ततश्च मत्संश्लेष विश्लेषैकसुखदुःखोज्ञानी दुर्लभ इत्यर्थः । यद्येवं **सर्वभूतानि संमोहं यान्ति ।** तर्हि चतुर्विधा भजन्त इत्यादेः पूर्वोक्तस्य अनुपपत्तिः इत्यत आह -

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ताः भजन्ते मां दृढव्रताः ।। २८ ।।

येषां पुण्यकर्मणाम् - पुण्यं कर्म येषां ते तथोक्ताः । तेषाम् अनेकजन्मार्जित पुण्यसञ्चयानाम् इत्यर्थः । **जनानां पापं** मदौन्मुख्यविरोधि पापम् **अन्तगतं -** क्षीणन्ते जनाः **द्वन्द्वमोहनिर्मुक्ताः** गुणमयाद्वन्द्वमोहाद्विनिर्मुक्ता **दृढव्रताः -** दृढसङ्कल्पा **मां भजन्ते -** मामेव भजन्ते ।

अथ भगवन्तं भजमानानां ज्ञातव्यविशेषान् प्रस्तौति - जरामरणमोक्षाय प्रकृतिवियुक्तात्मस्वरूपदर्शनाय -

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ।। २९ ।।

ये जरामरणमोक्षाय **माम् आश्रित्य** मां प्रपद्य **यतन्ति;** यतन्ते आराधयन्ति **ते ब्रह्म विदुः** कृत्स्नमध्यात्मं **विदुः - अखिलं कर्म विदुः** अत्र विदुः इति वर्तमाननिर्देशेऽपि

यदाग्नेयोष्टाकपालो भवति इत्यत्रेव लेट्त्वादिकं परिकल्प्य विध्यर्थकत्वं स्वीकर्तव्यम् । अप्राप्तार्थकत्वात् । तथा च ते ब्रह्मविदुः इत्यर्थः । एवमुत्तरश्लोकेऽपि इयान्परं विशेषः । **जरामरणमोक्षाय** इति श्लोके **ये** इत्युक्त सर्वाधिकार्यनुवाद यच्छब्द सद्भावेऽपि पुनर्य इत्युक्त्या ऐश्वर्यार्थिरूपाधिकारि विशेषोद्देशेन साधिभूताधिदैवं माम् इत्यस्य विधिः ।

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ।। ३० ।।

साधियज्ञम् इत्यस्यापि यद्यपि विशेषज्ञापकाभावात्तदुद्देश्यकत्वमेव प्रतीयते । तथापि सर्वाधिकारिसाधारणतया प्रमाणसिद्ध यज्ञादि पदार्थ स्वाभाव्यादधिकारित्रयोद्देशेनैव तज्ज्ञानविधिः **प्रयाणकालेऽपि च** इत्यत्र अपि च इत्यव्ययद्वयं न एकार्थकम् । किन्तु भिन्न प्रयोजनकम् अव्ययद्वयं युक्तचेतसः । ते च **प्रयाणकालेऽपि मां विदुः** स्वप्राप्यानुगुणं शरीरावसानसमये सर्वे **मां विदुः** इत्यर्थः ।।

।। श्रीशैलबुक्कपट्टण येन्नाच्चान्दास विलिखितेऽध्यायः
सप्तमः श्रीगीताभाष्यरहस्यार्थसंग्रहो वृत्तः ।।

अष्टमाऽध्यायः

[अक्षरपरब्रह्मयोगः]

सप्तमेऽध्याये मय्यासक्तमनाः इत्यादिना भगवत उपास्यत्वम् अभिधाय तच्छेषत्वेन 'भूमिराप' इत्यारभ्य तस्यैव विभूतिद्वयशेषित्वादिभिः परत्वं प्रतिपाद्य त्रिभिः 'गुणमयैः' इत्यादिना दुष्कृतप्रवाहेन तत्स्वरूपतिरोधानं 'जनास्सुकृतिन' इत्यादिना भगवत्प्रत्यासत्या च तन्निवर्तनमपि उक्त्वा ऐकान्तिकभक्तियुक्तस्य दौर्लभ्यमुक्त्वा ज्ञातव्यार्थविशेषांश्च दर्शितवान् ।

अथ अष्टमे प्रस्तुतान् ज्ञातव्योपादेयभेदान् विविनक्ति **अर्जुन उवाच** इति - ज्ञातव्य जीवस्वरूपम् अनुष्ठेयस्य उपायस्य भेदांश्च ज्ञातुमर्जुनः पृच्छति इत्यर्थः ।

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तम् अधिदैवं किमुच्यते ।। १ ।।

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ।। २ ।।

हे **पुरुषोत्तम!** अत्र देहे इन्द्रादौ **तद्ब्रह्म** जरामरणमोक्षार्थं यतमानानां ज्ञातव्यतयोक्तम् । **ब्रह्म किम्? किमध्यात्मम्?** आत्मानमधिकृत्य प्रवृत्तम् अध्यात्मं तत्किं? **कर्म च किं** अयमक्षरयाथात्म्यार्थिविषयः प्रश्नः । **अधिभूतं च किं प्रोक्तं, किमधिभूतम्** इति प्रोक्तम्? इत्यर्थः । **अधिदैवं किमुच्यते** - किमधिदैवमुच्यत इत्यर्थः । अयम् ऐश्वर्यार्थिविषयः प्रश्नः, **अधियज्ञः** कः स **कथं** तस्य अधियज्ञभावश्च कथम् इत्यर्थः । **नियतात्मभिः प्रयाणकाले कथं ज्ञेयोऽसि** अयं त्रितयसाधारणः प्रश्नः । **पुरुषोत्तम मधुसूदन** शब्दाभ्यां भगवतोऽपेक्षित प्रश्नाानाम् उत्तरदानक्षमत्वं स्वाज्ञानशमनक्षमत्वं च व्यञ्जितम् ।

श्रीभवानुवाच इति । उक्तप्रश्नानामुत्तरं भगवानुवाच इत्यर्थः ।

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ।। ३ ।।

अधिभूतं क्षरोभावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ।। ४ ।।

ब्रह्म तद्ब्रह्म इति प्रश्न वेळायां निर्दिष्टं ते ब्रह्मतद्विदुः इति मयोपक्षिप्तं ब्रह्म इत्यर्थः । **परमम् अक्षरं** न क्षरति इति अक्षरम्, नित्यमात्मस्वरूपम् इत्यर्थः । प्रकृतिविविक्तत्व

बोधनाय **परम**शब्दः अत्र देहे ज्ञातव्यतयोक्तम् । **ब्रह्म** प्रकृति विविक्तात्मस्वरूपमेव इत्यर्थः । ब्रह्मसाधर्म्यात् ब्रह्मशब्दः औपचारिक इत्यर्थः । **स्वभावो अध्यात्ममुच्यते । स्वभावः -** प्रकृतिः सैव **अध्यात्मम् इत्युच्यत** इत्यर्थः । स्वयमेव भवति सम्बध्नाति इति व्युत्पत्या प्रकृतेरेव नियत सम्बन्धत्वात् । आत्मन्यधि **अध्यात्मम्** आत्मनि सम्बध्यमानम् इत्यर्थः । अथ एव अनात्मत्वं सिद्धम् । ततश्च अनात्मभूतमात्मनि सम्बध्यमानं भूतसूक्ष्म तद्वासनादिकमेव स्वभावः । स एव ज्ञातव्यतया उक्तोऽध्यात्मशब्दार्थ इत्यर्थः । **भूतभावोद्भवकरः** भूतभावो मनुष्यत्वादिविशिष्टशरीरयोगः तदुद्भवकरः तदभिव्यक्ति सम्पादकः **विसर्गः -** योषित्सम्बन्धजो रेतो विसर्ग इत्यर्थः । अयमेव ज्ञातव्यतया उक्तकर्मशब्दार्थः । तस्यापि परिहरणीयतया मुमुक्षुभिः ज्ञातव्यत्वात् । अधिभूतमैश्वर्यार्थिभिः ज्ञातव्यतयोक्तम् **अधिभूतं क्षरोभावः । क्षरो** नश्वरः **भावोभूतानां** परिणामविशेषः । शब्दस्पर्शादिभूतावस्थानां तदाश्रयभूतानां च तैः प्राप्यत्वेन ज्ञातव्यत्वात् । उभयसङ्ग्रया क्षरोभाव इत्युक्तम् पुरुषश्च अधिदैवतं पुरुषः भावप्रधानो निर्देशः पुरुषत्वमित्यर्थः । सर्वचेतनगतभोक्तृत्वाद्यवस्था इति यावत् । तस्यैव इन्द्रप्रजापतिप्रभृत्यखिल देहोपरिवर्तमानत्वात् ऐश्वर्यार्थिभिः भोक्तृत्वावस्थारूपपुरुषत्वस्य प्राप्यतया ज्ञेयत्वं द्रष्टव्यम् । यज्ञे सम्बध्यमानोऽधियज्ञः अत्र देहे देहभूत इन्द्रादौ अहमेव अधियज्ञो ज्ञेयः । अत्र देह इति इन्द्रादीनां देहत्वोक्त्या इन्द्रादीष्वाराध्येषु सत्सु कथम् **अधियज्ञोऽहमेव** इत्युक्तरीत्या शङ्का परास्ता । 'विष्णुः सर्वादेवताः' 'अङ्गान्यन्यादेवताः' इत्युक्तेरिति भावः । **अत्र देह** इत्युक्तैव कथमिति प्रश्नस्यापि उत्तरमुक्तं भवति । तेन तत्तद्विशिष्टवेषेण आराध्यत्वस्य अभिव्यक्तेः । महायज्ञादि नित्यनैमित्तिकादिकर्माधिकारिणां त्रयाणामप्यनुष्ठानवेलायाम् अनुसन्धेयम् । एतत् अत्र अध्यात्मचिन्तानुगुणसत्वोत्तरदेहेन्द्रियादिमत्वद्योतनाय देहभृतां वरेति सम्बोधनम् । प्रयाणकाले च कथं ज्ञेयोऽसि इति प्रश्नस्य उत्तरमाह -

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेबरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ।। ५ ।।

अन्तकाले च - प्रयाणकाले च चकारेण पूर्वकालेऽपि स्मरणम् आवश्यकम् इति ध्वनितम् । **मामेव स्मरन्** विषयान्तरवैमुख्येन **मां स्मरन् कलेबरम् -** शरीरं मुक्त्वा **यः प्रयाति सः मद्भावं याति ।** मम यो भावः - स्वभावः तं याति । तदानीं **यथा** माम् अनुसन्धत्ते । तथाविधाकारो भवति इत्यर्थः । अत्र अनुसन्धेयाकारविशेषसाम्यप्राप्तिः

विवक्षिता । तत्साम्यं च स्वरूपभेदकधर्मभेदे सत्येव इति कृशोदरकीटनीडनिहित कीटस्येव तज्ञातीयत्वप्राप्तिः । येन ईश्वरान्तरप्रसङ्गत्रयाणाम् अधिकारिणां भेदविलयापत्तिः न इति ध्येयं नास्ति । अत्र **संशयः** अत्रान्तकालस्मरणे स्मृतव्यक्तिविशेषसमाकारप्राप्तौ संशयो नास्ति । आदिभरतादिषु दृष्टत्वात् इति भावः । न केवलम् ईश्वरविषयान्तिमप्रत्ययस्य अयं स्वभावः । किन्तु सर्वविषयप्रत्ययस्यापि इत्याह -

यं यं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेबरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ।। ६ ।।

अन्तशब्दोन्तकालपरः । स च **स्मरन्नित्यनेन** अन्वेति । तथा च **यं यं वाऽपि भावम् अन्तकाले स्मरन्** कलेबरम् मुक्त्वा तमेव भावमेति तत्र हेतुप्रतिपादकविशेषणमाह - **सदेति** । तस्मिन् भावो भावितो येन स तथा अनेन अन्तिमप्रत्यय हेतुः दर्शितः । अत्र **यं यं तं तम्** इति वीप्सयां वा अपि इत्यव्ययद्वयेन च स्मर्तव्य विषयनियमः नीचोत्तमविषयवैलक्षण्यभावश्च दर्शितः । **तं तमेव इत्येव**कारेण असङ्कीर्ण फलप्राप्तिः । तस्याः प्राप्तेश्च प्रबलपुण्यन्तरेणापि दुर्निवारत्वं विवक्षितम् ।

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिः मामेवैष्यस्यसंशयः ।। ७ ।।

यस्मादन्तिमप्रत्ययाधीनं फलम् अन्तिमप्रत्ययश्च पूर्वाभ्यस्तविषय एव जायते तस्मादित्यर्थः । **सर्वेषु कालेषु** आप्रयाणं सर्वस्मिन्नपि काल इत्यर्थः । तथा च श्रुतिः 'स खल्वेवं वर्तयन्यावदायुषं प्रायणान्तमोङ्कारमभिध्यायीत' इति प्रतिमासम् प्रति पक्षमनुस्मरणेऽपि आप्रयाणमिति वक्तुं शक्यमिति । तद्व्यवच्छेदाय बहुवचनम् । तेन अहरहः पूर्वापररात्रेषु युञ्जान इति विहितैकाग्रतानुकूलेषु **सर्वेषु काले**ष्वपि इत्यर्थ लाभः । **युध्य च माम् अनुस्मर** इत्युक्त्या विहितस्य युद्धस्य फलवत्स्मृतिसन्निधिपाठात् 'फलवत्सन्निधावफलं तदङ्ग'मिति न्यायात् स्मृत्यङ्गत्वं लभ्यते । **युध्येति** पदं तद्वर्णाश्रमविहितधर्ममात्रप्रदर्शकम् । तथा च **मामनुस्मर** तादृशस्मृतिनिष्पादकं **वर्णाश्रमानुबन्धिश्रुति** चोदितम् । फलाभिसन्धिरहितं नित्यं नैमित्तिकं कर्म कुरु । एवं कुर्वन् मय्यर्पितमनोबुद्धिः मनसोर्पणं नाम अहरहरनुस्मरणं बुद्धेः अर्पणं फलप्रदत्वाध्यवसायः । मयि इत्येतस्य अयमेव मदभिलषितं दास्यति इति दृढमध्यवस्य नैरन्तर्येण मामनुस्मरन् इत्यर्थः । **मामेवैष्यसि** इति । यथाभिलषितप्रकारं मां प्राप्स्यसि

इति । **असंशयः - संशयोनास्ति** इत्यर्थः । 'अमानोनाः प्रतिषेध' इत्येतदपि **प्रत्येकं** प्रतिषेध बोधकमिति ध्येयम् ।

यद्वा न विद्यते संशयो यस्य इत्यसंशयः; इत्यर्जुनविशेषणं त्वम् **असंशयश्चेदेष्यसि** इति । अनेन विशेषणेन -

'निस्संशयेषु सर्वेषु नित्यं वसति वैहरिः ।
स संशयान्हेतुबलान्नाध्यावसति माधवः' ।।

इति श्लोकार्थः सूचितः । एवम् अन्तिमप्रत्ययप्रसङ्गात्तद्धेतुतया उपासनं **प्रस्तुतम्** । **अथ** तत्प्रकारभेदं वक्तुम् उपक्रमते । तत्र ऐश्वर्यार्थिनाम् उपासनप्रकारं **यथोपासनम्** अन्तिमप्रत्ययप्रकारं च आह -

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ।। ८ ।।

अभ्यासः - 'आलम्बनसंशीलनं पुनःपुनरभ्यासः' इति वाक्यकारोक्तम् । आलम्बनसंशीलनं, योगशब्दो ध्यानपरः **अभ्यास** - योगाभ्यास **युक्तेन** । अत एव **अनान्यगामिना** अन्यस्मिन्विषयान्तरे गन्तुं शीलं यस्य तदन्यगामिन **अन्यगामिनान्यगामिन गनैका**दिशब्दवन्न समासः । तेन **अनन्यगामिन** इत्यर्थः । **चेतसा** - मनसा दिव्यं समनन्तरश्लोकोक्त प्रकारं **परमं पुरुषं** सर्वेश्वरं माम् **अनुचिन्तयन्** - पश्चाच्चिन्तयन् अभ्यासयोगेत्यनेन प्राचीनचिन्तनस्य उक्तत्वात् । **याति** - प्राप्नोति तत्प्राप्तिश्च तत्साम्यापत्तिरेव । तथा च ऐश्वर्यार्थी आदि भरतमृगत्वप्राप्तिवत् अन्तकाले स्मर्यमाणभोगप्रदानो पयुक्ताकारविशिष्टपरमपुरुष समानैश्वर्यम् प्राप्नोति इत्यर्थः । अत्र पुनः पुनः संशीलनरूपाभ्यास पदोक्त्या अविरुद्धैः नित्यनैमित्तिकादिभिः व्यवधानं युक्तमिति सूचितम् ।

कविं पुराणमनुशासितारम् अणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूपम् आदित्यवर्णं तमसः परस्तात् ।। ९ ।।

प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् ।। १० ।।

कविं - क्रान्तदर्शिनं सर्वज्ञमित्यर्थः । **पुराणं** - पुरातनम् अनादिमित्यर्थः । **अनुशासितारम्** - अत्र सर्वस्य धातारम् इत्यत्रऽयं सर्वस्येति पदमाकृष्यते । **तथा च**

सर्वस्य - प्रपञ्चस्य **अनुशासितारम्** - अन्तःप्रविश्य नियन्तारम् **अणोरणीयांसम्** - अणोर्जीवादप्यणुतरम् अनेन पूर्वोक्त प्रशासनार्थं सर्वान्तः-प्रवेशौपयिकं साक्ष्म्यं दर्शितम् । **सर्वस्य** धातारं धातृशब्दोऽत्र स्रष्टृपरः । 'धातूनाम् अनेकार्थत्वात्' 'धाता यथा पूर्वं धाता पुरस्ताद्यमुदाजहार' इत्यादिषु स्रष्टरिप्रयोगाच्च । तथा च सर्वस्य स्रष्टारम् इत्यर्थः । अचिन्त्यम् इत्थं वेत्थं वेति कुतर्कैः चिन्तयितुम् अनर्हं रूपं - स्वरूपं यस्य तथोक्तम् । 'आदित्यवर्णं तमसः परस्तात्' अत्र सर्वकारणभूताप्रकृतिस्तमश्शब्दार्थः । अप्राकृतस्वासाधारणरमणीयरूपमित्यर्थः । एवम्भूतं भक्त्या युक्तो योगबलेन चैव यस्माद्भक्त्या युक्तः । **तस्माद्योगबलेन** - बलिष्टेन योगेन आरूढसंस्कारं योगेन हेतुना अचलेन निश्चलेन मनसा भ्रुवोर्मध्ये प्राणमावेश्य निश्चलतयावस्थाप्य सम्यक् **प्रयाणकाले** शरीरावसानसमये यः स्मरेत् स तंदिव्यं पुरुषमुपैति । तत्समानैश्वर्यो भवति इत्यर्थः । एतेन अन्तिमकालस्मर्तव्यतया निर्दिष्ट एव प्रागपि ध्येय इत्युक्तम् भवति । अत्र **कविम्** इत्यादि श्लोकेऽनुसंहिताः सर्वज्ञत्वादयो गुणा अपि ऐश्वर्यार्थिनामनुसन्धेया इति दर्शितम् । अथ कैवल्यार्थिनाम् उपासनाप्रकारम् अन्तिमप्रत्ययप्रकारं च आह -

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये ।। ११ ।।

वेदविदो - वेदार्थविदः । यस्तु समपादा पठति न असौ वेद इत्युच्यते । अर्थाभिज्ञ एव खलु वेद इत्युच्यत इति हि उक्तम् । अस्थूलमनण्वह्रस्वम् इत्यादि वेदार्थविद इत्यर्थः । **यदक्षरं वदन्ति** त एव वदन्ति इत्यर्थः । 'नावेदविन्मनुते तं बृहन्तम् इत्युक्तेः' इति भावः । **वीतरागाः** - निरस्तसमस्त मनः कालुष्याः **यतयः यदक्षरं विशन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति** । अत्रापि यतय एव कर्तारः । **यदिच्छन्तः** - यदक्षरं प्राप्तुमिच्छन्तः **ब्रह्मचर्य**मूर्ध्वरेतस्त्वं **चरन्ति तत्पदं** पद्यते गम्यत इति पदं तत्प्राप्यम् अक्षरमित्यर्थः । **ते** तुभ्यं **सङ्ग्रेहेण** सङ्क्षेपेण **प्रवक्ष्ये** यथोपास्यं तथा वक्ष्यामि । अत्र अक्षररूपपरमात्मभूतमत्स्वरूपोपासनमक्षररूपजीवात्मप्राप्तिफलकमिति भावः । तदेव आह -

सर्वद्वाराणि संयम्य मनो हृदि निरुद्ध्य च ।
मूर्ध्न्याधायात्मनः प्राणम् आस्थितो योगधारणाम् ।। १२ ।।

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ।। १३ ।।

सर्वद्वाराणि - ज्ञानद्वारभूतानि श्रोत्रादीनि इन्द्रियाणि **संयम्य** शब्दादि विषयौन्मुख्यंयथा न भवेत् तथा निवर्त्यमनो **हृदि निरुध्य च ।** हृच्छब्दोऽत्र हृत्कमलनिविष्टाक्षरपरः हृदयकमलनिविष्टे अक्षरे मयि मनो निरुध्येत इत्यर्थः । **योगधारणम्** आस्थितः योगाख्यां धारणामास्थितः प्रत्याहारानन्तरभाविधारणपरत्वव्युदासाय योगशब्दः । ततश्च **योगधारणम्** इत्यस्य निश्चलां स्थितिम् इत्यर्थः । **आस्थितः -** आश्रितः । **ओमित्येकाक्षरं** प्रणवं **ब्रह्म** ब्रह्मप्रतिपादकत्वात् ब्रह्मेति व्यपदेशः; प्रणवस्य ब्रह्मप्रतिपादकत्वं च 'तस्य वाचकः प्रणवं' इति योगसूत्रसिद्धम्' **व्याहरन् -** उच्चरन् मामनुस्मरन् 'ओमित्येवं ध्यायतात्मानं त्रिमात्रेण ओमित्यनेनैव अक्षरेण परमपुरुषम् अभिध्यायीत' इत्युक्तम् । तस्य योगाङ्गत्वमपि व्याहरन्नित्यनेन सूचितम् । मन्त्रस्य अनुष्ठेयार्थ प्रकाशनमुखेन उपकारकत्वं मन्त्रमुच्चारयन्नेव मन्त्रार्थं मनसा स्मरन् इति शास्त्रतात्पर्यं च सूचितम् ।

'देवतायाः परायाष्टाह्यालम्बः प्रणवस्मृतः ।
अदृष्टविग्रहो देवो भावग्राह्यो निरामयः ।
तस्योङ्कारस्मृतं नाम तेनाहुतः प्रसीदति ।।
तस्मादोमिति पूर्वं तं कृत्वा युञ्जीत तत्परः' ।। इत्यादिकं ग्राह्यम् ।

आत्मनः प्राणं मूर्ध्न्याधायमूर्धन्यनाड्यां प्राणमावेश्यदेहं **त्यजन् यः प्रयाति परमीं गतिं याति** प्रकृतिविविक्तः मत्समानाकारम् आत्मानं प्राप्नोति इत्यर्थः । **परमगति** शब्देन प्रकृतिविविक्तात्मस्वरूपं 'यत्सर्वेषु भूतेषु' इति श्लोके निर्दिष्टम् । इत्थम् ऐश्वर्यार्थिनः । कैवल्यार्थिनश्च स्वप्राप्यानुगुणो भगवदुपासनप्रकार उक्तः । अथ ज्ञानिनो भगवदुपासनप्रकारं प्राप्तिप्रकारं च आह -

अनन्यचेतास्सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ।। १४ ।।

अन्यस्मिन् मद्व्यतिरिक्ते विषये चेतो यस्य नास्ति स तथोक्तः । **यस्सततं** सर्वकालम् उद्योगप्रभृतिसर्वेषु कालेषु **नित्यशः -** आत्मानुभवादिफलान्तरव्यवधाननैरपेक्ष्येण **मां स्मरति । अनन्यचेता** इत्यनेन विगलितवेद्यान्तरत्वलाभात्स्मृतेः भक्तिरूपत्वं व्यञ्जितम् । **नित्ययुक्तस्य** मयि नित्ययोगं काङ्क्षमाणस्य **योगिनः** अहं **सुलभः** अकृच्छ्रेण प्राप्य इत्यर्थः । 'ईषद्दुस्सुषुकृच्छ्राकृच्छ्रार्थेषु खलु' इत्यनुशासनं भगवत्प्राप्तेः । फलान्तरेभ्यो अतिशयितत्वात् प्राप्तौ प्रयासातिरेक संभावना व्यवच्छेदाय सुलभ इत्युक्तम् । इत्थं ऐश्वर्यादीनां कैवल्यार्थिनां ज्ञानिनां च केचन वेद्योपायभेदाः प्रतिपादिताः । अतः परमधिकारोपयिकतया पश्य साध्यस्य फलस्य स्थिरास्थिरत्वलक्षणविशेषं दर्शयति -

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाऽऽप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ।। १५ ।।

निरुपाधिकनिर्देशात् दुःखशब्दोऽसङ्कुचितदुःखपरः । ततश्च **दुःखालयं** सर्वेषां दुःखानाम् आश्रयम् **अशाश्वतम् -** अस्थिरम् । **जन्म -** जन्मशब्दो जनिमच्छरीरपरः । एतादृशं शरीरं **न आप्नुवन्ति ।**

तत्र हेतुगर्भं विशेषणमाह - **महात्मानः महामनसः,** यथावस्थितमत्स्वरूपज्ञानायतनाः इत्यर्थः । **परमां -** सर्वोत्तमां **संसिद्धिं गताः** परमपुरुषार्थरूपं मामेव प्राप्ता इत्यर्थः । स्वप्राप्तौ **पुनर्जन्म** निषेध उक्तः । स च प्रसक्तिसापेक्षः । प्रसक्तिश्चासन्नवर्तिनाम् ऐश्वर्यार्थिनामेव इति तेषां पुनर्जन्मनि स्वप्राप्तानां च तदभावे च हेतुमाह -

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।। १६ ।।

आङ् अत्र अभिविधौ ब्रह्मशब्दश्चतुर्मुखपरः । **आ ब्रह्म भवनात्** ब्रह्म भवनमभिव्याप्य स्थिताः लोकाः सर्वे ब्रह्माण्डान्तर्वर्तिनो **लोकाः पुनरावर्तिनः** विनाशिनः प्रकृत्याख्य पुनरावर्तिनः विनाशिनः प्रकृत्याख्या भगवन्मायामहोदधौ । ब्रह्माण्डानामपि बुद्बुदायितत्वेन तदन्तर्गतानां विनाशित्वं कैमुत्यसिद्धमिति बोधनाय आब्रह्मभवुनादित्युक्तम् । **मामुपेत्य तु -** मां प्राप्यतु । ऐश्वर्यार्थिप्राप्यलोकवदनित्यत्वाभावेन पुनरावृत्तिप्रसङ्गो नास्ति इति बोधनाय तु शब्दः **पुनर्जन्म न विद्यते ।** प्राप्यस्य स्थिरत्वादिति भावः । **अर्जुन कौन्तेय** इति संबुद्धिद्वयं विद्याभिजनाभ्यां विशुद्धत्वज्ञापनाय अथ ब्रह्मलोकपर्यन्तानां तदन्तर्वर्तिनां लोकानां भगवत्सङ्कल्पकृताम् **उत्पत्ति -** विनाशकालव्यवस्थामाह -

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ।। १७ ।।

अत्र **ते** इत्यस्य प्रतिसम्बन्धित्वेन य इत्यध्याहार्यं ततश्च **ये अहोरात्रविदो** जनाः **ते ब्रह्मणः** चतुर्मुखस्य **सहस्रयुगपर्यन्तं** युगसहस्रावधिकं यदहः तत् अहः युगसहस्रमेव अन्तो यस्याः तां **रात्रिं च विदुः ।** उक्तं च एवमेवमानवेद्येयुग सहस्रं तु ब्राह्मं पुण्यमहर्विदुः । 'रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः' इति । सहस्रयुगानि पर्यन्तं यस्य तत्सहस्रयुगपर्यन्तमिति विग्रहः । युगशब्दश्चतुर्युग परः । तेन चतुर्युगसहस्राणि

ब्रह्मणो दिवमुच्यत इत्यनेन विरोधः । अस्त्वैवं चतुर्मुखस्याहोरात्र व्यवस्था ततः किं प्रस्तुतस्य इत्यत्राह -

अव्यक्ताद्व्यक्तयस्सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञिके ।। १८ ।।

अत्र व्यक्तिशब्दो न महदादिपरः, चतुर्मुखात्प्रागेव तदुत्पत्तेः अतः चतुर्मुख सृज्यविषयः । तत्रापि सत्यलोकस्य प्रतिकल्पं सृष्ट्यभावात् त्रैलोक्यान्तर्वर्ति वस्तुमात्रविषयः, तेषां च उत्पत्तिब्रह्मशरीरादेव ततश्चाव्यक्तशब्दोऽपि न मूलाद्व्यक्तविषयः; अपि तु **व्यक्त** शब्दार्थोपादानचतुर्मुखशरीरविषयः शरीरस्य च अव्यक्तशब्दवाच्यत्वं 'सूक्ष्मं तु तदर्हत्वात्' इति सूत्रे व्यक्तम् । तथा च **अव्यक्ता**च्चतुर्मुखशरीरा**द्व्यक्तयः** त्रैलोक्यान्तर्गताः भोग्यभोगस्थानभूताः व्यक्तयो ब्रह्मणोह**रागमेप्रभवन्ति** । उत्पद्यन्ते रात्र्यागमे तस्यैव ब्राह्मणो **रात्र्यागमे** अव्यक्तसंज्ञिते । **तत्रैव** ब्रह्मशरीर एव प्रलीयन्ते - लीना भवन्ति । उक्तस्यार्थस्य सर्वष्वपि कालेष्वभिव्याप्तम् । यथा पूर्वकल्पनं च आह -

भूतग्रामस्स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ।। १९ ।।

भूतशब्दो अत्र अचिद्विशिष्टक्षेत्रज्ञपरः । तेषां **ग्रामः** - सङ्घः स एवायम् इत्यनेन पूर्वकल्पावसाने योलीनः स एव इत्यर्थः । एतेन अकृताभ्यागमकृतविप्रणाशादिदोषः परिहृतः अन्यत्स्पष्टम् ।

यद्वा स एवायं **भूतग्रामः** - पूर्वसृष्टिस्थित एव भूतग्रामः पृथिव्यादिभूतसङ्घातः । **अहरागमे भूत्वा भूत्वा** ब्रह्मणः प्रथमेऽहनि **भूत्वा रात्र्या**गमे ब्रह्मणोऽन्तिम रात्र्यागमे **प्रलीयते** पुनश्चाहरागमे प्रभवति । कथं भूतः **अवशः** - सृज्यत्वसंहार्यत्व हेतुकर्मभिः अवशस्सन् इत्यर्थः । अस्मिन्पक्षे **प्रभवति** इत्यत्र मयि इति योज्यम् । मद्व्यतिरिक्तानां सर्वेषाम् इत्थमुत्पत्तिविनाशयोः सत्वात् मम तदभावाच्च । ऐश्वर्यगतिं प्राप्तानां पुनरावृत्तिर्मां प्राप्तानान्त्वपुनरावृत्तिः इति हृदयम् । अथ कैवल्यं प्राप्तानां पुनरावृत्यभावमाह -

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ।। २० ।।

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ।। २१ ।।

अव्यक्तो न व्यक्तादिति भेदः । **तस्मात्** अव्यक्तात् उत्पत्तिविनाशशालित्वेन पूर्वप्रस्तुतात् अव्यक्तादचेतनप्रकृतिरूपात्परः पुरुषार्थतया प्रकृष्टः अतश्चेतनतया विसजातीयः भावः पदार्थः सत्ताविनाभावाद्भाव इत्युक्तिः । **अव्यक्तः** - स्वासाधारणाकारेण स्वव्यतिरिक्तैः कश्चिदपि दुर्ग्रहः **सनातनः** - नित्यः । अत एव **सर्वेषु** सकारणेषु सकार्येषु **भूतेषु** वियदादि महाभूतेषु नश्यत्स्वपि **न विनश्यति** । तिलेषु दह्यमानेषु तदनुप्रविष्टतैलं यथा नश्यति तथा स्वयं तदनुप्रविष्टोऽपि न नश्यति इत्यर्थः । **अव्यक्त अक्षर इत्युक्तः** । ये तु अक्षरमनिर्देश्यम् अव्यक्तमित्युक्तः । **यः** प्रकृतिविमुक्तो विशुद्धात्मा **तं** परिशुद्धमात्मानं **परमां गतिमाहुः** - यः प्रयाति इत्यादिना इति शेषः । **यं** - परिशुद्धात्मानं **प्राप्य न निवर्तन्ते** पुनरावृत्तिं न यान्ति **तद्धाम परमं मम** तत् एवंरूपेण अवस्थितं मुक्तात्मस्वरूपं **मम** - **मत्सम्बन्धि परमं धाम** - सर्वोत्कृष्टं नियमनस्थानं 'यः पृथिव्यां तिष्ठन्' इत्याद्युक्ताचिद्रूपनियमनस्थानात् 'य आत्मनि तिष्ठन्' इत्याद्युक्ताचित्संसृष्टचिद्रूपनियमन-स्थानादुत्कृष्टं नियमनस्थानमित्यर्थः । तच्च अपुनरावृत्तिरूपमिति भावः ।

यद्वा धाम तेजः **परमं** प्रकृतिसंसृष्टात् परिभिन्नप्रकाशादुत्कृष्टं **तत्** परिशुद्धात्मस्वरूपं **धाम मम** मच्छेषभूतमित्यर्थः । 'अपरेयम् इतस्त्वन्याम्' इत्यत्र जीवसामान्यस्य शेषत्वमुक्तम् । अत्र मुक्तजीवस्य इति न पौनरुक्त्यम् । अथ ज्ञानिनः प्राप्यं तस्मात् अत्यन्तविलक्षणमित्याह -

पुरुषस्स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तस्स्थानि भूतानि येन सर्वमिदं ततम् ।। २२ ।।

यस्य अन्तस्स्थानि भूतानि 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' मामेभ्यः परम् इत्युक्तस्वभावस्य यस्य **भूतान्यन्तस्थानि** येन पुरुषेण च इदं सर्वं ततं व्याप्तं पूर्णम् इत्यर्थः । तथा च श्रुतिः - 'तेनेदं पूर्णं पुरुषेण सर्वम्' इति स **परःपुरुषः** 'यस्मात्परं नापरमस्ति किञ्चिदि'त्युक्तः परमपुरुषः अनन्ययाविषयान्तरसम्बन्धरहितया **भक्त्या लभ्यः** पूर्णत्वात्पुरुषमित्युक्त महिमशालिनः स्वस्य प्राप्यत्ववचनात् ज्ञानिनां निरतिशयपुरुषार्थलाभ उक्तो **भवति** । **अथ** आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणम् अर्चिरादिकां गतिमाह -

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ।। २३ ।।

महावंशजप्रवरस्य अनुसन्धानार्थमिदम् अवश्यं ज्ञातव्यमिति **सम्बोधनस्य** भावः ।

अग्निर्ज्योतिरहशुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ।। २४ ।।

आग्निर्ज्योतिः - अग्निरूपज्योतिः इत्यर्थः । तेन देवयानप्रथमपर्वस्थ अर्चिर्विवक्षा **अहः** - दिनं **शुक्लः** - शुक्लपक्षः **षण्मासा उत्तरायणम्** - उत्तरायणात्मकाष्षण्मासा इत्यर्थः । एतत्संवत्सरादीनां प्रदर्शकं तेन च आतिवाहिकास्सर्वे सङ्गृहीताः पूर्वैः -

'अर्चिरहस्सित पक्षानुदगयनाब्दान्मरुद्दिनेन्दून् ।
अपि वैद्युतवरुणेन्द्रप्रजापतीनातिवाहिकानाहुः' ।। इति ।

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ।। २५ ।।

धूमरात्रि शब्दौ प्रसिद्धौ । **कृष्णः** - कृष्णपक्षः **षण्मासा दक्षिणायनम्** पूर्ववदर्थः । अत्रापि अनुक्ताः पितृलोकाकाशचन्द्रादयो ग्राह्याः । **तत्र** - तस्मिन्मार्गे **योगी** पुण्यकर्मा **चान्द्रमसं ज्योतिः** - **प्राप्य निवर्तते** - पुनः निवर्तत इत्यर्थः ।

शुक्लकृष्णे गती ह्येते जगतश्शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः ।। २६ ।।

शुक्लकृष्णे - विशुद्धाविशुद्धे अभिगन्तव्यत्वानभिगन्तव्यत्वद्योतनाय शुक्लकृष्णा-शब्दाभ्यां निर्देशः । **एते गती** - गम्यते नयेति व्युत्पत्या गतिशब्दो मार्गपरः । गमन हेतुमार्गो इत्यर्थः । **जगतः** - अधिकृतवर्गद्वयस्य ज्ञानिनां विविधपुण्यकर्मिणां च इत्यर्थः । **शाश्वते** - प्रवाहरूपेणानुवृत्ते **मते** - अभिमते हि प्रसिद्धौ 'तद्य इत्थं विदुर्ये चेमेऽरण्ये' 'अथ य इमे ग्रामे इष्टापूर्ते' इत्यादिषु श्रुतिषु प्रसिद्धे इति भावः । **एकया** - अर्चिरादिकया गत्या **अनावृत्तिं याति अन्यया** धूमादिकया पुनरावर्तते ।

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ।। २७ ।।

एते सृती - एतौ मार्गौ वर्तन्येकपदी **सृतिः** इत्युक्ततया सूक्ष्मरूपतया बोधनाय सृतिशब्दः **जानन्** - विदन् कश्चन कोऽपि **योगी न मुह्यति** - गमनाय वैय्याकुलीं न गच्छति इत्यर्थः । मार्गपरिज्ञानं गन्तुः अव्याकुलगमनाय उपकरोति इति लोकसिद्धम् इति भावः । 'तत्प्रकाशितद्वारा' इत्युक्त प्रकारेण स्पष्टमार्गो भवति इति हृदयम् । यद्यपि **योगिनो** मार्गद्वयज्ञानं न आवश्यकं, तथापि परित्यागार्थं हेयमार्गोऽपि ज्ञेय एवेति हृदयम् । **सृति** ज्ञानस्य फलमाह - **तस्मादिति** । उक्ताद्धेतोः इत्यर्थः । **सर्वेषु कालेषु** उपासनानुष्ठान-समयेषु **अहरहर्योग युक्तो भव** । अर्चिरादिगतिचिन्तनाख्ययोगयुक्तो भव । अध्याय द्वयोक्त शास्त्रार्थवेदन फलमाह -

वेदेषु यज्ञेषु तपस्सु चैव दाने च यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ।। २८ ।।

वेदेषु - ऋग्यजुस्सामाथर्वणेषु अभ्यस्तेष्विति शेषः । **यज्ञेषु** - अग्निष्टोमादिषु अनुष्ठितेषु इति शेषः । **तपस्सु** - चान्द्रायणादिषु निर्विघ्नमाचार्स्तेष्विति शेषः **दानेषु** - कृतेषु इति शेषः । चकारादनुक्ततीर्थयात्रादिसंग्रहः **यत्पुण्यफलम्** अतिशयितं फलं **प्रदिष्टम्** - निर्दिष्टम् । **तत्सर्वं फलम् इदं** विदित्वासप्तमारम्भप्रभृत्युक्तं **विदित्वा अत्येति** - अतिक्रान्तो भवति । **तत्सर्वं फलं** तृणवन्मन्यत इत्यर्थः । **योगी** - योगी सन् - ज्ञानीभूत्वा अक्षरं 'तदक्षरे परमे व्योमन्' 'दिव्यं स्थानमजरं च अप्रमेयम्' इत्याद्युक्तमहिमशालि आद्यमनादिं **स्थानं** श्रीवैकुण्ठम् उपैति - प्राप्नोति ।।

।। श्रीशैलबुक्कपट्टण येन्नाच्चान् दास विलिखितेऽध्यायः अष्टमकः
श्री गीताभाष्यरहस्यार्थसंग्रहो वृत्तः ।।

नवमाध्यायः

[राजविद्याराजगुह्ययोगः]

इत्थम् उपासकभेदनिबन्धनानि ज्ञातव्योपादेयभेदाः प्रदर्शिताः ।

इदानीम् उपास्य परमपुरुषमाहात्म्यं ज्ञानिनां विशेषं विशोध्य भक्तिरूपस्य उपासनस्य स्वरूपमुच्यते । **श्रीभगवानुवाच** इति । स्वविषयभक्तिस्वरूपं विशदयन् भगवानुवाच इत्यर्थः ।

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ।। १ ।।

इदं वक्ष्यमाणं बुद्धिस्थतया इदमिति निर्देशः । 'एष तु वा अतिवदति' इत्यत्र प्राणातिवाद्यपेक्षया सत्यातिवादिनोऽतिशयद्योतनवत्कर्मयोग-ज्ञानयोगाभ्याम् आधिक्यद्योतनाय **तु** शब्दः; **गुह्यतमं** - रहस्यतमम् । एतेन इतरयोः गुह्यत्वं **गुह्यतरत्वम्** च ज्ञापितम् शुश्रूषातिशयोत्थापनद्योतनार्थं गोपनाधिक्यशिक्षणार्थं च एतत् **विज्ञानसहितम्** - उपासनगत प्रकारविशेषसहितं **ज्ञानम्** - उपासनाख्यज्ञानम् **अनसूयवे** - गुणेषु दोषाविष्करणचित्तवृत्ति-विशेषो-सूयातद्विपर्ययोऽनसूया ते गुणेषु गुणाध्यवसायपराय इत्यर्थः । **प्रवक्ष्यामि** - कृत्स्नं लघुव्यक्तं च वक्ष्यामि इत्यर्थः । यज्ज्ञात्वा यज्ज्ञानम् अनुष्ठानपर्यन्तं ज्ञात्वा यद्वा यदुपासनं ज्ञात्वा स प्रकारं विदित्वा अनुष्ठाय इति शेषः । **अशुभात्** - भक्त्युत्पत्तिविरोधिनः पुण्यापुण्यरूपात्कर्मणः **मोक्ष्यसे** - मुक्तो भविष्यसि ।

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ।। २ ।।

विद्यानां राजा राजदन्तादित्वात् राजशब्दस्य पूर्वनिपातः विद्यासु श्रेष्ठं इत्यर्थः ।

यद्वा राजभूता विद्यापूर्ववदर्थः । **राजगुह्यम्** - रहस्यानाम् अतिशयितरहस्यम् इत्यर्थः । **इदम्** उपासनात्मकं **ज्ञानम् उत्तमम्** - पवित्रम्, निरतिशयमुपायविरोधिपाप-निवर्तकमित्यर्थः । कतिपय तन्निवर्तकतीर्थसेवादिव्यावृत्तये उत्तममित्युक्तं **प्रत्यक्षावगमम्** - अवगम्यते इत्यवगमः - विषयः **प्रत्यक्षः** - प्रत्यक्षभूतोऽवगमो यस्य तत् तथोक्तम्, 'भक्तिरूपेण उपासनेन उपास्योऽहम् उपासितुः । प्रत्यक्षताम् उपगतो भविष्यामि' इत्यर्थः । **धर्म्यम्** - धर्मादनपेतम् धर्मपथ्यर्थन्यायात् अनपेत इति स्मृतिः । धर्मत्वं च अलौकिकश्रेयस्साधनत्वं,

यद्यपि भक्तिरूपतया स्वरूपेण । अत्यर्थः प्रियतया च तदानीमेव मत्साक्षात्कारापादकतया च तज्ज्ञानं, स्वत एव पुरुषार्थः । तस्य धर्मादनपेतत्वं पुरुषार्थसाधनत्वरूपं न वक्तव्यम् । तथापि निरतिशय निःश्रेयसमत्प्राप्तिसाधनमपि इति बोधनाय तथोक्तिः । स्वरूपतः साध्यतश्च पुरुषार्थरूपमिति भावः । **कर्तुं सुसुखम् -** करणे नित्यं सुखरूपमित्यर्थः । स्वरूपतो विषयतश्च अत्यर्थानुकूलत्वात् सुखेन अनुष्ठेयमित्यर्थः । **अव्ययम् -** फलविनाश्यं हि सर्वमन्यत्कर्म । इदं तु फलेनापि न क्षीयत इत्यर्थः । अपवर्गरूपफलमप्येतस्य नालम् इति भावः। एवंरूपोपासनानुष्ठानाभावे मोक्षो न सिद्ध्यति इत्याह -

अश्रद्दधानां पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ।। ३ ।।

अस्य पूर्वोक्त सर्वप्रकारविशिष्टस्य **धर्मस्य** उपासनात्मकस्य अलौकिकश्रेयस्साधनस्य षष्ठी सम्बन्धसामान्ये । तथा च तदुपासनयोग्यतावन्तोऽपि इत्यर्थः । **अश्रद्दधाना -** विश्वासपूर्वकत्वराहिताः, **माम् प्राप्य** उपासनेन **माम्** अननुभूय वावेति वार्थः । **मृत्युसंसारवर्त्मनि -** मृत्युवद्बाधकस्वरूपे संसारवर्त्मनि इत्यर्थः ।

यद्वा मरणगर्भत्वात् मृत्युरूपता **निवर्तन्ते -** नितरां वर्तन्ते तस्मादिति प्रतिसम्बन्धिनिर्देशाभावाद्वर्त्मनि इत्यधिकरणसप्तम्या आधेयसाकाङ्क्षत्वात् उपसर्गाणाम् अनेकार्थत्वाच्च, न प्रतिनिवृत्तिः इत्यर्थः । किन्तु उक्त एवार्थ इति । एतादृश श्रद्धाहेतवोऽन्तश्शत्रवः त्वया निराकार्या इति बोधनाय परन्तप इति सम्बोधनम् । इत्थं प्रापकस्य ज्ञानस्य माहात्म्यमुक्त्वा तत्स्थिरीकरणाय प्राप्यस्य स्वस्य माहात्म्यमाह -

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।। ४ ।।

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ।। ५ ।।

इदं प्रमाणचित्रवैचित्र्यं जगत्, चेतनाचेतनात्मकं कृत्स्नं जगत् **अव्यक्तमूर्तिना-** मूर्तिशब्दः स्वरूपपरः अप्रकाशितस्वरूपेण **मया** 'अन्तर्यामिणायं पृथिवी न वेद यमात्मा न वेद' इति श्रुत्युक्तरीत्या चेतनाविदितस्वरूपेण अन्तर्यामिणा मया इत्यर्थः । **ततम् -** व्याप्तं **मस्थानि सर्वभूतानि** तत एव सर्वभूतान्यपि मत्स्थानि मदधीनधारणानि

मदायत्तस्थितिनियमनानि इति यावत् । **अहं तेषु** भूतेषु **न च अवस्थितः** अन्तर्यामित्वेन **तेषु** - विद्यमानत्वेऽपि तदायत्तस्थितिको न भवामि इत्यर्थः । मदवस्थितौ तैः न कश्चिदुपकार इति भावः । एतद्योतनायैव अवेत्युपसर्गं **मत्स्थानि सर्वभूतानि** इत्यत्र यादृशीमन्निरूपितास्थितिर्भूतानां न च अहम् इत्यत्र तादृश्यावस्थितिः निषिध्यत इति हृदयम् । तद्व्यञ्जयितुमेव **न च मत्स्थानि** इति **भूतानि,** न च मत्स्थानि घटजलादिकमिव न मयि स्थितानि किन्तु शरीरिणा शरीरमेव सङ्कल्पेन धृतानीति भावः । तथा च मत्स्थानि सर्वभूतानि इत्यत्र सङ्कल्पादीनधारकत्वमुक्तम् । न च मत्स्थानीत्यत्र स्वतन्त्र धारकत्वं निषिध्यत इति न उक्तविरोधः । **मे** - मम **ऐश्वरम्** - ईश्वरस्य ममैवासाधारणं योगं सन्नहनं युज्यमानस्वभावमित्यर्थः । **पश्य** - अत्याश्चर्यकरम् इति भावः । तमेव योगमाह - **भूतभृदिति ।** औचित्यादहमिति विशेष्यमूह्यम् । सर्वेषां **भूतानां** भर्ताऽहं न च भूतस्थः, न च तैः कश्चन ममोपकारः ममात्मा भूतभावनः । अत्र **आत्मशब्देन** मनोवाचिना तत्कार्यसङ्कल्प उच्यते । 'तदसदेव सन्मनो कुरुत स्यामि'ति **मनश्शब्देन** सङ्कल्पस्य उक्तत्वात् । तथा च मम **आत्मा** मदीयः सङ्कल्पः **भूतभावनः** - भूतानां भावयिता धारयिता नियन्ता च । सर्वस्यास्य स्वसंकल्पायत्तस्थितिप्रवृत्तित्वे निदर्शनमाह -

यथाऽऽकाशस्थितो नित्यं वायुस्सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ।। ६ ।।

आकाशे - निरालम्बनप्रदेशे **स्थितो** - महान् **वायुः सर्वत्रगः** - सर्वदेशसञ्चारी **यथा** - येन प्रकारेण मत्सङ्कल्पायत्त स्थिति प्रवृत्तिः निरालम्बे विहायसि **स्थितानां** विहन्नानान् तत्र स्थितेः अन्यत्र सञ्चारस्य च अधिष्ठानभूतचेतनाधीनत्वस्य दृष्टत्वात् इति भावः । **वायोः** - भगवत्सङ्कल्पाधीनस्थितिप्रवृत्तिबोधनायैव महान् इत्युक्तं, **तथा** - तेन प्रकारेण **मत्स्थानीति** मत्सङ्कल्पायत्तस्थिति प्रवृत्तीनि **इत्युपधारयेति** । स्थितिप्रवृत्योः इव सृष्टिप्रलययोः अपि सङ्कल्पाधीनत्वमाह -

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ।। ७ ।।

सर्वभूतानि - स्थावरजङ्गमात्मकानि, सर्वाणि भूतानि, **मामिकाम्** - मदीयां **प्रकृतिं** - गुणसाम्यावस्थां तमश्शब्दितां **प्रकृतिं** प्रकृत्यास्तु भगवतीयत्वं 'यस्य मृत्युः शरीरम्' इत्यादि श्रुतिसिद्धम् । **यान्ति** - यापयामि इत्यर्थः । **तानि** कल्पादौ **विसृजामि**

इत्यनन्तरवाक्यानुसारात् । कदा **कल्पक्षये** - अन्तिमब्रह्मदिवसावसानसमये **पुनस्तानि** संहृतानि; तत्सजातीयानि इत्यर्थः । **कल्पादौ** - सृष्टिसमये **विसृजामि** - विविधं सृजामि । यथा कुन्तीशरीरात् तव उत्पत्तिः त्वयाऽनुपलब्धाऽपि आप्तवाक्यात् दृढप्रतिपन्ना । तथा मच्छरीरात्प्रपञ्चोत्पत्तिं ममैव वाक्यात् अभ्युपगच्छेति तात्पर्येण **कौन्तेय** इत्युक्तिः । अथ **विसृजामि** इत्युक्तायाः समष्टिव्यष्टिरूपायाः सृष्टेः प्रकारमाह -

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ।। ८ ।।

स्वाम् - स्वकीयां **प्रकृतिम्** - परिणामिनीं गुणमयीं प्रकृतिम् अधिष्ठाय उपादानद्रव्यस्य कर्त्रवष्टम्भो ह्यधिष्ठानम् अभिमतकार्यविशेषानुगुणमध्यमावस्थां प्रापय्येत्यर्थः । **विसृजामि** - विविधतया सृजामि **भूमिरापः** इत्यादि प्रागुक्तप्रकारेण अष्टधा परिणमय्य सृजामीत्यर्थः । इत्थं समष्टिव्यष्टिम् उक्त्वा व्यष्टिसृष्टिमाह - **पुनः पुनरिति । इमं** प्रतिपन्नं देवमनुष्यतिर्यकस्थावरात्मना चतुर्विधं **कृत्स्नं** सावान्तरभेदं **भूतग्रामं** व्यष्टिचित्सोमप्रकृतेः मदीयायाः गुणमय्या मोहिन्याः प्रकृतेः वशादवशम्, यथा परवशं भवति, तथा पुनः पुनः तत्तदुत्पत्युचित द्विपरार्धसहस्रयुगप्रतिनियतानाद्यनन्तकालावच्छेदरूपेषु **विसृजामि** - विविधं सृजामि । विचित्रनामरूपदेशकालभोगादियुक्तं करोमि इत्यर्थः । एवं तर्हि सृज्यदेवादिवैषम्येण विषमाणि सृष्टिकर्माणि नैर्घृण्यापादनेन भवन्तम् निबध्यन्तीत्यत आह -

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ।। ९ ।।

चकार आशङ्काव्यावृत्यर्थः । **तानि** - सृष्ट्यादीनि **कर्माणि मां निबध्नन्ति** मयि नैर्घृण्यं न आपदयन्ति इत्यर्थः । कुत इत्यत्राह - **उदासीनवत्** इति शेषः । **कर्मसु** असक्तं **तेषु** सृष्ट्यादिकर्मसु वैषम्ये **असक्तं** प्रयोजकत्वरूपसम्बन्धरहितं तत्र दृष्टान्तः **उदासीनवदासीनमिति** । यथा कश्चित् किञ्चित्कर्मण्युदासीनः तत्र प्रयोजकत्वरूपसम्बन्धरहितः । तथा कर्तव्येऽस्मिन्नंशे उदासीन इति अयं भावः । क्षेत्रज्ञानां पूर्वपूर्वजन्मकृतान्येव कर्माणि वैषम्यहेतवः । अहं तु वैषम्य उदासीन इति । कर्मभिः भाविताः पूर्वैः - 'वाचिकैः पक्षिमृगतां मनसैरन्त्यजातिताम् । शरीरजैः कर्मदोषैर्यातिस्थावरतां नरः' इत्यादिकामिह भाव्यम् । यदि कर्मानुगुणा विषमसृष्टिः, तर्हि प्रकृतिरेव परिणामशीला । तथा परिणमतां, किन्त्वया इत्यत आह -

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनाऽनेन कौन्तेय जगद्धि परिवर्तते ।। १० ।।

मया - सत्यसङ्कल्पेन, **अध्यक्षेण** - अध्यक्षभूतेन 'कर्माध्यक्षः सर्वभूताधिवासः' 'योऽस्याध्यक्षः' इत्युक्तेन ईक्षितेति शेषः । 'अध्यासिता तेन' इति श्रुतेः **प्रकृतिः** मदीया प्रकृतिः पूर्वार्धे जगच्छब्दः उत्तरार्धे चराचरशब्दश्च अन्वेतव्यः । तथा च **सचराचरं जगत्सूयते अनेन** क्षेत्रज्ञ कर्मानुगुणसङ्कल्पात्मकेन मदीक्षणरूपेण **हेतुना** सचराचरं **जगद्धिपरिवर्तते** परस्पर विषमतया प्रवर्तत इत्यर्थः । अथ महात्मनां विशेषं वक्तुं मूढानां स्वभावमाह -

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ।। ११ ।।

मामित्यस्य विशेषणं **भूतमहेश्वर**मिति । **भूतानां** महान्तमीश्वरं सर्वज्ञत्व-सत्यसङ्कल्पत्वादिना नियन्तारं **मानुषीं** - मनुष्यसम्बन्धिनीं मनुष्यकञ्चुकिताम् इत्यर्थः । **तनुम्** शरीरम् **आश्रितं** कृतवन्तं सर्वसमाश्रयणीयत्वाय कारुण्यात् मनुष्यतनु सजातीयसन्निवेशवतीं वस्तुतः ततो विलक्षणं तनुं स्वेच्छया परिगृहीतवन्तमित्यर्थः । एवम्भूतं **मां** मम **परं** सर्वोत्कृष्टं **भावं** - स्वभावम् **अजानन्तः** अनेन अवमानकरणहेतुभ्रमे भेदाग्रहरूपं कारणं दर्शितम् **मूढाः** - स्वकृतैः कर्मभिः अयमपि कश्चिन्मनुष्य इति मोहं प्राप्ताः **अवजानन्ति** उत्कर्षापह्नवेन निकर्षापादनरूपाम् अवज्ञां कुर्वन्ति इत्यर्थः । अथ अवज्ञानस्य हेतुफले दर्शयति -

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ।। १२ ।।

राक्षसीं - रक्षस्सम्बन्धिनीं तामसीम् इत्यर्थः । **आसुरीम्** - असुरसम्बन्धिनीं **मोहिनीम्** - मत्स्वरूपतिरोधानकरीं **प्रकृतिं** - स्वभावं, **श्रिताः मोघाशाः** - मोघा निष्फला आशावाञ्छितं येषान्ते तथोक्ताः । **मोघकर्माणस्त** इति कर्मप्रवृत्तिः मोघं कर्म येषान्ते तथोक्ताः, उपक्रमप्रभृति निष्फलप्रवृत्तय इत्यर्थः । **मोघज्ञाना** ज्ञानस्य मोघत्वं स्वाधीनप्रभृत्यभिमतफलराहित्यम्, अस्वतन्त्रे स्वतन्त्रत्वम् अस्वकीये स्वकीयतेत्येवं सर्वत्र निष्फलविपरीतज्ञानाः इत्यर्थः । **विचेतसः** - चेतश्शब्दोऽयं चिन्ता साध्यज्ञानपरः । तथा च सर्वत्र विगतयाथार्थ्यज्ञाना इत्यर्थः भवन्ति इति शेषः । अत्रोत्तरार्धेन अवज्ञायाः कारणं पूर्वार्धेन फलमिति विवेकः, तर्हि अवज्ञा प्रवृत्तजनसङ्कुले अस्मिन् लोके निष्फलोऽवतार इत्याशङ्क्याह -

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ।। १३ ।।

आशङ्कानिवृत्यर्थः **तुशब्दः** **दैवीं** - देवसम्बन्धिनीं सात्त्विकीम् **प्रकृतिम् आश्रिताः** - जन्मान्तरार्जितैः सुकृतैः प्राप्ताः **महात्मानः** - मदाश्रयेण विध्वस्त समस्तपापबन्धतया महामनसः **भूतादिं** निखिलजगत्कारणमव्ययम् । नित्यं ज्ञात्वा सर्वेश्वरोऽपि साधुपरित्राणार्थं मनुष्याकृत्यावतीर्ण इति **ज्ञात्वा अनन्यमनसः** विषयान्तरानासक्तमनसः **भजन्ति** उपासते । इन्द्रसूनुत्वेन दैवप्रकृतित्वसूचनाय पार्थेति सम्बोधनम् ।

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ।। १४ ।।

भजमानास्ते भक्त्या स्वरनेत्राङ्गविक्रियालक्षणवत्या निरतिशयप्रीत्या **सततं** सदा कीर्तयन्तः कृष्णवासुदेव इत्यादिभिः नामभिः मामेव कीर्तयन्तः सततमित्युक्त्या रहसि जनसन्निधौ च कीर्तने व्रीडाराहित्यं व्यञ्जितम् । यतन्तः भक्तियोगासाधारणेषु प्रयत्नवन्तः । अत एव **दृढव्रताः** दृढसङ्कल्पाः महत्यामापदि सम्पदि च अन्याश्रयणमकुर्वाणाः **नमस्यन्तश्च** 'मनोबुद्ध्यभिमानेन सह अन्यस्य धरातले । कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम्' इत्युक्तप्रकारेण प्रणमन्तः नित्ययुक्ता नित्ययोगमाशंसमानाः **माम् उपासते ।** भजन्त्यनन्यमनस इत्यनन्यमनस्त्वेन विशेषितं भजनं **सतत**मिति श्लोकेन अन्तरङ्गैः कीर्तनादिभिः विशेषयित्वा पुनरप्याकारविशेषप्रदर्शनेन विशेषयति -

ज्ञानयज्ञेन चाप्यन्ये भजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ।। १५ ।।

चकारः पूर्वोक्तकीर्तनादि समुच्चयार्थः; **अपि अन्य** इत्यनेन अन्वितः **अन्ये**ऽपि पूर्णोपासकाः पूर्वोक्तैः कीर्तनादिभिः ज्ञानाख्येन **यज्ञेन** च **भजन्तः** - प्रीणयन्तः **मामुपासते** । कथं **बहुधा पृथक्त्वेन** समष्टिव्यष्टि तदेवान्तरभेदभिदुरजगदाकारेण **विश्वतोमुखं** - विश्वप्रकारमवस्थितम् । **माम् एकत्वेन** - एकत्वेन उपासत इति 'सूक्ष्मचिदचिद्विशिष्टो' भगवानेक एव 'बहु स्याम्' इति सङ्कल्प्य देव-मनुष्यादिविशिष्टजगद्रूपोऽवतिष्ठत इत्यनुसन्दधाना उपासत इति भावः । तदेव **विश्वतो मुखत्वम्** उपपादयति -

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ।। १६ ।।

पिताऽहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च ।। १७ ।।

गतिर्भर्ता प्रभुस्साक्षी निवासश्शरणं सुहृत् ।
प्रभवः प्रलयस्थानं निधानं बीजमव्ययम् ।। १८ ।।

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ।। १९ ।।

अहमेवाज्यम् इत्यत्र **हि** एवकारः सर्वत्र योज्यः । **अहं क्रतुः** ज्योतिष्टोमादि क्रतुरहमेव, **अहं यज्ञः** - देवयज्ञो, भूतयज्ञ इत्येवं पञ्चधा परिगणितो महायज्ञो अहमेव, **स्वधाऽहं** पितृगण तुष्टिदा स्वधा अहमेव, **अहमौषधम्** ओषधीविकारं **हविरहमेव, मन्त्रोऽहम**नुष्ठेयार्थ प्रकाशको **मन्त्रोऽहमेव, अहमेवाज्यं** सर्वहविरुपस्तरणाभिघारणार्थ-माज्यमहमेव अहमग्निर्गार्हपत्याहवनीयाद्यग्निः अहमेव **अहं हुतः, हुतम्** इति भावे क्तः होम इत्यर्थः । अग्निहोत्रादि होमोऽहमेव अस्य **जगतः** स्थावरजङ्गमात्मकस्य कृत्स्नस्य **जगतः अहं पिता माता** तत्र तत्र पितृत्वेन च वर्तमानोऽहमेव धाता मातृ-पितृव्यतिरिक्त उत्पादकश्चेतनविशेषोऽहमेव **पितामहः** तत्र तत्र तथा व्यवह्रियमाणोऽपि अहमेव **वेद्यं पवित्रं पवित्रम्** - पावनं पापशोधकं वेद्यं यत्किञ्चिद्वेद्यं तदहमेव । अर्थात् वेदवेद्योऽहमेव इत्यर्थः । **ओङ्कारः** - वेदबीजभूतः प्रणवोऽहमेव **ऋक्साम यजुरेव च ।** ऋगहमेव सामाहमेव यजुश्चाहमेव इत्यर्थः । **गम्यत** इति गतिः फलं **भर्ता** धारयिता **प्रभुः** शासिता **साक्षी** साक्षात् द्रष्टा निवसन्त्यस्मिन्निति निवासः अधिकरणे घञ् वासस्थानमित्यर्थः । शरणं रक्षिता इष्टप्राप्तौ अनिष्टनिवारणे च हेतुश्चेतनविशेषः । संहृत् शोभनं हृत् हृदयं यस्य स तथा हितैषी **प्रभवः प्रलयः** स्थानं प्रभव उत्पत्तिः । **प्रलयो** नाशः तयोः यत्स्थानं तदहमेवेत्यर्थः । **प्रभव प्रलय**स्थानमिति सामान्योक्त्या यस्य कस्यचित् यत्र कुत्र वा यदुत्पत्तिस्थानं तत्सर्वमहमेव इत्युक्तम् भवति । निधीयत इति **निधानम्,** कर्मणि ल्युट् । तदहमेव उत्पाद्यं संहार्यं च अहमेव इत्यर्थः । **अव्ययं** व्ययरहितम् **बीजं** कार्येन्वितं बीजम् उपादानकारणमित्यर्थः । एवं प्रसिद्धपदार्थानां सत्ताया स्वाधीनत्वमुक्त्वा अथ तेषां प्रवृत्तेरपि स्वाधीनत्वमाह - **तपामि** इत्यादिना । **अहम्** - अहमेव **तपामि**

आदित्यादि द्वारा सन्तापयामि **अहं वर्षं - वृष्टिं** निगृह्णामि रश्मिद्वारा ग्रीष्मकाले **गृह्णामि -** उत्सृजामि च पर्जन्यादिद्वारा वृष्टिमुत्**सृजामि** अमृतं जीवनसाधनं मृत्युर्मृतिसाधनं च अपरमेवं कियत्पर्यन्तं वक्तव्यमिति त्रैकाल्यवर्ति स्त्रवसङ्ग्रहेण उपसंहरति **सदसच्चाहमिति ।** सच्छब्दो वर्तमानपरः, असच्छब्दः तदन्यपरः यद्वर्तते यदतीतमनागतं च तत्सर्वम् अहमेव इत्यर्थः । एवं महात्मनां ज्ञानिनां वृत्तमुक्त्वा तेषां विशेषं दर्शयितुं कामकामानां वृत्तमाह -

त्रैविद्या मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ।। २०।।

त्रिस्रो विद्याः समाहृताः त्रिविद्यं अकारान्त उत्तरपदो द्विगुस्त्रियाम् इत्यस्य पात्रादिभ्यः प्रतिषेधात् ततः त्रिविद्यमधीते वेद वेति तदाधीते तद्वेदेत्यण् । **त्रैविद्या** ऋग्यजुस्सामात्मक वेदत्रयनिष्ठाः तदुक्त कर्मानुष्ठानप्रकाराभिज्ञा इत्यर्थः । **सोमपाः** केवल इन्द्रादियागशिष्टं सोमं पिबन्तः **पूतपापाः** पूतशब्दो निरस्तपरः निरस्तपाप्मान इत्यर्थः । स्वर्गादिविरोधिपापात् निर्मुक्ता इत्यर्थः । **यज्ञैः मां** इष्ट्वा स्वर्गरूपं फलं **प्रार्थयन्ते** काङ्क्षते **ते पुण्यं** पुण्यशब्दोऽयं पुण्यप्रतिक्षेप्य पापकार्यदुःखासम्मिश्रत्वपरः । ततश्च दुःखासम्भिन्नम् इत्यर्थः । **सुरेन्द्रलोकमासाद्य** प्राप्य **दिवि तत्र स्वर्गे** दिव्यान् भौमविलक्षणन् **देवभोगान्** देवानां भोज्यान् अश्नन्ति । देवैः संविभवतान् भुजन्ति-अनुभवन्ति इत्यर्थः । चरु-पुरोडाशादीनाम् अपि देवभोज्यत्वात् तद्व्यावृत्तये **दिव्यानिति ।** अत्र **माम्** इष्ट्वा इत्युक्त्या भगवदाराधनात्मकत्व लब्धेः कथं पुनरावृत्तिहेतुत्वमिति न शङ्कनीयम् । परमपुरुषस्य तथाऽनुसन्धानसत्वेऽपि यजमानस्य तथाऽनुसन्धानं न इति तदुपपत्तिः इति बोध्यम् ।

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयी धर्ममनुप्रपन्नाः गतागतं कामकामा लभन्ते ।। २१ ।।

ते - त्रयी निष्ठाः केवलेन्द्रादियाचिनः **विशालं** - भौमभोगापेक्षया विफुलं **तं** - दुःखासम्भिन्नं **स्वर्गलोकं** - सम्भवं भोगं **भुक्त्वा** - अनुभूय **पुण्ये** - स्वर्गानुभवहेतौ सुकृते **क्षीणे** क्षयं प्राप्ते **मर्त्यलोकं** - मनुष्यलोकं भूलोकमित्यर्थः । तस्यापि अस्थिरत्वद्योतनाय **मर्त्य**शब्दः **विशन्ति । एवं त्रयीधर्ममनुप्रपन्नाः** - त्रय्यन्तज्ञानवैधुर्येण वेदोक्तज्योतिष्टोमादि धर्ममास्थिताः **कामकामाः** - प्रथमः **काम**शब्दः काम्यन्त इति व्युत्पत्या स्वर्गादिपरः तस्मिन् कामो अभिलाषा येषान्ते **कामकामाः, गतागतम्** - गतं च अगतं च **गतागतं -** गमनागमनम् इत्यर्थः । अल्पास्थिरस्वर्गादीननुभूय पुनः निवर्तन्त इत्यर्थः । महात्मानस्तु

निरतिशयप्रियरूपमच्छिन्तनं कृत्वाऽनवधिकानन्दरूपं मां प्राप्य न पुनरावर्तन्त इति तेषां विशेषमाह -

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।। २२ ।।

अनन्याश्चिन्तयन्तः - अन्यशून्याश्चिन्तयन्त इत्युक्त्या चिन्तनादन्यस्यापि निषेधसिद्धेः अनन्यप्रयोजनत्वलाभः । **ये जनाः -** ये महात्मानः निर्विशेषण जनशब्दश्च तेषामेव जन्मसार्थकम् इति ज्ञापनाय **पर्युपासते -** परित उपासते अन्यूनमुपासत इत्यर्थः । अखण्डितगुणविभूतिकमुपासत इति यावत् । **नित्याभियुक्तानां** मयि नित्याभियोग-माकाङ्क्षमाणानाम् **अहं -** परमोदारत्वसौशील्यादि गुणवानहं, **योगक्षेमं -** योगश्च क्षेमं च योगक्षेमं समाहारत्वात् एकवद्भावो नपुंसकत्वं च अलब्धलाभो योगः लब्धस्य रक्षणं क्षेमः तौ **वहामि** प्रापयामि मत्प्राप्तिमलब्धां लम्भयामि । लब्धायाः तस्याः अपुनरावृत्ति-घटनेन रक्षणमपि करोमि इत्यर्थः ।

ननु सर्वानामपि देवतानां भवच्छरीरत्वात् त्रैविध्या इत्युक्तरीत्या कृतसमाराधनमपि स्वसमाराधनमिति जानन् भवान् किम्? केवल कर्मिणां योगक्षेमं न प्रयच्छति इत्यत्राह -

येऽत्वन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ।। २३ ।।

अन्यदेवताभक्ताः मदन्यइन्द्रादिदेवता भक्ताः, **श्रद्धयाऽन्विताः -** 'केवल त्रयीमात्रोक्त' न्यायेन श्रद्धयाऽन्विता **यजन्ते,** इन्द्रादीन्यजन्ते, **तेऽपि मामेव** यजन्ति, 'मयि सर्वमिदं प्रोतं मया ततमिदं विश्वम्' इत्याद्युक्तरीत्या इन्द्रादेरपि मच्छरीरत्वात्, अपि तु **अविधिपूर्वकं यजन्ति** विधिस्वज्ञानात् उद्भूता यस्य पूर्वं कारणं तद्विधिपूर्वकं तदन्यदविधिपूर्वकं हविरुद्देश्य परमपुरुषविशेषणतया हि इन्द्रादेः उद्देश्यकोद्यन्तर्भाव इति तात्पर्यलिङ्गैः विधिर्बोधयति केवल इन्द्रादीनुद्दिश्यानुष्ठाने तु अविधिपूर्वकम् इत्यर्थः । अविधिपूर्वकत्वमेव विवृण्वन् तथाविधस्य नैष्फल्यं विपरीतफलतां च आह -

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ।। २४ ।।

सर्वयज्ञानां - इन्द्रादिसम्बन्धितया उत्पन्नानां तदुद्देशेन क्रियमाणानामपि इत्यर्थः । **भोक्ता** तैः आराध्यप्रभुः फलप्रदश्च इन्द्राद्याराधनतया प्रयोगे यथाऽहं फलप्रदः । **तथा न**

मदाराधनतया प्रयोगे फलप्रदः कश्चिदिति बोधनायैवकारः । **ते** केवलेन्द्रादि उद्देशेनापि इत्यर्थः । कर्मकरणे प्रवृत्ताः **मां तत्त्वेन** याथातथ्येन **नाभिजानन्ति** । इन्द्रादयो हविरुद्देश्यं प्रति विशेषणमात्रं इन्द्राद्यन्तर्याम्यहम् उद्देश्यमिति न जानन्ति । **अतश्च्यवन्ति** तत्तत्कर्मसाध्यमस्थिरमेव फलं यान्ति इत्यर्थः। कथमेकस्यैव कर्मणो भोगमोक्षरूप-विरुद्धफलसाधनत्वम्? इत्याशङ्क्य सङ्कल्पाख्यसहकारिवैचित्र्यात् तदुपपत्तिः इत्याहुः -

यान्ति देवव्रता देवान् पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्याः यान्ति मद्याजिनोऽपि माम् ।। २५ ।।

व्रतशब्दोऽत्र सङ्कल्पवाची देवेषु व्रतं सङ्कल्पो येषान्ते **देवव्रताः ते देवान् यान्ति । ये** दर्शपूर्णमासादिभिः कर्मभिः इन्द्रादिदेवान्यजामहे इति सङ्कल्प्यानुतिष्ठन्ति । ते देवान् **यान्ति** तैः सह परिमितभोगान् भुक्त्वा तन्नाशकाले स्वयमपि नष्टा भवन्ति इत्यर्थः । **पितॄन्यान्ति पितृव्रताः** पूर्ववदर्थः । **भूतेज्याः** - इज्या-यजनं भूतोद्देश्या इज्या येषां ते तथोक्ताः । अन्यत्पूर्ववत् **भूत**शब्दश्च न प्राणिमात्रपरः । किन्तु राजसतामसयाज्य यक्षः निशाचर परः **मद्याजिनः** मद्यजनशीलाः अपिर्विसोधे तैरेव कर्मभिः **मां यान्ति** । अहन्तु निरतिशयानन्दरूपो क्षयः अतो **मां** प्राप्तानां न पुनरावृत्तिः इत्यर्थः । इत्थं समानेप्यायासे प्राप्तिवैषम्यमुक्तम् । अथ उपायवैषम्यमाह -

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ।। २६ ।।

पत्रादीनां समाननिर्देशाच्च शब्दप्रयोगाच्च परस्परनैरपेक्ष्यं दर्शितं सर्वाभावेऽपि **तोयं** सुलभमित्यभिप्रायेण तस्य पश्चादुक्तिः **फलं** वाऽपि फलमपि वा **मे** - मह्यम्, **भक्त्या** अत्यर्थप्रेम्णा **यः प्रयच्छति** समर्पयति । **अहम्** अवाप्तसमस्तकामोऽहं **प्रयतात्मनः** तत्प्रदान प्रयोजनैकविशुद्धमनसः भक्त्युपहृतं प्रीतिपूर्वकं समर्पितम् **अश्नामि** भोग्यत्वेन अनुभवामि । पत्रेषु, पुष्पेषु, फलेषु, तोयेष्वक्रीतलभ्येषु सदैव सत्सु । भक्त्यैकलभ्ये पुरुषे पुराणे **मुक्त्यै** किमर्थं क्रियते न यत्नः । 'अन्यत्पूर्णादपां कुम्भादन्यत्पादावने जनात् । अन्यत्कुशल संप्रश्नात् न चेच्छति जनार्दनः' । इत्यादिकं द्रष्टव्यम् । अत्र **य** इति । सामान्योक्त्या नापराधजडाजडविभागं **न पश्यामि** इति तात्पर्यम् सूचितम् । **भक्त्या** इत्युक्त्वेऽपि **पुनः** भक्त्युपहृतमित्यक्तिः 'अण्वपि उपहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् । भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते' । इत्युक्त भगवदादरणीयत्व सूचनाय भक्त्यैव

मनोनैर्मल्यलाभेऽपि पुनः **प्रयतात्मन** इत्युक्तिः - 'तपो न कल्कोध्ययनम् न कल्कः स्वाभाविको वेदविधिः न कल्कः । प्रपन्नवित्ताहरणं न कल्कः तान्येव भावोपहतानि कल्कः' । इत्याद्युक्तरीत्या भावशुद्धेरेव अतिशयोपकारकत्वद्योतनाय । इत्थं महात्मनां विशेषमभिधाय तत्परिगृहीतं भक्तियोगं वक्तुं तदङ्गभूतं बुद्धिविशेषम् अनुशास्ति ।

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।। २७ ।।

देहयात्राशेषत्वेन लौकिकं यत्कर्म करोषि, **यज्जुहोषि ददासि** इति वैदिककर्मणोः पृथङ्निर्देशात् **यत्करोषि** इति सामान्येन उक्तस्यापि एवमेव अर्थो ग्राह्यः । **यदश्नासि** देहधारणाय यद्रव्यमश्नासि, **यज्जुहोषि** प्रदर्शकमेतत् शास्त्रप्राप्तं यागहोमादि यत्कर्मकरोषि इत्यर्थः । **ददासि** यत् तद्दानं स्वल्पं महद्वा यदनुतिष्ठसि **यत्तपस्यसि** तत्सर्वं **मदर्पणं कुरुष्व -** अर्प्यत इत्यर्पणं 'कुत्यल्युटो बहुलम्' इति कर्मणि ल्युट् । **मदर्पितं -** कुरुष्व इत्यर्थः । अनेन **यत्**करोमि यदश्नामि यज्जुहोमि ददामि यत् । 'यत्तपस्यामि भगवन् तत्करोमि त्वदर्पणम्' ।। इति समर्पणमन्त्रः स्मारितः ।

ननु अन्यत्र स्थितस्य ततोऽन्यत्र निवेशनं हि समर्पणम् । एतत्तु स्थायिन एव स्यान्न तु क्षणिकस्य कर्मण इति मैवं सर्वस्य लौकिकस्य वैदिकस्य कर्मणः कर्तृत्वं भोक्तृत्वमाराध्यत्वं यथा मयि समर्पितं भवति । तथा कुर्विति तात्पर्यात् परमकर्तरि परमशेषिणी सर्वेश्वरे मयि कर्ता भोक्ता आरध्यश्च भगवानेव इत्यनुसन्धानं कृत्वा निर्भरो भव इति भावः ।

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ।। २८ ।।

एवमुक्तरीत्या **सन्न्यासयोगयुक्तात्मा** सन्न्यासः सम्यक् आसनं पूर्वोक्तं समर्पणम् इत्यर्थः । तस्य योगानुसन्धानं तेन युक्त आत्मा मनो यस्य स तथोक्तः । **शुभाशुभफलैः -** शुभं च अशुभं च फलं येषां तानि तथोक्ताः तैः शुभाशुभफलैः अनुकूलैः - प्रतिकूलैश्च इति यावत् । **कर्मबन्धनैः** कर्मरूपैः बन्धनैः अभिमतगतिनिवृत्तिहेतुर्हि बन्धनं, मत्प्राप्ति-विरोधिभिः प्राचीनैः कर्मभिः इत्यर्थः । **मोक्ष्यसे** विमुक्तश्च तैः विमुक्तश्च **मामुपैष्यसि** पुनर्विमुक्त इत्युक्तिः न विलम्ब इति द्योतनाय ।।

समोऽहं सर्वभूतेषु न मे द्वेष्योऽसि न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।। २९ ।।

अहम् अतिलोकस्वभावोऽहं **सर्वभूतेषु** - भूतशब्दोऽत्र जन्तुमात्र परः । **सर्वेषु भूतेषु** जात्याकारस्वभावगुणादिभिः उत्कर्षादिकमाश्रितेषु सर्वेषुभूतेषु **समः** - समाश्रयणीयत्वे समः **न मे द्वेष्योऽस्ति** - जात्यादिभिः अयं निकृष्ट इति समाश्रयणीयत्वे मम द्वेष्यो नास्ति । द्वेष्यतया त्याज्यो नास्ति इत्यर्थः । **न प्रियः** जात्यादिभिः उत्कृष्टोऽयमिति प्रियो न विद्यते । ततश्च समाश्रयणीयत्वे सङ्ग्राह्योऽपि नास्ति इत्यर्थः ।

नन्वेवं **न च मे प्रियः** इत्यादि विरोध इत्यत आह- **ये** इति । **तु** शब्दः आशङ्काव्यावृत्यर्थः । **ये भक्त्या** अत्यर्थप्रीत्या **मां भजन्ति** उत्कर्षापकर्षादिनियमाभावाभिप्रायेण **ये** इति सामान्यनिर्देशः । **ते मयि** जात्यदिभिस्तुल्येष्विव ते मय्येकरस्येन वर्तन्त इत्यर्थः । स्वामित्वेन त्वां भजतां कथं तुल्येष्विवैकरस्यमित्यत आह - **तेषु चाप्यह**मिति। अपिर्विरोधपरिहारे तेषु मदुत्कृष्टेष्विव महतो मन्दैस्सह नीरन्ध्रेण संश्लेषस्वभावरूपसौशील्यातिरेकात् 'याः क्रियास्सम्प्रयुक्तास्युः एकान्तगतबुद्धिभिः । तास्सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम्' । इत्येवं तांत्संभावयामि इत्यर्थः । एवं समाश्रयणस्वीकारे जात्याद्यपकरोत्किञ्चित्कर इत्युक्तम् । अथ वृत्तापकर्षोप्यकिञ्चित्कर इत्याह -

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यस्सम्यग्व्यवसितो हि सः ।। ३० ।।

अपि चेत् इत्यस्य ये इत्यर्थः । **सुदुराचारः** यस्य यस्य स्वजात्यनुरोधेन यद्विहितं यच्च निषिद्धं तदतिक्रमः तस्य दुराचारः **सुदुराचारः** अस्खलितदुराचारोऽपि यदि **अनन्यभाक्** सततं कीर्तयन्त इत्युक्त प्रकारेण भजनैकप्रयोजनो **भजते । साधुरेव** मन्तव्यः साधुरेव वैष्णव एव साधवः । क्षीणपापा स्युः 'नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते' इत्युक्तम् । अनन्यभाग्भजते इत्यनेन कृष्णभक्तिसिद्ध्या क्षीणपापत्वम् अर्थसिद्धमिति साधुत्वम् । अनन्यभजनादेव वैष्णवत्वम् । 'विष्णर्पिताखिल आचारस्स हि वैष्णव उच्यते' इति हि उक्तम् । 'विष्णुरेव भूत्वा' इतिवदेवकारः साम्यार्थकः, साधुभिस्तुल्यतया बहुमन्तव्य इत्यर्थः । तत्र हेतुमाह - **सम्यगिति ।** हि यस्मात्सः अनन्यभाक्त्वेन भजमानः **सम्यग्व्यवसितः** सम्यग्व्यवसायवान् । अतः पूर्वोक्तमहात्मभिः तुल्यतया बहुमन्तव्यः । 'ज्ञानं च व्यवसायश्च द्वौ परप्रतिपादकौ । व्यवसायादृते ब्रह्मन्नासादयति तत्परम्' ।। इति हि उक्तमिति भावः ।

नन्वस्तु अन्येषां बहुमन्तव्यः स्वस्य तु न कार्यसिद्धिस्स्यात् । 'नाविरतो दुश्चरितात् नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्' । 'पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः' इति आचारव्यतिक्रमस्य भजननिरोधकत्वात् इत्यत आह -

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ।। ३१ ।।

भजनोन्मुखः **क्षिप्रमेव धर्मात्मा** भवति । **धर्म**शब्दो अलौकिकश्रेयस्साधन सामान्यपरोऽपि प्रकरणाद्भजनरूपधर्म परः । **धर्मः** साऽस्य परन्तप इत्युपक्रमे तत्परत्वेन प्रयुक्तश्च तस्मिन् **आत्मा** मनो यस्य स तथोक्तः । तदुपक्रममात्रादेव पापमूलरजस्तमसोः निवृत्तौ क्षिप्रमेव विरोधिरहितमद्भजनैकमना भवति । **शश्वच्छान्तिं निगच्छति** मत्प्राप्तिविरोधिदुराचारनिवृत्तिमपि गच्छति । हे **कौन्तेय! प्रतिजानीहि** त्वमेव अस्मिन्नर्थे प्रतिज्ञां कुरु प्रतिजानामि इति । स्वेन प्रतिज्ञाकरणे विना त्वमेव प्रतिज्ञां कुर्वित्युक्तिः स्थैर्यातिशयद्योतनाय कथं प्रतिज्ञा कार्या 'मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् । जपतां जुह्वतां चैव विनिपातो न विद्यते' ।। इति अपापशुभाचारवतां सत्कर्मिणामिव विनिपाताभावोक्तेः । पापं प्रज्ञां नाशयति इति दुराचारस्य तद्व्याघातकत्वोक्तेश्च इत्यत आह - **न मे भक्त** इति । मद्भक्तो **न प्रणश्यति** उपक्रान्तभक्तिः विरोध्याचारमिश्रोऽपि न प्रणश्यति । 'दुराचारोऽपि सर्वाशीकृतघ्नो नास्तिकः पुरा । समाश्रयेदादिदेवं श्रद्धया शरणं यदि' । 'निर्दोषं विद्धि तं जन्तुं प्रभावात्परमात्मनः' । इति अनन्तख्यातिनिर्वीर्य-विषवत्कृतदुराचारस्य प्रतिरोधाक्षमत्वमिति भावः । एतच्चोपरिचर प्रह्लादक्षेत्रबन्धुषु स्पष्टम् । उपरिचरो हि भगवद्धर्ममास्थितः । कदाचिद्देवानाम् ऋषीणां विवादे शास्त्रविरुद्धं पिष्टपश्वादेः अनुष्ठेयत्वं वदन् तेन दुराचारात्पतितोऽपि भगवता उद्धृतः । प्रह्लादोऽपि कदाचित् भगवता सह योद्धुं प्रवृत्तः । शीघ्रं प्रत्येव बुध्यत क्षत्रबन्धुश्च पापिष्ठोऽपि भगवन्नामप्रभावादनन्तर जन्मनि जातिं स्मरन् तीव्रनिर्वेदो भगवन्तं शरणमुपगम्य मुक्त इति । इत्थम् आगन्तुक दुर्वृत्यानिकर्षेऽपि समाश्रयणमात्रेण फलसिद्धिः उक्ता ।

अथ पापिष्ठानां जात्यापकर्षेऽपि समाश्रयणफलसिद्धिमाह -

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ।। ३२ ।।

हे **पार्थ! स्त्रियो वैश्यस्तथा शूद्राश्च** इत्युक्ताः, **ये** जनाः **पापयोनयस्स्युर**पि परगति विरोधिपापमूलक जन्मानोऽपि इत्यर्थः । **मां व्यपाश्रित्य** तेऽपि **परां गतिं यान्ति ।** यद्यपि **वैश्य**स्त्रैवर्णिकः विद्यावांश्च इति स्त्रीशूद्राभ्यां सह पापयोनित्वेन परिगणनं न युज्यते । तथापि तत्र अनधिकारात्तत्तुल्यत्वोक्तिः । सत्रे तु ऋत्विज एव यजमानाः इति तेषां नास्त्यधिकारः ब्राह्मणस्यैवार्त्विज्यविधानात् न चैवं क्षत्रियस्यापि अनापत्तिः । तस्माद्राजपेय-याज्यार्त्वियजन इति क्षत्रियस्यापि तत्सम्भवात् इति । इत्थं सर्वधा विकृष्टसत्वेऽपि

फलसिद्धिमुक्त्वा जात्यात् उत्कर्षे भक्ति पौष्कल्ये च 'कैमुतिकन्यायेनैव' फलसिद्धिः इति दर्शयन् अर्जुनं जात्यादिभिः उत्कृष्टत्वं फले निस्सन्देह उपायमातिष्ठ इत्याह -

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ।। ३३ ।।

पापयोनिशब्दप्रतिकोटित्वात् पुण्यशब्दः पुण्ययोनिपरः । **पुण्याः** - पुण्ययोनयः **भक्ताः** - मद्भजनैकमनसः । तथा **राजर्षयश्च किं पुनः** - किं वक्तव्याः अनायासेनैव फलसिद्धिभाज इत्यर्थः । राजर्षिशब्दोऽर्जुनस्य फलसिद्धिप्रयोजनार्थः **अनित्यम्** इत्यत्र अतस्त्वम् इति पदद्वयम् अध्याहार्यम् । अतः तस्मात् त्वं राजर्षिः, 'त्वं अनित्यं सततविक्रिय' इत्युक्तरीत्या क्षण क्षरण स्वभावम् । **असुखं** - तापत्रयभूयिष्ठतया सुखरहितम् । **इमम्** - अतिक्षुद्रत्वेन प्रतीतं **लोकम्** - मनुष्यलोकं प्राप्य अनुवादोऽयं स्थितः । **मां भजस्व** - **अनित्यमसुखम् इमम्** इति अस्थिरत्व-दुःखमिश्रत्व-क्षुद्रत्वकथनं स्वभजनवैमुख्यनिवृत्तिलाभाय **भजस्व** इत्युक्तम् । भक्तिस्वरूपं निष्कृष्यदर्शयति ।

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ।। ३४ ।।

मामेवैष्यसि इति साध्येवधारणदर्शनात् । साधने व्यवधारणं ज्ञेयम् । तथा च मय्येव मनो यस्य तथोक्तः । सर्वस्वामिनि मयि तैलधारावत् अविच्छिन्नमना भवेत्यर्थः । **मद्भक्तः** मद्भक्तस्सन् **मन्मना भव** इत्यन्वयः । 'प्रेमपूर्वम् अनुध्यानं भक्ति'- अत्यर्थमत्प्रियत्वेन युक्तो मन्मना भव इत्यर्थः । **मद्याजी** - मद्यजनशीलः । अत्रापि पूर्ववदन्वयः । यजनं नाम परिपूर्णशेषवृत्तिः 'यज देव-पूजायां' पूजनं हि औपचारिकैः नीराजनादिभिः सांस्पर्शिकैः स्रकचन्दनादिभिः सादृष्टिकैर्दीपादिभिः अभ्यवहारिकैः भक्ष्यभोज्यादिभिः परिचर्याकरणं तच्च शेषोत्पत्तिरेव मदनुभवजनितनिरतिशय- प्रीतिकारितमद्यजनपरो यथा भवसि तथा **मन्मना भव** इत्यर्थः । **मां नमस्कुरु** - 'प्रेक्षावतः प्रवृत्तिर्या प्रह्वीभावात्मिका परा । उत्कृष्टं परमुद्दिश्य तन्नमः परिकीर्तितम्' ।। इत्युक्त नमस्कारं कुरु । **मत्परायणः अहमेव परम्** - उत्कृष्टमयनं प्राप्यं समाश्रयणीयं यस्य स तथोक्तः । मया विना आत्मधारणासम्भावनया मदाश्रय इत्यर्थः । एवम्भूतस्सन् उक्तया रीत्या आत्मानं मनस्समाधौ निवेश्य मामेवैष्यसि एवकारो भिन्नक्रमः । मामेष्यस्येव **अहरहः** बाह्यान्तःकरणैकरस्येन उक्तलक्षणमुपासनम् **आददानो** मामेष्यस्येव ।।

श्रीशैलबुक्कपट्टण येन्नाच्चान् दासविलिखितेऽध्यायः नवमः

श्रीमद्गीताभाष्यरहस्यार्थसङ्ग्रहो वृत्तः ।।

दशमाऽध्यायः

[विभूतिविस्तरयोगः]

इत्थं सपरिकरं भक्तियोगम् उक्त्वा तदुत्पत्तिविवृद्धये स्वस्य कल्याणगुणाकरत्वं कृत्स्नस्यापि जगतः स्वाधीनत्वं च आह - **श्रीभगवानुवाच** इति । पूर्वं सङ्ग्रहेणोक्तं स्वमाहात्म्यं विस्तरेण उवाच इत्यर्थः ।

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ।। १ ।।

अहम् - आश्रितवात्सल्यविवशः प्रियमाणाय मन्माहात्म्यं श्रुत्वा प्रीयमाणाय **ते -** तुभ्यं **हितकाम्यया -** मद्भक्तिविवृद्धिरूपं हितम् कर्तुमिच्छया **भूयः -** पुनरपि **परमम् -** अतिरहस्यं **वचः यत् वक्ष्यामि** । विस्तरेण यद्वक्ष्यामि तद्वचो **मे -** मत्तः **शृणु -** अत्र शृण्वत एव अर्जुनस्य पुनः श्रृण्विति विधानं सावधानश्रवणार्थं प्रीयमाणाय इत्यनेन **महाबाहो -** इति सम्बोधनेन च बहुशालिनां परोत्कर्षकथनम् असूयास्पदं भवति । तव तु भाग्यवशात् तादृशस्यापि मय्येतादृशी प्रीतिः जाता । अतः प्रश्नमन्तरेणैव अतिगहनं **वक्ष्यामि** इति भावः सूच्यते । अथ वक्ष्यमाणस्य अर्थस्य आदरणीयत्वाय दुर्लभत्वमाह -

न मे विदुस्सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ।। २ ।।

सुरगणाः - देवसमूहः ज्ञानमप्रतिघं यस्य इत्यादिभिः अधिकतरज्ञानवत्वेन प्रसिद्धानां ब्रह्मरुद्रादिदेवानां समूहः । **परमर्षयः -** अतीन्द्रियार्थदर्शिनो महर्षयोपि **मे** 'क इत्था वेद यत्र सः' 'सो अङ्ग वेद यदि वा न वेद त्वमेव त्वां वेत्थ योऽसि सोऽसीत्यादिषु' स्वेतरदुरधिगमत्वेन प्रतिपन्नस्य मम **प्रभवं -** प्रभावं **न विदुः -** न जानन्ति कुत इत्यत्राह - **अहम्** इत्यादि । **हि -** यस्माद्देवानां ब्रह्मादिदेवानां **महर्षीणां च -** अहमेव **सर्वशः** सर्वप्रकारेण आदिः कारणं न देवादीनामेव अहं कारणं, किन्तु तेषां यज्ज्ञानशक्तिबलादितस्यापि, तथा च ते मद्दत्ततरतमभावापन्नपरिमितज्ञानवन्तः । अतः ते यथावन्मां ज्ञातुं न शक्ता इति एतद्बोधनायैव सर्वशः इति पदम् ।

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असम्मूढस्स मर्त्येषु सर्वपापैः प्रमुच्यते ।। ३ ।।

अजम् - उत्पत्तिरूपविकाररहितम् अनेन अचिद्द्रव्यात् तत्संसृष्टात् बद्धाच्च व्यावृत्तिलाभः । अचितः स्वत उत्पत्तिमत्वात् बद्धस्य देहसम्बन्धरूपोत्पत्तिमत्वात् । **अनादिं -** पूर्वावधिविधुरं अनेन स्वतो मुक्तस्य व्यावृत्तेः । **सर्वलोकमहेश्वरं** सर्वलोकानां महान्तम् ईश्वरम् अनेन नित्याद्व्यावृत्तिः । एतादृशं **मां यो वेत्ति स मर्त्येषु असम्मूढः** इतरसजातीयतया एकीकृत्य मोहः - सम्मोहः तद्रहितः, सर्वपापैः मद्भक्त्युत्पत्तिविरोधिभिः सर्वैः पापैः **प्रमुच्यते -** निर्मुक्तो भवति । एवं स्वप्रभावाऽनुसन्धानेन भक्त्युत्पत्तिप्रतिबन्धक-पापनिरसनम् । तत एव अर्थाद्भक्त्युत्पत्तिं च प्रतिपाद्य अथ ऐश्वर्यगुणाद्यनुसन्धानेन भक्त्यभिवृद्धिप्रकारमाह -

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमश्शमः ।
सुखं दुःखं भवोऽभावो भयं चाभयमेव च ।। ४ ।।

अहिंसा समता तुष्टिः तपो दानं यशोऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ।। ५ ।।

बुध्यते अनयेति **बुद्धिः ।** इदमित्थमिति मनसा निरूपणसामर्थ्यमित्यर्थः । **ज्ञानम् -** चिदचिद्वस्तुविशेषविषयो निश्चयः । 'ज्ञा-अवबोधने' इति हि धातुः । **असंमोहः -** समीकृत्य मोहस्सम्मोहः - विजातीयसजातीयता बुद्धिः इत्यर्थः । तद्राहित्यम् **असम्मोहः** क्षमाक्रोधहेतौ वा क्रोशताडनादौ सत्यपि मनोविकाराभावः । सत्यं यथा दृष्टविषयं भूतहितं वचनं भूतहितमप्ययथा दृष्टं **सत्यं ।** यथा दृष्टमपि परान् अर्थकरं न सत्यमित्युभयोपादनं बाह्याकरणानाम् अनर्थविषयेभ्यो नियमनं **दमः ।** अन्तःकरणस्य तथा नियमनं **शमः । सुखम् -** मनोनुकूलानुभवः, **दुःखं -** प्रतिकूलानुभवः । **भवः -** भवनम् उद्धर्ष इत्यर्थः । **अभावः -** मनसः प्रतिकूलानुभवहेतुकोऽवसादः । **भयम् -** आगामि दुःखहेतुदर्शनजं दुःखं, तन्निवृत्तिर**भयम् । अहिंसा -** परदुःखहेतुत्वम्, **समता -** द्वेषाद्यभावेन शत्रुमित्रादिसाम्यं, **तुष्टिः -** तोषस्वभावत्वम्, **तप -** शास्त्रीयो भोगसङ्कोच रूपः कायक्लेशः, **दानं -** स्वभोग्यानां परस्वस्यापादनम् । **यशः -** गुणवत्ता प्रथा । **अयशः -** नैर्गुण्याप्रथा एवमाद्याभूतानां भावाः प्रवृत्तिनिवृत्तिहेतवो मनोवृत्ति विशेषाः । **मत्त एव -** मत्सङ्कल्पादेव भवन्ति । परस्परविरुद्धानाम् अपि अहमेक एव हेतुः इति बोधनाय पृथग्विधा इत्युक्तम् । सर्वभूतजातस्य सृष्टिस्थित्योः प्रवर्तयितारश्च मत्सङ्कल्पायत्तप्रवृत्तयो न स्वतन्त्रा इत्याह -

महर्षयस्सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोकाः इमाः प्रजाः ।। ६ ।।

पूर्वे - अतीतमन्वन्तरस्थाः ये **सप्तमहर्षयः** सप्त ब्रह्माण इत्येते पुराणे निश्चयं गता इत्याद्युक्ताः । गोत्राणां प्रवर्तयितारो ये भृग्वादयः । तथा **चत्वारो मनवः** ब्रह्मसावर्णि; रुद्रसावर्णिः, दक्षसावर्णिः, इन्द्रसावर्णिश्च इति चत्वारो मनवः । एते **मानसा मद्भावा जाताः** - मद्भावा इति मध्यमपदलोपसमासः मम यो भावः स्वभावो येषान्ते तथोक्ताः । **मन्मते** स्थिता इत्यर्थः । राज्ञो भाव एव भावो येषां किंकाराणान्ते राज **भावा** इत्युच्यन्ते । तद्वत् तथा च मत्सङ्कल्पानुवर्तिन इति पर्यवसितोऽर्थः । 'इमाः सर्वाः प्रजाः येषां लोके सन्तानमये लोके स्थिताः' ।

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकम्प्येन योगेन युज्यते नात्र संशयः ।। ७ ।।

एताम् - सर्वस्य मदायत्तस्वरूपस्थितिप्रवृत्तिरूपां **विभूति**मैश्वर्यं 'विभूतिर्भूतिरैश्वर्यः' इत्यर्थः । विभुशब्दो नियन्तरि दृष्टचरः । ततः भावे क्तिन्नन्तोऽयं नियमन परः । योगं च युज्यत इति **योगः** । उभयलिङ्गत्वं हेयप्रतिभटकल्याणैकतानत्वमित्यर्थः । **मम** तत्त्वतो **यो वेत्ति** याथातथ्येन यो वेत्ति **सः अविकम्पेन** बाधकशतैरपि अविचाल्येन योगेन युज्यते । **न अत्र संशयः** शास्त्रसिद्धस्यार्थस्य सिद्धस्यार्थस्य साक्षात्कारे हृद्यन्तर्वैशद्यन्तदेवजायते । न अत्र संशय इत्यस्य भावः । उक्तार्थमेव उदाहरणप्रदर्शन मुखेन विशदयति ।

अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ।। ८ ।।

सर्वस्य - चिदचिन्मिश्रस्य जगतः **अहं प्रभवः** - उत्पत्तिकारणं प्रभवत्यनेन इति व्युत्पत्तेः । **सर्वं मत्त** एव **प्रवर्तते** सर्वमित्यनेन ब्रह्माद्यधीनप्रवृत्तिरपि मदधीन इति सूचितम् । **इति मत्वा भावसमन्विताः** - मयि स्पृहयालवः ।**बुधाः** ज्ञानिनः **मां** - वात्सल्यसौशील्यादि गुणविशिष्टं **मां भजन्ते** तदेव भावसमन्वितत्वं विशदयति ।

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ।। ९ ।।

मयि **चित्तं** मनो येषान्ते तथोक्ताः । मां विना विषयान्तरे अनिवेशितमनस्काः **मद्गतप्राणाः** मद्गताः प्राणा येषां ते तथोक्ता । मां **विना** आत्मधारणमलभमानाः **परस्परं बोधयन्तः -** साधुसमाजे स्थितिदशायां परैः अज्ञातां तान् स्वानुभूतान्मद्गुणां तेभ्यो बोधयन्तः - **मां कथयन्तः ।** दिव्यमानुषत्वप्रयुक्ताद्भुत दिव्यचेष्टित इति मां कथयन्तश्च **तुष्यन्ति** निवृत्ताभ्यधिक स्पृहा भवन्ति **रमन्ति** अन्तर्भावित व्यर्थोऽयं **रमयन्ति** इत्यर्थः । लोके कथनस्य प्रयोजनान्तरसाधकपरप्रीत्यर्थतादृष्टेः इति भावः । **मच्चित्ता** इत्यादिभिः चतुर्भिः विशेषणैः भक्तिपरिपाकक्रमविशेष सिद्धाकारः प्रदर्शितः । इत्थं भगवद्गुण विभूतिज्ञानस्य भक्त्युत्पत्तिविरोधिनिवृत्तिहेतुत्वमुक्तम् । इदानीं तथाविध विवृद्धभक्तेः भगवत्प्राप्तिपूर्वभावि विशदतमसाक्षात्काररूपावस्थाविशेषहेतुत्वं भगवत्प्रसादा अवान्तरव्यापरकमुच्यते ।

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।। १० ।।

सततयुक्तानां मयि सर्वदा योगाशंसमानानां **भजतां -** भजमानानाम् तम् आशंसाविषयान्तर्गतं **बुद्धियोगं** विपाकदशापन्नं बुद्धियोगं प्रीतिपूर्वकं **ददामि** येन बुद्धियोगेन ते भजमाना **माम् उपयान्ति ।** अत्र प्रीतिपूर्वकम् इत्युक्त्या भजनावान्तरव्यापार-रूपप्रसादकथनमुखेन भगवतः परमौदार्यादिगुणप्रकाशनं कृतम् उक्तबुद्धियोगोत्पत्तिः प्रतिबन्धनिरसनं मयैव क्रियत इत्याह -

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ।। ११ ।।

तेषामेव येषां बुद्धियोगं दातुं प्रवृत्तः तेषामेव **अहम् -** अनुग्रहोपयुक्तज्ञानशक्ति-कारुण्यादिमानहं **अनुकम्पार्थम्** अनिष्टनिवृत्तिपूर्वकेष्टप्राप्तिहेतु प्रसादार्थम् आत्मभावस्थः आत्मनो मनसो भावो वृत्तिविशेषः तत्र स्थितः तद्विषयतयाऽवस्थितः **भास्वता -** परितः प्रकाशमानेन सर्वप्रकारगोचरेण इत्यर्थः । **ज्ञानदीपेन** अज्ञानजम् - 'अज्ञानं ज्ञानविरोध्यनादि' कर्म 'अविद्या कर्म संज्ञान्या' इत्युक्तेः । तेन जनितं तमः भगवत्साक्षात्काररूपप्रकाशप्रतिबन्धकं विषयान्तरप्रावण्यरूपं तमः नाशयामि । यद्यपि विषयप्रावण्यनिवृत्तिपूर्वकमेव भजनम् । तथापि संस्कारशेषात् अनुवृत्तं सूक्ष्मं प्रावण्यं तमश्शब्दितमिति न दोषः ।

अर्जुन उवाच इति । इत्थम् अर्जुनो भगवतो विभूतिं गुणयोगं च सङ्क्षेपतः श्रुत्वा विस्तरेण श्रोतुकाम उवाच इत्यर्थः ।

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ।। १२ ।।

आहुस्त्वामृषयस्सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासस्स्वयं चैव ब्रवीषि मे ।। १३ ।।

भवान् परं ब्रह्म 'सत्यं परं ब्रह्म-नारायण परं ब्रह्म' 'ब्रह्म विद्वाप्नोति परं' 'स यो ह वै तत्परं ब्रह्म' इत्यादि श्रुतेः इति भावः । **परं धाम** - 'अथ यदतः परो दिव्यो ज्योतिः नारायण परो ज्योतिः' इत्यादि श्रुतेः इति भावः । **परमं पवित्रं** 'तद्यथा पुष्करपलाश आपो न श्लिष्यन्त' इति । तद्विदाप्येतादृशमाहात्म्यश्रुतेः इति भावः । श्रुतिसिद्धोयमेवार्थ इतिहासपुराणादिप्रवक्तृवचनैश्च सिद्ध इत्याह - **पुरुष**मित्यादि नानार्थेन सर्वे ऋषयः परावरतत्त्वयाथात्म्यविदः सर्वेपि त्वां शाश्वतं नित्यं **दिव्यं** परमव्योमनिलयं 'पुरुषं पतात्परं पुरिशयं पुरुष'मित्युक्तरीत्या निखिलजगच्छरीरम् **आदिदेवम्** आदिश्चासौ देवश्च इति समासः जगत्कारणभूतं क्रीडारूपजगद्व्यापारविशिष्टं च इत्यर्थः । **अजम्** कर्मकृतजन्मादिरहितं **विभुं** - नियन्तारम् आहुः देवर्षिः नारदः **असितो देवलो व्यासश्च आहुः** इत्यन्वयः । स्वस्वकृतग्रन्थेष्विति शेषः ।

'एष नारायण श्रीमान् क्षीरार्णवनिकेतनः ।
नागपर्यङ्कमुत्सृज्य ह्यागतो मधुरां पुरीम् ।।

पुण्या द्वारवती तत्र यत्रास्ते मधुसूदनः ।
साक्षान्नारायणो देवः (पुराणोऽसौ) स हि धर्मस्सनातनः ।।

ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ।
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ।।
ज्योतिषामपि तज्ज्योतिः ।।

पवित्राणां हि गोविन्दः पवित्रं परमुच्यते ।
पुण्यानामपि पुण्योसौ मङ्गलानां च मङ्गलम् ।।

त्रैलोक्यं पुण्डरीकाक्षो देवदेवस्सनातनः ।
आस्ते हर विरिञ्चात्मा (हरिरचिन्त्यात्मा) तत्रैव **मधुसूदनः** ।।

यत्र नारायणो देवः परमात्मा सनातनः ।
तत्र कृत्स्नं जगत्पार्थ तीर्थान्यायतनानि च ।।

तत्पुण्यं तत्परं ब्रह्म तत्तीर्थं तत्तपोवनम् ।
तत्र देवर्षयस्सिद्धास्सर्वे चैव तपोधनाः ।।

आदिदेवो महादेवो यत्रास्ते मधुसूदनः ।
पुण्यानामपि तत्पुण्यं माभूत्ते संशयोऽत्र वै ।।

कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः ।
कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम्' ।।

इत्यादि वाक्यैराहुः इत्यर्थः । **स्वयं चैवं ब्रवीषि मे, मे** - मह्यं स्वयमेव ब्रवीषि । भूमिराप इत्यारभ्य मत्तस्सर्वं प्रवर्तत इत्यन्तेन । अत्र सर्वे महर्षयः इत्युक्त्या सर्वेषाम् उक्तार्थे ऐकरस्यं सूचितम् । नारदादेः केषाञ्चित् पृथक्क्त्याऽभिधानम् आप्ततमानामप्यत्रैकरस्यम् इति बोधनाय स्वयं चैत्येतत्स्वतः सर्वज्ञेन ब्रह्म गुरुणाप्ययमेव अर्थो निर्णीत इति बोधनाय ।

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ।। १४ ।।

हे **केशव !** ब्रह्मरुद्रादेरपि नियन्तः **मां** शिष्यः तेऽहम् इत्युक्त्या त्वां प्रपन्नं प्रति **यद्वदसि** ऐश्वर्यं कल्याणगुणयोगं च यद्वदसि **एतत्सर्वं ऋतं** सत्यमेव **मन्ये** न **प्रशंसापरम्** इति मन्ये । आप्ततमैः नारदादिभिः आम्नायैः स्मृतिभिः महर्षिभिः सर्वज्ञेन स्वयं च उक्तत्वात् इत्यर्थः । हे **भगवन् ।** हेयप्रतिभटकल्याणैकतान **ते** - तव **व्यक्तिं** व्यञ्जनप्रकारं देवादानवाश्च परिमितज्ञानाः **न विदुः** विपक्षे वास्तव प्रतिपादनप्रकारमेव अन्ये न विदुः, किं पुनः ? प्रत्यक्षादिवत् प्रकाशनमिति भावः । एतदेव तात्पर्यं सूचयितुं हि शब्दः **न हि ते** इत्यादिना । देवादीनां भगवद्वैभववक्तृत्वयोग्यतां प्रतिक्षिप्य भगवत एव स्ववैभववचनयोग्यतामाह -

स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ।। १५ ।।

आत्मानं त्वाम् **आत्मना** आत्मनैव अन्यैः अननुगृहीत **एव वेत्थ** - जानासि 'त्वमेव त्वां वेत्थ योऽसि, सोऽसि' इति श्रुतेः इति भावः । **भूतभावन** - भूतानामुत्पादयितः

भूतेश तेषां नियन्तः **देवदेव** - देवानामपि देव इतरापेक्षया देवा यथा **अभ्यधिकाः**; तथा तेभ्यः सर्वेभ्योऽभ्यधिक इति भावः । **जगत्पते** - जगत्स्वामिन् ।

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ।। १६ ।।

आत्मविभूतयः - त्वदसाधारण्यो विभूतयः, **दिव्या हि** न स्वयमूहितुं शक्याः अवश्यवक्तव्या इत्यर्थः । **अशेषेण कार्त्स्न्येन वक्तुमर्हसि** - त्वमेव वक्तुमर्हसि । **अर्हसि** इति योग्यत्वनिर्देशेन तत्प्रार्थनं विवक्षितम् । **याभिः विभूतिः** नियन्तव्यैः । यद्वा विपूर्वाद्भावार्थकक्तिन्नताद्विभूतिशब्दान्नियमनमुच्यते । तथा च यैः - नियमनैः इत्यर्थः । **इमान्लोकान्व्याप्य** अन्तर्यामित्वेन **व्याप्य तिष्ठसि ।**

कथं विद्यामहं योगी त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्यौऽसि भगवन्मया ।। १७ ।।

हे **भगवन्! योगी** - भक्तियोगनिष्ठस्सन्नहं **सदा** - निरन्तरं **त्वां परिचिन्तयन्** अविच्छेदेन चिन्तयितुं लक्षणहेत्वोरिति शतृप्रत्ययः **त्वां** समस्तकल्याणगुणपरिपूर्णं चिन्तयन् त्वां कथं विद्यां **केषु केषु** - बुद्धिर्ज्ञानम् इत्यादि भावन्यतिरिक्तेषु केषु **भावेषु** चिन्तयन् त्वं **मया चिन्त्योऽसि ।**

विस्तरेणाऽऽत्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ।। १८ ।।

हे **जनार्दन! आत्मनः** स्वस्य **योगं** मत्तः सर्वं प्रवर्तक इति सङ्क्षेपेण उक्तम् । प्रष्टृत्वादि **योगं विभूतिं** नियमनं च **भूयः** पुनः **विस्तरेण कथय** - अमृतममृतवद्भोग्यं त्वन्माहात्म्यं शृण्वतः **मे तृप्तिः नास्ति** न विद्यते । 'हि' प्रसिद्धौ मम तृप्त्यभावः त्वयाऽपि विदित इति भावः । प्रतिकूलजनानां निरयगतिप्रदस्त्वमेव अनुकूलजनैः अभिलषितं याच्यमानः इति बोधनाय जनार्दन इत्युक्तिः ।

श्रीभगवानुवाच इति । एवम् अतृप्त्या पृच्छन्तमर्जुनं प्रति प्रसन्नो भगवान् तस्याभिजनादिवर्णनमुखेन योग्यतां दर्शयन् विभूतीनाम् आनन्त्यात्केनचिदुपाधिविशेषेण संगृहीता । विभूतीर्वदिष्यामि इत्याह इत्यर्थः ।

हन्त ते कथयिष्यामि विभूतीरात्मनश्शुभाः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ।। १९ ।।

ते अनसूयत्व प्रियमाणत्वाप्तत्वादि गुणवते **तुभ्यं शुभाः** - कल्याणीः **आत्मनः** मम विभूतीः कथायिष्यामि । कथं **प्राधान्यतः** - प्राधान्येन याः प्रधानभूताविभूतयः ता एव कथयिष्यामि इत्यन्वयः । विस्तरेण कथय इत्युक्ते कथं कतिपयाभिधानम् इत्यत आह - **नास्ति** इति विस्तरस्येत्यादौ विभूतीनाम् इत्यध्याहारः विभूतेः विस्तरो महान् इति मे विभूतीनां **विस्तरस्य** अन्तश्चरमावधिः नास्ति । कुरुश्रेष्ठत्वात् ज्ञातुं त्वं समर्थः । सर्वज्ञत्वात् अहं वक्तुमपि समर्थः । तासाम् आनन्त्याद्वक्तुं श्रोतुं न शक्यत इति भावः । विस्तरेणात्मनो योगं विभूतिं च इति पृष्टमर्थद्वयं विस्तरेण वक्तुं द्वयमाह -

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ।। २० ।।

सर्वभूताशयस्थितः - सर्वेषां भूतानां शरीरभूतानां **आशये** - हृदये स्थितः हेतुगर्भविशेषणमेतत् । शरीरभूतसर्वभूतानां हृद्देशे नियन्तृत्वेन अवस्थानाद् अहं सर्वेषां आत्मा इत्यर्थः । **आत्मा** हि शरीरस्य धारको नियन्ता भवति इति भावः । एवमात्म भूतोऽहं **भूतानाम्** आदिर्मध्योन्तश्च उत्पत्तिस्थितिलयहेतुः इत्यर्थः ।

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ।। २१ ।।

आदित्यानाम् - अदित्यपत्यानां द्वादशानां 'मध्ये य उत्कृष्टो विष्णूनामादित्यः,' स **एवाऽहं ज्योतिषां रविरंशुमान्** - जगतप्रकाशकानां तेजसां मध्ये **अंशुमान्** प्रशस्तप्रकाशः रविर्द्वादशविधः सूर्यसङ्घोऽहम् इत्यर्थः । **मरुताम्** सप्तभिः सप्तभिः एकैकगणत्वेन सप्तधा अवस्थितानां दितिपुत्राणां एकोनपञ्चाशन्मरुताम् उत्कृष्टो **मरीचिरहमस्मि । नक्षत्राणामहं शशी** न इयं पूर्ववन्निर्धारणे षष्ठी चन्द्रस्य नक्षत्रत्वाभावात् । किन्तु सम्बन्धसामान्ये नक्षत्राणां पतिश्चन्द्रोऽहमस्मि इत्यर्थः । न च प्रायपाठभङ्गः भूतानामस्मि चेतनावादः प्रवदताम् इत्यादिषु निर्धारणासिध्या प्रायपाठाभावात् ।

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ।। २२ ।।

वेदानाम् - ऋग्यजुस्सामाथर्वणां मध्ये, **सामवेदोऽस्मि** - गीतिप्रधानत्व - सहस्रशाखत्वादिभिः सामवेदस्य श्रैष्ठ्यं **देवानामस्मि वासवः** - देवाः स्वर्गवासिनः, तेषां वासवः प्रधानभूत इन्द्रोऽस्मि । **इन्द्रियाणां** - ज्ञानकर्मभेदेन एकादशविधानां इन्द्रियाणां श्रेष्ठं **मन** इन्द्रियमस्मि **भूतानाम् अस्मि । चेतना** अत्रापि न निर्धारणे षष्ठी, भूतानां चेतनाहमस्मि विशिष्टे सारभूतो विशेषणांशोऽहमस्मि इत्यर्थः ।।

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुश्शिखरिणामहम् ।। २३ ।।

रुद्राणाम् - एकादशानां **शङ्करोऽस्मि** शङ्करशब्देनैव उत्कर्षस्सूचितः । **वित्तेशो यक्षरक्षसाम्** - यक्षराक्षसजात्योः अदूरविप्रकर्षाद्यक्षरक्षसामित्युक्तिः । **वित्तेशः** तत्पतिः कुबेरोऽस्मि इत्यर्थः । नक्षत्राणां **शशीति**वद्बोध्यः । संज्ञयैवैश्वर्यातिशय द्योतनादुत्कर्षो व्यञ्जितः । **वसूनाम्** अष्टवसूनां मध्ये **पावकनामस्मि** । अत्रापि नाम्नैव पापशोधकत्वरूपातिशय उक्तः । **शिखरिणाम्** - शिखरशोभिनां मध्ये **मेरुरस्मि** रत्नकाञ्चनमयशिखरयोगान्मेरोः अतिशयः ।

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कन्दस्सरसामस्मि सागरः ।। २४ ।।

पुरोधसां - पुरोहितानां मध्ये **बृहस्पतिं, मां विद्धि** - नाम्ना बृहतां पतित्व लब्ध्या उत्कर्षः सिद्धः । **सेनानीनाम्** - सेनापतीनां मध्ये **स्कन्दः** देवसेनापतित्वात् उत्कृष्टस्कन्दः **सरसामस्मि सागरः** सरश्शब्देन प्रवाहव्यतिरिक्तस्थास्नु सलिलाशयमात्रं विवक्षितं तेषां सागरोऽस्मि ।

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ।। २५ ।।

महर्षीणां - मरीच्यादीनां मध्ये **भृगुरहं गिराम्** - अर्थाभिधायिनः शब्दागिरः **तासामेकम् अक्षरम्** 'ओमित्येकाक्षरम्' इत्युक्तः । प्रणवः तस्य सर्वोत्कृष्टार्थाभिधायित्वात् । **यज्ञानां** सर्वेषां **जपयज्ञोऽस्मि** - जपयज्ञस्योत्कर्षो विधियज्ञाज्जपयज्ञो विशिष्टो दशभिः गुणैः इत्युक्तः । **स्थावराणां** पर्वतमात्राणां **हिमालयः** - हिमवानस्मि शैलराजत्वप्रसिद्ध्या तस्यातिशयो व्यक्तः ।

अश्वत्थस्सर्ववृक्षाणां देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथस्सिद्धानां कपिलो मुनिः ।। २६ ।।

सर्वेषाम् - वृक्षाणां मध्ये पूज्योऽश्वत्थोऽस्मि । **देवर्षीणाम्** - मन्त्रदर्शिनो देवाः देवर्षयः तेषां **नारदोऽस्मि** । तस्यातिशयश्च भारते प्रसिद्धः । **गन्धर्वाः** देवयोनिविशेषाः तेषां राजा **चित्ररथोऽस्मि** । पूर्वसञ्चितसुकृतविशेषाज्जन्मसिद्धाणिमाद्यैश्वर्याः

सिद्धाः तेषां **कपिलो मुनिः** - कपिल नाम मुनिः अहमस्मि । स हि 'ऋषि प्रसूतं कपिलमिति' श्रुतौ ज्ञानपरिपूर्णत्वेन प्रसिद्धः ।

उच्चैश्श्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ।। २७ ।।

अश्वानां मध्ये **अमृतोद्भवम् ।** अमृते मध्यमानावस्थायां सुधायाम् उद्भवो यस्य तं **उच्चैश्श्रवसमे**तन्नामानमश्वं **मां विद्धि गजेन्द्राणाम्** गजश्रेष्ठानां मध्ये **ऐरावतं मां विद्धि ।** अत्रापि 'काकाक्षिन्यायेन' अमृतोद्भवम् इत्यन्वेतव्यम् । तेन उभयोरतिशयो व्यक्तः, **नराणाम् नराधिपं** राजानं **मां विद्धि** नराधिपशब्देन निर्वाहकत्व - लक्षणातिशयस्सिद्धः ।

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ।। २८ ।।

आयुधानाम् - कुन्तभिण्डिवालाद्यायुधानां मध्ये अहम् **वज्र**मस्मि । **धेनूनाम्** - दोग्ध्रीणां गवां **कामधुक्,** दिव्या सुरभिः **अस्मि** कामधुक् शब्देनैव उत्कर्षस्सूचितः । **प्रजनः** - प्रजननहेतुः **कन्दर्पो** - मन्मथोऽहं प्रजननहेतुत्वादेव उत्कर्षस्सिद्धः । **सर्पा** एक शिरसः तेषां मध्ये **वासुकिरस्मि ।**

अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमस्संयमतामहम् ।। २९ ।।

नागा बहु शिरसः तेषां मध्ये**ऽनन्तोऽस्मि । यादसाम्** - जलजन्तूनां **वरुणः** - तत्पतिर्वरुणोऽस्मि । पितॄणां मध्ये **अर्यमा** - पितृराजः; स च अस्मि **संयमताम्** - संयच्छतां दण्डयतामित्यर्थः । **यमः** - दण्डधरोऽहम् ।

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ।। ३० ।।

दैत्यानाम् मध्ये **प्रह्लादः** उपमानमशेषाणाम् इत्युक्तौ अतिशयवान् प्रह्लादोऽस्मि **कलयतां** मरणाद्यनर्थप्रेप्सुतया गणयतां मध्ये **कालः** धर्मसहचारि चेतनविशेषोऽहं तं विनाशकस्य अनर्थाः प्राप्तेः । तत्र तस्यातिशयः मृगाणां मध्ये **मृगेन्द्रः** सिम्होऽहं मृगेन्द्रशब्दादेवातिशयो व्यक्तः । **पक्षिणाम् वैनतेयः** - विनतापुत्रो गरुत्मान् तस्य वेदात्मकत्वादतिशयः ।

पवनः पवतामस्मि रामश्शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्त्रोतसामस्मि जाह्नवी ।। ३१ ।।

पवताम् - अजस्त्रगमनशीलानां **पवनः - वायुः** अस्मि । तारकादेः अजस्त्रभ्रमणस्यापि तदधीनत्वात्तस्यातिशयः । **शस्त्रभृतां रामोऽहम्** अत्र रामस्य स्वापेक्षयार्थान्तरत्वाभावात् अमोघशस्त्रत्वलक्षणं शस्त्रभृत्वं विभूतिः इति ज्ञेयम् । न च एवं सर्वेषां वाक्यानाम् ऐकरूप्यं न स्यादिति शङ्क्यम् । आदित्यादीनां विभूतीनां शस्त्रभृत्वस्य च भगवन्तं धर्मिणं प्रति धर्मत्वाविशेषेणैकरूप्यसम्भवात् इति ध्येयम् । **झषाणां -** मत्स्यानां **मकरो -** मत्स्यराजः **स्त्रोतसां -** प्रवाहानां **जान्हवी -** गङ्गा तस्याः सर्वज्ञशिरोधृतत्वजगत्पावनत्वादिभिः अतिशयः स्पष्टः ।।

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ।। ३२ ।।

आदिरन्तोमध्यमित्यादिभिः अनन्वयात् **सर्ग**शब्दस्य सृज्यन्त इति कर्मणि व्युत्पत्या सृज्यमानवस्तुपरः । तेषाम् **आदिः** उत्पत्तिवेलायां निमित्तकारणमुत्पादकः । अन्तास्संहारवेलायां संहारकः **मध्यं** पालनवेलायां पालकश्चाहमेव इत्यर्थः । **विद्यानां** सर्वासाम् **अध्यात्मविद्या -** जीवपरमात्मयाथात्म्यविद्याविषयतः फलतश्च । तस्या उत्कर्षस्सिद्धः । **प्रवदतां** जल्प-वितण्डादिकुर्वतां **वादः -** तत्त्वनिर्णयाय प्रवृत्तो वादः **अहम् ।**

अक्षराणामकारोऽस्मि द्वन्द्वस्सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ।। ३३ ।।

अक्षराणाम् - 'अकारो वै सर्वा वाक्' इत्युक्तोऽकारोऽस्मि । **सामासिकस्य -** समाससमूहस्य, **द्वन्द्वः -** द्वन्द्वसमासोऽहं तस्योभयपदार्थप्रधानत्वात् अतिशयः । **अक्षयः -** अनादिर्भगवान् कालेनान्तोऽस्येत्युक्तः । कलाकाष्ठादिमयः कालोऽहमेव **विश्वतो मुखः -** चतुर्दिक्प्रवर्तितमुखः, **धाता -** स्त्रष्टा हिरण्यगर्भोऽहं **विश्वतो मुखः** इति चतुर्वेद-प्रवर्तकत्वोपस्थितेः उत्कर्षो व्यञ्जितः ।

मृत्युस्सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिश्श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ।। ३४ ।।

सर्वहरः सर्वप्राणिहरो **मृत्युरहं** यमः । कर्मानुरूपदण्डकृत्कालः कालावच्छेदनिर्णेता । अयं यमादेशकारी प्राणि वर इति न पुनरुक्ता **भविष्यताम्** उत्पत्स्यमानानाम् **उद्भव**

उत्पत्तिक्रियाऽहमेव **नारीणां** मध्ये **कीर्तिश्रीर्वाक्च** भगवदसाधारणशक्त्यः एताः तिस्रोऽहमेव इत्यर्थः । तथा **स्मृतिर्मेधा धृतिः क्षमा** च अहमेव इत्यर्थः ।

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ।। ३५ ।।

साम्नां मध्ये **बृहत्सामाऽहं** तस्यातिशयस्तु 'बृहच्च वा इदमग्रे रथन्तरं च आस्तां वाग्वै रथंतरं मनो बृहदिति' श्रुतिसिद्धः । **छन्दसाम् गायत्री -** गायत्रीछन्दोऽहं तदतिशयोऽप्यग्रं वैछन्दसां **गायत्रीति** श्रुतिसिद्धः । **मासानां** मध्ये **मार्गशीर्षः**मार्गशीर्षमासोऽहं तस्य **वर्ष -** गर्भाधानकालत्वात् अतिशयः । **ऋतूनां** षण्णां **कुसुमाकरः** वसन्तः । **कुसुमाकर** शब्देनैव सर्वसुखहेतुत्वद्योतनात् अतिशयो व्यक्तः । उपनयनाग्र्याधानाद्युपक्रमकालत्वाच्च ।

द्यूतञ्छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ।। ३६ ।।

छलयतां तत्करोति इति णिच् छलं कुर्वतां **द्यूतम् -** अक्षादिलक्षणं द्यूतमहमस्मि । तस्य जयादिसम्पादकत्वादतिशयः । **तेजस्तेजस्विनाम्** इतिवत् दिव्यतां द्यूतम् इत्यनभिधानाच्छलयताम् इत्युक्तेश्च वञ्चनास्पदेषु सर्वेषु धर्माविरोधेन अनायासेनैव समस्तधनहारित्वेन अतिशयितत्वात् अक्षादिलक्षणद्यूतमहम् इत्युक्तमिति ज्ञेयम् । **तेजस्विनां** पराभिभवसामर्थ्यवतां तेजस्तत्सामार्थ्यमहमस्मि इत्यर्थः । अत्र अतिशयस्स्पष्टः **जयोऽस्मि व्यवसायोऽस्मि -** पूर्वोक्तानुरोधात् । जेतॄणां **जयोऽस्मि ।** व्यवसायिनां **व्यवसायोऽस्मि** इत्यर्थः । **सत्ववतां सत्वं** नाम महामनस्त्वं तद्वतां **सत्वमहम् ।**

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ।। ३७ ।।

वृष्णीनाम् - वृष्णिवंशप्रसूतानां, **वासुदेवोऽस्मि ।** स्वस्मादर्थान्तराभावात् वसुदेवसूनुत्वं विभूतिः इति ज्ञेयम् । अत्र वसुदेवसूनुत्वस्य विभूतित्वोक्तिस्तु तदभिव्यक्तचतुर्भुजत्वेन अवतारप्रभृत्यनुवृत्तातिमानुषव्यापारमुखेन प्रवृत्तं स्वातिशयं दृष्टान्तीकृत्योक्तार्थः स्थिरीकरणार्थो । **पाण्डवानां** मध्ये **धनञ्जयोऽहं** सर्वदर्शिनो भगवतस्सर्वत्र परोक्षतया निर्देशवत् । अत्रापि परोक्षतया निर्देशः । अतः त्वम् इत्यनुक्तिः **मुनीनां -** मननेन आत्मयाथात्म्यदर्शिनो मुनयः तेषां व्यासः 'तपो विशिष्टादपि वै वसिष्ठान्मुनिसत्तमात् । मन्ये श्रेष्ठतमत्वाद्यरहस्य ज्ञानवेदिनाम्' इत्युक्तातिशयवान् **व्यासोऽहं**

कवीनां - कवयः क्रान्तदर्शिनः विपश्चित इत्यर्थः । तेषां मध्ये **उशना कविः** शुक्रोऽहं न कश्चिन्नोपनयते । पुमानन्यत्र भार्गवात् । शेषसंप्रतिपत्तिस्तु बुद्धिमत्स्यवतिष्ठत इति नीतिनैपुण्यादिभिः तस्यातिशय उक्तः ।।

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ।। ३८ ।।

दमयतां - नियमातिक्रमे दण्डयताम् अहं **दण्डोऽस्मि** । दण्डस्य तत्पापनिवर्तकत्वात् अतिशयः । **जिगीषताम्** - जिगीषूणां नीतिः जयहेतुभूतानीतिरस्मि । जयहेतुत्वरूपार्थबोधनायैव **नीतिः** - नीतिमतामिति नोक्तम् । **गुह्यानाम्** - अत्र सम्बन्धसामान्य विहिताऽपि षष्ठी । गोप्यगोपकभावरूपविशेषे विश्रान्ता । ततश्च **गुह्यानां** सम्बन्धिषु गोपनेषु वाङ्नियमनरूपं **मौनमस्मि** इत्यर्थः । चैतन्यमात्रस्य पूर्वमुक्तत्वात् ज्ञानशब्देन पुरुषार्थोपयिकमतिशयित**ज्ञानं** - विवक्षितं तद्वतां **तत् ज्ञानमहम्** ।

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ।। ३९ ।।

सर्वभूतानाम् - कार्यावस्थानां सर्वेषां **भूतानां** यच्च **बीजं** तथा तथा परिणामि यदुपादानं तदप्यहमेव प्रतीयमानम् अप्रतीयमानं च यत्तस्य नित्यसृष्टिहेतुभूतस्य सर्वस्यापि ग्रहणार्थं चापि इत्यव्ययद्वयं **मया विना** आत्मभूतेन मया विना **चराचरं** चरमचरं च **यद्भूतं** स्यात् तन्नास्ति सर्वं वस्तुजातम् आत्मभूतेन मया युक्तमेव स्यादित्यर्थः । अनेन पूर्वोक्तास्समानाधिकरण निर्देशाश्शरीरात्मभावनिबन्धना इति शिक्षितम् । निश्शेष वचनाशक्ततां प्रागुक्तां स्मृत्वाऽह -

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ।। ४० ।।

मम दिव्यानां - शुभानां, **विभूतीनां** अन्तोऽवधिः नास्ति न विद्यते । एषमत्प्रदर्शितस्तु विभूतेः विस्तरः उद्देशतः प्रोक्तः । उपाधिभेदेन उक्तः प्रयोजकाकारैः विभूत्युद्धारेण प्रोक्त इत्यर्थः । प्राधान्यतः कथयिष्यामि इत्युक्तं प्रपञ्चितम् । अनुक्तानां प्रधानविभूतीनां संग्राहकमित्युपसंहारः ।

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ।। ४१ ।।

विभूतिमत् - ईशितव्यसम्पन्नं श्रीमद्धनधान्यादिसमृद्धम् **ऊर्जितम्** - ऊर्जा अधीनत्वेन सम्पन्नार्हशीलता अस्य सञ्जातेति तारकादित्वात् इतच्; शुभतमेषु आरम्भेषु उद्युक्तम् इत्यर्थः । एतादृशं **यद्यत्सत्त्वं** - जन्तुजातं **तत्तत् मम** अचिन्त्यशक्तेर्मम **तेजोंशसम्भवं** - तेजः पराभिभवसामर्थ्यं तस्यांशस्य एव सम्भवो हेतुः यस्य तत्तथोक्तम् । शैलांदोलनदोहलिनो मारुतस्य तृणप्रेरणं वेगलेशमात्रभवम् । यद्वत्तद्वदिह इति भावः । अथ सङ्क्षेपादपि संक्षेपेण प्रधानाप्रधानादिसमस्तविभूतिसङ्ग्रहमाह -

अथवा बहुनैतेन किं ज्ञानेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।। ४२ ।।

एतेन उक्तिपर्यवसानरहितेन **बहुना ज्ञानेन** अनेक विभूतिविषयज्ञानेन अपर्यवसितेन तव **किं** - किं प्रयोजनं विभूतिपर्यवसानाज्ञानरूपं **प्रयोजनं** सिद्ध्यति इत्यर्थः । अत एतावन्मात्रं ज्ञेयमित्याह - **विष्टभ्येति** । इदं परस्परविलक्षणतया बहुविधवैचित्र्यवत्तया प्रमाणप्रतिपन्नं कृत्स्नं कारणावस्थं कार्यावस्थं स्थूलं सूक्ष्मं जगच्चेतनं च अहं निरतिशयशक्तिः अहम् । **एकांशेन** महिम्न एकदेशेन विष्टभ्य यथा स्वैरान्नप्रवर्तते । तथा व्यवस्थाप्यस्थितः स्वरूपसद्भावेस्थितौ प्रवृत्तिभेदे च यथामत्संकल्पान्नातिवर्तेत । तथा व्यवस्थाव्यस्थित इति ।।

।। इति श्रीशैलबुक्कपट्टण येन्नाच्चान् दासविलिखितेऽध्यायः दशमः
श्रीमद्गीताभाष्यरहस्यार्थसङ्ग्रहो वृत्तः ।।

एकादशाऽध्यायः

[विश्वरूपसंदर्शनयोगः]

अर्जुन उवाच इति । स्वविषयभक्तियोगनिष्पत्तये तद्विवृद्धये च भगवता विभूति प्रतिपादनपूर्वकं स्वस्य सर्वात्मत्वे कथिते तदेवमेवेति निश्चित्य तथाविधं भगवन्तं द्रष्टुकामोऽर्जुन उवाच इत्यर्थः । तत्रादौ त्रिभिः श्लोकैः स्वस्य कृतज्ञतामास्तिक्यं भक्तिमत्वं च दर्शयति ।

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ।। १ ।।

मदनुग्रहाय - देहात्मभ्रमेण मोहितस्य ममानुग्रहाय अवाप्तसमस्तकामस्य तव न ह्यन्यत्प्रयोजनमिति भावः । **परमं** - गुह्यतमभक्तियोगशेषत्वात् उत्तमम् **अध्यात्मसंज्ञितम्** - आत्मनि वक्तव्यं **गुह्यं** - रहस्यं यद्वचः **'न त्वेवाहम्'** इत्यारभ्य 'योगी भवार्जुन' इत्यन्तं यद्वचनं **त्वयोक्तं** हितप्रवर्तकेन त्वयोक्तं **तेन वचसा अयं मोहः** आत्मविषयो **मोहः विगतः** - विशेषेण गतः अपुनरंकुरम् विनष्ट इत्यर्थः ।

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ।। २ ।।

हे **कमलपत्राक्ष! भूतानां** त्वद्व्यतिरिक्तानां सर्वेषां **भूतानां त्वत्तः भवाप्ययौ** उत्पत्तिप्रलयौ **विस्तरशः** - विस्तरेण **श्रुतौ त्वत्त** इति षष्ठ्यन्ततया परिणाम्यानुषज्यते । तव **अव्ययं** - कालतो विषयतः संख्यातः प्रकर्षतश्च व्ययरहितं **माहात्म्यमपि श्रुतम् ।** अन्तरादित्यविद्याद्युपदिष्टपुण्डरीकाक्षत्वादि विशिष्टाप्राकृतविग्रहवत्वम् अस्मिन्नवतारेऽप्युपलभ्यत इति सूचनाय **कमलपत्राक्षेति** सम्बोधनं वक्ष्यमाणदिदृक्षाद्योतनाय च हि शब्दः ।

एवमेतद्यथाऽऽत्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ।। ३ ।।

हे **परमेश्वर!** अनेन सम्बोधनेन 'भूमिरापः' 'मत्तः परतरं नान्यत्' 'मयि सर्वमिदं प्रोतं' 'बुद्धिर्ज्ञानम्' इत्यादिभिः उक्तम् । हृद्यारूढमिति द्योतितं **आत्मानं त्वं यथात्थ** येन प्रकारेण ब्रवीषि । एतदेवमेव नात्र सन्देह इत्यर्थः । हे **पुरुषोत्तम!** पुरुषोत्तमत्वाद्भवतः का पुरुषवत्त्वया विवक्षमाणे मयि दोषदर्शनं न कार्यमिति भावः । **ऐश्वरम्** ईश्वरस्य तवासाधारणं **रूपं द्रष्टुमिच्छामि** साक्षात्कर्तुमिच्छामि ।

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ।। ४ ।।

हे प्रभो! तत् ऐश्वरं त्वद्रूपं **मया द्रष्टुं शक्यमिति यदि मन्यसे** ततः तस्माद्रष्टुं शक्यत्वात् । **आत्मानं त्वां योगेश्वरत्व**व्यतिरिक्तस्य कस्याप्यसम्भावितानां गुणानां निधे **अव्ययं दर्शय** - निरवशेषं दर्शय अत्र अघटितघटनासामर्थ्यवत्वस्य प्रभुशब्देन द्योतनात्तादृशरूपप्रदर्शने न किञ्चिद्दुष्करम् इति भावः । दिदृक्षिताकारस्यानुष्ठेय योगान्तरं गत्वज्ञापनाय **योगेश्वर** इति सम्बोधनम् । श्रीभगवानुवाच इति श्रोतुं कौतूहलवतार्जुनेन प्रार्थितो भगवानुवाच इत्यर्थः ।

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ।। ५ ।।

हे **पार्थ! नानाविधानि** - प्रत्येकं भूषगायुधलाञ्छनभुजादिबहुप्रकारविशिष्टानि नानावर्णाकृतीनि नानावर्णानि नानाकृतीनि च इत्यर्थः । वासुदेवादिव्यूह भेदेन युगभेदेन सितरक्तपीतकृष्णरूपाणि सुरनरतिर्यगादिसमान नानाविधसंस्थानवन्ती इत्यर्थः । **दिव्यानि** - अप्राकृतानि मे दर्शयितुम् अभिमुखस्य मम **रूपाणि शतशः सहस्रश्च पश्यत शतशः** इत्याद्यानन्त्यपरम् ।

पश्यादित्यान् वसून् रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ।। ६ ।।

पश्येत्यत्र मम रूप इत्यादि **आदित्यान्** द्वादशादित्यान् **वसून्** - अष्टवसून् **रुद्रान्** - एकादशरुद्रान् **अश्विनौ** द्वौ **मरुतः** - एकोनपञ्चाशद्भेदान् मम रूपे पश्येत्यर्थः । अपि च **अदृष्टपूर्वाणि** इदमुपलक्षणम् अश्रुत**पूर्वाणि** इत्यपि बोध्यम् । **बहून्याश्चर्याणि पश्य** त्वयान्यैश्च प्रतिपन्नबुद्धिभिः अनवगतान्यद्भुतानि वस्तूनि अत्रैव रूपौत्येत्यर्थः । महायोगिवंशप्रसूतस्य तव अन्यैः अदृष्टेष्वपि दर्शनयोग्यता अस्तीति द्योतनाय **भारत**त्युक्तिः । श्लोकः ।

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ।। ७ ।।

हे गुडाकेश! इह मम देहे एतस्मिन्ममैव देहे **चराचरं कृत्स्नं जगत् एकस्थं** एकदेशस्थितं **कृत्स्नम्** इत्युक्त्यैकस्थम् इति वचनादेकदेशस्थितत्वं फलितम् । अन्यदपि

यद्द्रष्टुम् इच्छसि धार्तराष्ट्रजयादिकं यदन्यद्द्रष्टुम् इच्छसि तदप्येकदेशस्थमेव **पश्य** इत्यर्थः । निद्राजयवतः तव मद्दर्शनं सुशकम् इति बोधनाय गुडाकेशेत्युक्तिः ।

न तु मां शक्ष्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ।। ८ ।।

माम् - एकदेशस्थितकृत्स्नचराचरविग्रहं **माम्** - अनेनैव परिमितवस्तुग्राहिणा **स्वचक्षुषा द्रष्टुं** साक्षात्कर्तुं **न तु शक्ष्यसे** - शक्तो न भविष्यसि । अतः ते तद्दिदृक्षवे तुभ्यं **दिव्यं** मद्दर्शनक्षमं अप्राकृतं **चक्षुः ददामि । मे** तादृशस्य **मम ऐश्वरं** परस्वरूपसम्बन्धिनं योगम् अपरिमितगुणयोगं **पश्य । सञ्जय उवाच** इति । तत्रत्यानाम् अद्भुतानाम् अवाङ्मनसगोचरत्वात् बहुधा वक्तव्यत्वाच्च । सावधानेन बोद्धव्यमिति ज्ञापयन् धृतराष्ट्रं प्रति सञ्जय उवाच इत्यर्थः । उक्तप्रकारमेवाह -

एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ।। ९ ।।

एवम् पूर्वोक्तया रीत्या **उक्त्वा** वक्तव्यमंशम् अनुशिष्य **ततः** दिव्यचक्षुः प्रदानानन्तरं **महायोगेश्वरः ।** महतां योगानां स्वगतानां परगतानां च महाश्चर्याणाम् **ईश्वरः** - नियन्ता **हरिः** - आश्रितार्तिशमनः श्रीमन्नारायणः **पार्थाय** - पृथायाः पुत्राय अर्जुनाय वात्सल्याभिव्यञ्जकमेतत् । **ऐश्वरं** सर्वेश्वरस्य स्वस्य असाधारणं **परमं** निखिलजगदाश्रयतया सर्वोत्कृष्टं **रूपं दर्शयामास** - राजन्निति धृतराष्ट्रस्य सम्बोधनम् ।

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ।। १० ।।

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ।। ११ ।।

इहैकस्थं जगत्कृत्स्नम् इत्युक्तत्वात् । **अनेकानि** अनेकरूपाणि विजातीयाकाराणि वक्त्राणि नयनानि यस्मिन् तत्तथोक्तम् । **अनेकानि** विजातीयानि **दिव्यानि** - शोभनानि आभरणानि यस्मिन् तत् **दिव्या** इतर विलक्षणा । **अनेका** उद्यताः कार्योन्मुखतया स्थापिता **आयुधाः** । प्रहरणानि यस्मिन् तत् । अत एव अनेकमद्भुतदर्शनं **यस्य** तथोक्तम् । अनवधिकाश्चर्यतया दृश्यमानमित्यर्थः । **दिव्यान्यप्राकृतानि माल्यान्यंबराणि** च तेषां **धरं** दिव्यगन्ध एव अनुलेपनं यस्य, सर्वाश्चर्यमयं 'जगदेतन्महाश्चर्यं रूपं **यस्य**

महात्मनः' इत्युक्तरीत्या आश्चर्यभूतसर्वतत्वाश्रयम् इत्यर्थः । **देवं** - द्योतमानम् **अनन्तम्** - अपरिछिन्नं **विश्वतो मुखं** - सकलदिग्वर्तिमुखम् । अथ देवशब्दनिर्दिष्टां द्योतमानतां विशिनष्टि ।।

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भास्सदृशी सा स्याद्भासस्तस्य महात्मनः ।। १२ ।।

दिवि - आकाशे, **सूर्यसहस्रस्य** - अनन्तानां सूर्याणां भास्तेजः । **यदि युगपदेकदा उत्थिता** अभिव्यक्ततया उत्थिता भवेत् । **सा भास्तस्य महात्मनः** । भासस्तेजसः सदृशी स्यात् तुल्या स्यात् । सञ्जयेन इत्थमुक्त्या अर्जुनस्य दिव्यचक्षुःप्रदानवेलायां सर्वेषाम् अभिव्यक्त्यर्थं सर्वेभ्यः तद्दत्तवान् इति व्यञ्जितम् ।

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ।। १३ ।।

तत्र पूर्वोक्तप्रकारे **देवशरीरे एकस्थम्** - एकदेशस्थितमपि **प्रविभक्तं** - परस्परासङ्कीर्णावस्थानं **पाण्डवः** - अर्जुनः **अपश्यत्** - दृष्टवान् कथं तदा येन रूपेण दर्शयामास तेनैकरूपेण इत्यर्थः ।

ततस्स विस्मयाविष्टो हृष्टरोमा धनञ्जयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ।। १४ ।।

ततः - दर्शनानन्तरं **विस्मयाऽविष्टः** - अत्यद्भुतमिदमित्येवम् अनुसन्दधानः । **हृष्टरोमा** - पुलकाङ्कितसर्वगात्रः **धनञ्जयः देवं शिरसा प्रणम्य** - मनोबुद्ध्यभिमानेन इत्युक्तप्रकारेण साष्टाङ्गं **प्रणम्य कृताञ्जलिः** - बद्धाञ्जलिस्सन् **अभाषत** - अवदत् ।

अर्जुन उवाच इति । **अभाषत** - इत्युक्त्यनन्तरं पुनः अर्जुन उवाच इत्युक्त्या पश्यामि इत्यादिकम् अर्जुनमुखोद्गतमेव इति सूचितम् ।

पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्वानुरगांश्च (दीप्तान्) दिव्यान् ।। १५ ।।

हे **देव! तव देहे सर्वान् देवान्पश्यामि** । तथाभूतविशेषाणां प्राणिविशेषाणां **संघान्** - ब्रह्माणं चतुर्मुखं **कमलासनस्थं** - कमलासने स्थितं तदभिमते स्थितम् **ईशं** - रुद्रं **सर्वान्** - ऋषीन् **दिव्यानुरगांश्च** ।

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप ।। १६ ।।

अनेके - बाहवः, अनेकान्युदराणि, अनेकानि वक्त्राणि, अनेकानि नेत्राणि यस्मिन् तं **त्वां सर्वतोऽनन्तरूपम्** - अपरिच्छिन्नरूपं **पश्यामि । हे विश्वेश्वर! हे विश्वरूप!** विश्वशरीर **अन्तं न पश्यामि, मध्यं न पश्यामि, आदिं च न पश्यामि ।** अनन्तरूपत्वादेव इति भावः । यद्यपि अनन्तत्वाद्देशतः कालतश्च परिच्छेदाभावात् आद्यन्ताभावः सिद्ध्यति न तु मध्याभावः । तथापि आद्यन्तविच्छेदाभावे तदुभयनिरूपणीय मध्यभागो न इति फलिष्यति ।

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वा दुर्निरीक्षं समन्ता-
द्दीप्तानलार्कद्युतिमप्रमेयम् ।। १७ ।।

तेजोराशिं - राशीभूततेजःस्वरूपं **सर्वतो दीप्तिमन्तम् ।** सर्वव्याप्तप्रभाशालिनं **समन्तात्** - विग्रहसर्वावयवावच्छेदेन **दीप्तानलार्कद्युतिं** - प्रज्वलद्धानुवह्निसमकान्तिम् । अत एव **दुर्निरीक्षम् अप्रमेयम्,** दृक्त्वेयत्ताभ्यां परिच्छेत्तुम् अशक्यम् । एतादृशं **त्वां किरीटिनं गदिनं चक्रिणं च पश्यामि ।** अदृष्टाद्भुतरूपदर्शनेऽपि त्वदसाधारणैः किरीटचक्रादिभिः विशिष्टं पश्यामि इत्यर्थः । एतैश्चिह्नैः कृष्ण एवेति प्रत्यभिजानामि इत्यर्थः ।

त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययशशाश्वतधर्मगोप्ता
सनातनत्वं पुरुषो मतो मे ।। १८ ।।

वेदितव्यं 'येनाक्षरं पुरुषं वेद सत्यम्' - इति वेदितव्यतया उक्तम् । **परममक्षरम् - त्वमेव अस्य विश्वस्य परं निधान**माधारः निधीयते अस्मिन् इति व्युत्पत्तेः 'विष्णु संज्ञं सर्वाधारं धामेति' श्रुतिः इह ज्ञेयत्वमव्ययः स्वरूपस्य गुणस्य विभवस्य व्ययो **यस्य**

नास्ति स तथोक्तः । **शाश्वतः** - शश्वतः नित्य इत्यर्थः । तस्य **धर्मस्य गोप्ता** । अवतारः गोप्ता धर्म संस्थापनार्थत्वात् अवतारस्य इति भावः । **धर्मस्य शाश्वतत्वं** - नित्यवेदमूलत्वाद्बोध्यम् ।

यद्वा शाश्वतधर्मो नित्यपुरुषार्थसाधकस्सात्वतधर्मः तस्य **गोप्ता** । अत एव नारायणः सात्वत **धर्मगोप्ता** - इत्युच्यते । **सनातनः पुरुषः त्वमेव मतः** । 'वेदाहमेतं पुरुषं महान्तम्' इति मुमुक्षूपास्यत्वेन उक्तः । पुरुषस्त्वमेवेति **मे मतः** ।

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वा दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदन्तपन्तम् ।। १९ ।।

अनादिमध्यान्तम् - आदिमध्यान्तरहितम् उत्पत्तिविवृद्धिविनाशरूपविकार **रहितम्** - इत्यर्थः । **अनन्तवीर्यम्** - वीर्यशब्दः सन्नियोगशिष्टानां ज्ञानशक्त्यादीनां प्रदर्शकः । निरवाधिकज्ञानशक्तिबलैश्वर्यवीर्यतेजश्शालिनम् इत्यर्थः । **अनन्तबाहुं** - बाहुशब्दः प्रदर्शकः । असंख्येय **बाहुपादाः** । पूर्वत्रानेकत्वमात्रमुक्तम् । अत्र असंख्येयत्वमुच्यत इत्यपुनरुक्तिः **शशिसूर्यनेत्रं** - शशिसूर्ययोः प्रसादप्रतापकरनेत्रम् इत्यर्थः । तेन अनेकनेत्रोक्त्या न विरोधः । **दीप्तहुताशववक्त्रं** - दीप्तोहुताश इव वक्त्रं यस्य तं तथोक्तम् । सर्वजगत्प्रतपने समर्थवदनमित्यर्थः । **स्वतेजसा** स्वकीयेन **तेजसा इदं विश्वं तपन्तं त्वां पश्यामि** - साक्षात्करोमि ।

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ।। २० ।।

द्यावापृथिव्योः - द्यावापृथिवीशब्दितोर्ध्वाधरलोकयोरिदमन्तरमयम् अवकाशः । त्वया **व्याप्तं** सर्वा दिशश्च त्वया व्याप्ताः । तव **इदमुग्रं** - भयंकरम् **अद्भुत**मत्याश्चर्यावहं-रूपं विग्रहं **दृष्ट्वा लोकत्रयं** शत्रुमित्रोदासीनरूपो जनस्सर्वोऽपि **प्रव्यथितं** - प्रकृष्टव्यथा युक्तमासीत् ।

अमी हि त्वा सुरसङ्घा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ।। २१ ।।

अमीसुरसंघाः त्वा त्वां **विशन्ति** - हृष्टमनसः सन्त उत्कृष्टाः समीपं **विशन्ति** - इत्यर्थः । केचित्तेष्वेव **केचित्** - भीतास्सन्तः **प्राञ्जलयः** - बद्धाञ्जलिपुटौ **गृणन्ति**

स्वज्ञानानुगुणं स्तुतिवाक्यानि **गृणन्ति;** - गृणन्ति इत्युक्त्या न स्वयं स्तुतिं कुर्वन्ति किन्तु स्तुतिरूपाणि वेदवाक्यानि पठन्ति इति फलितम् । **महर्षयः** - भृग्वादयः सिद्धसङ्घाः सनकसनन्दनप्रमुखाः **स्वस्ति इत्युक्त्वा पुष्कलाभिः** - समग्राभिः **स्तुतिभिः त्वां** - समस्तकल्याणगुणाकरं स्तुवन्ति । अत्र स्वस्ति इत्युक्तेत्यनेन सेव्यसन्दर्शनेन सेवकस्य **स्वस्ति** - इत्युक्तिः उचितेति ध्वनितम् ।

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसंघा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ।। २२ ।।

रुद्रा - एकादश **वसवो** - अष्टा ये च **साध्या देव**योनि विशेषा **विश्वे** - विश्वेदेवा **अश्विनौ मरुतः** - मरुद्गणः **ऊष्मपाः** - पितरः 'ऊष्मभागा हिं पितर' इति हि श्रुतिः । **गन्धर्वयक्षासुरसिद्धानां सङ्घा** - एते **सर्वे त्वां** - त्वां विस्मिताः सन्तः **वीक्षन्ते** - पश्यन्ति ।

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ।। २३ ।।

हे **महाबाहो !** तव बाहुबलसामर्थ्यमेव एतेषां भयसम्पादकम् इति बोधनाय, इत्थं सम्बोधनं महदपरिच्छिन्नं **बहुवक्त्रनेत्रं बहुबाहूरुपादं बहूदरं** - बहुजठरं **बहुदंष्ट्राकरालं** - बह्वीभिर्दंष्ट्राभिः **कराळं ते रूपं** - विग्रहं **दृष्ट्वा** - लोकामित्रामित्रोदासीनरूपास्सर्वे जनाः **प्रव्यथिताः** - अतीव भीताः । तथा **अहमपि** प्रव्यथितः ।

नभस्स्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वा प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णोः ।। २४ ।।

नभश्शब्दोऽत्र परमव्योमशब्दितनित्यविभूतिपरः । **तत्स्पृशं** - तदप्यभिव्याप्तम् । अत एव **दीप्तम् अनेक वर्णं** प्रति नियतानन्तावयववर्तिभिः सितासितपीतरक्तादिवर्णैः, किमीरितं - व्यात्ताननं विवृतास्यं **दीप्तविशालनेत्रं** - प्रद्योतमानविस्तीर्णनयनं **त्वा** - त्वां **दृष्ट्वा प्रव्यथितान्तरात्मा** - भीतमनाः 'तस्माद्वा एतस्मात्प्राणमयात् अन्योन्तर आत्मा मनोमय' इति वैदिकप्रयोगात् मनस्यन्तरात्मशब्दप्रयोगः । **धृतिं** - धैर्यं देहधारणं वा **न विन्दामि** - शमं मनसश्च इन्द्रियाणां च इति शेषः । हे **विष्णो !** सर्वव्यापिन् ।

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ।। २५ ।।

दंष्ट्राभिः करालानि - भयङ्कराणि । अपि च **कालानलसन्निभानि** - प्रलयकालप्रवृद्धवह्नितुल्यानि **ते मुखानि दृष्ट्वैव** - एतद्दर्शनमात्रादेव इत्यर्थः । प्रसादनार्थं सम्भाषणार्थं मुखदर्शनमेव कर्तुं न शक्यत इत्यभिप्रेत्य पुनरपि **दंष्ट्राकरालानी**त्युक्तिः । दृष्ट्वैवेत्येवकारश्च **दिशो न जाने म एव तातिः** । अन्यत् ज्ञानं तु न स्यादिति भावः । **शर्म सुखं न लभे जगन्निवासं** - जगदाश्रयभूतदेवेश ब्रह्मादिदेवानामीश **प्रसीद** - प्रसन्नो भव । यथाऽहं प्रकृतिं गतो भवानि तथा कुर्वित्यर्थः ।

अमी च त्वा धृतराष्ट्रस्य पुत्राः सर्वैः सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ।। २६ ।।

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः ।। २७ ।।

अमी धृतराष्ट्रस्य पुत्राः - दुर्योधनादयः **सर्वे अवनिपालसङ्घैः सह** - सहायभूतनृपतिसङ्घैस्सह, तथा **भीष्मः द्रोणः, सूतपुत्रः** - कर्णः अस्मदीयैरस्म - त्सेनान्तरगतैः **योधमुख्यैः सह दंष्ट्राकरालानि** - अत एव **भयानकानि । ते** - तव **वक्त्राणि त्वरमाणाः विशन्ति । केचित्** - दशनान्तरेषु दन्तमध्येषु **चूर्णितैः उत्तमाङ्गैः सन्दृश्यन्ते । दिव्यचक्षुः** - प्रदानसामर्थ्यादागामिनोऽप्यर्थस्य वर्तमानतया साक्षात्कारः । यद्यप्यत्र नानारूपैः पुरुषैः वध्यमाना **विशन्ति । ते** - वक्त्रमचिन्त्यरूपम् । यौधिष्ठिरा धार्तराष्ट्राश्च योधाः शस्त्रैः निकृत्ताविविधैः सर्व एव ।

'दिव्यानि कर्माणि तवाद्भुतानि पूर्वाणि पूर्वे ऋषयस्तुवन्ति ।
नान्योऽस्ति कर्ता जगतस्त्वमेको धाता विधाता च बहुर्भवश्च ।।
तवाद्भुतं किन्नु भवेद्रहस्यं किं वा शक्यं परतः कीर्तयिष्ये ।
कर्ताऽसि लोकस्य यतस्स्वयं विभो त्वत्तस्सर्वं त्वयि सर्वं त्वमेव ।।
अत्यद्भुतं कर्मसु दुष्करं ते कर्माणि मानं च न विद्यते ते ।
न ते गुणानां परिमाणमस्ति न तेजसो नापि बलस्यनर्थेः' ।।

इति श्लोकाः कैश्चित्पठिताः । तथापि श्रीमद्भाष्यकृद्भिः अव्याख्यानान्मयापि अनाहृताः ।।

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ।। २८ ।।

अम्बुवेगाः वेगवन्त्यम्बूनि - प्रवाह इत्यर्थः । **अभिमुखाः** - आभिमुख्यं प्राप्ताः **समुद्रमेव द्रवन्ति** - समुद्रं प्रत्येव गच्छन्ति । **तथा अमी नरलोकवीराः** - तव **विज्वलन्ति** - प्रकाशमानानि वक्त्राण्यभिविशन्ति ।।

यथा प्रदीप्तज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकाः तवापि वक्त्राणि समृद्धवेगाः ।। २९ ।।

यथा पतङ्गाः - शलभाः, **समृद्धवेगाः** - सन्तः **प्रदीप्तज्वलनं** - दीप्यमानमग्निं **नाशाय विशन्ति । तथैव समृद्धवेगाः लोकाः** - तव **वक्त्राण्यपि नाशाय विशन्ति ।** पुनः निवर्तनाशक्यत्वबोधनाय पूर्वदृष्टान्तः नाशस्य स्वेच्छामूलव्यापारहेतुकत्वबोधनाय अयमिति विवेको ज्ञेयः ।

लेलिह्यसे ग्रसमानः समन्ताल्लोकान् समग्रान् वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ।। ३० ।।

ज्वलद्भिः वदनैः - वक्त्रैः **समग्रान्लोकान् जनान्** - ग्रसमानः **समन्ताल्लेलिह्यसे** पुनः पुनरोष्ठपुटलेहनं करोषि । हे **विष्णो!** तव उग्राः तीव्राभासो रश्मयः **तेजोभिः** स्वकीयैः प्रकाशैः **समग्रं** - सर्वं जगत् **प्रतपन्ति** - सन्तापयन्ति । ग्रसनार्थं पचन्तीति भावः ।

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम् ।। ३१ ।।

को भवान्! इति न स्वरूपप्रश्नः न हि **प्रजानामि तव प्रवृत्तिम्** - इत्यनन्तरमेव प्रश्नाभिप्रायज्ञापनात् । अतः **को भवान्** - इत्यस्य किं प्रयोजनको भवानित्यर्थः । किं कर्तुं प्रवृत्तो भवान् इति यावत् । यत **उग्ररूपः** - दर्शयात्मानमव्ययम् इति प्रार्थने कृते उग्ररूपप्रदर्शनस्य किं प्रयोजनम्? इति प्रश्नस्य भावः । **आख्या हि** - स्फुटं कथय । हे **देववर ते** - तुभ्यं **नमोऽस्तु** - सर्वेश्वरत्वान्नमस्कारः न भय प्रयुक्त इति बोधनाय **देववर** इत्युक्तिः । **प्रसीद** - प्रसन्नो भव **भवन्तं विज्ञातुमिच्छामि** - विशेषेण ज्ञातुमिच्छामि । स प्रकारं ज्ञातुम् इच्छामि इत्यर्थः । **तव प्रवृत्तिम्** - अभिमतां वृत्तिं न हि प्रपश्यामि ।

श्रीभगवानुवाच - इति । एवं प्रार्थितो भगवान् त्वद्धितार्थम् एतत्प्रदर्शितवान् इत्युवाच इत्यर्थः ।।

कालोऽस्मिलोकक्षयकृत्प्रवृद्धो
लोकान् समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वा न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ।। ३२ ।।

कलयति - गणयति इति **कालः** - धार्तराष्ट्राणाम् आयुरवसानदिनगणनवानित्यर्थः । **लोकक्षयकृत्** - अत्र लोकशब्दः तद्राजलोकपरः । **प्रवृद्धः** - महतारूपेण प्रवृद्धः । **लोकांस्तान्** - राजलोकान् **समाहर्तुम्** - आभिमुख्येन संहर्तुम् **इह** - युद्धभूमौ प्रवृत्तोऽस्मि । **ऋतेऽपि त्वा** - त्वाऽमृतेऽपि त्वां विनाऽपि **सर्वे न भविष्यन्ति** । त्वत्प्रयत्नमन्तरेणैव ते सर्वे नंक्ष्यन्ति इत्यर्थः । क इत्यत्राह - **येऽवस्थिता** - इति । **तव प्रत्यनीकेषु ये योधा अवस्थिताः** - युद्धायोद्युक्ताः । यदि मदुद्योगमन्तरा ते न भविष्यन्ति । तर्हि किं मामुद्योजयसि इत्यत आह -

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवेते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ।। ३३ ।।

तस्मात् - यस्मादेवं तस्मादित्यर्थः । **त्वमुत्तिष्ठ** - युद्धाय उत्तिष्ठ **यशः** - कीर्तिं **लभस्व समृद्धं** निस्सपत्नं **राज्यं भुङ्क्ष्व एते पूर्वमेव** - त्वदुद्योगात्पूर्वमेव **मयैव निहताः** - हन्तव्यत्वेन सङ्कल्पिताः । मत्सङ्कल्पस्यामोघत्वात्फलसिध्यविनाभावान्निहता इत्युक्तिः । **निमित्तमात्रं भव** - मया हन्यमानानां शस्त्रादिस्थानीयो भव । **मयैव** करणीकृतेन भवता पापनैर्घृण्यपराजयादि शङ्का न कार्येति भावः । अत एव प्राधान्यव्यवच्छेदार्थो मात्रशब्दः । युद्धोपयिकम् असाधारणातिशयं द्योतयन् सम्बोधयति । **सव्यसाचिन्निति** सव्यहस्तकरणका स च समवाय इति धातोः ताच्छील्ये णिनि प्रत्ययो बोध्यः । सव्येन हस्तेनापि शरसन्धानकरः हस्तद्वयेनाऽपि योद्धुं समर्थ इत्यर्थः । अर्जुनस्यास्थानस्नेहकारुण्यधर्माधर्मभयमूलं कथम् भीष्ममित्यादिकं प्रश्नं प्रतिवक्ति ।

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधमुख्यान ।।
मया हतांस्त्वं जहि मा व्यथिष्ठाः युध्यस्व जेतासि रणे सपत्नान् ।। ३४ ।।

द्रोणं भीष्मं जयद्रथं तथा अन्यान् योधमुख्यानपि मया हतान् - कृतापराधतया मयैव हनने विनियुक्तान् **त्वं जहि मा व्यथिष्ठाः** - व्यथां मा कुरु दुर्जयाश्शत्रवः युद्धसिद्धिश्चञ्चलेति व्यथा न कार्येति भावः । धर्माधर्मभयादिकं तु पृष्ठतः करोमि इति

बोधनाय द्रोणाद्युपादानं **युध्यस्व** - यत एवं ततो युध्यस्व इत्यर्थः । **रणे सपत्नान्** - शत्रून् जेतसि जेष्यसि **जेतासि** - इति न पदद्वयम् । तथात्वे तृन्नन्तं तृजन्तं वा स्यात् उभयमप्यनुपपन्नम् । एकत्र द्वितीयायोगात् । अन्यत्र भविष्यदर्थकत्वासिद्धेः । अतो मध्यमपुरुषैकवचनमेकं पदम् इति बोध्यं, न एतेषां वधे तव नृशंसतासम्भवः । अपि तु जय एव लभ्यत इति भावः । अनुकूलेष्वानृशंस्यं गुणः । एते च प्रतिकूला इति बोधनाय सपत्नशब्दः ।

सञ्जय उवाच - इति । इत्थं भगवत्यभिदधति तच्छ्रवणानन्तरभाविनीम् अर्जुनस्य वृत्तिं सञ्जयो धृतराष्ट्राय आह इत्यर्थः ।

एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ।। ३५ ।।

एतत् - पूर्वोक्तमाश्रितवात्सल्यप्रदर्शकं **वचनं श्रुत्वा** - **नमः** - नमस्कारं कृत्वा नन्तव्यः परमश्शेषीशेषानन्तार ईरिता इत्युक्तार्थानुसन्धानेन वाक्यश्रवणमात्रान्नमस्कृत्य **भीतभीतः** - अत्यन्तभीतस्सन् **किरीटी** - अर्जुनः **भूयः प्रणम्य कृताञ्जलिः** - बद्धाञ्जलिपुटः **वेपमानस्सन् कृष्णं सगद्गदं** प्राह - भीतस्य भयनिवर्तनेन निर्वृतिप्रदत्वं तस्यैव इत्यभिप्रायेण कृष्णशब्दः 'भारः परं पट्ट किरीट जुष्ट अपि उत्तमाङ्गं न नमेन्मुकुन्दम्' इत्युक्तरीत्या भगवच्चरणारविन्दवन्दनेन किरीट जुष्टं शिरः कृतार्थमिति द्योतयितुं किरीटीत्यर्जुनस्य निर्देशः ।

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः ।। ३६ ।।

स्थाने - इति न सप्तम्यन्तं पदं किन्तु अव्ययं युक्तम् इत्यर्थे वर्तते । हे **हृषीकेश!** जगतत्त्वद्दिदृक्षया समागतं देवर्षि यक्ष रक्षः प्रमुखं **जगत्** - तदप्रकीर्त्या **प्रहृष्यति** - अतिलाभादिवाक्षिमनः **प्रीतिं प्रयाति अनुरज्यते च** - पित्रादिषु पुत्रादिरिव सस्नेहं भवति **रक्षांसि** - प्रतिकूलानि **भीतानि दिशो द्रवन्ति** । **सर्वे सिद्धसङ्घाः** - अनुकूलाः **नमस्यन्ति** । इदं स्थाने युक्तं युक्तताद्योतनार्थमेव **हृषीकेश** इत्युक्तम् ।

कस्माच्च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ।। ३७ ।।

हे **महात्मन्! गरीयसे** - गुरुतराय **ब्रह्मणः** चतुर्मुखस्यापि **आदिकर्त्रे** - आदिभूताय कर्त्रे **ते** - तुभ्यं **कस्मान्न नमेरन् न** - नमस्कुर्युः अनन्तत्रिविधपरिच्छेद-

शून्यदेवेशब्रह्मादिदेवानामपि नियन्तः **जगन्निवास** - जगति निवासो यस्य सर्वान्तर्यामिन् इत्यर्थः । **त्वमक्षरं** - न क्षरति इति अक्षरं नित्यं जीवात्मतत्त्वं त्वमेव **सदसत्** - विभक्तनामरूपतया सच्छब्दनिर्दिष्टं कार्यावस्थम् असत् अविभक्तनामरूपतया कारणावस्थं चिदचित्तत्वं **तत्परमं** - तदुभयविलक्षणां यन्मुक्तात्मस्वरूपं तत्तत्स्वरूपं **त्वम्** ।

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ।। ३८ ।।

आदिदेवः पुराणपुरुषः अस्य विश्वस्य परं निधानम् - आधारश्च **त्वं वेत्तासि** । सर्वोऽपि वेत्ता त्वमेवासि **वेद्यं** च सर्वं **त्वमेवासि** - परं सर्वोत्कृष्टं **धाम** - स्थानं च त्वमेव कुत इत्यत्राह - **त्वया ततं** - स्रवमप्यन्तर्यामितया व्याप्तं ततश्च सर्वस्यापि मच्छरीरत्वात् त्वमेव इत्यर्थः । अत एव **अनन्तरूपेति** सम्बोधनम् - अनन्तरूपत्वादेव वाय्वादिशब्दवाच्यस्त्वमेव इत्याह -

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ।। ३९ ।।
नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।

वाय्वादयस्त्वमेव 'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' । 'अग्निं यमं मातरिश्वानमाहुः' 'ब्रह्मा नारायणः शिवश्च नारायणः शक्रश्च नारायणः' इत्यादिकम् इह भाव्यम् । **प्रपितामहश्च** - सर्वासां प्रजानां पितरः प्रजापतयः तेषां पिता ब्रह्मा तस्यापि **पिता प्रपितामहश्च** त्वं वाय्वादीनाम् आत्मतया तत्तच्छब्दवाच्यं त्वमेव इत्यर्थः । **ते** - तुभ्यं **नमोऽस्तु** - सहस्रकृत्वोऽपि तुभ्यमेव **नमोऽस्तु** - पुनश्च भूयः बहुशः **नमो नमश्च** सर्वोऽपि नमस्कारस्तुभ्यमेवास्तुत्वं विष्णुरुरुगायौ नमस्य इति श्रुतौ । तवैवनन्तव्यता विधातापि इति भावः । **ते पुरस्तान्नमः** - अथ पृष्ठतः पश्चादपि **ते नमः** हे **सर्वसर्वात्मन्! ते सर्वत एव नमोऽस्तु** । तवेव सर्वात्मकत्वं सहेतुकत्वमाह -

अनन्तवार्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ।। ४० ।।

अत्र **अनन्तवीर्येति** - सम्बोधनम् । यद्वा अनन्तमपरिच्छिन्नं **वीर्यं** - सामर्थ्यं तेन **अमितः** - इदमित्थमिति निश्चेतुमशक्यः । **विक्रमः** - पादविन्यासो यस्य तादृशस्त्वं **सर्वं समाप्नोषि** - सम्यक् आप्नोषि **ततः सर्वोऽसि** सर्वशब्दवाच्योऽसि इत्यर्थः ।

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेमं मया प्रमादात्प्रणयेन वापि ।। ४१ ।।

यच्चापहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ।। ४२ ।।

तव - सर्वेश्वरेश्वरस्य तव **इदम्** इदमिति निर्दिश्यमानं **महिमानं** - माहात्म्यं **अजानता मया प्रमादात्** - अनवधानात् प्रणयेन वापि चिरपरिचयेन वापि **सखेति मत्वा** - मम वयस्य इति मत्वा **हे कृष्ण! हे यादव! हे सखा!** इति **प्रसभं** विनयोपेतं **यदुक्तम्** अपहासार्थम् **असत्कृतोऽसि** सत्कारार्हस्त्वम् **असत्कृतोसि** इति यत् । अथवा **विहारशय्यासनभोजनेषु** सह कृतेष्विति शेषः । **एक** एव वा एकान्ते **वा** असत्कृतोऽसि समक्षम् आभिमुख्येन वा असत्कृतोऽसि इति यच्च **तत्तत्** तत्सर्वमपि **अप्रमेयं त्वां क्षामये** - आश्रितरक्षणव्रतान् **अच्युत** - इत्यच्युत इति खलु तपसामेति बोधनाय अच्युतेति सम्बोधनम् ।

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ।। ४३ ।।

चराचरस्य - स्थावरजङ्गमात्मकस्य जगतः **पितासि** - जनकोऽसि, रक्षकोऽसि च **अस्य** जगतः गुरुश्चासि । अतः **त्वं** - त्वमेव **गरीयान्** - गुरुतरः, पूज्यश्च । हे **अप्रतिम - प्रभाव** - न विद्यते प्रतिमा साम्यं यस्य **सोऽप्रतिमः** तादृशः प्रभावो यस्य तस्य सम्बोधनम् । निस्तुल्यनिरवधिकमाहात्म्येत्यर्थः । लोकमयेऽपि **अन्यस्त्वत्समो नास्ति ।** कारुण्यादिना त्वत्समः कोऽपि नास्ति । **कुतोऽभ्यधिकः?** समस्यैवाभावेन अधिकस्यासंसारिकत्वादिति भावः ।

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायाऽर्हसि देव सोढुम् ।। ४४ ।।

यस्मात् पूज्यतमो निस्समाभ्यधिकसत्वं **तस्मादीशं** नियन्तारं **ईड्यम्** - स्तुत्यं **प्रणम्य** - साष्टाङ्गंनत्वा **कायं प्रणिधाय** - प्रकर्षेण निधाय नीचैः कृत्वा **त्वां प्रसादये पुत्रस्य पितेव सख्युः सखेव प्रियः** त्वं हे देव **प्रिया** मह्यं **सोढुमर्हसि** । यथा कृतापराधाय पुत्राय पिता प्रसीदति । यथा च सख्ये सखा तथा प्रियः परमकारुणिकस्त्वं **प्रियाय** मह्यं प्रसीदेति भावः ।

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ।। ४५ ।।

अदृष्टपूर्वं - पुरा कदाचिदप्यदृष्टं रूपं **दृष्ट्वा हृषितोऽस्मि** - हृष्टोऽस्मि, **मे मनः भयेन च** - अत्युग्ररूपसन्दर्शनजनितभीत्या **प्रव्यथितं** - अत्यन्तं व्यथितम् । हे **देव! तदेव रूपं मे दर्शय** यत्सुखेन मया द्रष्टुं शक्यं तदेव दर्शय इत्यर्थः । **देवेश जगन्निवास** जगदाश्रय । अत्र **देव** इत्यनेन क्रीडापरवशत्वात्तव-तादृग्रूपप्रदर्शकत्वम् उचितम् । देवशब्दितेन्द्रियप्रेरकत्वबोधकेन देवेशेत्यनेन इन्द्रियोत्तममनः क्षोभ्यकत्वम् अनुचितम् । **जगन्निवास** इत्यनेन जगदन्तर्गत मादृशाभिमतकरणमुचितमिति सूचितम् ।

करीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ।। ४६ ।।

किरीटिनम् - किरीटं शिरोभूषणं **तद्वन्तं गदिनम्** - प्रशस्तगदं **चक्रं हस्ते** यस्य तथोक्तम् **त्वां तथैव ।** यथावत् रूपदर्शनात्पूर्वम् अनुभूतम्, तथैव इत्यर्थः । **द्रष्टुमिच्छामि चतुर्भुजेन** - चत्वारो भुजा यस्मिन् तेन **तेनैव रूपेण** पूर्वदृष्टरूपेणैव भव हे **सहस्रबाहो!** हे **विश्वमूर्ते!** इदानीं प्रदर्शितं रूपम् उपसंहृत्य **तेनैव रूपेण भव** इति बोधनाय सम्बोधनद्वयम् ।

श्रीभगवानुवाच इति । एवम् अर्जुनेन प्रार्थितो भगवान् प्रसन्नस्सन् उवाच इत्यर्थः ।

मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ।
तेजो मयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ।। ४७ ।।

प्रसन्नेन - त्वय्यनुग्रहबुद्धिमता मया **परं** - सर्वोत्कृष्टं **रूपम् आत्मयोगात् ।** आत्मनः स्वस्य सङ्कल्पात् **तव** अत्यन्तभक्तियुक्तस्य तव **दर्शितम् । तेजोमयं** - तेजः प्रचुरं तेजसां राशिं **विश्वं** सर्वात्मिकम् । **अनन्तम्** अपरिच्छिन्नं आद्यं कृत्स्नस्यादिभूतं **मे** यद्रूपं त्वदन्येन **दृष्टपूर्वं न** भवति । तद्रूपं दर्शितमित्यन्वयः विशुद्धतरस्य दर्शनयोग्यताऽस्ति इति बोधनाय अर्जुन इत्युक्तिः । रूपस्य दुर्दर्शत्वमेव आह -

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवं रूपशशक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ।। ४८ ।।

एवं रूपः - यथावदवस्थितप्रदर्शिताकारः **त्वदन्येन** मयि भक्तिमतस्त्वत्तोन्येन ऐकान्तिकभक्तिरहितेन केनाऽपि **नृलोके** - मनुष्यलोके **द्रष्टुं न शक्यः** भक्तिव्यतिरिक्त-

साधनान्तराणाम् अप्रयोजकतामाह - **न वेदेति ।** केवलैश्चतुर्भिः - **वेदैः** केवलैः **यज्ञैः** केवलैः अध्ययनैः केवलैः दानै...... ? केवलाभिः **क्रियाभिः** केवलैः **उग्रैः तपोभिश्च** भक्तिरहिते । त्वदन्येन द्रष्टुं न शक्य इत्यन्वयः । यज्ञा! ज्योतिष्टोमादयः क्रियाः अग्निहोत्रादय इति विवेकः ।

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ।। ४९ ।।

ईदृक् - ईदृशं बहुकरालवक्त्रादि युतं **घोरम्** - भयङ्करं रूपं दृष्ट्वा **व्यथा मा भूत् विमूढभावो** मोहाविष्टचित्तता सोऽपि माभूत् । तदेव पुराऽभ्यस्तमेव साम्यं चतुर्भुजादिसहितम् । इदं दर्शयिष्यमाणं रूपं **व्यपेतभीः** - विगतभयः **प्रीतमनाः** सन्तुष्टान्तःकरणः **पुनस्त्वं प्रपश्य** सम्यगवलोकय ।

सञ्जय उवाच इति । भगवानर्जुनं प्रति एवमुक्त्वा पूर्वरूपमेव तस्मै दर्शयामासेति राज्ञे सञ्जय उवाच इत्यर्थः ।

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं भूत्वा पुनस्सौम्यवपुर्महात्मा ।। ५० ।।

वासुदेवः - श्रीकृष्णः इति । एवम् **अर्जुनं तथोक्त्वा** - तथैव भवतु इत्युक्त्वा **स्वकं** - स्वकीयं **रूपं** - चतुर्भुजरूपमेव **भूयः** - पुनः, **दर्शयामास पुनस्सौम्यवपुः भूत्वा भीतमेतम्** अर्जुनम् **आश्वासयामास । महात्मा** - सत्यसङ्कल्पः ।

अर्जुन उवाच इति भगवता पूर्वरूपे दर्शिते हृष्टोऽर्जुनो भगवन्तमुवाच इत्यर्थः ।।

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तस्सचेताः प्रकृतिं गतः ।। ५१ ।।

हे **जनार्दन! इदं** पुनः प्रदर्शितं **मानुषम्** - मनुष्यसंस्थानसजातीयं **सौम्यं** दर्शने सुखदं **तव रूपं दृष्ट्वा इदानीं सचेताः** - सच्चित्तः प्रकृतिं गतश्च **संवृत्तः ।** एवं भूतोऽस्मि इत्यर्थः ।

श्रीभगवानुवाच इति । एवं सुखस्थमर्जुनं प्रति भगवान् स्वानुग्रहं **व्यञ्जयन्** उवाच इत्यर्थः ।

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ।। ५२ ।।

दर्शनापेक्षावान्तः न दृष्टवन्त इत्यर्थः । कस्मादित्यत आह -

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवं विधो द्रष्टुं दृष्टवानस्मि मां यथा ।। ५३ ।।

अहं यथा दर्शिताकारोऽहं **वेदैः** - अध्यापनप्रवचनादिविषयैः चतुर्भिः वेदैः **तपसा** - कृच्छ्रचान्द्रायणादि तपसा **दानेन** बहुविधेन दानेन **इज्यया च** - यागैश्च । **एवं विधो द्रष्टुं** न शक्यः । कीदृग्विधः **दृष्टवानसि मां यथा** । यथा त्वं **मां** दृष्टवानसि तथा न शक्य इत्यर्थः ।

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ।। ५४ ।।

अनन्यया - प्रयोजनान्तरशून्यया **भक्त्या** - एवं **विधोहं** तत्वेन **ज्ञातुं तत्त्वेन द्रष्टुं तत्त्वेन प्रवेष्टुं च शक्यः** पूर्वजन्मसुकृतमूलसात्विकसंवादादिजनित यथावच्छ्रवणानुगुणं किञ्चिदानुकूल्यरूपं भक्तिमात्रं ज्ञानहेतुः उत्कटदिदृक्षा गर्भा तु परभक्तिः साक्षात्कारहेतुः । साक्षात्कृतेन परिपूर्णानुभवाभिनिवेशलक्षणा परमभक्तिः प्रवेशे हेतुरिति भावः ।

मत्कर्मकृन्मत्परमो मद्भक्तस्सङ्गवर्जितः ।
निर्वैरस्सर्वभूतेषु यस्स मामेति पाण्डव ।। ५५ ।।

मत्कर्मकृत् - वेदाध्ययनादीनि सर्वाणि कर्माणि मदाराधनरूपाणि इति कर्म कुर्वन् **मत्परमः** अहमेव परमः स्वारब्धानां कर्मणाम् उद्देश्यो यस्य स मत्परमः **मद्भक्तः** मत्कीर्तनश्रवणादिकं विना आत्मधारणमलभमानः **सङ्गवर्जितः** मदेकप्रियत्वेन तदितरसङ्गम् । असहमानः तृषितोऽमृतधारायां तृणादिनिरोधे यथा तत्सङ्गं न सहते । तथा इतर सङ्गमसहमानः इत्यर्थः । अत एव **सर्वभूतेषु निर्वैरः** - वैररहितः परमात्मनि रिक्ततया तदितरविरक्ततया च सांसारिकक्षुद्रसुखदुःखयोः उपेक्षकत्वात् तन्निवर्तकेषु तत्प्रवर्तकेषु च द्वेषो नास्ति इति भावः । एवम्भूतो **यस्स माम् एति** - मां प्राप्नोति ।।

।। श्रीशैलबुक्कपट्टण येन्नाच्चान् दासविलिखितेऽध्यायः एकादशः
गीताभाष्यरहस्यार्थसङ्ग्रहो वृत्तः ।।

द्वादशाऽध्यायः
[भक्तियोगः]

अथ अस्मिन् अध्याये प्रसक्ताया भक्तेः त्रैविध्यादिकमुच्यते ।

अर्जुन उवाच इति । मत्कर्मकृदित्यादिना भगवतोक्तस्य भक्तियोगस्य विशेषं ज्ञातुमर्जुन उवाच इत्यर्थः ।

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ।। १ ।।

एवं मत्कर्मकृत् इति भवदुक्तप्रकारेण **सततयुक्ताः -** सततयोगमाशंसमानाः भगवन्तं त्वामेव परं मन्यमानाः **ये भक्ताः त्वां पर्युपासते -** परिपूर्णम् उपासते । पूर्वोक्तगुणविभूत्यादिविशिष्टमुपासते । **ये चापि** भक्ताः **अव्यक्तं** चक्षुरादिकरणेन अभिव्यक्तम् अक्षरं प्रत्यगात्मानं **पर्युपासते** इत्यनुषङ्गः । **तेषां** मध्ये **के योगवित्तमाः -** योगिश्रेष्ठाः परमात्मोपासकानां प्रत्यगात्मोपासकानां मध्ये के उत्तमा इत्यर्थः ।

पंचविंशकमव्यक्तं षड्विंशं पुरुषोत्तमः ।
एतज्ज्ञात्वा विमुच्यन्ते यतयश्शान्तबुद्धयः ।।

इति यमस्मृतेः । प्रत्यगात्मनो व्यक्तशब्देन निर्देशः । उभयोपासकयोः योगित्वं च उक्तम् उत्तमत्वं च शीघ्रगामित्वेन बोध्यम् ।

श्रीभगवानुवाच इति । उभयोर्मध्ये स्वोपासकस्यैव शीघ्रगामित्वम् इतरस्य विलम्बिततत्वं च भगवानर्जुनं प्रति उवाच इत्यर्थः ।।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ।। २ ।।

मनः प्राप्य विषयं मनः **मयि -** परमप्राप्यभूते मयि **आवेश्य -** अत्यर्थं प्रियत्वेन निवेश्य **परया श्रद्धया उपेताः नित्ययुक्ताः -** नित्ययोगमाशंसमानाः **ये उपासते ते मे मम युक्ततमाः ।** योगवित्तमा **मताः** मां सुखेन अचिरात् एव प्राप्नुवन्ति इति **मता** इत्यर्थः । अक्षरोपासकस्यापि उपायतया भगवति चित्तावेशसाम्येपि प्राप्यतया तदभावात् एकाकारेण तत्सूचनाञ्च, तद्वैलक्षण्यसिद्धिः अथैतदपेक्षया अक्षरोपासकस्य निकर्षमाह - **ये तु** इत्यादिभिः त्रिभिः श्लोकैः ।

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ।। ३ ।।

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ।। ४ ।।

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ।। ५ ।।

अनिर्देश्यं प्रकृतिविवक्तत्वेन निर्देशदशायां प्रकृतिपरिणामरूपदेहवाचिदेवादि-शब्दानिर्देश्यत्वात् अनिर्देश्यम् । अत एव **अव्यक्तं** देहादन्यत्वेन चक्षुरादिभिः अनभिव्यक्तम् । **सर्वत्रगमचिन्त्यम् - सर्वत्रगं** - देवतिर्यगादिदेहेषु वर्तमानमपि तद्विजातीयतया तेन तेन रूपेण चिन्तयितुम् अनर्हम् । तत एव **कूटस्थं** सर्वसाधारणतत्तद्देवाद्यसाधारणाकार-सम्बन्धम् इत्यर्थः । अपरिणामित्वेन स्वासाधारणाकारान्न चलति - न च्यवति **इत्यचलम्** । तत एव **ध्रुवं** - नित्यं **अक्षरं** - प्रत्यगात्मानम् **इन्द्रियग्रामं** चक्षुरादिबाह्योन्द्रियवर्गं **सन्नियम्य** - सम्यक् नियम्य स्वस्वव्यापारेभ्यो निवर्त्य **सर्वत्र** सर्वशरीरस्थेषु आत्मसु **समबुद्धयः** । ज्ञानैकाकारतया आत्मा तुल्यः देवाद्याकारवैषम्यं तु कर्मनिर्मितदेहगतमिति मन्यमानाः अत एव **सर्वभूतानां हिते रताः** । एवम्भूताः सन्तः **पर्युपासते** निश्चलमनसा उपासते । तेऽपि प्रत्यगात्मोपासनपरा अपि **मां** - मत्समानाकारम् असंसारिगमात्मानं प्राप्नुवन्त्येव इत्यर्थः । **तेषां** प्रत्यगात्मोपासकानां **क्लेशोधिकतरः** अत्यन्तमतिशयितः कुतः? **अव्यक्तासक्तचेतसां** यतास्ते चक्षुराद्यनभिव्यक्तात्मस्वरूपासक्त मनसः तावन्मात्रात्कथम् इत्यत आह - **देहवद्भिः** **अव्यक्ता** - अव्यक्तसम्बन्धिनी **गतिः** - मनोवृत्तिः **दुःखं** यथा तथा **अवाप्यते** देहवन्तो हि देहमेवात्मानं मन्वते । न तु तदतिरिक्तमव्यक्तात्मानं सुखेन जानन्ति इत्यर्थः । स्वोपासकानां युक्ततमत्वं सुव्यक्तमाह -

ये तु सर्वाणि कर्माणि मयि सन्नस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ।। ६ ।।

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ।। ७ ।।

सर्वाणि कर्माणि देहधारणार्थानि लौकिकानि यागदानहोमादीनि वैदिकानि च इत्यर्थः । बहुवचनसर्वशब्दाभ्यां सपरिकराणि इत्यपि लभ्यते । **मयि** सर्वकर्माराध्ये **मयि सन्न्यस्य** - आत्मप्रवणमनसासमर्प्येत्यर्थः । **मत्पराः** मदेकप्राप्याः **अनन्येनैव** - अनन्यप्रयोजनेनैव **योगेन मां ध्यायन्त उपासते** । अत्यर्थ प्रियाणि कीर्तनप्रणामस्तुति-ध्यानादीनि फलापेक्षां विना भगवत्प्रियत्वेन अनुतिष्ठन्त **उपासते** । **तेषां मय्यावेशित**

चेतसां मयि विन्यस्त मनसां तेषाम् इत्यर्थः । **मृत्युसंसारसागरात्** मत्प्राप्तिविरोधितया मृत्युतुल्यरूपः संसारसागरः सागरवद्दुःखगाहस्संसार इत्यर्थः । तस्मात् अचिरादचिरादेव **समुद्धर्ता भवामि ।** अथोक्तार्थं श्रोतरि अर्जुने निवेशयति ।

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ।। ८ ।।

मय्येव परप्राप्ये मय्येव **मन आधत्स्व** मनस्समाधानं कुरु । **मयि बुद्धिं निवेशय** बुद्धिः अध्यवसायः प्रियमेव परमप्राप्यमिति मय्यध्यवसायं कुरु इत्यर्थः । **अत ऊर्ध्व**मध्यवसायनिवेशनानन्तरं **मय्येव निवसिष्यसि ।** दृष्टादृष्टसर्वप्रकाररक्षके मयि आचार्ये शिष्यवत् पुत्रवत्स्थितो भविष्यसि । निर्भरो भविता इति भावः ।

यद्वा - **मय्येव निवसिष्यसि** मुक्तवद्भविष्यसि इत्यर्थः । इत्थं भगवदुपासनस्य साध्यनिष्पादने शैघ्र्योत्सुखोपादानत्वाच्च । श्रैष्ठ्यमुक्तम् । तस्मिन्नधिकुरुष्व इत्यर्जुनं प्रत्यनुशिष्टम् । अथ विषयवासनाकृष्टमनसः अत्यन्तादृष्टपूर्वे त्वयि कथं चित्तसमाधानं शक्यत इत्यर्जुनाशयमुन्नीय तदुपायमुपदिशति ।

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ।। ९ ।।

अथ शब्दः प्रश्नार्थः । यद्यर्थो वा **मयि** निर्दोषसमग्रकल्याणगुणे मयि **चित्तं** मनः **समाधातुं न शक्नोषि -** ततः सहसैव चित्तसमाधानस्य अशक्यत्वात् । **अभ्यासयोगेन** निरतिशयप्रीतिगर्भस्मृत्यभ्यासयोगेन मां हेयप्रत्यनीककल्याणैकतानं **माम् आप्तुम् इच्छा** अभ्यासयोगेन चित्तसमाधानं कृत्वा **मां प्राप्नुम्** इच्छा इत्यर्थः ।

ननु भोगेषु सक्तस्य मनसो दुर्निग्रहत्वात् गुणवति विशुद्धेपि त्वयि अभ्यासो न शक्यः वासनानुरोधात्कर्मस्वेव मनः प्रवर्तत इत्यर्जुनाभिप्रायमुन्नीयपरिशीलनजातीयम् अभ्यासोपायं दर्शयति ।

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ।। १० ।।

पूर्वश्लोकात् अथ इत्यनुषज्यते । **अभ्यासेऽप्यसमर्थो** यदि निरतिशय-प्रेमगर्भस्मृत्यभ्यासेऽप्यसमर्थो यदि इत्यर्थः । **मत्कर्म परमो भवमदर्थमपि कर्माणि** इति यज्ञादिकर्मणां पृथङ्निर्देशात् मत्कर्मशब्दो भगवच्छास्त्रादिसिद्ध दीपारोपणमालाकरण-

सम्मार्जनोपलेपादिभगवत्कैङ्कर्योपयुक्तकर्मपरः । मत्कर्मभिरेवं विधैः परम उत्कृष्टो **भव** - अत्यर्थ प्रियत्वेन मत्कर्म आचर इत्यर्थः ।

यद्वा - **मत्कर्मपरा** मत्कर्मासक्तामाज्ञानं यस्य स तथोक्तः । मदर्थमपि अपिर्भिन्नक्रमः **मदर्थम्** - आराधनरूपतया अत्यर्थं मत्प्रियार्थं **कर्माणि** नित्यनैमित्तिकादीनि कुर्वन् **सिद्धिमवाप्स्यसि** । अध्यासयोगमवाप्य मयि स्थिरां मनस्स्थितं लब्ध्वा मत्प्राप्तिरूपां सिद्धिम् अवाप्स्यसि इत्यर्थः । त्वत्कर्मणामतिपवित्रत्वात् प्रतिकर्ममच्चिन्तनाच्च स्मृत्यभ्यासोऽचिरात्सिद्यति इति न उक्ता शङ्का इति भावः । एवमपि स्वार्थेषु कर्मस्वेव निबद्धचित्तस्य कथं त्वदीय-त्वदीयकर्मस्वत्यर्थप्रियत्वेन प्रवृत्तिः संभवेत् । येनैवं स्यादित्याशङ्क्य तदुपायपरं पराकाष्ठाभूतं कर्मयोगं प्रत्यभिज्ञापयति ।

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ।। ११ ।।

अत्रापि अथशब्दो यद्यर्थकः । **मद्योगमाश्रितस्सन्** इति शेषः । मत्प्रियत्वाकारं प्राप्यतम भूतमद्विषयभक्तियोगमाश्रितस्सन् तदपि **कर्तुं** न शक्नोषि । यदि भक्तियोगाङ्कुरम् एतत्कर्म कर्तुं न शक्नोषि यदि इत्यर्थः । ततः **यतात्मवान्**यत मनस्कः पूर्वषट्कोदितं परभक्तिनिष्पादकं अक्षरयोगमाश्रितस्सन् सर्वकर्मफलत्यागं कुरु तदुपायतया - **सर्वकर्मफलत्यागं कुरु** इत्यर्थः । मद्विषयभक्तियोगमाश्रित्य तदङ्कुरे मत्कर्मणि प्रवेष्टुम् अक्षमश्चेत् प्रत्यगात्मविषययोगम् आश्रित्य तदङ्कुरे कर्मयोगे प्रवृत्तो भव इति फलितार्थः । एतत्सर्वमभिप्रेत्य उक्तमन्यत्र -

'तत्र चित्तं समावेष्टुं न शक्नोषि भवान्यदि ।
तदभ्यासपरं तस्मिन्कुरुयोगं दिवानिशम् ।।
तत्राप्यसामर्थ्यवतः क्रियायोगो महात्मनः ।
ब्रह्मणा यस्समाख्यातः तत्परस्सततं भव ।।
करोषि यानि कर्माणि देवदेव जगत्पतौ ।
समर्पय स्वभद्रन्ते ततः कर्म प्रहास्यसि ।।
प्रधानं कारणं योगो विमुक्तेर्दिविजेश्वरः ।
क्रियायोगश्च योगस्य परमं तस्य साधनम्' ।। इति ।

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ।। १२ ।।

अभ्यासात्कीर्तनध्यानार्चनादिस्मृत्यभ्यासात् **ज्ञानं श्रेयः** तदुपायभूतं जीवात्मविषयकज्ञानमेव श्रेयःहिततरम् । यद्यपि साक्षात्साधनस्य न श्रेयस्त्वं तथाऽप्यनधिकारिणां क्रियमाणोभ्यासः परिपक्वफलरसदोहदपटुतरमृदितशलाटुवद्विरस एव स्यादिति व्यपदेशतोऽपास्यापि श्रेयस्त्वमुक्तम् ज्ञानं च तदापरोक्ष्य पर्यन्तं विवक्षितम् । **ज्ञानाद्ध्यानं विशिष्यते ।** जीवयाथात्म्यज्ञानपूर्वकतदपरोक्षज्ञानादपि तत्साधनं जीवात्मध्यानमेव विशिष्यते । अनिष्टन्नात्तस्मान्निष्पन्नमिदमेव श्रेयः इत्यर्थः । **ध्यानात्कर्मफलत्यागः** तस्मादप्यनिष्पन्नात्फलत्यागपूर्वकमनुष्ठितं कर्मैव विशिष्यत इत्यर्थः । **त्यागाच्छान्तिरनन्तरम्** फलत्यागपूर्वकमनुषठितात् कर्मणः अनन्तरमेव शान्तिर्भवति । मनसो रागद्वेषादिकषायनिवृत्तिः भवति इत्यर्थः । यद्यपि पूर्वपूर्वापेक्षया उत्तरोत्तरस्य श्रेयस्त्वं पूर्वमुक्तं तद्रीत्या श्रेयस्त्वमेव वक्तव्यं, न तु साध्यत्वम् । तथापि अनन्तरम् इत्युक्त्या यदनन्तरं यद्दृश्यते । तत्तस्साध्यमेव इति इत्थमुक्तम् । तथा च अनभिसंहितफलतया अनुष्ठितैः कर्मभिः मनश्शान्तिः शान्ते मनसि प्रत्यगात्मध्यानं ध्यानाच्च तदपरोक्ष्यम् । तस्माच्च स्मृत्यभ्यासः । तस्माद्भक्तिः इति तदशक्तस्य पर्वक्रमेण कर्मनिष्ठैव ज्यायसि इति भावः ।

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारस्समदुःखसुखः क्षमी ।। १३ ।।

सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तस्स मे प्रियः ।। १४ ।।

यद्यपि **यो मद्भक्तस्समे प्रियः** इति भक्तिनिष्ठस्यैव एते गुणाः प्रतीयन्ते । तथापि ध्यानात्कर्मफलत्याग इत्यनन्तरमाम्नानात्कर्मयोगाङ्गत्वमेव युक्तम् । भक्तिशब्दस्तु त्रयाणामपि योगानां मात्रया अन्योन्यसङ्गम् इत्युक्त्या भक्तिगन्धरहितयोगस्यैवाभवादुपपद्यते । **सर्वभूतानाम् अद्वेष्टा** करणत्रयेणोपकारं कुर्वतामपि भूतानां द्वेषमकुर्वन् **मैत्रः** तेषु मैत्रीमतिं कुर्वन् हितैषिणामेव बुद्धिं कुर्वन् इत्यर्थः । मदपराधानुगुणमीश्वरप्रेरितानि भूतानि उपकुर्वन्ति कस्यैषां दोष इत्यनुसन्दधान इति यावत् करुणः । तेष्वपि दुःखितेषु करुणां कुर्वन् नाम धातोः क्विबन्तात् पचाद्यच् **करुण** इत्यदन्तः । तत अर्श आदिभ्यो शितिमत्वर्थीयच्छ प्रत्ययः कारुण्यवानित्यर्थः । एतन्मैत्रशब्देऽपि **निरहङ्कारः** निर्गतोऽहङ्कारात् देहात्माभिमानरहितः । अत एव **निर्ममः** - देहेन्द्रियादिषु तत्सम्बन्धिषु ममतारहितः **समदुःखसुखः** अहङ्कारममकारप्रयुक्तयोः सुखदुःखागमयोः हर्षोद्वेगरहितः **क्षमी** - सांस्पर्शिकयोरपि तयोः विकाररहितः **सन्तुष्टः** यदृच्छालाभेन सन्तुष्टः **सततं योगी** सर्वदा प्रकृतिविविक्तात्मानुसन्धानपरः । **यतात्मा** - नियतमनोवृत्तिः **दृढनिश्चयः**

अध्यात्मशास्त्रोदितेष्वर्थेषु सन्देहरहितः **मयि** अहं हि सर्वयज्ञानाम् इत्याद्युक्तस्वभावे **मयि अर्पित मनोबुद्धिः** - मदनुष्ठितकर्मणा अयमेव आराध्यते । आराधितश्चायमेवात्मापरोक्ष्यं साधयिष्यति इति । निवेशित **मनोबुद्धिः** आराध्यत्वेन चिन्तनं मनसोऽर्पणं फलप्रदत्वाध्यवसायो बुद्ध्यर्पणम् इति विवेकः । एवम्भूतः **सः** अन्योमद्भक्तः **यः** कर्मयोगेन मां भजमानः **स मे प्रियः** प्रीतिविषयः तदभिलषितमहं ददामि इति भावः । अथ निर्ममत्वादिफलभूतं लोकोद्वेगकरकर्मत्यागरूपं गुणं विदधत्तत्फलयोगं च दर्शयति -

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यस्स च मे प्रियः ।। १५ ।।

यस्मात् - कर्मयोगनिष्ठात् **लोको नोद्विजते** - उद्वेगं न प्राप्नोति भगवदाराधनात्मक-फलसंगादिरहितकर्मकरतया उद्वेगहेतुकर्म कर्मणाभावात् इति भावः । **यः** - कर्मयोगनिष्ठो **लोकान्नोद्विजते** । उद्वेगं न प्राप्नोति सर्वाविरोधित्वेन तदुद्वेगकर्मकर्तुरेव अभावादिति भावः । **हर्षामर्षभयोद्वेगैः मुक्तः** उपकारापकारादिहेतुभेदाभावात्कञ्चन प्रति तेषाम् अप्रवृत्तेः विमुक्तः । **यस्स च** सोऽपि **मे प्रियः** ।

अनपेक्षश्शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तस्स मे प्रियः ।। १६ ।।

न विद्यते अपेक्षा आत्मव्यतिरिक्तेषु यस्य सो**ऽनपेक्षः शुचिः** जात्याश्रयनिमित्तात् दुष्टादन्नात्कायशुद्धिमान् **दक्षः** । उपयुक्तशास्त्रीय अनुष्ठानसामर्थ्यवान् **उदासीनः** । अविहिते प्रतिषिद्धे च पक्षपातरहितः तत्र अप्रवृत्तस्य इत्यर्थः । **गतव्यथः** - अवर्जनीयेषु शीतोष्णादिषु व्यथारहितः । **सर्वारम्भपरित्यागी** - आरभ्यमाणत्वादारम्भाः व्यापाराः सर्वे च ते आरम्भाः तेषां परित्यागी अनुपयुक्तवागादि सर्वव्यापारपरित्यागीत्यर्थः । **यो मद्भक्तः स मे प्रियः** एतदखिलमपि भक्तिविशिष्टत्वात् विशेषेणैव प्रीतिहेतुः इति बोधनाय पुनःपुनः यो मद्भक्त इत्युक्तिः । अनेन आत्ममात्रापेक्षितत्वं तद्व्यतिरिक्तेषु निरीहत्वं च उक्तम् ।

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यस्स मे प्रियः ।। १७ ।।

यः कर्मयोगनिष्ठः **न हृष्यति** हर्षनिमित्तवस्तुषु प्राप्तेष्वपि न हृष्यति न द्वेषनिमित्तेषु सत्स्वपि **न द्वेष्टि न शोचति** शोकनिमित्ते बन्धुक्षयादौ न शोचति - **न काङ्क्षति ।** यद्विनाशे शोकस्स्यात् । तदपि न काङ्क्षति इत्यर्थः । **शुभाशुभपरित्यागी** - शुभाशुभशब्दौ पुण्यपापपरौ बन्धहेतुत्वाविशेषात्तदुभयपरित्यागी । एवम्भूतो **भक्तिमान् यः स मे प्रियः ।**

समश्शत्रौ च मित्रे च तथा मानावमानयोः ।
शीतोष्णसुखदुःखेषु समस्सङ्गविवर्जितः ।। १८ ।।

तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित् ।
अनिकेतस्स्थिरमतिर्भक्तिमान्मे प्रियो नरः ।। १९ ।।

शत्रौ द्वेष्ये मित्रे - सुहृदि **समः** - समचित्तः सन्निहितेष्वपि तेषु विकाररहितमना इत्यर्थः । **मानावमानयोः** बहूकृता निराकृतौ च समचित्तः । **शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ।** क्वचिदपि विषये सङ्गरहितः **तुल्यनिन्दास्तुतिः** तुल्ये निन्दास्तुती यस्य स तथोक्तः । **मौनी** निन्दन्तं न निन्दति स्तुवन्तं न स्तुवति इत्यर्थः । तदेव मौनित्वं हेतुना स्थापयति-**सन्तुष्टो येन केनचित्** इति यदृच्छागतेन येन-केनाऽपि सन्तुष्टत्वात् अपेक्षाभावेन कञ्चन स्तुतिपूर्वकं न याचते । अदातारं कञ्चनान्यस्तुतितात्पर्येण वा न निन्दति किन्तु मौनीत्यर्थः । **स्थिरमतिः** आत्मनि स्थिरमतिः अत **एवानिकेतः** - निकेतादिष्वसक्तः । एवम्भूतो **भक्तिमान् यस्स मे प्रियः ।** अध्यायोपक्रमे भक्तियोगनिष्ठस्य अक्षरनिष्ठा (च्छ्रैष्ठ्यं)मुक्तं भक्तियोगाशक्तिप्रसङ्गेन अक्षरयोगस्य परंपरया भक्तियोगसाधनत्वं तदपेक्षितगुणाश्चोक्ताः । अथारम्भगतप्रश्नस्य उत्तरं प्रपंचितं निगमयति ।।

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ।। २० ।।

धर्म्यामृतं - धर्म्यं चामृतं धर्म्यामृतं धर्म्यं धर्मादनपेतं अलौकिकश्रेयस्साधनमित्यर्थः । अमृतं तद्वद्भोग्यम् । इदं भक्तियोगात्मकं साधनं **यथोक्तमुपासते** मय्यावेश्य मनो ये माम् इत्युक्तप्रकारेणोपासते अनुतिष्ठन्ति इत्यर्थः । **श्रद्धधाना मत्परमाः** मदेकप्रवणाः **ते भक्ताः अतीव मे प्रियाः** अत्र यथोक्तम् इत्युक्त्या मय्यावेश्य मनः इति श्लोकार्थ एव अत्रापि उक्त इति प्रतीयते । तत्र नित्ययुक्ता इत्युक्त एवार्थोऽत्र मत्परमा इत्यनेन उच्यते **श्रद्धया परयोपेता** इत्यस्यार्थस्तु **श्रद्दधाना** इत्यनेन उच्यते । **ते मे** युक्तताम मता इत्यस्यार्थस्तु **भक्ता** इति **मेऽति प्रिया** इति । अतः स एव अत्रोपसंहृत इति सिद्धम् । पूर्वोक्तानामप्यन्येषां भक्तत्वमस्ति इति तद्वैलक्षण्याय 'ज्ञानी त्वात्मैव मे मतम्' इत्युपक्रम्य 'स महात्मा सुदुर्लभः' इत्युक्तम् । निरतिशयप्रियत्वद्योतनाय च अतीव मे प्रिया इत्युक्तम् ।।

श्रीशैलबुक्कपट्टण येन्नाच्चान् दासविलिखितेऽध्यायः द्वादशः ।
श्रीगीताभाष्यरहस्यार्थ सङ्ग्रहो वृत्तः ।।

त्रयोदशाऽध्यायः

[क्षेत्रक्षेत्रज्ञविभागयोगः]

एवं प्रथमषट्के प्राप्युपायभगवदुपासनाङ्गभूतं प्राप्तुर्जीवस्य याथात्म्यज्ञानं ज्ञानयोगकर्मयोगसाध्यमुक्तम् । द्वितीयषट्के प्राप्यभगवत्तत्वयाथात्म्यतन्माहात्म्य-ज्ञानपूर्वकैकान्तिकभक्तियोगः प्रपञ्चितः । स एव अतिशयितैश्वर्यार्थिनां कैवल्यार्थिनां च तदपेक्षितमपि साधयति इत्युक्तम् । इदानीं तृतीयषट्के षट्कद्वयोदितानि विशोध्यन्ते । तत्र प्रथमं देहात्मनो स्वरूपं देहयाथात्म्यबोधनं देहवियुक्तात्मप्राप्त्युपायं विविक्तात्म-स्वरूपशोधनम् । तथा विधस्य आत्मनो चित्सम्बन्धहेतुं स्वतो विवेकानुसन्धानप्रकाराश्च उच्यन्ते ।

श्रीभगवानुवाच इति । **गतासूनगतासून्** इति प्राक्त्वेनोपक्षिप्तस्य परिशोधनमपृष्टोऽपि अवसरप्राप्तत्वात् अर्जुनं प्रति भगवानुवाच इत्यर्थः ।।

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ।। १ ।।

हे **कौन्तेय! इदं** ब्राह्मणोऽहं स्थूलोऽहम् इत्यात्मसामानाधिकरण्येन प्रतीयमानं भोक्तुः आत्मनोऽर्थान्तरभूतं शरीरं **क्षेत्रमित्यभिधीयते** । शरीरयाथात्म्यविद्भिः इति शेषः । **क्षेत्रम्** इत्युक्त्या केदारादेः देवदत्तस्येव आत्मनो भोगस्थानतया शरीरस्य भोक्तॄन् जीवान्प्रति भोग्यत्वं तदपेक्षयातिरिक्तत्वं च सूचितम् । कर्मबीजफलोत्पत्तिस्थानत्वात् क्षेत्रमिति वाचोयुक्तिः । यद्वा अत्र देहयाथात्म्यविद्भिः इति न शेषः कार्यः । तद्विद इत्येतदेव विपरिणम्य तद्विद्भिः इत्यनुषज्यते । एतच्छब्दस्य च प्रकृतशरीरपरत्वं स्वीक्रियते । एतत् शरीरं क्षेत्रभूतं **यो वेत्ति** मम मूर्धा मम हस्तौ मम पादौ इत्यवयवशः मम देह इति सङ्घातरूपेण च **यो वेत्ति** - जानाति **तं क्षेत्रज्ञो जीव इति तद्विदः** - आत्मविदः **प्राहुः** - इदमहं वेद्मि इति प्रत्यक्त्वेन सिद्धस्य स्वस्य पराक्त्वेन सिद्धत्वात् वैलक्षण्यं सिद्धमित्याहुः - सामानाधिकरण्यप्रतीतिस्तु प्रबलप्रमाणबाधितत्वात् भ्रान्तिः इति भावः । इत्थं क्षेत्रक्षेत्रज्ञयोः स्वरूपं प्रदर्श्यतया ऊर्ध्वयोरपि स्वशेषत्वम् उद्दिश्य तयोरैक्यभ्रमव्यावृत्त्यर्थं क्षेत्रज्ञे अतिशयं दर्शयति -

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ।। २ ।।

सर्वक्षेत्रेषु - देवमनुष्यादिसर्वशरीरेषु विद्यमानं **क्षेत्रज्ञं चापि मां विद्धि** - मच्छेषं विद्धि । **अपिशब्दात्** क्षेत्रमपि **मां विद्धि** इत्यर्थः । अत्र मदीयं विद्धि इति

सामानाधिकरण्येन निर्देशः । यथा क्षेत्रज्ञस्य ब्राह्मणादिशब्देन शरीरेण सामानाधिकरण्यनिर्देशो ब्राह्मणोऽहं क्षत्रियोऽहमिति । एवं क्षेत्रज्ञो मच्छरीरभूत इति ज्ञापनाय । अत एव **क्षेत्रज्ञं चापि मां विद्धि** इति बद्धावस्थजीववाचिशब्द एव प्रयुक्तः । नात्मानं चापि विद्धि इत्युक्तम् । एतत्सौक्ष्म्यं महायोगिकुलप्रसूतस्य तवैव अनुग्रहमिति बोधनाय **भारत** इति सम्बोधनम् । आत्मनः परमात्मशरीरत्वं च 'यस्यात्मा शरीरम्', 'पूः प्राणिनस्सर्व एव गुहाशयस्य' इत्यादि श्रुतिस्मृतिसिद्धम् । **क्षेत्रक्षेत्रज्ञयोः** परस्परविविक्ताकारयोः शरीरात्मनोः यज्ज्ञानं यन्मदात्मकत्वज्ञानं तदेव **ज्ञान**मिति **मम** सम्मतम् । 'रविकिरणानुगृहीतानि कमलानि कमलानि' इतिवत् द्वितीयकमलपदमिव द्वितीयज्ञानपदं प्रशंसापरम् । तथा च तदेव प्रशस्तमुपादेयं **ज्ञानम्** इति मे **मतम्** इत्यर्थः ।।

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ।। ३ ।।

इदं शरीरमिति पूर्वमुक्तं **क्षेत्रं** शरीरं **यच्च यद्द्रव्यं** यादृक्च - यत्प्रकारं येषाम् आश्रयभूतम् इत्यर्थः । **यद्विकारि** - यद्विकारवत् ये चास्य विकाराः इत्यर्थः । **यतः** - यतो हेतुरुत्पन्नं यस्मै प्रयोजनाय उत्पन्नम् इत्यर्थः । **यत्** - यत्स्वरूपं प्रथमयच्छब्दो जडद्रव्यनिश्चयार्थः । द्वितीयश्च तेष्वन्यतमात्मकत्वसङ्घातात्मकत्वनिश्चयार्थः । **स च** क्षेत्रज्ञश्च **यः** - यत्स्वरूपः **यत्प्रभावश्च** - तत्सर्वं **मे** - मत्तः **समासेन** - संक्षेपेण **शृणु** - शृण्वतोऽप्यर्जुनस्य पुनस्तदुक्तिरवधानार्था ।

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ।। ४ ।।

ऋषिभिः - अलौकिकार्थ**द्रष्टृभिः** पराशरादिभिः **बहुधा** - बहुप्रकारेण सङ्क्षेपतो विस्तरतश्च इत्यर्थः । **गीतं** वर्णितं क्षेत्रक्षेत्रज्ञादिस्वरूपमिति शेषः । श्रीविष्णुपुराणादि जडभरतोपाख्यानादिषु विशदं वर्णितम् इति भावः । **विविधैः** ऋग्यजुस्सामादिबहुप्रकारैः **छन्दोभिः** - वेदैः **पृथक्** - भिन्नभिन्नतया गीतम् । एवं **हेतुमद्भिः** सयुक्तिभिः **निश्चितैः** पूर्वपक्षसिद्धान्तादिप्रदर्शपूर्वं निर्णीतैः **ब्रह्मसूत्रपदैः** ब्रह्मप्रतिपादकसूत्राणि - ब्रह्मसूत्राणि, शारीरकमीमांसा सूत्राणि **तद्गतैश्च** पदैः गीतम् इत्यन्वयः अयमर्थः ।

'आत्मा शुद्धोक्षरश्शान्तो निर्गुणः प्रकृतेः परः ।
पिण्डः पृथग्यतः पुंसः शिरः पाण्यादिलक्षणः ।।
किन्त्वमेतच्छिरः किंनु शिरस्तवतथोदरम् ।
किमुपादादिकं तद्वत्तत्किं वद महामते' ।।

इत्यादिषु क्षेत्रक्षेत्रज्ञविवेकः ।
'इन्द्रियाणि मनोबुद्धिस्सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव च' ।। इति ।

तयोः भगवदात्मकत्वं च महर्षिभिः गीतं 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यारभ्य 'अन्योन्तर आत्मा विज्ञानमयः' इत्यन्तेन क्षेत्रक्षेत्रज्ञयोः विवेकमुक्त्वा अन्योन्तर आत्माऽनन्दमय इति परस्व रूपं निरूप्य 'सच्च त्यच्चाभवत्' इत्यादिभिः क्षेत्रक्षेत्रज्ञयोः तदात्मकत्वमुक्तम् । वेदवाक्यैः 'न वियदश्रुतेः' 'नात्मा श्रुतेः', 'नित्यत्वाच्च ताभ्यः' इति क्षेत्रक्षेत्रज्ञविवेकम् अभिधाय - 'परात्तु तच्छ्रुतेः' इति तयोर्भगवदात्मकत्वं च ब्रह्मसूत्रे निर्णीतमिति । अत्र वेदेभ्यः 'पूर्वम् ऋषिभिः गीतमि'त्युक्तिः उपबृम्हणवाक्यैः विना वेदार्थो दुर्विज्ञेय इत्यभिप्रायेण एवं भूतं क्षेत्रक्षेत्रज्ञयोः माहात्म्यं सङ्क्षेपेण मया उच्यमानं शृण्विति पूर्वेणान्वयः ।।

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः ।। ५ ।।

इच्छा द्वेषस्सुखं दुःखं संघातश्चेतनाधृतिः ।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम् ।। ६ ।।

महाभूतानि - पृथिव्यप्तेजोवाय्वाकाशाः **अहंकारः** - भूतादिः **बुद्धिः** - महत्तत्वम् । **अव्यक्तं** - मूलप्रकृतिः **इन्द्रियाणि दश** - श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि । वाक्पाणिपादपायूपस्थानि पञ्चकर्मेन्द्रियाणि मिलित्वादशकम् । ततोऽतिरिक्तम् **एकं** मनोरूपम् एकादशमिन्द्रियं च इत्यर्थः । **पञ्च च इन्द्रियगोचराः** । शब्दस्पर्शरूपरसगन्धाः **पञ्चेन्द्रिय** विषयाः इत्यर्थः । **इच्छाद्वेषस्सुखं दुःखं चेतनाधृतिः** - चेतनास्याधारः **संघातः** - भूतसंघात **इत्येतत्सर्वं सविकारं** सकार्यं **क्षेत्रं समासेन उदाहृतम्** । अत्र **महाभूतानि** इत्यारभ्य **इन्द्रिय गोचराः** इत्यन्तेन क्षेत्राश्रित तत्त्वोक्तिः । इच्छाद्वेषस्सुखंदुःखम् इति क्षेत्रकार्योक्तिः । अवशिष्टेन तन्निष्पत्युक्तिः इति विवेकः । तथा च प्रकृत्यादिद्रव्यारब्धमिन्द्रियाश्रयभूतम् इच्छादिकार्यं चेतनाधारभूतसंघातरूपं क्षेत्रमिति भावः । अथ इच्छादिवत् क्षेत्रकार्येषु आत्मज्ञानसाधनतया उपादेयान् गुणानाह -

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ।। ७ ।।

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ।। ८ ।।
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ।। ९ ।।
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ।। १० ।।
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थचिन्तनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ।। ११ ।।

अमानित्वम् - अभिजनविद्याधनैः यो गर्वस्समानः तद्वान्मानी तद्रहितो मानी तत्त्वम् उत्कृष्ट जनावधीरणारहितत्वम् इत्यर्थः । **अदम्भित्वं** धार्मिकत्वप्रधायैयत्कर्मानुष्ठानं न पुनष्टोति कर्तव्यता बुद्ध्या स डम्भः तद्रहितत्वम्; अनर्थैकफलपीडारूपव्यापारो हिंसा, तदभावो **अहिंसः क्षान्तिः** परेः पीड्यमानस्यापि तान्प्रत्यविकृतचित्तत्वम् । **आर्जवं -** ऋजुत्वं **वाङ्मनः -** कायवृत्तीनाम् ऐकरूप्यम् **आचार्योपासनम् -** उपासनशब्दोऽत्र प्रणिपतनादिव्यापारपरः प्रणिपतनादिभिः आचार्यसेवानिरतत्त्वम् इत्यर्थः । **शौचं -** रागानृतनिषिद्धभक्षणादिरूपमनोवाक्कायदोषैः वियुक्तत्वं; **स्थैर्यं** स्थिरत्वं अध्यात्मशास्त्रोदितेऽर्थे **बाह्य** कुदृष्ट्यादिभिरक्षोभणीयत्वम् इत्यर्थः । **आत्मविनिग्रहः -** आत्मशब्दो मनःपरः तस्य विनिग्रहः विषयेभ्यो निवर्तनं **इन्द्रियार्थेषु** वैराग्यं इन्द्रियाणाम् अर्थाविषयाः तेषु **वैराग्यं** विरागता दुःखसाध्यत्वदुःखमिश्रत्वनश्वरत्वाद्यनुसन्धानेन उद्वेजनम् **अनहङ्कारः** देहात्मभ्रमराहित्यं **जन्ममृत्युजराव्याधिभिः यद्दुःखं** तज्जन्यं यद्दुःखम् इत्यर्थः । स एव **दोषः** तस्यानुदर्शनं भूयोभूयो**दर्शनम्** अनुसन्धानम् इति यावत् । **असक्तिः** आत्मव्यतिरिक्तप्रतिग्रहेषु सङ्गरहितत्वम् इन्द्रियार्थेष्वित्यादिना सांस्पर्शिकेषु वैराग्यमुक्तम् । इहत्वाभिमानिकेषु इत्यपौनरुक्त्यं **पुत्रदारगृहादिषु** अत्रादिशब्दः क्षेत्रादिपरः **तेष्वनभिष्वङ्गः** अनासक्तिः शास्त्रीयकर्मोपकरणत्वातिरेकेण - आसक्तिशून्यत्वमिति यावत् । **इष्टानिष्टोपपत्तिषु नित्यं च समचितत्वम्** एतेषाम् उपनिपातेषु हर्षद्वेगरहितत्त्वम् । **अनन्ययोगेन -** अन्ययोगराहित्येन देवतान्तरसम्बन्धरहितेन योगेन इत्यर्थः । **अव्यभिचारिणी -** न व्यभिचरितुं शीलं यस्याः सा तथोक्ता । **मयि भक्तिः -** मयि स्थैर्यं **विविक्तदेशसेवित्वं** जनरहितदेशवासशीलत्वम् **अरतिः जनसंसदि** जनशब्दस्सत्त्वोत्तरेतरजनपरः तत्समूहे **अरतिः -** 'अप्रीतिः अहेरिवगणाद्भीतः नैतादृशं ब्राह्मणस्यास्ति वित्तम् । यदेकता

समता सत्यता च' इत्यादिकम् इह भाव्यम् । **अध्यात्मज्ञाननिष्ठत्वं** आत्मनि यत् ज्ञानमद्यात्मज्ञानं तन्निष्ठत्वं तन्निरन्तरानुवृत्तिः तत्त्वज्ञानार्थचिन्तनं तत्त्वज्ञानप्रयोजनं यच्चिन्तनं तत्फलचिन्तनमन्तरेण अन्यचिन्ताराहित्यम् इत्यर्थः । **एतदमानित्वम्** इत्यारभ्योक्तम् **ज्ञानमिति प्रोक्तं ।** ज्ञायते अनेन इति **ज्ञानम् ।** आत्मज्ञानसाधनं प्रोक्तमित्यर्थः । इतः अस्मात् ज्ञानात् यदन्यथाप्रकारान्तरेण **युक्तं तत् अज्ञानम् -** आत्मज्ञानविरोधि ततश्चैतद्व्यतिरिक्तं सर्वं परिहरणीयम् इत्यर्थः । अथैतद्योवेत्ति इति वेदितृत्वलक्षणेन उक्तस्य क्षेत्रज्ञस्य स्वरूपं विशोध्यते ।

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादि मत्परं ब्रह्म न सत्तन्नासदुच्यते ।। १२ ।।

पूर्वोक्तैः आत्मज्ञानसाधकैः अमानित्वादिभिः यत् ज्ञेयमात्मस्वरूपं **तत्प्रवक्ष्यामि** यथावत् वक्ष्यामि । **यज्ज्ञात्वा अमृतं** जन्मजरामरणादिप्राकृतधर्मरहितमात्मानम् **अश्नुते** अनुभवति । **अनादिः** न विद्यते आदिः यस्य तदनादिकारणरहितम् इत्यर्थः । अहमेव परो यस्य **मत्परं** मच्छेषतैकरसमित्यर्थः । **ब्रह्म** बृहत्वगुणयोगितच्चाणोर्जीवस्य शरीरादिना परिच्छेदाभावात् 'स च आनन्त्याय कल्पते' इति स्वरूपाविर्भावदशायां ज्ञानासङ्कोचाच्च ज्ञेयम् । अत एव परं ब्रह्म इति परस्मिन्विशेषणसार्थक्यम् इति भावः । तत् ज्ञेयम् आत्मस्वरूपं सदिति वा असदिति वा न उपपद्यते । कार्यकारणावस्थाद्वयाऽनन्वयात् नामरूपविभागानर्हकारणावस्थासत्वे सदिति वक्तुं शक्यं तदर्हं कार्यावस्थासत्त्वे हि सदिति जीवस्वरूपं च तदुभयरहितमिति । उभयथापि नोच्यत इत्यर्थः । यद्यपि जीवान्व्यससर्जेति कार्यावस्थाप्यस्ति तथा सच्छब्दाभिधेयता शुद्धावस्थायां नामरूपानर्हत्वात् असच्छब्दार्थता च भवति । तथापि कर्मकृतावस्थाद्वयनिषेधे तात्पर्यम् ।

सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखम् ।
सर्वतश्श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ।। १३ ।।

अत्र पादादिशब्दाः तच्छक्तिपराः अशरीरत्वात् अनवयवत्वात् अनिन्द्रियत्वाच्च । यथा श्रुतार्थग्रहणायोगात् । **सर्वतः पाणिपादं -** सर्वपाणिपादकार्यकरणशक्ति **सर्वतोऽक्षिशिरोमुखं सर्वतः श्रुतिमत्** पूर्ववदर्थः । **लोके** यद्वस्तु जातं **तत्सर्वम् आवृत्य** धर्मभूतज्ञानद्वारा व्याप्य **तिष्ठति ।** यथा परंब्रह्म 'अपाणिपादो जवनो गृहीता' तत्तत्करणाभावेऽपि तत्तत्कार्यवत्, तद्वदात्मस्वरूपमपि भवति । 'परमं साम्यमुपैति' इत्युक्तेः । साम्यस्य जगद्व्यापारव्यतिरिक्तस्य सर्वविषयत्वस्य फलपादे समर्थनाच्च इति भावः ।

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ।। १४ ।।

गुणशब्दो अप्रधानार्थः । तथा च **सर्वेन्द्रियगुणाः** सर्वेन्द्रियवृत्तयः तैः **आभासो** बहिः पदार्थाभिव्यक्तिः यस्य तत्तथोक्तम् । शुद्धावस्थायामपि योग्यतास्त्यैवेति भावः । **सर्वेन्द्रियविवर्जितं** स्वभावतः सर्वेन्द्रियविवर्जितमित्यर्थः विनैवेन्द्रियवृत्तिभिः स्वत एव सर्वं जानाति इति यावत् । **असक्तं** स्वभावतो देवादिदेहसङ्गरहितं **सर्वभृत्** देवादिसर्वदेहभरणसमर्थं च 'स एकधा भवति स द्विधा भवति त्रिधा भवति' इति श्रुतम् । द्विधाभवनादिकं च विग्रहद्वारेति भावः । **निर्गुणं** अकर्मोपाधिकप्राकृतसत्वादिगुणभोगरहितं **गुणभोक्तृ च** औपाधिकगुणभोगसमर्थं च ।

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ।। १५ ।।

भूतानां - पृथिव्यादीनां **बहिरन्तश्च** - बहिर्वर्ति अन्तर्वर्ति च इत्यर्थः । पृथिव्यादिभूतानि परित्यज्य अशरीरतया स्थितं सत् बहिर्वर्तते । 'जक्षत्क्रीडन्नममाणः' इत्युक्त स्वच्छन्दवृत्तिषु तदन्तस्थितश्च वर्तते न हि त्रिधा भावादिकं जक्षणादिकं पितृलोककामादिकं च शरीरपरिग्रहं विना उपपद्यते । प्राकृतानाम् अप्राकृतानां वा **भूतानां** सङ्घात एव शरीरमित्यन्तर्वतितापि सिध्यति । **अचरं** स्वभावतो **चरं** चरं देहित्वावस्थायां चरं **सूक्ष्मत्वात् तदविज्ञेयं** तत् आत्मस्वरूपं **सूक्ष्मत्वा**दहमिति प्रतीयमानत्वेऽपि देहादिभ्यः पृथक्त्वेन ज्ञातुम् अशक्यं दूरस्थममानित्वादिगुणरहितानां **दूरस्तम्** - दुर्ग्रहं अन्तिके च तद्वताम् **अन्तिके** - समीपे स्थितम् इति शेषः । सुग्रहमित्यर्थः ।

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ।। १६ ।।

अविभक्तं - स्वरूपेण देवमनुष्यादिविभागरहितं **भूतेषु** - देवादिशरीरेषु **विभक्तमिव स्थितं** देवादिविभागावदिव स्थितं 'देवोऽयम् मनुष्योऽयम्' इति भ्रान्त्या विभक्तत्वेन प्रतीयमानमित्यर्थः । **तत्** आत्मस्वरूपं भूतभर्तृभूतानां देहरूपेण संहतानां पृथिव्यादीनां भूतानां भर्तृभर्तव्यात्तस्मात्पृथग्भूतं ज्ञेयमित्यर्थः । **ग्रसिष्णु** अन्नादीनां चारिकानां ग्रस्यमानानां ग्रसिष्णुग्रस्यमानेभ्योन्यत्वेन ग्रसितृत्वयोगाज्ज्ञातुं शक्यम् इत्यर्थः । **प्रभविष्णुरेतो** गर्भादिरूपेण रसमलधात्वादिरूपेण वा परिणामः तद्धेतुरित्यर्थः । तेनाऽपि देहाद्वैलक्षण्येन ज्ञातुं शक्यमिति भावः ।

ननु शरीरेणैव ग्रासादिकं क्रियमाणं दृश्यते । तत्कथमात्मधर्मत्वेन उच्यते । मैवम्; मृतशरीरे ग्रसनप्रभवाद्यदर्शनात्तथोक्तिः ।

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ।। १७ ।।

तत् - आत्मस्वरूपं **ज्योतिषामपि** - दीपादित्यमणिप्रभादिज्योतिषामपि **ज्योतिः** यथा दीपादीनां विषयसम्बन्धिप्रकाशद्वारा प्रकाशकत्वं तद्वदत्रापि प्रभास्थानीयेन ज्ञानाख्यधर्मेण प्रकाशकत्वमिति भावः । अन्यप्रकाशकान् दीपादीनपि प्रकाशयति इति द्योतनायापिशब्दः **तमसः परमुच्यते** गुणसाम्यावस्थाप्रकृतिस्तमः शब्दार्थः । **तस्मात्**परमन्यत् भोग्यभूतात्तस्मात् भोक्तृतया प्रधानमिति वा निर्गुणः प्रकृतेः पर इत्यादिषु उच्यत इत्यर्थः । तमश्शब्दस्य प्रकृति परत्वं हि 'तमः परे देव एकी भवति,' 'आसीदिदं तमो भूतम्' इति श्रुति-स्मृतिसिद्धम् । **ज्ञानम्** - ज्ञेयं ज्ञानमित्यनन्तरमिति शब्दो बोध्यः । ज्ञानमिति ज्ञेयं ज्ञानैकाकारमिति ज्ञेयमित्यर्थः । **ज्ञानगम्यं** ज्ञायते एभिः इति ज्ञानानि अमानित्वादीनि ज्ञानसाधनानि तैः गम्यं प्राप्यं सर्वस्य मनुष्यादि पिण्डस्य **हृदि** - हृदय कोशे **विष्ठितम्** - विशेषेण स्थितम् । इतरावयवेषु यथा धर्मभूतज्ञानद्वारा स्थितः । तथा नात्र किन्तु स्वरूपेण इति बोधनाय विशब्दः स्थितिश्चात्र सन्निधानं **सर्वस्य** गृहोपि अयमेव व्रीहिः इतिवदाकारैक्यविवक्षया सर्वस्य हृदि **विष्ठित**मित्युक्तिः । उपसंहरन्नुक्तयाथात्म्यज्ञानफलं च आह -

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ।। १८ ।।

इति - पूर्वोक्तप्रकारेण **क्षेत्रं** - क्षेत्रस्वरूपं **तथा ज्ञानम्** । एवमेव ज्ञानसाधनस्वरूपं **ज्ञेयं** - ज्ञातव्यमात्मस्वरूपं च **समासतः** सङ्क्षेपेणोक्तं 'महाभूतानि' इत्यारभ्य 'चेतना धृतिः' इत्यन्तेन क्षेत्रस्वरूपम् । 'अमानित्वम्' इत्यारभ्य 'तत्त्वज्ञानार्थचिन्तनम्' इत्यन्तेन ज्ञानसाधनस्वरूपम् 'अनादिमत्' इत्यादिना 'हृदि सर्वस्य विष्ठितम्' इत्यन्तेन ज्ञेयक्षेत्रज्ञस्वरूपं च सङ्क्षेपेण उक्तम् इत्यर्थः । **एतदुक्त** त्रितयं क्षेत्रयाथात्म्यं तद्विविक्तक्षेत्रज्ञप्राप्त्युपाययाथात्म्यं क्षेत्रज्ञयाथात्म्यं च इत्येत् त्रितयम् इत्यर्थः । **विज्ञाय** सम्यग्ज्ञात्वा **मद्भक्तस्सन्** मद् मम **यो भावः** स्वभावः असंसारित्वं तस्मै **उपपद्यते** योग्यो भवति इत्यर्थः । अथ परस्परविविक्तस्वभावयोः प्रकृतिपुरुषयोः संसर्गः अनादिसिद्धयोर्द्वयोः कार्यभेदः प्रवाहानादेः संसर्गस्य निमित्तं च उच्यते ।।

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ।। १९ ।।

चकार इतरेतरयोगार्थः । ततश्च **प्रकृतिं पुरुषं च इत्युभौ** अन्योन्यसंसृष्टौ इत्यर्थः । **अनादी -** पूर्वावधिविधुरौ **विकारांश्च** बन्धहेतून् इच्छाद्वेषादिकान् **विकारान् गुणान् -** मुक्तिहेतुभूतान्पूर्वोक्तानमानित्वादींश्च **प्रकृतिसम्भवान्विद्धि ।** उभयोः प्रकृतिसम्भवत्वोक्तिः । प्रकृतेरेव हेयत्वोपादेयत्वद्योतनार्था । अथ परस्परसंसृष्टयोः प्रकृतिपुरुषयोः संसर्गविशेषनिबन्धनो व्यापार उच्यते ।

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ।। २० ।।

कार्यशब्दः - साधारणोऽपि भोगायतनाख्यकार्यविशेष परः **कारण**शब्दः ज्ञानकारणपरः । तथा च कार्यस्य शरीरस्य कारणानां समनस्कोभयविध इन्द्रियाणां **कर्तृत्वे** क्रियाकारित्वे स्वव्यापाराश्रयत्वञ्चेत्यर्थः । **हेतुः प्रकृतिरुच्यते ।** पुरुषाधिष्ठिताप्रकृतिरेव कारणमुच्यत इत्यर्थः । क्षेत्राकारपरिणतप्रकृत्याश्रयाभोगसाधनभूताः क्रियाः इति भावः ।

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ।। २१ ।।

पुरुषः - संसृष्टो जीवः **सुखदुःखानां भोक्तृत्वे** हेतुरुच्यते । सुखदुःखानुभवश्रय इत्युच्यत इत्यर्थः । एवम् अन्योन्यसंसृष्टयोः प्रकृतिपुरुषयोः कार्यभेदमुक्त्वा स्वानुभवैकसुखस्यापि पुरुषस्य सुखदुःखोपभोगहेतुमाह - **पुरुष** इति । प्रकृतिसंसृष्टः **पुरुषः** प्रकृतिजान् **प्रकृतिशब्दः** तत्संसर्गपरः तज्जान् तत्संसर्गापादितान् इत्यर्थः । **गुणान् -** गुणकार्यान् सुखदुःखादीन् **भुङ्क्ते -** अनुभवति । स्वानुभवैकतानस्य वैषयिक सुख-दुःखोपभोगे प्रकृतिसङ्गो हेतुरित्युक्तम् परिशुद्धस्य तस्य प्रकृतिसंसर्ग एव कथं स्यात् इत्यत आह - **कारणमिति । अस्य** परिशुद्धस्यापि **गुणसङ्गः -** सत्त्वादिगुणसङ्गः, **सदसद्योनिजन्मसु -** विहितनिषिद्धकर्मद्वारा तत्फलानुभवार्थ सदसद्योनिजन्मसु हेतुरित्यर्थः । न च गुणसङ्गस्य पूर्वपूर्वसम्बन्धनिबन्धनत्वात् अन्योन्याश्रयः 'बीजाङ्कुरन्यायेन' तस्यादोषत्वात् इति भावः । सदसद्योनिजनन समनन्तरभाविनीं पुरुषस्य दशामाह -

उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ।। २२ ।।

उपद्रष्टा इति । अस्मिन् देहे वृत्तित्वं सप्तम्यर्थः । **देहे** वर्तमान इत्यर्थः । पुरुषो जीवः **उपद्रष्टा** - द्रष्टुः प्रमादादिना अदृश्यानां प्रदर्शकः देहप्रवृत्यनुगुणसङ्कल्पादिरूपेण देहस्य प्रवर्तक इत्यर्थः । **अनुमन्ता** च प्रवृत्तस्य पुनरपि प्रवर्तक इत्यर्थः । **भर्ता** - धारकः **भोक्ता** - देहवृत्तिजनितसुखदुःखयोः भोक्ता **महेश्वरः** - देहेन्द्रियादेः नियमनेन महेश्वरो भवति परमात्मेति चाप्युक्तः । **अस्मिन् देहे परमात्मेति चाप्युक्तः** । देहमनसोरपि आत्मशब्दिततत्वात् तदपेक्षया परमत्वात्परमात्मा इत्युक्त इत्यर्थः । पुरुषः परः स्पष्टोऽर्थः । परत्वमपि पूर्ववद्बोध्यम् ।

य एनं वेति पुरुषं प्रकृतिं च गुणैस्सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ।। २३ ।।

य एनमिति । यः - उपासकः **एनं** पूर्वोक्तस्वरूपं **पुरुषं प्रकृतिं** पूर्वोक्तस्वभावां **प्रकृतिं च गुणैस्सह** - वक्ष्यमाणस्वभावैः सत्वादिगुणैस्सह **वेत्ति** - जानाति । **स सर्वदा वर्तमानो**ऽपि नानाविधदेहसम्बन्धनिमित्तयोगविरोधिक्लेशान्वयितया वर्तमानोऽपि **भूयो न जायते** । पुनः पुनः प्रकृत्या न सम्बध्नाति । उक्तमर्थं श्लोकद्वयेन विवृण्वन् ज्ञानस्य पर्वभेदानाह -

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ।। २४ ।।

ध्यानेन इति । अत्र अधिकरणतया निर्दिष्टः आत्मा देहः कर्मतया निर्दिष्टो जीवः करणतया निर्दिष्टं मनः । तथा च केचिन्निष्पन्नयोगा । उपासका **आत्मनि** देहे **आत्मना** मनसा **आत्मानं** जीवं **ध्यानेन** - भक्तियोगेन **पश्यन्ति** । अन्ये अनिष्पन्नयोगाः **साङ्ख्येन योगेन** - ज्ञानयोगेन पश्यन्ति इत्यनुषङ्गः । योगयोग्यं मनः कृत्वा आत्मानं पश्यन्ति इत्यर्थः । अपरे ज्ञानयोगानधिकारिणः सुकरोपायसक्ताः **कर्मयोगेन** - अन्तर्गतज्ञानेन कर्मयोगेन मनसो योगयोग्यतां सम्पाद्य आत्मानं पश्यन्ति । अथ अनिष्पन्नकर्मयोगानां कर्मयोगोपक्रमदशोच्यते ।

अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते ।
तेऽपि चातितरन्त्यवमृत्युं श्रुतिपरायणाः ।। २५ ।।

अन्येतु इति । तु शब्देन कर्मयोगानधिकारित्वं सूच्यते । एवम् **अजानन्तः** उक्तप्रकारेण प्रकृतिविलक्षणतया आत्मानम् **अजानन्तः अन्येभ्यः** तत्त्वदर्शिभ्यः उपदेष्टृभ्यः

श्रुत्वा प्रकृतिविविक्तात्मस्वरूपमिति शेषः । **उपासते** कर्मयोगादिभिः उपासते तेऽपि श्रवणनिष्ठा अपि मृत्युमतितरन्ति । संसारमतिक्रामन्त्येव, अपि चेत् इत्यत्र **च शब्दो** भिन्नक्रमः **अन्त्ये -** अन्येतु इति श्रुतिपरायणाश्च इत्यर्थः । **श्रुतिः -** श्रवणं परमयनं निष्ठा येषां ते **श्रुतिपरायणाः** श्रवणमात्रनिष्ठाश्चापि मृत्यु**मतितरन्ति** इत्यनुषङ्गाः । ते च धूतपापाः कर्मयोगादिकम् आरभ्य क्रमेण तरन्त्येव इत्यर्थः । एवं तत्तत्पर्वभेदेन आत्मदर्शनप्रकारमुक्त्वा तदर्थं प्रकृतिपुरुषयोः विवेकानुसन्धानप्रकारं वदन् अविविक्तप्रकृतौ सत्यामेव न वक्तव्यः । अन्यथा नैष्फल्यात् तत्प्रतीतिश्च दोषात् । दोषश्च भोक्तृभोगायतनत्वनिर्वाहकः संसर्गविशेष इत्याह -

यावत्संजायते किञ्चित्सत्त्वं स्थावरजङ्‌गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ।। २६ ।।

यावत् इत्यादिना । सत्वशब्दो जन्तुपरः 'द्रव्यासु व्यवसायेषु सत्वमस्त्री तु जन्तुषु' इति कोशात् यावच्छब्दश्च साकल्यवाची । तथा च अयमर्थः किञ्चिदपि सत्वं **स्थावरजङ्गमं -** स्थावरजङ्गमात्मकं सत् जायते चेत्; स्थावरात्मना जङ्गमात्मना च जायते चेदित्यर्थः । तद्यावत् संकलमपि क्षेत्रक्षेत्रज्ञसंयोगात् जायत इति विद्धि इत्यर्थः । वृक्ष गुल्मलतादिषु चैतन्यानवभासमात्रमेव न अचेतनत्वमिति बोधनाय स्थावरग्रहणं मातापितृसंयोगात् तत्पुत्रोत्पत्तिवत् अन्यस्योत्पत्तिः न इति बोधनाय तदित्युक्तम् । तेन संयुक्तमेव जायते । न तु ततोऽन्यदिति सूचितम् । अथ समत्व-विषयत्व-नियन्तृत्व-नियाम्यत्व-नित्यत्वानित्यत्त्वैः द्वयोः विवेकाऽनुसन्धानमभिधाय तथैव तत्त्वाध्यवसायरूपत्वेन, परमपुरुषार्थसाधनत्वेन प्रशंसति ।

समः सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ।। २७ ।।

समः इति । **सर्वेषु भूतेषु** मृण्मय हिरण्मय घटादिवत् विषमतया दृष्टेषु देवमनुष्यादिभूतेषु समम् । तत्रत्य गङ्गोदकवत् एकाकारं समवस्थितं तिष्ठन्तं 'रुमाक्षिप्तकाष्ठ न्यायेन' तत्तादात्म्यापत्तिमन्तरेणैव स्वरूपेणावस्थितं **परमेश्वरं** देहेन्द्रियमनसां नियन्तारं **विनश्यत्स्वविनश्यन्तं** तेषु **भूतेषु विनश्यत्स्वपि** विनाशानर्हेण स्वस्वभावेन अविनश्यन्तं **यः पश्यति** एवम्भूतमात्मानं यः पश्यति स एव यथावस्थितमात्मानं **पश्यति न** तु **अन्य** इत्यर्थः । तदेव उपपादयति -

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ।। २८ ।।

समम् इति । **सर्वत्र** देवादिषु भूतेषु **समवस्थितं -** सम्यगवस्थितं भर्ताभोक्तेत्युक्ताकारेण स्थितं **ईश्वरं समं पश्यन्** ज्ञानैकाकारतया समं पश्यन् समम् ।

'गवामनेकवर्णानां क्षीरस्यत्वेकवर्णता ।
क्षीरवत्पश्यति ज्ञानं लिङ्गी न स गवां यथा' ।।

इत्युक्तरीत्या पश्यन् आत्मना मनसा **आत्मानं -** स्वमात्मानं **न हिनस्ति -** रक्षति । संसारान्मोचयति । **ततः** तस्मात्सर्वत्र समानाकारताज्ञानात् **परां गतिं याति -** गम्यत इति **गतिः,** परङ्गन्तव्य यथावस्थितमात्मानं प्राप्नोति इत्यर्थः । इत्थं विषमत्वसमत्वाभ्यां प्रकृतिपुरुषवैलक्षण्यमुक्त्वा अथ साक्षात्क्रियाश्रयत्वतदभावाभ्यां वैलक्षण्यमाह -

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथाऽऽत्मानमकर्तारं स पश्यति ।। २९ ।।

प्रकृत्या इति । सर्वशः सर्वाणि **कर्माणि** कार्यकारणकर्तृत्वे हेतुः प्रकृतिः उच्यत इत्युक्तरीत्या प्रकृत्या क्रियमाणानि **यः पश्यति तथा आत्मनं** ज्ञानाकारं **अकर्तारं** यः पश्यति प्रकृतिसंयोगः तज्ञन्यसुखदुःखोपभोगश्च चक्रवत्परिवर्तमानकर्मरूपोपाधिप्रयुक्त इति । **यः पश्यति** स आत्मानं यथावस्थितं पश्यति इत्यर्थः । अथ परिणामित्वापरिणामित्वाभ्यां वैलक्षण्यमाह -

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ।। ३० ।।

यदा इति । **भूतपृथग्भावं -** भूतानां-देवादिभूतानां पृथग्भावं देवत्वमनुष्यत्व-ह्रस्वत्व-दीर्घत्वाद्यात्मकं जातिरूपं गुणादिरूपं च भेदं **एकस्थं** प्रकृति-पुरुषद्वयात्मकेषु पिण्डेष्वेकप्रकृतिरूपतत्त्वं **पश्यति** शास्त्रम् - अनुसृत्य पश्यति । **तत एव** प्रकृतित एव पुत्रपौत्रादिपरिणाम भेदविस्तारम् 'अङ्गादङ्गात्सम्भवति' इत्युक्तरीत्या यदा प्रकृति तदा **ब्रह्म सम्पद्यते -** ब्रह्म भवति अनवच्छिन्नमात्मानं प्राप्नोति इत्यर्थः । आत्मनो नित्यत्वापरिणामित्वादिभिः उक्तं वैधर्म्यं स्थिरीकरोति ।

अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ।। ३१ ।।

अनादित्वादिति । अयं परमात्मा देहान्निष्कृष्टस्वभावेन निरूपितः शरीरस्थोऽपि अनादित्वात् उत्पत्तिरहितत्वात् **अव्ययः** - नाशरहितः निर्गुणत्वात्सत्वादिगुणशून्यत्वात् **न करोति** - न लिप्यते । तच्छरीरसंसर्गमात्रेण लेपभाक् न भवति इत्यर्थः ।

ननु गुणानाम् अभावान्न करोति इत्युपपद्यते न लिप्यत इति । कथं 'संसर्गतो दोषगुणा भवन्ति' शुष्केणार्द्रं दह्यते मिश्रभावादित्युक्तेः इत्यत आह -

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्राऽवस्थितो देहे तथाऽऽत्मा नोपलिप्यते ।। ३२ ।।

यथा सर्व इति । यथा सर्वगतमप्याकाशं सौक्ष्म्यान्नोपलिप्यते । परस्परविलक्षणैः अनन्तैः वस्तुभिः संयुक्तमपि संसर्ग्यन्तरस्वभावं नापद्यते । तथा सर्वत्रावस्थितोप्यात्मा देवमनुष्यादिदेहेष्ववस्थितोऽपि सौक्ष्म्यादेव तत्स्वभावैः न लिप्यत इत्यर्थः ।

'यं प्राप्यातिपवित्राणि वस्त्राण्याभरणानि च ।
अशुचित्वं क्षणाद्यान्ति किमन्यदशुचिस्ततः' ।।

इत्युक्त दुष्टदेहसम्बन्धेऽपि न दोषभाक्त्वमिति बोधनाय देह इत्युक्तिः । अथ एतद्यो वेत्ति इत्युपक्रमेप्रोक्तं वेद्यवेदितृत्वाभ्यां प्रतिपादितं वैलक्षण्यं दृष्टान्तपूर्वकं स्थीरीकरोति ।

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्र क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ।। ३३ ।।

यथा इति । **एकः रविः** सूर्यः स तु **लोकं** स्वप्रभया **यथा प्रकाशयति क्षेत्री** - जीवः **कृत्स्नं क्षेत्रम्** - आपादतलमस्तकं शरीरं, तथा तेन प्रकारेण प्रभास्थानीयेन धर्मभूतज्ञानेन **प्रकाशयति ।** अवयवभेदेन शरीरस्य नानात्वादात्मापेक्षया विलक्षणत्व-बोधनायावयवेषु कस्यचिद्वेदितृत्वशङ्कानिवसनाय च कृत्स्नमिति; क्षेत्रविशेषणम् । अथ अध्यायप्रधानार्थ विषयज्ञानस्य फलं दर्शयति -

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ।। ३४ ।।

क्षेत्र इति । **क्षेत्रक्षेत्रज्ञयोः** - प्रकृति-पुरुषयोः अन्तरं विशेषं **ज्ञानचक्षुषा** - विवेकविषयज्ञानाख्येन चक्षुषा अपरोक्षसाधनेन एवम् अज्ञत्ववेदितृत्व-धार्यत्वधारकत्वादि प्रकारेण **ये विदुः - ते** भूतमयी प्रकृतिः **भूतप्रकृतिः** तस्याः सकाशान्मोक्षो यस्मात्तद्भूत प्रकृतिमोक्षं अमानित्वादिसाधनवर्गम् इत्यर्थः ।

यद्वा - 'मोक्ष-मोक्षणै धातोः' मोक्ष्यते अनेन इति कर्मणि घञन्तो मोक्षशब्दः । भूतशब्दः । भूतप्रकृते मोक्षं मोक्षसाधनम् अमानित्वादिकम् इत्यर्थः । परं च प्रकृतेः परं स्वमात्मानं च प्राप्नुवन्ति इत्यर्थः । क्षेत्रक्षेत्रज्ञयोः विवेकविषयेण ज्ञानं न तयोः विवेकं ज्ञात्वा भूतप्रकृतिमोक्षोपायममानित्वादिकं संपाद्य स्वेन रूपेण स्थितम् अनवच्छिन्नज्ञानलक्षणम् आत्मानं प्राप्नुवन्ति इत्यर्थः । अत्र भूतप्रकृतिमोक्षमित्यनेन अनिष्टनिवृत्तिः परमित्यनेन इष्टप्राप्तिश्च सूचिता ।।

श्रीशैलबुक्कपट्टण येन्नाचान् दासविलिखिते अध्यायः

श्रीमद्गीताभाष्यार्थ संग्रहोऽत्र त्रयोदशो वृत्तः ।।

❈ ❈ ❈

चतुर्दशाऽध्यायः

[गुणत्रयविभागयोगः]

त्रयोदशे अन्योन्यसंसृष्टयोः प्रकृतिपुरुषयोः स्वरूपं विज्ञाय अमानित्वादिकं सम्पाद्य भगवद्भक्त्यनुगृहीतैः तैः बन्धान्मुच्यत इत्युक्तम् । बन्धहेतुश्च सत्वादिगुणमयसुखादिसङ्ग इति च उक्तम् । अथ गुणानां बन्धहेतुत्वप्रकारो गुणनिवर्तनप्रकारश्च उच्यते । पूर्वोक्तार्थ एव वक्तव्यं विषयं पर्यालोच्य पुनर्भगवानुवाच इत्यर्थः ।

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयस्सर्वे परां सिद्धिमितो गताः ।। १ ।।

परम् इति । अत्र परशब्दोऽन्यार्थः, न उत्कृष्टार्थः । **ज्ञानानां ज्ञानमुत्तमम्** - इत्युक्तेः ततश्च परं पूर्वोक्तादन्यत् ज्ञानं कीदृशं ज्ञानानाम् उत्तमं भूयः पुनरपि **भूय** इत्यनेन तज्ज्ञानं प्रकृति-पुरुषान्तर्गतं सत्वादिगुणविषयमेव इति व्यञ्जितम् । **प्रवक्ष्यामि** उत्तमत्वमेव आह - **यज्ज्ञात्वा** इति । **तज्ज्ञानं** ज्ञात्वा स प्रकारं ज्ञात्वा **सर्वे मुनयः** मननशीलाः सन्तः । इतः संसारमण्डलात् **परां सिद्धिं** परिशुद्धात्मस्वरूपरूपांसिद्धिं **गताः** - प्राप्ताः । पुनरपि तदेव ज्ञानं विशिनष्टि ।

इदं ज्ञानमुपश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ।। २ ।।

इदम् इति । **इदं** वक्ष्यमाणप्रकारं **ज्ञानमुपाश्रित्य** - सम्पाद्य **मम साधर्म्यं** साम्यम् **आगताः** - उपागताः सर्गेऽपि **न उपजायन्ते** - न उत्पद्यन्ते । **प्रलये** - नाशकाले **न व्यथन्ति** - न संह्रियन्ते । अथ गुणानां बन्धहेतुत्व प्रकारं वक्तुं यावत्सञ्जायत इत्युक्तम् । सर्वस्य भूतजातस्य प्रकृतिसंसर्गजत्वं स्वेनैव कृतम् इत्याह -

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
संभवस्सर्वभूतानां ततो भवति भारत ।। ३ ।।

मम इति । **योनिः** - जगतः कृत्स्नस्य उपादानं **महत्** महाभूतानां कारणादहङ्कारात् तत्कारणान्महतत्त्वादपि तत्कारणतया **महत् ब्रह्म** प्रकृतिः । यद्वस्तु **तस्मिन् गर्भं** सकलप्राणि-बीजभूततया चित्समष्टिरूपं **गर्भं दधामि ।** भोगक्षेत्ररूपया चेतनया प्रकृत्या भोक्तृवर्गभूतां चेतनप्रकृतिं संयोजयामि इत्यर्थः । ततः संयोजकमत्सङ्कल्पकृतात्प्रकृतिपुरुषसंयोगात्

सर्वभूतानां ब्रह्मादिस्तम्बपर्यन्तानां भूतानां सम्भवो भवति । आत्मबुद्धिपूर्वकस्सर्गः प्रादुर्भूतस्त मय इति चतुर्मुखसङ्कल्पमन्तरेणैव स्थावरादिसृष्टिवचनात् हिरण्यगर्भस्य तत्सृष्टानां स्तम्बपर्यन्तानामपि परमात्मसङ्कल्पजन्यत्वं बोध्यम् । एवं प्राकृतनैमित्तिकसृष्ट्यो स्वाधीनत्वमुक्त्वा नित्यसृष्टेरपि स्वाधीनत्वमाह -

सर्वयोनिषु कौन्तेय मूर्तयस्सम्भवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीज प्रदः पिता ।। ४ ।।

सर्वयोनिषु इति । **सर्वयोनिषु** - सर्वासु योनिषु देवगन्धर्वयक्षरक्षो मनुष्यपशुमृगादियोनिषु **या मूर्तयः** शरीराणि **सम्भवन्ति** - जायन्ते । **तासां** सर्वासां मूर्तीनां **महद्ब्रह्म** प्रकृतिरेव योनिः उपादानम् । अहं तु **बीजप्रदः पिता,** तत्तत्कर्मानुगुण्येन तत्र **चेतनवर्गसंयोजकः** न चैवम्; परमात्मन एव उपादानत्वम् अपि इति सिद्धान्तविरोधः निर्विकारस्य भगवतो विशिष्टवेषेणैव उपादानत्वस्वीकारेण अनुकूलतया विरोधाप्रसरादिति भावः ।

ननु नैमित्तिक सर्गादौ परमपुरुषसङ्कल्पकृताचित्संसर्गवशात् जन्मोपपन्नम् । प्राचीनकर्म सञ्चतेनैव शरीरेण गतं; ततः शुद्ध आत्मा न नित्यसृष्टिविषयस्स्यादित्याशङ्क्य स्वरूपनिरूपकधर्मा न कदाचिदपि धर्मिणं त्यजन्ति । अतः तदुपपत्तिः इति अभिप्रेत्य आह -

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।। ५ ।।

सत्त्वम् इति । **सत्त्वंरजस्तम इति** व्यपदिष्टाः । **प्रकृतिसम्भवाः** - प्रकृतिस्वरूपानुबन्धिनो **गुणाः** असाधारणधर्मविशेषाः **देहे अव्ययं** - गुणसम्बन्धकृतज्ञानसङ्कोचकृत व्ययरहितं; **देहिनम्** - आत्मानं **निबध्नन्ति** । अत्र गुणसम्बन्धानर्हस्य कथं **देहे** निबन्धनम् इत्याशङ्कपनुत्तये देहिनम् इत्युक्तिः । आमोक्षसाधनादविभिन्नदेह सम्बन्धोपाधि सत्वादुपपदमेव बन्धनमिति द्योत्यते न अयं गुणसम्बन्धो बाहुबलेन इत्युक्तं शक्यत इति बोधनाय **महाबाहो** - इत्युक्तम् । अथ सत्वरजस्तमसाम् आकारं बन्धस्वरूपं च आह -

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ।। ६ ।।

तत्र इत्यादिना । **तत्र** - सत्त्वादि गुणत्रयमध्ये **सत्त्वं** - सत्त्वगुणः निर्मलत्वान्मलशब्दोऽत्र तमस्स्वभावभूतप्रकाशविरोध्याकारपरः तच्छून्यत्वात् इत्यर्थः । **प्रकाशकं** - प्रकाशो

वस्तु याथात्म्यावबोधः तज्ञनकम् इत्यर्थः । **अनामयम्** - आमयो रोगः न विद्यते आमयो यस्य तत्तथोक्तम् आरोग्य सम्पादकम् इत्यर्थः । एतादृशं **सत्त्वं** सुखसङ्गेन च **बध्नाति** देहिनं सुखसङ्गतं ज्ञानसङ्गतं च करोति इत्यर्थः । अयमाशयः ज्ञानसुखयोः सङ्गे जाते तत्साधनेषु श्रौतस्मार्तकर्मसु प्रवर्तते । ततः तत्फलानुभवहेतुषु योनिषु जायते इति ज्ञानसुखसङ्गद्वारेण पुरुषं निबध्नाति इति । 'न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च' इति वदतस्तवसङ्गो न इति बोधनायानघ इत्युक्तिः ।

रजो रागात्मकं विद्धि तृष्णा सङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ।। ८ ।।

रजो रागात्मकम् इति । प्रकाशकमिति । प्रकाशहेतुत्वस्य मोहनम् इति मोहहेतुत्वस्य च उक्ते रागात्मकम् इत्यस्य रागहेतुम् इत्यर्थः ।

यद्वा - रज्यते अनेन इति रागः रागसाधनं तदात्मकम् इत्यर्थः । रागः योषित्पुरुषयोः परस्परस्पृहा, **तृष्णासङ्गसमुद्भवम्** - सम्यगुद्भवत्यस्मिन्निति समुद्भवः । उत्पत्तिस्थानं तृष्णासङ्गयोः उत्पत्तिस्थानम् इत्यर्थः । **तृष्णा** - सर्वविषयस्पृहा **सङ्गः** - पुत्रादिषु सम्बन्धिषु स्पृहा इति विवेकः **तत् रजः** देहिनं **कर्मसङ्गेन बध्नाति** कर्मसु सङ्गः स्पृहा तद्द्वारेण बध्नाति इत्यर्थः, अयम्भावः । कर्मस्पृहया कर्मारभते तत्कर्मपुण्यपापरूपमिति तत्फलानुभवसाधनभूतासु योनिषु निबध्नाति इति ।

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ।। ८ ।।

तमस्विति । अत्यन्तपरिहरणीयत्वलक्षणवैलक्षण्यद्योतनाय **तु** शब्दः **अज्ञानजं** ज्ञानं वस्तु याथात्म्यावबोधः तद्विपर्ययोऽज्ञानं विपरीतज्ञानम् इत्यर्थः। तज्ञं मोहनं सर्वदेहिनां मोहोऽधर्मवैपरीत्यज्ञानं तज्ञननम् इत्यर्थः । **तत्** तमः पूर्व लोकार्थे देहिनम् इत्यनुषज्यते । **प्रमादालस्यनिद्राभिर्निबध्नाति** प्रमादोऽनवधानं च कर्तव्यादन्यत्र कर्तव्ये **प्रवृत्तिहेतुः** - आलस्यमलसत्वं कर्तव्येष्वप्रवृत्तिः इत्यर्थः । तयोः उभयोः बन्धकत्वमुक्तम् ।

'अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ।
प्रसजश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः' ।।

इति पुरुषस्य इन्द्रियप्रवर्तन श्रान्त्या सर्वेन्द्रियप्रवर्तनोपरतिः निद्रा - निद्रायाबन्धकत्वं च उदितकर्मकालभ्रंशसम्पादकत्वात् पापिष्ठस्वप्नद्वारा च बोध्यम् । सत्त्वादीनां बन्धनद्वारेषु प्रधानान्याह -

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ।। ९ ।।

सत्त्वम् इति । **सत्त्वं सुखे सञ्जयति** सुखसङ्गमेव प्रधानतया द्वारीकृत्य निबध्नाति इत्यर्थः । **रजःकर्मणि** इति । पूर्ववदर्थः । **तमः** ज्ञानमावृत्य वस्तुयाथात्म्यज्ञानमाच्छाद्य **प्रमादे सञ्जयति ।** प्रमादसङ्गं प्राधान्येन द्वारीकृत्य बध्नाति इति **उत** इत्यपि च इत्यर्थः । देहाकारेण परिणतायाः प्रकृतेः स्वरूपानुबंधिनः सत्त्वादयः । यथार्थादिज्ञानेन सुखदुःखादिपरस्परविरुद्धकार्याणि कथं कुर्वन्ति इत्याशङ्क्याह -

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजस्सत्त्वं तमश्चैव तमस्सत्त्वं रजस्तथा ।। १० ।।

रजस्तमश्च इति । **रजः** - रजो गुणं **तमः** - तमोगुणं च **अभिभूय सत्त्वं भवति** - सत्त्वमुद्रिक्तं भवति इत्यर्थः । कदाचिदिति शेषः । सात्त्विकाहारनिषेवणाद्यवसर इति भावः । तथा **तमः सत्त्वं** च अभिभूय रज उद्रिक्तं भवति । **तथा तमः** कदाचिद्रजस्सत्त्वे अभिभूय उद्रिक्तं भवति इति भगवदनुग्रहनिग्रहहेतूनां कर्मणां विषयविपाकादुद्भवाभिभवसम्भवेन तदुपपद्यत एवेति भावः । तत्कथम् ज्ञेयम्? इत्यारभ्य कार्योपलब्ध्यैव ज्ञेयमित्याह -

सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्यात् विवृद्धं सत्त्वमित्युत ।। ११ ।।

सर्वद्वारेषु इति । **सर्व**शब्दः सङ्कुचितः समनस्केषु चक्षुरादि इन्द्रियद्वारेषु इत्यर्थः । **अस्मिन् देहे** यदा **प्रकाशे** वस्तुयाथात्म्यप्रकाशे ज्ञान**मुपजायते । तदा अस्मिन्देहे** सत्यं प्रवृद्धमिति विद्यात् **प्रकाश उपजायते** इत्यत्र प्रकाशे इति सप्तम्यन्तं न प्रथमान्तं तथा च अयमर्थः । विषयत्वं सप्तम्यर्थः । प्रकाशश्च व्यवहारानुगुण्यं व्यवहारानुगुण्यविषयकं ज्ञानं यदोपजायत इत्यर्थः ।

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ।। १२ ।।

लोभ इति । **लोभः** - स्वकीयस्य द्रव्यस्य अपरित्यागशीलताप्रवृत्तिः । तृणच्छेदाङ्गकम्पादि वृथा चेष्टा आरम्भः कर्मणां दृष्टादृष्टफलसाधनकृषियज्ञादि **कर्मणा**मारम्भः उपक्रमः - **अशमः** इन्द्रियानुपरतिः **स्पृहा** विषयवाञ्छा **एतानि रजसि विवृद्धे जायन्ते ।** यदा लाभादयः प्रवर्तन्ते तदा **रजः** प्रवृद्धमिति विद्यादित्यर्थः ।

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ।। १३ ।।

अप्रकाश इति । **अप्रकाशः -** ज्ञानानुदयः पूर्वोक्तनिद्रा इति यावत् । अप्रवृत्तिस्तब्धता प्रागुक्तमूलत्वमित्यर्थः । **प्रमादः -** अकृत्यप्रवृत्तिफलम् अनवधानं **मोहो** विपरीतज्ञानम् । **तमसि** विवृद्धे **एतानि जायन्ते ।** एतैर्जातैः तमोविवृद्धम् इति विद्यादित्यर्थः । अथान्त्यकाले रजस्तमस्समुद्भवहेतूनाम् आदावेव परिहरणार्थम् अन्तकालप्रवृद्धानां गुणानां पृथक्फलमाह -

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते ।। १४ ।।

यदा इति । **यदा -** शब्दो यदिशब्दार्थकः । सत्त्वेप्रवृद्धे **देहभृत् -** देहधारी **प्रलयं याति -** मरणं याति । यदि **तदा उत्तमविदां** आत्मयाथात्म्यविदाम् अमलान्निर्मलान् **लोकान्प्रतिपद्यते -** आत्मयाथात्म्यविदां कुलेषु जनित्वा ज्ञानसाधनेषु पुण्यकर्मसु अनुरक्तो भवति इत्यर्थः ।

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ।। १५ ।।

रजसि - विवृद्धे **प्रलयं गत्वा कर्मसङ्गिषु** फलार्थं कर्म कुर्वत्सु **जायते -** तत्कुले जनित्वा स्वर्गादिफलसाधनेषु कर्मसु अधिकरोति इत्यर्थः । **तथा** एवमेव **तमसि** विवृद्धे प्रलयं गत्वा इत्यनुषज्यते । **मूढयोनिषु** श्व-सूकरादियोनिषु **जायते** सकलपुरुषार्थानर्हो जायत इत्यर्थः ।

कर्मणस्सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ।। १६ ।।

कर्मण इति । **सुकृतस्य कर्मणः -** सत्त्वविवृद्धिकाले देहविरमं प्राप्य पुनः आत्मयाथात्म्यविदां कुले जाते न अनुष्ठितस्य मदाराधनात्मककर्मणा इत्यर्थः । **सात्त्विकं** पूर्वसत्त्वापेक्षयाऽभ्यधिकसत्त्वजनितं **निर्मलं -** निष्कल्मषं **फलं प्राहुः -** सत्त्वगुणपरिणाम विद इति शेषः । **रजसस्तु फलं दुःखम्** अयम्भावः । अन्त्यकालप्रवृत्तस्य रजोगुणस्य फलं दुःखं फलसाधनकर्मानुष्ठातृकुले तत्र फलाभिसन्धिपूर्वककर्मारम्भः ततः तत्कर्मफलानुभवः । पुनर्जन्म तत्रापि रजोविवृद्धिः इत्येवं दुःखप्रायमेव फलमिति तद्याथात्म्यविद आहुरिति -

अज्ञानं तमसः फलम् अन्त्यकालप्रवृद्धस्य तमसः फलमज्ञानपरम्परारूपमिति । तद्याथात्म्यविदः प्राहुः इत्यर्थः । उक्तानि फलानि तेभ्यः कथम् इत्याशङ्क्यपपादयति -

सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ।। १७ ।।

सत्त्वात् इति । **सत्त्वा**त्परंपरया जातादधिकसत्त्वादित्यर्थः । ज्ञानमात्मयाथात्म्यावलोकनरूपं **ज्ञानं सञ्जायते ।** अप्रतिबद्धं सत्फलपर्यवसायि जायते । **रजसो लोभ एव च** परम्परया प्रवृद्धात् रजसो लोभ एव स्वर्गादिफल लोभ एव सञ्जायत इत्यर्थः । **प्रमादेति । तमसः** परम्परया प्रवृद्धात्तमसः **प्रमादमोहौ -** प्रमादशब्दस्तन्निमित्तासत्कर्मप्रवृत्ति परः । **मोहो -** विपरीतज्ञानं **भवतः** स्याताम्, **अज्ञानामेव च** ततस्तमः प्रवृद्धिद्वाराऽज्ञानं भवति इत्यर्थः ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ।। १८ ।।

ऊर्ध्वम् इति । **सत्त्वस्थाः -** उक्तरीत्या सत्त्वविवृद्धिवन्तः । **ऊर्ध्वं गच्छन्ति -** क्रमेण संसारबन्धान्मोक्षं व्रजन्ति **राजसाः मध्ये तिष्ठन्ति ।** फललाभाय कर्मानुतिष्ठन्तः तत्फलं स्वर्गादिकमनुभूय पुनरपि जनित्वा तदेव कर्म कुर्वाणाः मध्य एव वर्तन्त इत्यर्थः । **तामसाः -** तमोनिष्ठाः **जघन्यगुणवृत्तिस्थाः** उत्तरोत्तरनिकृष्टतरगुणवृत्तिषु स्थितास्सन्तः **अधो गच्छन्ति ।** अन्त्यत्वं ततस्तिर्यक्त्वं, ततः कीटत्वमित्यवम् अधो गच्छन्ति इत्यर्थः । अथ वर्धितसत्त्वानां गुणात्ययद्वारेण ऊर्ध्वगमनप्रकारमाह -

नाऽन्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ।। १९ ।।

नान्यम् इति । **द्रष्टा** सात्त्विकाहारादिभिः फलाभिसन्धिरहितानुष्ठितकर्मभिश्च विवृद्धसत्त्वतयाऽनुद्रष्टा यः पुरुषः **गुणेभ्योऽन्यं कर्तारं नानुपश्यति ।** स्वानुगुणप्रवृत्तिषु गुणा एव कर्तारो नात्मेति पश्यति । **गुणेभ्यः -** कर्तृभ्यो गुणेभ्यः परमतिरिक्तमात्मानं **च वेत्ति** स मद्भावं मम यो भावः **तमधिगच्छति ।** अयम्भावः । स्वतश्शुद्धस्यात्मनो विविधकर्मकर्तृत्वं पूर्वपूर्वकर्ममूलगुणसङ्गनिमित्तं स्वयं तु आत्मानमवच्छिन्नज्ञानाकारोऽकर्तेत्यात्मानं **यो वेत्ति -** स मद्भावमधिगच्छति इति मद्भावम् इत्युक्तमेव विशदयति ।

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ।। २० ।।

गुणानेतान् इति । **देही** - देहभृत् **देहसमुद्भवान्** देहादिपरिणतप्रकृतिसम्भवान् **एतान्** - उक्तस्वभावान् **त्रीन् गुणान्** - सत्त्वादीन् **अतीत्य** ते भोग्यत्वम् आत्मानं पश्यन् इत्यर्थः । **जन्मेति । जन्ममृत्युजराभिः** - तत्साध्यदुःखैश्च इत्यर्थः । **विमुक्तोऽमृतमश्नुते ।**

अर्जुन उवाच -

कैर्लिङ्गैस्त्रिगुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्तते ।। २१ ।।

कैर्लिङ्गैः इति । अत्र **लिङ्ग**शब्दो न वेषपरः न लिङ्गं धर्मकारणमिति तस्य गुणदोषोपलक्षकत्वायोगात् । किन्तु असाधारणधर्मपरः **कैः लिङ्गैः** - कैः असाधारणैर्धर्म्यैः **एतान्** त्रीन् **गुणानतीतो भवति ।** तेषु धर्मेषु सत्स्वतीत इति ज्ञायत इत्यर्थः । **किमाचारः** - क आचारोऽस्य किम् आचार इति बहुव्रीहिः । केन आचारेण युक्त इत्यर्थः । अस्य स्वरूपावगमलिङ्ग-भूताचारः कः इत्यर्थः । स्वसंवेद्यैः आन्तरैः असाधारणधर्मैः स वक्तव्य इति प्रश्नार्थः ।

श्रीभगवानुवाच इति । उत्तरं प्रश्नस्य भगवानुवाच इत्यर्थः ।

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ।। २२ ।।

प्रकाशं च इति । **प्रकाशं** - सत्त्वं कार्यं **प्रवृत्तिं** रजः कार्यम् **मोहमेव च** - तमः कार्यं च एतानि **संप्रवृत्तानि** न द्वेष्टि **निवृत्तानि न काङ्क्षति ।** इत्यर्थः । अयमर्थः । आत्मव्यतिरिक्तानि गुणकार्याणि यो **न द्वेष्टि** - इष्टेषु साध्येषु साधनतया स्थित्वा निवृत्तानि पुनः **न काङ्क्षति** इति सशरीरस्य कथम् इष्टानिष्टसाधनसम्पत्तौ न विकार इत्यत्र उत्तरमाह -

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्ते इत्येव योऽवतिष्ठति नेङ्गते ।। २३ ।।

उदासीनवत् इति । **उदासीनवदासीनः** - आत्मावलोकनतृप्ततयात्मा - अतिरिक्तेषु उदासीनवदासीनः । अत एव **गुणैः न विचाल्यते ।** तद्गुणकार्यद्वेषाकाङ्क्षा द्वारेण विषयेषु न प्रवर्तत इत्यर्थः । **गुणाः वर्तन्ते** - स्वकार्येषु प्रकाशादिषु वर्तन्त इत्यनुसन्धाय इत्यर्थः । अनुतिष्ठति गुणकार्यप्रवृत्तैः एतैः किं ममेति तूष्णीम् **अवतिष्ठति** इत्यर्थः । परस्मैपदमार्षं

ततो **नेङ्गते** - न चलति न द्वेषकाङ्क्षानुगुणं प्रवर्तत इत्यर्थः । अत्र उत्तरार्धे अवतिष्ठति इत्यन्तम् । औदासीन्यविवरणं **नेङ्गते** - इत्येतन्न चाल्यत इत्यस्येति विवेकः ।

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ।। २४ ।।

मानावमानयोस्तुल्यः तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ।। २५ ।।

समदुःख इत्यादि । **समदुःखसुखः** - उभयत्र समचित्तः **स्वस्थः** - स्वस्मिन्नेवस्थितः आत्मैकप्रियः इत्यर्थः । एतच्च पूर्वोक्तसमदुःखसुखत्वे हेतुः । अत एव **समलोष्टाश्मकाञ्चनः** । तत एव च **तुल्यप्रियाप्रियः** - प्रियाप्रियोपनता क्षोभ्य इत्यर्थः । अत एव **धीरः** प्रकृत्यात्मविवेककुशलः । अत एव **तुल्यनिन्दात्मसंस्तुतिः** - आत्मनि प्रवृत्तयोः गुणागुणनिमित्तस्तुतिनिन्दयोः स्वासम्बन्धाऽनुसन्धानेन अविकृतचित्तः । तत्प्रयुक्तयोः **मानावमानयोः तुल्यः तुल्यो मित्रारिपक्षयोः** तत्प्रयुक्तयोः - तयोश्च तुल्यः स्वसम्बन्धाभावादेव तुल्यचित्त इत्यर्थः । आरभ्यते इत्यारम्भः कर्मकृत प्रकृतादिरूप देहानुबन्धकर्मेत्यर्थः । तत्परित्यागी सांसारिकसर्वकर्मत्यागीत्यर्थः । **गुणातीतः स उच्यते** । एवम्भूतो गुणातीत उच्यत इत्यर्थः । आन्तरैरद्वेषादिभिः बाह्यैः आरम्भपरित्यागादिभिश्च गुणातीतो लक्ष्यत इति भावः ।

अथैवंरूपगुणात्यये प्रधानहेतुमाह - **मां च** - इति ।

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ।। २६ ।।

मां - सत्यसङ्कल्पं **सर्वेश्वरं माम् अव्यभिचारेण** - एकान्तिकेन **भक्तियोगेन यः सेवते स एतान् गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते** - ब्रह्मभावयोग्यो भवति इत्यर्थः । नान्यङ्गुणेभ्यः इत्यादिषु उक्तम् तु दृष्ट तदद्वारोपकारकत्वात्प्रतिबन्धकभूयः तया केवलं न कार्यकरमिति भावः । **साङ्गेन** - भक्तियोगेन सेवितोऽहमेव मुमुक्षोः मोक्षप्रद इति निष्कृष्टार्थः । तदेव उपपादयति ।

ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याऽव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ।। २७ ।।

ब्रह्मणो हि इति । अत्र ब्रह्मशब्दः 'ब्रह्मभूयाय कल्पते' इति जीवस्य फलदशाभावित्वेन निर्दिष्टं यद्रूपं तदुपचाराद्वति क । तथा च हि यस्मादहं ब्रह्मणः फलदशाभावि

परसमानं मुमुक्षोः जीवस्य यत्स्वरूपं तस्य **प्रतिष्ठा** - शास्त्रोदितेषु सिद्धेषु साध्येषु हेतुषु प्रधानतमो हेतुः इत्यर्थः ।

यद्वा - **प्रतिष्ठा** शब्द आधारवाच्येव तच्च नियमनगर्भम् इति । 'एतस्य वा अक्षरस्येति' श्रुत्युक्तम् । तथा च शुद्धात्मस्वरूपनिर्वाहकत्वात् तदाधारं प्रस्तुतं ब्रह्मभूयस्त्वं मद्भजनैकलभ्यम् इति भावः । तस्य स्वरूपस्य भोग्यत्वमक्षयत्वं च दर्शयितुम् **अमृतस्याव्ययस्य च** इति विशेषणद्वयं **शाश्वतस्य धर्मस्य च अहं प्रतिष्ठे**त्यन्वयः । इन्द्रप्रजापतिभोगापेक्षयाऽतिशयितस्य स्वरूपाविर्भावानन्तरभाविनः नित्यस्यैश्वर्यस्य इत्यर्थः । यद्यपि धर्म श्रेयस्साधनं न श्रेयः । तथापि 'यत्प्राय' इति न्यायात् तस्यैव ग्रहणमुचितमिति ध्येयम् । **ऐकान्तिकस्य सुखस्य** - एकान्तिलभ्यं सुखमैकान्तिकम् इत्युच्यते । तादृशस्य सुखस्य चाहं प्रतिष्ठेति । अनेन गुणात्ययप्रभृतिषु सर्वेषु फलेषु स्वस्यैव साधनत्वम् इत्युक्तेः सिद्धोपायव्यक्तीकरणं जातमिति । 'दैवी ह्येषा गुणमयी' इत्यनेनैककण्ठ्याच्च । भक्तियोगेन इत्यत्र प्रपत्तिरपि क्रोडीकृतेति बोध्यम् ।।

।। श्रीशैलबुक्कपट्टण येन्नाच्चान् दासविलिखितेऽध्यायः ।

श्रीमद्गीताभाष्यार्थसंग्रहे चतुर्दशो वृत्तः ।।

।। शुभमस्तु ।।

पञ्चदशाऽध्यायः

[पुरुषोत्तमयोगः]

एवम् अध्यायद्वयेन प्रथमषट्कोदितप्रकृतिपुरुष तत्प्रकारपरिशोधनं कृतम् । तत्रेयं प्रकृतिः स्वगुणैः यदधीना पुरुषश्च यदपराधाद्बद्धो यत्प्रसादान्मोक्ष्यते स मध्यमषट्कोदितः परमात्मा इदानीं शोध्यते ।

श्रीभगवानुवाच इति । भजनीयस्य स्वस्य बद्धमुक्तोभयविभूतिमत्त्वेन सर्वोत्कर्षं वदन् विभिन्नबन्धाक्षराख्य विभूतिं वक्तुं छेद्यरूपबन्धाकारेण विततम् अचित्परिणाम विशेषमश्वत्थवृक्षाकारं कल्पयन् अर्जुनं प्रति भगवानुवाच इत्यर्थः ।

ऊर्ध्वमूलमधश्शाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ।। १ ।।

ऊर्ध्व इति । उत्तरत्र असङ्गशस्त्रेण दृढेन भित्वा इत्युक्तेः असङ्गशस्त्रच्छेद्यस्य संसारस्यैव अत्र अश्वत्थत्वेन रूपणं **अव्ययम्** - आसम्यग्ज्ञानोदयाद्व्ययरहितं संसारम् **ऊर्ध्वमूलमधश्शाखमश्वत्थं प्राहुः** - 'ऊर्ध्वमूल अवाक्छाख एषोऽश्वत्थस्सनातनः'। 'ऊर्ध्वमूलमवाक्छाखं वृक्षं यो वेत्ति तत्त्वतः' ।। इत्यादि श्रुतयः प्राहुः इत्यर्थः । ऊर्ध्वमूलत्वं सर्वलोकोपरिवर्तमानचतुर्मुखादिमूलत्वेन एवमधश्शाखत्वं पृथिव्यस्थसकलनर-पशु-मृगाद्यन्ततया अधःप्रदेशस्थितशाखत्वं यस्य संसाराख्यस्य अश्वत्थस्य **छन्दांसि** - श्रुतयः **पर्णानि** - पत्राणि यथा **पर्णैः** - वृक्षो वर्धते । तथा काम्यकर्मप्रतिपादकैः वेदैः संसारो वर्धत इत्यर्थः । **तम्** - तादृशं संसाराख्यमश्वत्थं **यो वेद स वेदवित्** - छेद्यसंसारस्वरूपं तच्छेदनोपायस्वरूपं च वेदे वदति इति तच्छेद्यस्वरूपवेत्तैव च्छेदनोपायमपि जानाति इति स एव वेदवित् इत्यर्थः । **श्वो न स्थास्यति** - इति अर्थबोधनाय वृक्षान्तरवाचकशब्दं विनाऽश्वत्थप्रयोगः । एवं वेदवाचिशब्दान्तरसत्त्वेऽपि छन्दांसि इत्युक्तिः । पर्णवत्संसारवृक्षस्य यथावस्थिताकारं सञ्छाद्य रक्षन्ति इति ज्ञापनाय इत्थं नैमित्तिकसृष्टिप्रक्रियया संसारस्य वृक्षत्वम् अभिधाय अथ नित्यसृष्टिप्रक्रिययापि तदाह -

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ।। २ ।।

अधश्च इति । **तस्य** - वृक्षस्य **शाखाः अधश्च** - अधः प्रदेशे **ऊर्ध्वं च** - ऊर्ध्वप्रदेशे च **प्रसृताः अधः** - पुनरपि मनुष्यादिरूपेण प्रसृताः **ऊर्ध्वं पुनः** गन्धर्व-यक्ष-

रक्षो-देवादिरूपेण **प्रसृताः** ताः कीदृश्यः **गुण प्रवृद्धाः** - गुणैः सत्त्वादिभिः **प्रवृद्धाः** सलिलस्थानीयैः - प्रकाण्डस्थानीयैः वातैः **प्रवृद्धाः विषयप्रवालाः** - शब्दादिविषयपल्लवाः शाखासु यथा पल्लवा भोग्यत्वेन समुद्भवन्ति । तथा देवादिषु शाखास्थानीयेषु भोग्यतया शब्दादयस्तु भवन्ति इति भावः ।

ननु ऊर्ध्वमूलस्य अधश्शाखत्वं मूलानुगुण्येन उपपद्यते । शाखानां पुनः ऊर्ध्वप्रसृतत्वन्तु कुत? मूलाभासादित्यत आह - **अधश्च** इति । मूलानि कर्मानुबन्धीनि सन्ति । **मनुष्यलोके** - मनुष्यत्वावस्थायां कृतैः कर्मभिः अनुबद्धानि सन्ति । अधश्च अनु सन्ततानि । अयमर्थः । यथा प्ररूढस्य न्यग्रोधस्य शाखाग्रे जातायाः जटायाः क्षितिसंसर्गवशान्मूलत्वात् । ततः पुनः ऊर्ध्वं शाखाप्रसृतिश्च । यथा वा प्रासादशिखरप्ररूढप्रलम्बिलतायाः क्षिति संसर्गजान्मूला **प्रसूताः शाखाः** - ऊर्ध्वं प्रसृताः, तद्वत् मनुष्यपश्वादयो भवन्ति इति । अत्र मूलशब्दोऽवान्तरमूलपरो बोध्यः ।

ननु सर्वप्रत्यक्षस्य अस्य संसारस्य यस्तं वेद स वेदवित् इति प्रशंसा कथम् इत्यत्राह -

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्वा ।। ३ ।।

न रूपम् इति । **अस्य** - संसाराख्यवृक्षस्य रूपमाकारः । तथा ऊर्ध्वमूलमधश्शाखम् इति मयाऽस्य यः प्रकारो वर्णितः । तेन प्रकारेण **न उपलभ्यते** । अपवर्गोपयुक्तज्ञानहान्यैः संसारिभिः इति शेषः । **नान्त** इति । तथा **उपलभ्यत** - इति पदद्वयम् अनुषज्यते । **अन्त** - आत्यन्तिकनाशः असङ्गशस्त्रसाध्यत्वेन उपलभ्यते । न चार्थः । अत्रापि पूर्ववदनुषङ्गः गर्भादिरूपस्य अवान्तरादेः उपलम्भसम्भवेऽपि गुणसङ्ग एव मूलमिति स प्रकारमादिर्नोपलभ्यत इत्यर्थः । **न च संप्रतिष्ठा** अनुषङ्गः । पूर्ववत् सम्प्रतिष्ठत्यस्मिन्निति वा अनेन इति वा **सम्प्रतिष्ठा** - शब्देन आधारकारणं प्रोच्यते । **तथा च सम्प्रतिष्ठा** - संसारस्य-आधारं कारणं च अनात्मन्यात्माभिमानरूपाज्ञानसञ्चितकर्मैव इत्येवं **न उपलभ्यते** । तथा च यथावत् दुर्ज्ञेयस्य यो वेदिता स प्रशंसार्हाविव इति भावः । **अश्वत्थमेनम्** - इति । **एनं** सङ्गास्पदप्रकृतिवैचित्र्ययुक्तं **सुविरूढमूलं** - सृष्टं या रूढमूलम् अनादिकालं मनोवाक्कायैः बुद्धिपूर्वं वा विरचितैः विधिनिषेधात्मकैः विविधैः कर्मभिः उत्पन्नया वासनया सुदृढं रूढमूलम् **अश्वत्थं** - असङ्गशस्त्रेण **दृढेन सम्यज्ज्ञानमूलेन असङ्गशस्त्रेण** - गुणमयभोग्यासङ्गेन शस्त्रेण **भित्वा** ।

ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये(य)द्यतः प्रवृत्तिः प्रसृता पुराणी ।। ४ ।।

ततः - विषयासङ्गात् हेतोः **तत्पदं परिमार्गितव्यम्** - अन्वेषणीयम् । **आत्मानमत्विच्छदित्यर्थः**। यस्मिन्पदे **गता भूयः न निवर्तन्ति** - न वर्तन्ते । परस्मैपदमार्षम् ।

ननु रूढमूलस्य संसारवृक्षस्यासङ्गशस्त्रेणच्छेद उक्तः । असङ्गशस्त्रालाभे तु दुश्शक इत्याशङ्क्यह - **तमेव** इति । आद्यं कृत्स्नस्य जगतः आदिभूतं तं पुरुषं सर्वेश्वरत्वेन निस्समाभ्यधिकत्वेन पूर्वोक्तं **प्रपद्येत्** - प्रपद्येत शरणमुपगच्छेत् इत्यर्थः । आर्षं - परस्मैपदम् । यदा ज्ञातिलङ्घनाष्टन्धः स एव प्रसादितो मोचक इति बोधनायैवकारः **यतः - यस्मात्पुरुषात् पुराणी** - पुरातनी प्रवृत्तिः गुणमयभोगप्रवृत्तिः प्रसृतानिष्पन्ना उक्तं ह्येतदेव पूर्वमपि 'दैवी ह्येषा' इते श्लोके तत्र हि पूर्वार्धे यत इत्यादिः । उत्तरार्धे तमेव इत्यादेः अर्थो दर्शितः । यद्वा **प्रपद्येयत** इति पाठः **प्रपद्य इयत** इति च्छेदः । **आद्यं** - तमेव पुरुषं **प्रपद्य इयतः** - अज्ञाननिवृत्यादेः कृत्स्नस्य प्रवृत्तिः । अत्रेयच्छब्दोत्तरषष्ठीसम्बन्धार्थासम्बन्धश्च साध्यसाधनभावरूपविशेषविश्रान्तः । ततश्च कृत्स्नाज्ञाननिवृत्तेः साधनभूताप्रवृत्तिः इत्यर्थः । **पुराणी प्रसृता** - पुरातनी प्रवृत्तेत्यर्थः । नाद्यतनानामेव शिक्षिता । अपितु पूर्वतनैरेवानुष्ठितेत्यर्थः । पुरातना मुमुक्षवो मां शरणम् उपगम्यनिर्मुक्तबन्धा जाता इति उक्तार्थे शिष्टाचारो दर्शितः ।

निर्मानमोहा जितसङ्गदोषाः अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैः गच्छन्त्यमूढाः पदमव्ययं तत् ।। ५ ।।

निर्मानमोहो - इति मान आत्माभिनानः । स एव मोहा निर्गतो येभ्यः तथोक्ताः । अत एव **जित**सङ्गदोषाः । **जितसङ्गः** - गुणमयभोगसङ्ग एव दोषो ये स्ते तथोक्ताः । **आत्मनि** - यज्ज्ञानं तदध्यात्मं तत्र नित्यानियतः । आत्मज्ञाननिरता इत्यर्थः । योगकाले नैरन्तर्येण उत्थानकाले प्राचुर्येण तत्र निरता इति यावत् । अत एव **विनिवृत्तकामाः** - स्वादुतमे स्वात्मज्ञाने निरतत्वात् तदितरकामेभ्यो वृत्ता इत्यर्थः । विषयसन्निधावपि उपेक्षकत्वद्योतनाय वै इत्युक्तिः । **सुख-दुःखसंज्ञैः** - अनुकूल-प्रतिकूलस्वभावैः **द्वन्द्वैः विमुक्ता** - अमूढा आत्मानात्मस्वभाव तेषां निर्माने इत्यत्र देहात्मभ्रमराहित्यम् । अत्र तदितरभ्रममात्रराहित्यम् इत्यपुनरुक्तः **तदव्ययमं पदं** - गच्छन्ति पद्यत इति पदम्, प्रापणीयं परिशुद्धात्मानं ज्ञानैकाकारं प्राप्नुवन्ति इत्यर्थः । परिशुद्धात्मस्वरूपस्यापि प्राप्यत्वं प्रापणीयः तथैवात्मा प्रक्षीण शेषभावन इत्युक्तम् । मां शरणं गतानाम् एताः सर्वप्रवृत्तयो मत्प्रसादात्सिद्धिपर्यन्ताः सुशका भवन्ति इति । **तमेव** - इत्यादिना उक्तम् भवतीति ।

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ।। ६ ।।

न तद्भासयते इति । तत्प्राप्यतया उक्तम् । परिशुद्धात्मस्वरूपं **सूर्यः न भासयते** - एवं **शशाङ्क** - चन्द्रः **पावकः** - अग्निः - ज्ञानस्वरूपस्य तस्यैव सर्वप्रकाशकत्वादिति भावः । आदित्यादीनां विषयेन्द्रियसम्बन्धि तमो निवर्तने उपकारकत्वमेव न प्रकाशकत्वं तस्य रूपस्य तस्य प्रकाशकत्वं तु योगस्येवेति हृदयम् । **यद्गत्वा पुनः न निवर्तन्ते तद्धाम परमं** - सर्वोत्कृष्टं **तज्ज्योतिः मम** - मद्विभूतिभूतं ममांश इत्यर्थः ।

ममैवांऽशो जीवलोके जीवभूतस्सनातनः ।
मनष्षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ।। ७ ।।

इत्थमुक्तस्वरूपः सनातनो ममांश एव जीवभूतः । अनादिकर्मरूपाविद्या वेष्टितो जीवभूतः । जीवलोके वृत्तित्वं सत्पम्यर्थः । तत्र वर्तमानस्सन् इत्यर्थः । **प्रकृतिस्थानि** - प्रकृतिपरिणामविशेषशरीरस्थानि **मनःषष्ठानि** मनष्षष्ठं येषां तानि **इन्द्रियाणि** चक्षुरादीनि ज्ञानेन्द्रियाणि **कर्षति** कर्मानुगुणम् । इतस्ततः **कर्षति** इत्यर्थः । कर्षणप्रकारमेव आह -

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ।। ८ ।।

यच्छरीरमवाप्नोति - परिगृह्णाति **यच्चाप्युत्क्रामति** - यस्माच्छरीरादुत्क्रामतीत्यर्थः । **ईश्वरः** - इन्द्रियाणां नियन्ता जीवः । **एतानि** इन्द्रियाणि **गृहीत्वा** भूतसूक्ष्मैः सह गृहीत्वा **संयाति** । कथमिव **वायुः गन्धानिवाशयात्** । वायुः यथा **आशयात्** - गन्धाशयात् चन्दनकुसुमादेः गन्धान् गृहीत्वा संयाति तथा इत्यर्थः । अत्र वायुदृष्टान्तेन गन्धं गृहीत्वा वायुः यथाऽन्यत्र याति । तथाभूतसूक्ष्मैः सह इन्द्रियाणि गृहीत्वा देहांतरं गच्छति इति द्योतितम् । कानि पुनस्तानि इन्द्रियाणि इत्यत आह -

श्रोत्रं चक्षुस्स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ।। ९ ।।

स्पर्शनम् - त्वगिन्द्रियम् इत्यर्थः । एवकारो भिन्न क्रमः श्रोत्रादीन्द्रियषट्कम् अधिष्ठायैव स्वस्वविषयवृत्यानुगुणान् कृत्वा इत्यर्थः । **विषयान्** - शब्दादीन् **उपसेवते** - अनुभवति । इत्थं कर्म कलापशृङ्खलानिगलितस्य करणकलेबरकारागृहेव **स्थानम्** । **ततो**

उपवेशादिक्लेशं विषमयाल्पक्षुद्रतरविषयोपसेवा च उक्ता । इदानीं तन्निदानभूतमात्मापहारचौर्यमुपक्षिप्य योग्यानुपलम्भम् च परिहरति ।

उत्क्रामन्तं स्थितं वाऽपि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ।। १० ।।

गुणान्वितं - गुणैस्सत्वादिभिः **अन्वितम्** - अनुसृत्येतं गुणानुमय प्रकृतिपरिणामविशेषमनुष्यत्वादि पिंडसंस्पृष्टं **उत्क्रामन्तं** पिण्डविशेषात् उत्क्रामन्तं स्थितम् । तस्मिन् पिण्डविशेषे **स्थितं वा भुञ्जानं** वा विषयान्भोजिनं वा **विमूढाः** यथा मनुष्यत्वादि पिण्डाकारात्माभिमानिनः **न अनुपश्यन्ति** । अहम् इत्युपलभ्यमानमपि प्रकृतिपरिणामरूपात् देहाद्विलक्षणं ज्ञानैकाकारं, **न पश्यन्ति** । **ज्ञानचक्षुषः** - ज्ञानमेव आत्मावलोकनसाधनं **चक्षुर्येषां** तथोक्ताः । देहात्मविषयविवेकवन्त इत्यर्थः । **पश्यन्ति** - सर्वावस्थास्वपि एनं विविक्ताकारमेव पश्यन्ति इत्यर्थः । उक्तमेवार्थम् सहेतुकम् उपपादयति ।

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ।। ११ ।।

आत्मनि शरीरे **अवस्थितमेनम्** आत्मानं **यतन्तः** - मत्प्रपत्तिपूर्वकं कर्मयोगादिषु यतमानाः **योगिनः** निर्मलान्तःकरणनिष्पादितयोगाः **पश्यन्ति** । तद्विविक्ताकारं स्वरूपेणावस्थितमेव पश्यन्ति । **यतन्तोऽपि** यतमाना अपि **अकृतात्मानः** असंस्कृतमनसः मत्प्रपत्तिविरहेण मनस्संस्कारशून्या इत्यर्थः । अत एव **अचेतसः** - प्रकृतोपयोगाभावात् असत्कल्पचेतसः । **नैनं पश्यन्ति** आत्मानं यथावस्थितं न पश्यन्ति इत्यर्थः । इत्थमात्मज्योतिषो विभूतित्वमभिधाय तत्प्रकाशनासमतया व्यवच्छेद्यत्वेन प्रसक्तानां प्रकृतज्योतिषामपि विभूतित्वमाह -

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ।। १२ ।।

आदित्यगतं यत्तेजः अखिलं जगद्भासयते - प्रकाशयति । **यच्चन्द्रमसि अग्नौ च** गतं यद्भासयति **तत्तेजः मामकं विद्धि** - मदीयमेव इति विद्धि । 'येन सूर्यः तपति तेजसेद्धः यस्यादित्यो भाम् उपयुज्य भाति' इति पृथिव्या भूतधारिण्या शक्तिः मदीयैव इत्याह -

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीस्सर्वास्सोमो भूत्वा रसात्मकः ।। १३ ।।

गां - पृथिवीम् **आविश्य** - अन्तर्यामितया प्रविश्याऽ**हम् ओजसा** - अप्रतिहतसामर्थ्येन **भूतानि** - चराणि स्थावराणि च सर्वाणि **भूतानि धारयामि ।** अन्ये तु पदार्थाः प्रतिघातिना संयोगेन धारयन्ति । अहन्तु शक्त्यैव इति बोधनाय **ओजसेत्युक्तम्** । 'सदाधारपृथिवींद्यां' 'येन द्यौः उग्रापृथिवीं च दृढा विष्णुना विधृते भूमिः' इत्यादिकम् इह भाव्यम् । अहमेव रसात्मकः । अमृतरसमयः **सोमो भूत्वा सर्वौषधीः पुष्णामि** रसात्मक इति विशेषणद्वारा विशेष उक्तः । सोमो भूत्वा रसैः **अहं पुष्णामि** - इति ।।

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ।। १४ ।।

अहमेव वैश्वानरो भूत्वा जाठरानलो **भूत्वा प्राणिनां** - जन्तूनां **देहमाश्रितः प्राणापानसमायुक्तः** - उपलक्षणमिदं वृत्यन्तरस्य समानस्यापि तदुक्तम् । अपानप्राणयोः मध्ये प्राणापानसमाहितः । समन्वितः समानेन सम्यक्पचति पपाक - इति । **तथा च** प्राणापाने इत्यस्य प्राणापानसमानवृत्तिभेदभिन्नवायुसमायुक्तम् इत्यर्थः । **चतुर्विधं** - खाद्य-चोष्य-लेह्य-पेयात्मना चतुःप्रकारमन्नम् पचामि । सोमो भूत्वा, **वैश्वानरो भूत्वा** इति सामानाधिकरण्येन निर्देशो न अभेदनिबन्धनः । किन्तु शरीरशरीरिभावनिबन्धन इति दर्शयति । सर्वस्य इति च । पूर्वोक्तसमुच्चयार्थः ।

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ।। १५ ।।

अहं सर्वस्य सोमवैश्वानरयोश्च **हृदि** - हृदये सकलप्रवृत्तिनिवृत्तिहेतुज्ञानोदय-देशे **सन्निविष्टः** - अन्तर्यामितया प्रविष्टः अतस्स्मृतिः । पूर्वानुभूतविषयानुभवजन्यसंस्कार जनित **धीः** - ज्ञानम् इन्द्रियसंयोगलिङ्गागमजन्यो निश्चयः । **अपोहनं** - प्रमाणानुग्राहकं तर्करूपज्ञानं च **मत्तः** - मत्सकाशादेव जायत इति विद्धि इत्यर्थः । 'वेदैः **सर्वैश्च** अहमेव वेद्यः' ततश्चाग्निसूर्यवायुसोमेन्द्रादीनाम् मदन्तर्यामिकत्वेन मदात्मकत्वात् तत्प्रतिपादकैः **सर्वैः वेदैः** अहमेव प्रतिपाद्य इत्यर्थः । **वेदान्तकृत्** - वेदानां तत्तत्कर्म प्रतिपादकानाम् । अतः पर्यवसानभूतं फलं तत्तत्कर्मफले हि सर्वे वेदाः पर्यवस्यन्ति **इति** भावः । तत्करोति इति तथोक्तः । वेदोदितस्य सकलकर्मफलस्य प्रदाताहमेव इत्यर्थः । **वेदविदेव च अहं** - वेदवित् च अहमेव । एवं वेदार्थवित् अहमेव । इतोऽन्यथा **यो** वेदार्थं ब्रूते न स वेदवित् इत्यर्थः । अतो मत्त एव सारभूतमर्थं शृण्वित्याह -

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।। १६ ।।

अक्षरष्टा - अक्षर इति **लोके** - जगति यद्वा लोक्यत - इति **लोकः** प्रमाणम् । तस्मिन् **द्वौ पुरुषौ** प्रथितौ । तत्र **क्षरः** - क्षरशब्दनिर्दिष्टः **पुरुषः सर्वाणि भूतानि** - ब्रह्मादिस्तम्बपर्यन्त **भूतानि** क्षरणस्वभाव अचित्संसृष्टत्वादिति भावः । **कूटस्थः** - अचित्संसर्गवियोगरूपैक- एकोपाधिपुरस्कारेण एकत्वनिर्देशः अक्षरशब्द निर्दिष्टः । कूटस्थोचित्संसर्गवियुक्तः स्वेनरूपेण - अवस्थितो मुक्तात्मा । 'उत्तमः पुरुषस्त्वन्यः ताभ्यां क्षराक्षरशब्दिताभ्यां बुद्धमुक्ताभ्यामन्यः अर्थान्तरभूतः परमात्मा' इति आत्मशब्दवाच्याभ्यां परमत्वात्परमात्मेत्युदाहृतः। सर्वाभूश्रुतिभिः इति शेषः । उत्तमपुरुषत्वं ताभ्याम् अन्यत्वं च उपपादयति ।

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।। १७ ।।

यः - लोकत्रयं लोक्यत इति **लोक** इति व्युत्पत्या लोकशब्दः प्रमाणसिद्धार्थपरः प्रमाणसिद्धश्च अचिद्वर्गः बद्ध जीवा मुक्ताश्चेति लोकत्रयमाविश्य आत्मतया प्रविश्य बिभर्ति । तस्मात् व्याप्याद्भर्तव्यात् अर्थान्तरभूत उत्तमष्टा । किञ्च अव्यय ईश्वरश्च **अव्यय -** इत्यनेन **व्यय** स्वभावात् अचेतनात् तदधीन संकोचविकासलक्षणविकारभाजो बद्धात् । पूर्वं तत्सम्बन्धिनो मुक्ताच्च वैलक्षण्यं सिद्धम् । ईश्वरश्च इत्यनेन ईशितव्यात् अन्यत्वमुत्तमत्वं च व्यञ्जितम् । एवं प्रतिज्ञातमन्यत्वमुत्तमत्वं च **'उत्तमः पुरुषः'** इत्यनुवादस्मारितया समाख्यया स्थिरी क्रियते ।

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।। १८ ।।

यस्मादुक्तैः - स्वभावैः **क्षरमतीतोऽहं** - बद्धमतिक्रान्तः **अक्षरादपि च** - मुक्तपुरुषेभ्योपि **उत्तमः । अतो लोके** - स्मृतौ लोक्यते अनेन वेदार्थ इति व्युत्पत्तेः **वेदे च** - **पुरुषोत्तम** इति प्रथितः । 'अंशावतारं पुरुषोत्तमस्य' इत्यादि स्मृतेः । सः उत्तमः पुरुषः इत्यादि श्रुतेश्चेत्यर्थः । एवं पुरुषोत्तमत्वनिर्वचनम् तथा अनुचिन्तनार्थमेव इति व्यञ्जयन् पुरुषोत्तमवेदिनं स्तौति -

यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ।। १९ ।।

एवं पूर्वोक्तप्रकारेण **पुरुषोत्तमं माम् असम्मूढो यो जानाति,** एकीकृत्य मोहरहितस्सन् जानाति । क्षराक्षरपुरुषाभ्यां विलक्षणतया जानाति **सः सर्ववित् -** मत्प्राप्त्युपायतया वेदितव्य सर्ववित् **भजति । मां सर्वभावेन -** भावशब्दो भजनावान्तरभेदपरः । तथा च ये मत्प्राप्त्युपायरूपतया पूर्वं निर्दिष्टाय मद्भजनप्रकाराः कीर्तनयजनादयः तैः सर्वैः मां भजते अयम्भावः । मद्विषयैः सर्वैः वेदनैर्मम या प्रीतिः सर्वप्रकारैः मद्विषयैः भजनैः मम या प्रीतिः सा सर्वापि पुरुषोत्तमत्ववेदनेन जायत इति । एवं तर्हि भजनाद्यनुष्ठानविधिवैय्यर्थ्यम् इत्याशङ्क्य सर्वासां प्रीतीनां एतदेव मूलकारणं फलसाम्याद्वा सर्वस्य विदितत्वकृतत्ववचनमित्यभिप्रेत्य निगमयति ।।

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ।
एतद्बुद्ध्वा बुद्धिमांत्स्यात्कृतकृत्यश्च भारत ।। २० ।।

इति गुह्यतम् इत्थं - गोपनीयतमं **शास्त्रं -** पुरुषोत्तमत्ववेदनप्रतिपादनं पञ्चदशोध्याय इत्यर्थः । **इदं -** शास्त्रन्तरेभ्यः उत्कृष्टं **मया -** वक्तव्यत्ववेदिना त्वदधिकारवेदिना परसख्याञ्चेत्यर्थः । **एतद्बुध्वा बुद्धिमांत्स्यात् ।** 'सा विद्या या विमुक्तये' इत्युक्त विद्यावान् स्यात् । **कृतकृत्यश्च** स्यात् इत्यनुषङ्गः 'तत्कर्म यन्न बन्धाय' इत्युक्त कृत्यवानपि स्यात् इत्यर्थः ।।

।। श्रीशैलबुक्कपट्टण येन्नाञ्चान्दास विलिखेले अध्यायः ।
श्रीमद्गीताभाष्यार्थ सङ्ग्रहोऽकारि पञ्चदशः ।।
।। शुभमस्तु ।।

षोडशाऽध्यायः

[दैवासुरसम्पद्विभागयोगः]

पूर्वं त्रयोदशप्रभृतिभिः त्रिभिः अध्यायैः संसृष्टयोः विविक्तयोश्च प्रकृतिपुरुषयोः, अथ अध्यात्मं तत्सङ्गवियोगयोश्च गुणसङ्गतद्विपर्ययहेतुकत्वं द्विविधयोरपि तयोः भगवद्विभूतित्वं विभूतिमतः तस्य विभूतिभूतात् अचेतनाच्चेतनात् अर्थान्तरत्वं दर्शितम् । इदानीं तदेव स्थिरी क्रियते ।

श्रीभगवानुवाच इति । अन(घ)भारतेति शब्दाभ्यां सूचिताधिकारिविवेचनाय दैवासुरविभागं तावत् आह इत्यर्थः ।।

अभयं सत्त्वशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ।। १ ।।

अहिंसा सत्यमक्रोधस्त्यागश्शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ।। २ ।।

तेजः क्षमा धृतिश्शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ।। ३ ।।

आगामि दुःखहेतुदर्शनजं दुःखं भयं तन्निवृत्तिः **अभयं** सत्त्वस्यान्तःकरणस्य **संशुद्धिः** - समीचीनशुद्धिः - रजस्तमोरूपमूलनिवृत्या रागासूयावञ्चनादि सर्वदोषनिवृत्तिः **ज्ञानयोगव्यवस्थितिः** । ज्ञानेन शास्त्रजन्येन निष्पाद्यं चिन्तानं **ज्ञानयोगः** - प्रकृतिविविक्तात्मस्वरूपचिन्तनम् इत्यस्मिन्नवस्थितिः निष्ठा **दानं** न्यायार्चितस्य धनस्य पात्रे प्रधानं, **दमः** - मनसो विषयौन्मुख्यनिवृत्तिसंशीलनं, **यज्ञश्च** फलाभिसन्धिरहिततया महायज्ञनित्यनैमित्तिकानुष्ठानं **स्वाध्यायः** - कृत्स्नो वेदः स विभूतेः भगवतः तदाराधनस्य च स्वरूपं ब्रूते इत्यनुसन्धाय तदभ्यासनिष्ठा **तपः** - चान्द्रायणैकादश्युपवासादिभिः भगवत्प्रीणन-कर्मयोग्यतापादानस्य करणम्, **आर्जवं** - मनोवाक्कायवृत्तीनाम् एकनिष्ठता कौटिल्य-प्रसङ्गस्थलो तन्निवृत्तिः इत्यर्थः । **अहिंसा** - स्वपरपीडावर्जनं, **सत्यं** - भूतहितवचनम् **अक्रोधः** - परपीडाफलकचित्तविकारः **क्रोधः** - तद्रहितत्त्वं, **त्यागः** आत्महित प्रत्यनीक परिग्रहविमोचनं **शान्तिः** - इन्द्रियाणां विषयप्रावण्यनिरोधन शीलनम्, **अपैशुनम्** - परानर्थकरवाक्यनिवेदनाकरणं, **दया** - शत्रुमित्रादिषु सर्वेषु दुःखासहिष्णुत्वं **भूतेष्वलोलुप्त्वम्** - अलोलुपत्वम् इत्यर्थः । आर्षः - पकारलोपः अलोलुत्वमिति वा पाठः **भूत**शब्दो विषयपरः

विषयेषु निस्स्पृहत्वम् इत्यर्थः । **ह्रीः** - अकृत्यकरणे लज्जा, **अचापलं** **स्पृहणीय**-विषयसन्निधानेप्यचञ्चलत्वं तेन क्रीडापरिहासमृगयाक्षादिषु अप्रसङ्गो दर्शितः **तेजः** - दुर्जनैः अनभिभवनीयत्वं; **क्षमा** - परनिमित्तपीडानुभवेऽपि तं प्रति निर्विकारचित्तता **धृतिः** - महत्त्यामापदि शास्त्रीयानुष्ठानसङ्कल्पस्य प्राचुर्यतोऽवलम्बनं, **शौचं** - बाह्याभ्यन्तरकरणानाम् अशुचिपुरुषस्पर्शा **शुचिः** - द्रव्योपसेवाद्यभावेन शास्त्रीयकर्तव्यकर्मयोग्यता, **अद्रोहः** - स्वप्राबल्येन दुर्बलेषु स्वच्छन्दवृत्तिनिरोधः द्रोहः - तद्रहितत्वं, **नातिमानिता** - अतिमानित्वम् अभिजनविद्यावृत्तादिप्रयुक्तगर्ववत्वं तद्राहित्यं नातिमानिता 'न गन्तैकादिवत्' समासः **दैवीं** - सम्पदभिजातस्य भवन्ति । देवास्सत्त्वोत्तराभागवताः 'सत्त्वं देवगुणं विद्यावितरावासुरा मतौ' इति हि उक्तम् । तेषां सम्बन्धिनी दैवी तां सम्पदं भगवदाज्ञानुवृत्तिम् अविवेकिनां **धनसमृद्धिः** । **तेषाम्** - आज्ञानुवृत्तेरेव अपेक्षितत्वात्सम्पश्यंताम् अभिजातस्य अभिमुखीकृत्य जातस्य तां निर्वर्तयितुम् जातस्य इत्यर्थः भवन्ति । पूर्वोक्ताः गुणाः भवन्ति इत्यर्थः ।

डम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ।। ४ ।।

अत्रापि भवन्ति इत्यनुषज्यते । **डम्भः** - भगवदाज्ञानुवृत्तिरूपबुद्धिं विना **प्रतिष्ठार्थं** कर्मानुष्ठानं, **दर्पः** शास्त्रातिलङ्घनहेतुविषयानुभवनिमित्तहर्षः । **अतिमानश्च** - अभिजनविद्यादि प्रयुक्तोऽभिमानः ।

'वयसः कर्मणोर्थस्य श्रुतस्याभिजनस्य च ।
वेषवाग्वृत्ति सारूप्यमाचरन्विचरेदिह' ।। इत्यस्य उल्लङ्घनम् इत्यर्थः ।

क्रोधः - परपीडाफलकश्चित्तविकारः **पारुष्यं** - साधूनाम् उद्वेगकरस्वभावः । **अज्ञानं च** - परावरतत्त्वकृत्याकृत्याविवेकः । एते स्वभावाः **आसुरीं** - सम्पदमभिजातस्य भवन्ति । आसुराभगवदाज्ञातिवृत्तिशीलाः विष्णुभक्तिपरो दैवो विपरीतः । तथासुर इत्युक्तम् । अथ देवासुरस्वभावयो श्रद्धोद्योगजननार्थम् ऊर्ध्वं गच्छन्ति सत्त्वस्था इत्यादिना उक्तं स्मारयति ।।

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचस्संपदं दैवीमभिजातोऽसि पाण्डव ।। ५ ।।

दैवी सम्पत् - मदाज्ञानुवृत्तिरूपासम्पद्विमोक्षाय बन्धान्मुक्तये भवति आत्मसाक्षात्कारद्वारा मत्प्राप्तये भवति इत्यर्थः । **आसुरी सम्पत्** - मदाज्ञातिवृत्तिरूपासम्पत् **निबन्धाय** - नियतौ

बन्धो निबन्धः **तस्मै** - अधोगतिप्राप्तये भवति इत्यर्थः । **मा शुचः** - त्वं तु शोकं मा कृथाः स्वप्रकृत्यनिर्धारणात्पुनः अपारसंसारसागरनिमज्जन भीत्या शोकं मा कृथा इत्यर्थः । कुत इत्यत्राह - **सम्पदं दैवीमभिजातोऽसि** इति । न हि देवप्रकृतिकस्य धर्मोत्तरस्य पाण्डोः पुत्र आसुरप्रकृतिको भवति इति द्योतनाय पाण्डवेत्युक्तम् । स्वरूपादिभिः समेषु सर्वेष्वात्मसु देवासुरविभागस्य किं निदानम्? इति शङ्कां परिहरन् अत्यन्त-परिहर्तव्यज्ञापनाय प्रसक्तस्य आसुरवृत्तान्तस्य विस्तरम् उपक्षिपति ।

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ।। ६ ।।

अस्मिन्लोके - कर्मकरणयोग्यभूलोक इत्यर्थः । **भूतसर्गौ** - भूतानां सृष्टी **द्वौ** - द्विप्रकारौ 'सर्गस्वभाव निर्मोक्ष निश्चयाध्याय सृष्टिषु' इति हि नैघण्टुकाः तावेव प्रकारावाह - **दैव आसुर एव च** इति । प्राचीनकर्मवशाद्भगवदाज्ञानुवृत्तिरूपा-तद्विपरीतवृत्तिरूपा इत्यर्थः । दैवासुरसम्पद्विवर्धकत्वात् उत्पत्तेः दैवासुरत्त्वोक्तिः । **दैवो विस्तरशः प्रोक्तः ।** देवानां सत्त्वोत्तराणाम् उत्पत्तिः यदाचारकरणार्था । तदाचारः कर्मयोगादिरूपो विस्तरेण प्रोक्तः । **आसुरम्** - असुराणां मदाज्ञातिवर्तिनां सर्गं मे **शृणु** - आसुराणां सर्गो यदाचारार्थः तमाचारं मत्तः शृण्वित्यर्थः । अविदितम् - उपादेयं नोपादातुं शक्यम् । तथा हेयमप्यविदितम् । न हेतुं शक्यम् । अत्र सावधानो भव इत्यभिप्रायेण शृण्वित्युक्तम् ।

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ।। ७ ।।

आसुरजनाः प्रवृत्तिम् - अभ्युदयसाधनं **निवृत्तिं** - मोक्षसाधनं **न विदुः** - न जानन्ति ।'प्रवृत्तिलक्षणं धर्मं प्रजापतिः अथाब्रवीत् । निवृत्तिलक्षणं धर्ममृषिर्नारायणोऽब्रवीत्' इत्युक्तधर्मद्वयमपि न जानन्ति इत्यर्थः ।**न शौचं** - दुष्टसंसर्गादात्मगुणाभावाच्च बाह्यमान्तरं चैव वैदिककर्मयोग्यत्वं तेषु **न विद्यत** - इत्यर्थः । **नापि च आचारः ।** तन्निष्पादकसन्ध्याद्याचारोऽपि **तेषु** न विद्यते इत्यर्थः । तथा न सत्यं यथार्थज्ञानजन्यं भूतहितभाषणं च तेषु न विद्यत इत्यर्थः । न सत्यस्याभाषणमात्रम् । अपि तु विपरीत भाषणमस्तीत्याह -

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ।। ८ ।।

जगत् - चेतनाचेतनात्मकं जगत् **असत्यं** - 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः । 'तस्य ह वा एतस्य ब्रह्मणानाम् असत्यमिति' श्रुतेश्च न विद्यते । सत्यं यस्य तत्तथा अब्रह्मात्मकत्वं जगत् इति ते आसुरा आहुः इत्यर्थः । पुनः कीदृशमप्रतिष्ठं ब्रह्मणि अनन्ते प्रतिष्ठितं न वदन्ति । किन्तु 'भर्ता धरित्र्य यदि कश्चिदस्यास्तस्यापरस्तस्य परस्ततोऽन्यः । एवं हि हेतोः अनवस्थितिस्यादिति' । अप्रतिष्ठमेव वदन्ति इत्यर्थः । **अनीश्वरं च आहुः** - ईश्वरो नियन्ता तद्रहितं वदन्ति इत्यर्थः । तर्हि कथं वदन्ति इत्यत्राह - **अपरस्पर** इत्यादिकामहेतुकं जगदिति कथम् **अपरस्परसम्भूतं** - योषित्पुरुषरूपपरस्परसम्भूतं मनुष्य-पश्वादिकम् उपलभ्यते । अपरस्परसम्भूतमनैव भूतम् अन्यत्किमुपलभ्यते नोपलभ्यते । अतः **कामहेतुकम्** इति यद्यप्यनैवंभूतं स्थावरादिकं दृश्यते । तथापि स्थावरादिष्वपि योनिज-मनुष्यादिवत् दृष्ट किञ्चिद्धेतुकत्वं स्वीकुर्मो नादृष्ट ईश्वरहेतुकत्वं कामेत्यत्र तात्पर्यम् ।

एतां दृष्टमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽशुभाः ।। ९ ।।

एतां विपरीतां दृष्टिं धियम् **अवष्टभ्य** - अवलम्ब्य **नष्टात्मानः** - 'णश अदर्शन' इति हि धातुः । अदृष्टात्मस्वरूपां देहातिरिक्तमात्मानम् अपश्यन्त इत्यर्थः । **अल्पबुद्धयः** - देहातिरिक्तात्मदर्शनं कर्तुं समर्थबुद्धिरहिताः । अथ पूर्वोक्तवृत्तिफलमाह - **प्रभवन्ति** - इति । **उग्रकर्माणः** - सर्वेषां हिंसकाः **जगतः क्षयाय प्रभवन्ति** - 'एष वोऽस्त्विष्टकामधुनिति' भगवदुक्तां लोकभावनमर्यादां लङ्घयन्ति । ते तदनुवर्तिनश्च अन्येऽपि मन्दाः । तथा तदाचार-तदुपदेशादि विस्रम्भतः क्रमेण सर्वस्य जगतः तथैव प्रवर्तकत्वात् त्रिविधतापाभिहतिपूर्वकरूपक्षयाय प्रभवन्ति इत्यर्थः । कुतः ? यतस्ते अशुभाः स्वसंर्गिणामपि दोषावहाः ।

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद्गृहीत्वाऽसद्ग्रहान्प्रवर्तन्तेऽशुचिव्रताः ।। १० ।।

दुष्पूरं - विषयप्राप्तिर्हि कामस्य पूरणं तद्दुष्प्रापं यस्य तत् तथोक्तम् । **काममाश्रित्य** - प्रयोजनतयाऽभिसन्धाय **मोहात्** - विपरीतप्रवृत्तिहेतोः कृत्याकृत्यविवेकान्ध्यात् **असद्ग्रहान्** असन् - असाधुः ग्रह - आर्जनं येषां ते असद्ग्रहान्तान् चौर्यादिना अन्यायेन गृहीतानर्थान् इत्यर्थः । गृहीत्वा **अशुचि व्रताः** - पाषण्डाद्यावम् अनिर्दिष्टानि व्रतानि हि पुरुषदर्शनस्पर्शनाद्य योग्यता हेतुत्वात् अशुचीनि तानि येषां ते तथोक्तास्सन्तः **दम्भमानौ** - व्याख्यातौ

मदः - अभिजनादिजन्योऽहङ्कारः तदन्विताः प्रवर्तन्ते । एवं प्रवर्तमानानाम् उपर्युपरिमनोविकारानाह -

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ।। ११ ।।

अपरिमेयाम् - अपरिच्छेद्याम् असंख्येयविषयकत्वेन अनन्तशाखाम् इत्यर्थः । **प्रलयान्तां -** प्रलयः प्राकृतप्रलयः स एवान्तोवधिः यस्यास्सा तथोक्तां तां प्राकृतप्रलयावधिकालसाध्यविषयाम् इत्यर्थः । चिन्ताविषयेषु एकैकोऽपि दुस्साध इति भावः । **उपाश्रिताः -** दृढं संश्रिताः **कामोपभोगपरवशाः -** प्रयोजनतयाऽभिमतेषु कामोपभोग एव परमः उत्कृष्टो येषां ते तथोक्ताः । **एतावदिति ।** एतावदेव प्रयोजनम् इत्यर्थः । **निष्टिताः -** निश्चयवन्तः 'भुक्ता ब्राह्मणाः' इतिवत् कर्तरि क्तः ।

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ।। १२ ।।

आशाः - फलविषयेच्छाः ता एव **पाश -** शता निबन्धन रज्जुशतानि आशानां बहुशाखत्वात् बहुवचनं तैः **बद्धाः** दृढनिगळिताः, **कामक्रोधपरायणाः -** अत्र अयनशब्दो न प्राप्य परः क्रोधस्य अप्राप्यत्वात्; किन्तु आश्रयपरः । तथा च कामक्रोधैकनिष्ठा इत्यर्थः । **कामभोगार्थं -** काम्यन्त इति कामाः - विषयाः तद्भोगार्थं न तु परमनिश्श्रेयस-साधनभूतपरमपुरुषाराधनार्थम् इत्यर्थः । अन्यायेन चौर्यवञ्चनाद्यन्यायेन **अर्थसञ्चयानि ईहंते -** ईहया निष्पादयन्ति इत्यर्थः । अथ चिन्तामपरिमेयामिति इष्टप्राप्तौ अभिप्रायमुक्त्वा अनिष्टनिवृत्याद्यभिप्रायमाह -

इत्युक्तमुपपादयति -

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।। १३ ।।

इदं - क्षेत्रादिकम् **अद्य** इदानीं **मया लब्धं** प्राप्तं मयैव लब्धं न अदृष्टादिना इत्यर्थः । **इमं -** मनोरथम् अहमेव **प्राप्स्येव । इदं धनम् अस्ति -** इदं धनं मे पुनरपि इदं **भविष्यति -** अनेन चिन्ताविषयममेयं ज्ञापितम् । असौ शत्रुर्मया बलवता मया हतः संहतः

अपरः न अन्यानपि शत्रून् हनिष्ये संहरिष्यामि । इत्थम् इष्टप्राप्त्यनिष्टपरिहाराया स्वसामर्थ्याधीनत्वभ्रम उक्तः । अथ सामर्थ्यादावपि कारणीभूतादृष्टादिनैरपेक्ष्यभ्रम उच्यते ।

असौ मया हतश्शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ।। १४ ।।

अहमीश्वरः न ईशितव्यः । यद्वा अन्येषाम् अहमेव नियन्ता इत्यर्थः । **अहं भोगी** - अहमेव प्रशस्तभोगः मत्सामर्थ्यादेव अहं भोगि इति वा **सिद्धः** ज्ञानाद्यतिशयसम्पन्नः पूर्ववत्स्वसामर्थ्यादेव इति बोध्यम् । एवमुत्तरत्रापि बलवान् स्वत एव **बलवान् सुखी** पुत्रजन्मादि सुखयोगि इत्यर्थः । **भोगी** - सुखीत्येतयोः हेतुफलभावेन पौनरुक्त्याभावः ।

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ।। १५ ।।

आढ्यः - धनवान् **अभिजनवान्** कुलवान् **अस्मि** - अहमेव अस्मीत्यर्थः । **को अन्योऽस्ति सदृशो मया** - सदृशः अन्यः कोऽस्ति प्रकृतैः आकारैः एकैकशोऽपि यावल्लोकमन्वेषणेऽपि मत्सदृशो न इति । **कोऽन्योऽस्ति** - प्रतिक्षेप्तुराशयः । मदन्यत्वमेव असामर्थ्ये हेतुरिति द्योतनायान्यशब्दः । यद्वा **अन्यो** मे **मया सदृशः** अहमेव मया सदृश इत्यनुपमत्वद्योतनाय अन्यशब्दः **यक्ष्ये दास्यामि मोदिष्ये** इति । **अज्ञान विमोहिताः** - ईश्वरानुग्रहमनपेक्ष्यैव **मया** - यज्ञादिकर्तुं शक्यमिति । अज्ञानविमोहिता इत्यर्थः । अत्र **मोदिष्ये** - इत्युक्त्या **यक्ष्ये** - दास्ये इति मोदिष्य इत्यपि सूचनान्न स्वर्गादि विवक्षा । अपि तु यजमानत्वनिमित्तमहत्वमात्रं विवक्षितमिति सूचितम् ।

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ।। १६ ।।

चित्तं - चिन्तावृत्तियुक्तं मनः वृत्तिभेदादनेकं बहुविधं यच्चित्तं तेन **विभ्रान्ताः** - विक्षिप्ताः । यद्वा - **विभ्रान्ताः** - विपरीतज्ञानवन्तः **मोहजालसमावृताः मोहः** - अज्ञानं स एव **जालो** - वागुरा तेन समावृताः । यद्वा जालशब्दस्य मोहपरः । विषयभेदेन च मोहानां बाहुल्यं प्रसक्ताः **कामभोगेषु** - कामानाम् उपभोगेषु प्रकर्षेण सक्ताः ।

'न जातुकामः कामानाम् उपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते' ।।

इत्येतत् धर्मसूचनाय प्रीत्युक्तिः । **अशुचौ -** पूयरुधिरवसादिमयत्वेन अपवित्रे नरके पतन्ति । 'इदं कृतमिदं कार्यमिदमन्यत्कृताकृतम् । एवं मीमांसया युक्तं कृतान्तः कुरु ते वशम्' इत्युक्तरीत्या अपेक्षितमनवाप्यैव मध्ये मृता नरके पतन्ति इत्यर्थः ।

आत्मसंभाविताः स्तब्धाः धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ।। १७ ।।

आत्मसम्भाविताः - 'सर्वं वाक्यं सावधारणम्' इत्यवधारणगर्भता आत्मनैव सम्भाविता इत्यर्थः । **स्तब्धा -** आत्मानं परिपूर्णं मन्यमानाः, किञ्चिदपि सत्कर्माकुर्वाणा इत्यर्थः । तत्र हेतुमाह - **धनमानमदान्विताः -** धनेन मानेन च यो मदः तेनान्विताः । 'विद्या मदो धनमदः तथैवाभिजनो मदः' इति सन्नियोगशिष्टधनग्रहणान्मानशब्देन तत्सन्नियोगशिष्टविद्याभिजनजन्यमानो ज्ञेयः । दृष्ट संपत्यादृष्टवैकल्यतिरस्कारः इति भावः । **यजन्त** इति **नामयज्ञैः** नामसम्बन्धिनो यज्ञानाम् अयज्ञाः सम्बन्धश्च फलपरि-भावातमकानामैकप्रयोजनैः इत्यर्थः । यष्टेति नाममात्र सम्पादकेरिति यावत् । **दम्भेन -** दम्भेन हेतुना दम्भमभिसन्धाय इत्यर्थः । **अविधिपूर्वकं -** विधिः विधायकं वाक्यं तदुक्तप्रकारपरित्यागो विधिपूर्वकत्वं विधिम् अतिक्रम्यैव यजन्त इत्यर्थः । ते च इत्थं यजन्त इत्याह -

अहंकारं बलं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।। १८ ।।

अहङ्कारम् - अहमेव करोमि इति बुद्धिं **समाश्रिताः -** सम्यक् आश्रिताः निरपेक्षत्वेनाभिमन्दमाना इत्यर्थः । अनेन देवः प्रक्रमते इत्यस्यार्थस्य वैपरीत्यं सूचितम् । तदा बलमाश्रिताः मद्बलमेव अत्र पर्याप्तमिति मन्यमानाः । एतेन 'भगवतो बलेन' इत्यस्य वैपरीत्यं दर्शितं; गर्वं तदुभयमूलं सर्वाज्ञाने हेतुभूतः मनोवृत्तिविशेषः तमाश्रिताः । **कामं क्रोधं -** पूज्यपूजाप्रस्पर्धिनौ कामक्रोधौ च **संश्रिताः - आत्मपरदेहे** तु आत्मशब्दः आत्मीय परः । आत्मीय्यानां परेषां च देहेषु यज्ञाद्यनुकूलेषु ऋत्विगादिदेहेषु तत्प्रतिकूलतस्करादिदेहेषु **मां -** सर्वस्य कारयितारं **माम् -** अभ्यसूयकाः **प्रद्विषन्तः -** कर्मणैव सर्वनिष्पत्तौ किमीश्वरेण इति कुयुक्तिदोषमाविष्कुर्वन्तः द्विषन्तष्टा यजन्त इत्यन्वयः ।

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।। १९ ।।

द्विषतः मामिति शेषः । मामसहमानान् इत्यर्थः । **क्रूरान्** - क्रौर्ययुक्तान् **नराधमान्** - कृत्याकृत्यविवेकशून्यतया नरेषु अधमान् **अशुभान्** - स्वसंर्गेण परेष्वपि दोषजनकान् **अजस्त्रं** - निरन्तरं **संसारेषु** - जन्मजरामरणादिरूपेण चक्रवत्परिवर्तमानेषु **संसारेषु** - तत्राप्यासुरीषु योनिष्वेव **क्षिपामि** - मदानुकूल्यप्रत्यनिकेष्वेव जन्मसु संयोजयामि इत्यर्थः । तमोपकर्ष परंपरामाह -

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ।। २० ।।

आसुरीम् - असुराः भगवद्विमुखाः विपरीतः तथासुर इत्युक्तेः तथा भूतां **योनिम् आपन्नाः** मदानुकूल्यप्रत्यनीकं जन्मप्राप्ताः इत्यर्थः । अत एव **जन्मनि जन्मनि** - मूढाविपरीतज्ञानवन्तः । **मामप्राप्यैव** - मत्प्राप्तिहेतुभूतज्ञानमलब्ध्वैव, **ततः** जन्मनः **अधमां गतिं यान्ति ।**

'मज्जन्ति पितरः तस्य नरके शाश्वतीस्समाः ।
द्वेष्टारो विबुधश्रेष्ठं देवं नारायणं हरिम्' ।। इति ।

भगवद्वेषणपूर्वपतनानामपि पतनहेतुत्वस्मृतेः । तेषां पतनं कैमुत्यसिद्धम् । अन्यासुरस्य भावस्य मूलं वदन् अवश्यं परिहरणीयं सङ्क्षेपेण आह -

त्रिविधं नरकस्यैतद् द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत् ।। २१ ।।

आत्मनः - आत्मानम् अप्राप्तिसाधनं **कामः क्रोधः लोभ** - इत्येतत् **त्रिविधं** - त्रिप्रकारं **नरकस्य** - असुरस्वभावरूपस्य नरकस्य **द्वारं** - प्रवेशमार्गं हेतुः इति यावत् । **द्वारं** - नाशनमित्यव्यवहितोच्चारणात् प्रवेशकाल - विनाशक इति द्योतितं रौरवादिर्नरकः पापक्षयहेतुत्वात् नरकः । आसुरस्वभावस्तु पापार्जनहेतुत्वात् अतिघोर इति । आसुरस्वभास्येत्यनुक्त्वा नरकस्य इत्युक्तिः । तस्मादतिघोरनरकहेतुत्वादेव त्रयाणामादित्रयं **त्यज** - अथ त्याज्यस्य त्यागे फलमाह -

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनश्श्रेयस्ततो याति परां गतिम् ।। २२ ।।

तमोद्वारैः - मद्विपरीतज्ञानहेतुभिः **एतैः** - त्रिभिः कामादिभिः **विमुक्तः नरः - आत्मन श्रेय आचरति ।** मद्विषयज्ञानसम्पादनमतः परिहार्यो हेतुः, शास्त्रानादर इत्याह -

यश्शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ।। २३ ।।

विधिर्विधानं **शास्त्रं -** वेदः तद्रूपं विधानम् अनुशासनम् **उत्सृज्य -** त्यक्त्वा **कामकारतः** स्वाच्छन्द्येन **वर्तते -** प्रवर्तते **न स सिद्धिमवाप्नोति -** न सिद्धिमामुष्मिकीं प्राप्नोति । **न सुखम् -** ऐहिकमपि सुखं न किञ्चिदवाप्नोति, **न परां गतिं** नाप्नोति इत्यर्थः । परगतिप्राप्तिस्तु दूरनिरतेति भावः । अध्यायोक्तं सर्वमेव त्वदर्थमित्याह -

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ।। २४ ।।

कार्यम् - उपादेयं **अकार्यम् -** अनुपादेयं तयोः **व्यवस्थायां -** शास्त्रं ते तव प्रमाणं साधकम् । अनुष्ठानविपर्ययस्य तत्त्वविपर्ययस्य च आसुरस्वभावप्रदर्शित्वात् तद्विपर्ययस्य विवक्षितत्वात् तत्त्वयोरपि क्रोडीकारार्थं कार्याकार्येति साधारणशब्दः । **ते -** इत्यनेन सत्वोत्तरस्य तव मदाज्ञारूपं शास्त्रं प्रमाणं न द्विषामिति द्योतितम् । **शास्त्रविधानोक्तम् -** स्मृतीतिहासपुराणात् उपबृम्हितोवेदश्शास्त्रं तस्य विधानमाज्ञा तज्ज्ञापनप्रकारः तेन उक्तम् । **कर्म -** मदाराधनात्मकं कर्म **ज्ञात्वा -** अन्यूनातिरिक्तं विज्ञाय कर्तुम् उपादातुम् **अर्हसि ।** अन्यथा शास्त्रकरणं च न कर्तव्यमित्यभिप्रायेण अर्हसि इत्युक्तिः । **इह** कर्मभूमौ - कर्मवश्यत्वावस्थायां वा । अयम्भावः । सत्त्वोत्तरेण भवता कुहकपुरुषकालातिशय-परिगृहीतमोहनशास्त्राभ्यासप्रक्रियानुधावनेन भगवदाज्ञारूपवेदाख्यशास्त्रसारभूताद्यथाधिकारं कर्मज्ञानभक्तियोगरूपभगवदनन्यभजनपरमधर्मान्नप्रच्युतेन भवितव्यम् इति ।

।। श्रीशैलबुक्कपट्टण येन्नच्चान् दास विलिखिते अध्यायः
श्रीमद्गीताभाष्यार्थसङ्ग्रहे षोडशोवृत्तः ।।

।। शुभमस्तु ।।

सप्तदशाऽध्यायः

[श्रद्धात्रयविभागयोगः]

इत्थं प्राप्यतत्त्वज्ञानं प्राप्त्युपायज्ञानं च शास्त्रमूलम् इत्युक्तम् । इदानीं सामान्यतो विशेषतश्च शास्त्रीयार्थ विभजनं क्रियते । **अर्जुन उवाच इति ।** अशास्त्रविहितस्य निष्फलत्वमजानन् अशास्त्रविहिते श्रद्धासंयुक्ते यागादौ सत्त्वादिनिमित्तफलभेदबुभुत्सया अर्जुन उवाच **इत्यर्थः** ।

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ।। १ ।।

हे कृष्ण! सर्वापेक्षितनिर्वृत्तिप्रद; **शास्त्रविधिम् उत्सृज्य** शास्त्रोक्तविधानं परित्यज्य **श्रद्धयान्विताः ये यजन्ते** यागादि कुर्वन्ति **तेषां निष्ठा तु** का नितरां स्थीयते । अस्मिन् इति निष्ठा **आश्रयः -** आलम्बनमित्यर्थः । **का** किं रूपांशास्त्रीय निष्ठातो व्यावृत्तिद्योतनाय **तु** शब्दः **सत्त्वमिति** का इति स्त्रीलिङ्गान्तः, किं शब्दः नपुंसकान्ततया विपरिणेतव्यः । **आहो** इति पदं नावर्तनीयम् ।

श्रीभगवानुवाच इति । इत्थं पूर्वोक्तविरुद्धार्थं पृष्टो भगवान् अशास्त्रविहितश्रद्धायाः तत्पूर्वकस्य च यागादेः निष्फलत्वं हृदि निधाय शास्त्रीयस्य यागादेः गुणतः त्रैविध्यं प्रतिपादयितुं शास्त्रीयश्रद्धायाः त्रैविध्यमुवाच इत्यर्थः ।।

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ।। २ ।।

देहिनां ब्रह्मादीनां इत्युक्तम् । ननु शास्त्रेषु साधारणेषु कथं पुरुषभेदात् त्रैविध्यमित्यत आह -

श्रद्धेत्यर्थः । स्वभावजा - स्वस्वभावो धर्मविशेषः स्वासाधारणो धर्मः इत्यर्थः । तस्माज्जायत इति तथोक्ताः, तदसाधारणधर्मश्च प्राचीनवासनानिमित्तस्तत्तद्रुचिविशेषः । **तज्जन्यत्वं** च श्रद्धाया अन्वयव्यतिरेकसिद्धम् । **श्रद्धा** च स्वाभिमतं सावयत्येतदिति विश्वासपूर्विकासाधने त्वरा 'श्रद्धा विश्वासकाङ्क्षयोः' इति हि निघण्टुः । वासनारुचिश्च श्रद्धा च **आत्मधर्माः** शुद्धस्वभावस्यैव आत्मनः कर्ममूलगुणमयप्रकृतिसंसर्गोपाधिकधर्मभूतज्ञानपरिणतिविशेषाः । ततश्च सत्त्वादियुक्त देहसमुद्भवा **श्रद्धा च सात्त्विकी-राजसी-तामसी** च इति त्रिविधातामेनां **शृणु,** त्रिप्रकारकथनादेव त्रैविध्यस्य श्रुतत्वात् पुनः शृण्वित्युक्तिः, तत्प्रकारविशेषाभिप्रायेण ।।

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धस्स एव सः ।। ३ ।।

सर्वस्य पुरुषस्य चेतनस्य **सत्त्वानुरूपा** - सत्त्वमन्तःकरणं तदनुरूपा **श्रद्धा भवति** । **अन्तःकरणं** सत्त्वमन्तःकरणयुक्तं तदनुगुणा जायत इति । यद्विषयरुचिजनक-वासनोत्तम्भकसत्त्वादियुक्तम् । तद्विषया श्रद्धा जायत इति यावत् । अयं पुरुषः श्रद्धामयः श्रद्धापरिणामः श्रद्धाजन्यफलान्वयि इति यावत् । **यो यच्छ्रद्धः यः पुरुषः** यादृश श्रद्धायुक्तः । **स** स एव तादृश **श्रद्धा** परिणाम **एव** 'आयुर्घृतम्' इतिवत् निर्देशः पुण्यकर्मविषयश्रद्धा युक्तश्चेत् पुण्यकर्मसंयुक्तो भवति । तत्फलविशेषाणां श्रद्धाविशेषनिबन्धनत्वमेव आह -

यजन्ते सात्विका देवान् यक्ष रक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ।। ४ ।।

सात्विकाः सत्त्वप्रचुराः श्रद्धया युक्ताः **देवान् यजन्ते** । ततश्च आराध्य सायुज्य प्राप्तेः एव आराधनफलत्वात् तेषां दुःखासम्भिन्नं फलमिति । तादृशफलहेतुभूतदेवयागविषया श्रद्धा सात्त्विकीत्युक्तम् भवति । तेन श्रद्धां शृणु इत्युक्त्या सात्त्विकाद्यनुष्ठानप्रदर्शने असङ्गतिः इति नाशङ्कनीयम् । **यक्षरक्षांसि राजसाः** रजः प्रचुराः यक्ष रक्षांसि यजन्त इत्यर्थः । अत्रापि पूर्ववत् दुःखसम्भिन्नाल्पसुख जननी राजसी श्रद्धा इति पर्यवसानं कार्यम् । अन्ये उभाभ्यां भिन्नास्तामसाः - तमः प्रचुराः **प्रेतान्भूतगणान्** रुद्रपार्षदांश्च यजन्ते । अत्रापि दुःखमयाल्पसुख जननी श्रद्धा तामसी इति पर्यवसानं कार्यम् । एवं शास्त्रीयेषु यागादिषु गुणश्रद्धाभेदेन तव प्रश्न एव अयुक्त इत्यर्थात् उक्तमथ कण्ठत एव प्रश्नप्रतिषेधमाह -

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।
डम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ।। ५ ।।

अशास्त्राणि शास्त्रं वेदः तद्विरुद्धनि बाह्यागमा इत्यर्थः । तैः विहितम् । यद्वा शास्त्रेण विहितं शास्त्रविहितं तद्भिन्नम् **अशास्त्रविहितं** येन रूपेण यच्छास्त्रेण विहितम् । तद्वैपरीत्येन अनुष्ठितम् इत्यर्थः । **घोरं** यावत्कार्यमतिप्रयासगर्भं **तपः ये जनाः तप्यन्ते** - अनुतिष्ठन्ति । तपश्शब्दप्रदर्शनार्थः । तादृशं यागादिकमपि ये कुर्वत इत्यर्थः । तेन यजन्ते श्रद्धयानिताः तेषां निष्ठा तु का इति प्रश्ने तप्यन्ते तव इत्युक्ति व्यधिकरणेति शङ्का परास्ता । अनेन प्रश्नगत यजधातोरपि प्रदर्शकत्वं बोध्यम् । **डम्भाहङ्कारसंयुक्ता** - डम्भाहङ्काराभ्यां संयुक्ताः दृढं घटाहितान् **कामरागबलैः अन्विताः** । अत्र कामरागसहपाठात् बलमसात्त्विकमेव ग्राह्यं तेषां न परत्र सौख्यभावमात्रमपि तु अत्रापि तन्नास्ति इत्याह -

कर्शयन्तश्शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तश्शरीरस्थं तान्विद्ध्यासुरनिश्चयान् ।। ६ ।।

शरीरस्थं शरीररूपेण परिणतं **भूतग्रामं** पृथिव्यादिभूत सङ्घं **कर्शयन्तः** - शोषयन्तः अत एव **अचेतसः** ज्ञानशून्याः **अन्तश्शरीरस्थं** शरीरान्तरवस्थितं **मां च** कर्शयन्त एव अत्र **मां** मदंशभूतं जीवमित्यर्थः । अत एव शरीरस्थमित्यस्य अत्रापि अन्वेतुं शक्यत्वेप्यन्तश्शरीरस्थमिति क्षेत्रज्ञत्वसूचनाय उक्तं 'क्षेत्रज्ञं चापि माम्' इति शैल्यनुरोधात् । अत्रापि मां इत्युक्तिः । 'तेन अन्तर्याम्यमृतः' 'अनश्नन् अन्यो अभिचाकशीति' । 'न स्थानतोऽपि परस्येति' परमात्मन स्वरूपतो धर्मतो वा अदर्शनासम्भव इत्याशङ्का परास्ता । क्षेत्रज्ञस्य तु शरीरशोषणे सुखज्ञानसङ्कोचरूपकर्शनम् उपपद्यत इति न दोषः । एवं ये तपस्तप्यन्ते यागादिकं च कुर्वते । तान् आसुरनिश्चयान्विद्धि । असुराणां सम्बन्धी आसुरः, तादृशो निश्चयो येषान्ते तथोक्ताः । मदाज्ञाव्यतिक्रमः कर्तव्य इति खल्वसुराणां निश्चयः । तेन च तेषां पतन्ति नरके शुचौ इत्यनर्थ एवोक्तः । एते तथा भवन्ति तानासुर निश्चयान्विद्धि इत्युक्तम् । अथ प्रकृतमेव शास्त्रीयेषु यज्ञदानादिषु गुणतो विशेषं प्रपञ्चयितुं वृद्धिसमानैः सर्वेषां विपरीत्यैः विपर्यय इत्यायुर्वेदोक्तरीत्या सत्त्वादि विवृद्धेः आहारमूलत्वादाहारत्रैविध्यम् उच्यते ।।

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ।। ७ ।।

सर्वस्य प्राणिजातस्य **आहारोऽपि त्रिविधः** सत्त्वादिगुणभेदेन त्रिप्रकारस्सन् **प्रियो भवति** । अत्र 'पचाम्यन्नं चतुर्विधम्' इत्युक्तचातुर्विध्याविरोधेन इदमपि त्रैविध्यं बोध्यम् इत्यभिप्रायेणाऽ**पिशब्दः** तथा यज्ञस्त्रिविधः । तथा तपोदानं च त्रिविधं **तेषाम्** आहारादीनाम् **इमं** वक्ष्यमाणं **भेदं शृणु** ।।

आयुस्सत्त्वबलारोग्यसुखप्रीतिविवर्धकाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहारास्सात्त्विकप्रियाः ।। ८ ।।

आयुः प्रसिद्धं **सत्त्वम्** - अन्तःकरणकार्यं ज्ञानं 'द्रव्यासु व्यवसायेषु सत्त्व'**मिति** ज्ञानविशेषे निघण्टुः । **बलं** प्राणादेः उपचयः, **आरोग्यं** धातुसाम्यादिकं **सुखं** प्रसिद्धम् । **प्रीतिश्च** तेषामायुरादीनां **विवर्धकाः** आयुरादिविवर्धकत्वं आयुर्वेदादिभिः श्रुत्यादिभिः प्रत्यक्षादिभिः यथायोगं ग्राह्यम् । **रस्यन्त** इति **रासाः** - मधुररसोपेततया भोग्याः **मधुररसस्य**

रसान्तरेभ्यः शरीरस्थितौ विशेषतया उपयोगित्वम् । 'रसास्वादाम्ललवणतिक्तोष्मण-कषायकाः । षट्द्रव्यमाश्रितास्ते च यथा पूर्वं बलावहाः' । इति वाग्भटवचनसिद्धम् । **स्निग्धाः** स्नेहयुक्ताः स्नेहयुक्ताहारस्य रूक्षवायुकृतशरीरविशरणनिवारकत्त्वम् आयुर्वेदसिद्धं **स्थिराः** - स्वसाध्यधातुबलादेः स्थैर्यसम्पादकाः **हृद्याः** - सन्दर्शनमात्रेण प्रीत्युत्पादकवेषाः **आहारास्सात्त्विकस्य** पुरुषस्य प्रियाः ।

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टाः दुःखशोकामयप्रदाः ।। ९ ।।

कटवश्च अम्लाश्च लवणश्च अत्युष्णा अतितीक्ष्णा रूक्षाविदाहिनश्च तथोक्ताः । **कटवः** - कटुरसाः, **अम्लाः** - आम्लरसाः, **लवणाः** - लवणोत्कटाः अत्युष्णाः प्रसिद्धाः, **अतितीक्ष्णा** उदयोक्षणप्रभृतिप्रतिकूलतमार्थाः **रूक्षाः** - शोषकराः वातकोपना इत्यर्थः । **विदाहिनः** सन्तापकराः । पित्तकोपना इत्यर्थः । एवंविधा आहाराराजसस्य इष्टा अभिमताः । ते च कट्वादयः उक्ताः, उक्ताः **आहारादुःखशोकामयप्रदाः** दुःखप्रदाः शोकप्रदा आमयप्रदाश्च इत्यर्थः । दुःखप्रदत्वं **प्रत्यक्षसिद्धं** शोकप्रदत्वं तु धातुवैषम्यजनकत्वेन इत्यायुर्वेदसिद्धम् । आमयप्रदत्वमपि कालक्रमेण प्रत्यक्षसिद्धमेव ।

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ।। १० ।।

यातः - निवृत्तिः **यामः** - श्रेष्ठांशो यस्य तद्यातयामं निर्वीर्यम् इत्यर्थः । चिरकालावस्थितम् इति यावत् । **गतरसं** - त्यक्तस्वभाविकरसं तत्तद्वस्तु स्वभावसिद्ध-रसत्यागेन रसान्तरं प्राप्तमित्यर्थः । **पूति** - दुर्गन्धोपेतं **पर्युषितं** - कालातिपत्तिमात्रेण रसान्तरापन्नं **उच्छिष्टं** गुर्वादिभ्योऽन्येषां भुक्तशिष्टम् । **अमेध्यं** मेधो यज्ञस्तदर्हं मेध्यं तदनर्हम् अमेध्यम् । अयज्ञशिष्टमित्यर्थः । एवंविधं यद्भोजनं भुज्यत इति **भोजनम्** - आहार इत्यर्थः । 'कृत्यल्युटो बहुलमि'ति कर्मणि ल्युट् तत् तामसप्रियम् आहारत्रैविध्यकथनस्य सात्त्विकाहारत्रैविध्ये तात्पर्यम् । अथ यज्ञत्रैविध्यमाह -

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनस्समाधाय स सात्त्विकः ।। ११ ।।

अफलाकाङ्क्षिभिः - फलाकाङ्क्षारहितैः परमात्मप्रीतिव्यतिरिक्तफलनिरपेक्षैः इत्यर्थः । **विधिदृष्टः** - विधिर्विधायकं वाक्यं तेन दृष्टः । यथा शास्त्रकरणादविकल इत्यर्थः ।

यः - यज्ञः यष्टव्यमेव इति **मनस्समाधाय** सुहृत्समाराधनन्यायेन प्रयोजनाभावेऽपि भगवदाराधनत्वेन **यष्टव्यमेव इति** प्रकारान्तराद्विनिवार्य प्रस्तुतक्रियायामेकाग्रं **मनः** कृत्वा इत्यर्थः । **इज्यते** क्रियते **स सात्त्विको** यज्ञ इत्यर्थः ।।

अभिसन्धाय तु फलं दम्भार्थमपि चैव यः ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ।। १२ ।।

फलमभिसन्धाय इदं फलं मे भूयात् इति सङ्कल्प्य **डम्भार्थं** - डम्भनिष्पात्तये यशःफलावाप्तय इत्यर्थः । यदित्यस्य यदीत्यर्थः । **इज्यते** यदि इत्यर्थः । **तं यज्ञं राजसं विद्धि** इत्यर्थः । त्वन्तु सात्त्विकयज्ञाधिकारीत्यभिप्रेत्य **भरतश्रेष्ठ** इत्युक्तम् ।।

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ।। १३ ।।

विधिर्विधानम् अनुशासनं तद्धीनं सदाचारयुक्तैः विद्वद्भिः यजस्वेत्युक्तिहीनम् असृष्टान्नं यज्ञार्थं सृष्टं यत्तत्सृष्टशब्देन विवक्षितं तदन्यत् असृष्टं शूद्राद्यार्जितं तादृशमन्नं यस्य तदसृष्टान्नम् । तथा च स्मर्यते । 'न यज्ञार्थं धनं शूद्राद्विप्रोऽभिक्षेत **धर्मवित्** । यजमानो हि भिक्षित्वाप्तेत्य चण्डालतां व्रजेत्' इति **मन्त्रहीनमदक्षिणं** ऋत्विग्भो **देयं** द्रव्यं दक्षिणा तद्रहितः **श्रद्धया विरहितं यज्ञं तामसम्** इति **परिचक्षते** वेदविद आहुः इत्यर्थः । अथ तपस उक्तरीत्या गुणतस्त्रैविध्यं वक्तुं तस्य शरीरवाङ्मनोनिष्पाद्यतया प्रथमं स्वरूपमाह -

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ।। १४ ।।

देव-द्विज-सुर-प्राज्ञानां पूजनं तत्सन्निधाने कर्तव्यः प्रदक्षिणादिः । अत्र **शौच** - शब्दस्तद्धेतुतीर्थसेवादिपरः । **आर्जवं** वाङ्मनःकायवृत्तीनाम् ऐकरूप्यं **तस्य** शरीरप्राधान्याच्छारीरत्वव्यपदेशः, **ब्रह्मचर्यम्** - 'स्मरणं कीर्तनं केलिः प्रेक्षणं **गुह्यभाषणम्**' इत्याद्युक्ताष्टविधमैथुनेषु स्त्रीविषयभोग्यतायुक्तेक्षण रूपमैथुनरहितत्वम् अंहिसापरपीडनाभाव इत्येत**च्छारीरं तप उच्यते** ।

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।। १५ ।।

अनुद्वेगकरं भयादेरहेतुभूतं परुषमर्मोद्घाटनपरिवादादिराहित्यमित्यर्थः । **सत्यं यथा** दृष्टार्थविषयं भूतहितं **प्रियहितं** प्रियं च तद्धितं च प्रियहितं स्वागतधर्मान् घनादिरूपेण प्रियं पुरुषार्थपर्यवसायित्वेन हितं च इत्यर्थः । **स्वाध्यायाभ्यसनं चैव** स्वाध्यायो वेदः तस्याध्ययनं गुरुमुखोच्चारण अनूच्चारणं जपयज्ञश्च इत्येतद्वाङ्मयं **तप उच्यते ।**

मनःप्रसादस्सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ।। १६ ।।

प्रसादश्च सौम्यत्वं च प्रसादताम्यत्वे मनसः **प्रसादसौम्यत्वे** सर्वो द्वन्द्व इत्येकद्भावः । **प्रसादः** परेष्वहिताभिप्रायकालुष्यनिवृत्तिः **सौम्यत्वं** हिताऽभिप्राययोगः **मौनं** मनः प्रसादेत्यत्र स्थितं मनः बुध्या निष्कृष्टमनसा इत्यनुषञ्जनीयम् । तथा च मनसा वाक्प्रवृत्तेः नियमनं मौनशब्दार्थः । **आत्मविनिग्रहः** आत्मनो मनसो विनिग्रहः विशेषेण निग्रहः ध्येयविषयेव स्थापनं **भावसंशुद्धिः** भावस्याभिप्रायस्य **संशुद्धिः** सम्यक्बुद्धिः आत्मव्यतिरिक्तसमस्तोतरवर्जनम् इत्येतत्सर्वं **मानसं तप उच्यते** । इत्थं शारीरवाचकमानसस्वरूपेण त्रिविधस्यापि तपसस्सत्वादिगुणभेदेन त्रैविध्यमाह -

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैस्सात्त्विकं परिचक्षते ।। १७ ।।

अफलाकाङ्क्षिभिः फलाकाङ्क्षरहितैः **युक्तैः** क्रियमाणमिदं भगवदाराधनात्मकम् इति । तद्योगमाशंसमानै **परया श्रद्धया त्रिविधं** शारीरादिभेदेन पूर्वोक्तप्रकारं **यत्तपस्तप्तं तत्सात्त्विकं परिचक्षते ।।**

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ।। १८ ।।

सत्कारः - मनसा आदरणं मानः बहुमतिः वाचा प्रशंसनं पूजा नमस्कारादिः तदर्थं सत्कारार्थं मानार्थं **पूजार्थं च दम्भेन यत्तपः क्रियते** तत्तपः । **इह** अस्मिन्लोके **राजस**मिति प्रोक्तं तत्कीदृशं **चलं** - चलयतीति चलंन्त साधनमित्यर्थः । **अध्रुवं** क्षयिष्णु मनोवाक्काय निष्पाद्य बहुमतये श्रद्धां विनां दम्भेनैव नश्वरफलाकाङ्क्षया यत्तपः क्रियते तद्राजसम् इत्यर्थः ।।

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ।। १९ ।।

मूढाः अविवेकिनः **तेषां ग्राहः -** परिग्रहः विमूढकर्तृताभिनिवेशेन इत्यर्थः । **आत्मपीडया** स्वशक्तिम् अविचार्य स्वबाधनेन यत्तपः क्रियते । इदं कर्मारब्धं अत्र बलं तु न पर्याप्तं किं वा भवेत् इति । यत्क्रियत इत्यर्थः । **परस्योत्सादनार्थं वा** यत्क्रियते **तत्तामसमुदाहृतम्** इत्यर्थः । अत्र उदाहृतम् इत्यनेन 'अशक्यानि दुरन्तानि समव्ययकलानि च । असाध्यानि च वस्तूनि नारभेत विचक्षणः' । 'देशं कालं तथात्मानं द्रव्याद्रव्यं प्रयोजनम् । उपपत्तिमवस्थां च ज्ञात्वा शौचं समाचरेत्' ।। इति शास्त्रं स्मारितम् ।।

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ।। २० ।।

देशे - पुण्यदेशे, **काले -** पुण्यकाले च **पात्रे** श्रुतशीलादिमत्तया पात्रे **यद्दीयते** तदनुपकारिणा दीयते चेत् **तद्दानं सात्त्विकं स्मृतम् ।**

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ।। २१ ।।

प्रत्युपकारार्थं - प्रत्युपकार एवार्थः । प्रयोजनं यस्य तत् तथोक्तम् । प्रत्युपकाराभिप्रायपूर्वकम् इत्यर्थः । **फलमुद्दिश्य वा** 'वा शब्दश्चार्थः' । फलमुद्दिश्य च **क्लिष्टं** द्रव्यरागजनितपरिक्लेशयुक्तम् । अकल्याणद्रव्यम् इत्यर्थः । क्लेशेन द्रव्यं त्यजन् निहीनः पुरुषः कल्याणतमं स्वस्मै निधाय अकल्याणम् अन्यस्मै ददाति इति प्रसिद्धम् । **तद्राजसं दानम्** इत्युदाहृतम् इत्यर्थः ।

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ।। २२ ।।

अदेशः - देशशब्दः पुण्यदेशपरः तद्भिन्नेकलिङ्गकीटादिदेश इत्यर्थः । एवम् **अकाले** अयोग्यरात्र्यादिकाले **अपात्रेभ्यः** पङ्क्तिदूर-मूर्ख-तस्कर-कितव-वन्दिवैतालिकेभ्यः **यद्दीयते च** शब्दः अनुक्तसमुच्चयार्थः । ततश्च अपात्रेभ्यश्च इत्यर्थः । **असत्कृतम् -** सत्कृतं सत्करणं भावे निष्ठा तद्रहितं पादप्रक्षाळनादि सत्काररहितम् **अवज्ञातं -** अहमुत्कृष्ट इति दुरभिमानेन वाचा तिरस्कारपूर्वकं च देशेकालेऽपि यच्चदीयते **तत्तामसम्** इत्यर्थः । एवं वैदिकानां यज्ञदानतप आदीनां सत्त्वादिगुणभेदेन भेदमभिधाय तस्यैव वैदिकस्य यज्ञादेः प्रणवसंयोगेन तत्सच्छब्दव्यपदेश्यतया च लक्षणमुच्यते ।।

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ।। २३ ।।

निर्दिश्यतेऽनेन इति **निर्देश**शब्दः । इतिप्रकारे **ओं तत्सत्** इति । एवंप्रकारः **त्रिविधः** निर्देशशब्दः ब्रह्मणस्सम्बन्धसामान्ये षष्ठी ब्रह्मसम्बन्धि इत्यर्थः । **ब्रह्मशब्दो वेदपरः -** वेद सम्बन्धीवेदान्वयी स्मृत इत्यर्थः । **तत्सम्बन्धश्च** वैदिककर्मान्वितत्त्वेन तत ओम् इत्यस्य वैदिककर्माङ्गप्रयोगादौ प्रयुज्यमानतया तत्सत् एतयोश्च पूज्यत्वाय वाचकतया च तेन त्रिविधेन शब्देन ब्राह्मणः ब्रह्मैव ब्राह्मं स्वार्थे अण् - अणति पठति इत्यणः अणतेः पचाद्यच् **ब्राह्मस्य -** अणाः, ब्राह्मणाः त्रैवर्णिका इत्यर्थः । वेदाश्च **यज्ञाश्च पुरा विहिताः** अन्विताः मयैव निर्मिता इत्यर्थः । उक्तनिर्देशत्रयस्य ब्रह्मसम्बन्धित्त्वात् । वेदानाम् इव तत्सम्बन्धि त्रैवर्णिकानां तद्विहितकर्मणां तन्निर्देशत्रयान्वय इति भावः । तत्र प्रथमम् ओमिति शब्दस्य अन्वयप्रकारमाह -

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्तास्सततं ब्रह्मवादिनाम् ।। २४ ।।

तस्मात् - सर्वस्रष्ट्रा मया तदन्वितत्वेनैव विहितत्वात् विधानोक्ताः । विधीयते अनेन इति **विधानं** विधायकं शास्त्रं तेन उक्ताः यज्ञदानतपःक्रियाः **ब्रह्मवादिनां** वेदवादिनां त्रैवर्णिकानां **ओमित्युदाहृत्य सततं प्रवर्तन्ते ।** यद्यप्यत्र श्लोके वेदानां प्रणवान्वयो नोक्तः । अथापि ब्रह्मवादिनाम् इत्यनेन तेषां प्रणवान्वयः सूचितः । अत एव च तदन्वितवेदवक्तृत्वेन ब्राह्मणानामपि तदन्वय उक्तः । एवं स्वर्गापवर्गसाधारण-समस्तवैदिककर्मणां प्रणवान्वयरूपं लक्षणमुक्तम् । अथ तत्सच्छब्दौ मोक्षसाधनानां त्रिवर्गसाधनानां च लक्षणतया उच्यते ।।

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ।। २५ ।।

फलमनभिसन्धाय इदं फलं मे भूयात् इत्यसङ्कल्प्येत्यर्थः । **यज्ञ तपः क्रियाः** यज्ञ-तपोरूपाः **दानक्रियाश्च** मोक्षकाङ्क्षिभिः याः **क्रियन्ते** ताः क्रियाः तदिति निर्देश्या इति शेषः । **मोक्षकाङ्क्षिभिः** इत्यनेन ब्राह्मणानां वेदानां च तदन्वयस्सूचितः । अथ एतेषां सच्छब्दान्वय प्रकारं वक्तुं लोके सच्छब्दव्युत्पत्तिप्रकारमाह -

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ।। २६ ।।

सद्भावे वर्तमानतायाम् सद्विलक्षणत्वे इत्यर्थः । **साधुभावे** कल्याणरूपत्वे **सदित्येव प्रयुज्यते ।** लोके वेदे च इति शेषः । **तथा प्रशस्ते कर्मणि** केनचिदनुष्ठिते कल्याणे कर्मणि

इदं सत्कर्मेति **युज्यते** - प्रयुज्यत इत्यर्थः । पूर्वत्र मोक्षकाङ्क्षिभिः इत्युक्त्वा अत्र प्रशस्त इत्येतावन्मात्रोक्तेः मोक्षेतरपुरुषार्थसाधनमात्रलक्षणतया सच्छब्दो व्यपदिश्यत इति व्यञ्जितम् । एवं सच्छब्दस्य व्युत्पत्तिप्रकारं च उक्त्वा तदुपजीवनेन लक्षयिषिते ब्राह्मणादित्रिकं तत्प्रयोगोपपत्तिः उपसंह्रियते ।।

यज्ञे तपसि दाने च स्थितिस्सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ।। २७ ।।

वैदिकानां त्रैवर्णिकानां यज्ञे तपसि दाने च स्थितिः कल्याणतया **स्थितिस्सदि -** त्युच्यते । **तदर्थीयं** यज्ञदानार्थीयं **कर्म च सदित्येवाऽभिधीयते** । अत्र **स्थितिः** इत्यनेन स्थातॄणां वेदानां च सच्छब्दान्वयोर्थाद्दर्शितः । तस्मात् वेदा वैदिकानि कर्माणि ब्राह्मण शब्दनिर्दिष्टः त्रैवर्णिकाश्च हि तत्सच्छब्दान्वयरूपलक्षणेन **अवेदेभ्यः** अवैदिकेभ्यश्च व्यावृत्ता वेदितव्याः । अथ प्रकृतानां सन्निर्देशार्हत्वदृढीकरणाय शास्त्रा यस्यापि श्रद्धारहितस्य असत्त्वमाह -

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ।। २८ ।।

श्रद्धाराहित्येन **हुतम् -** होमः भावे निष्ठा । तथा **अश्रद्धया कृतं दत्तं दानं** अश्रद्धया **तप्तं तपः** यत्तत् असदित्युच्यते । कुतः ? तत् अश्रद्धया कृतं पूर्वोक्तं **प्रेत्य न च इह नो** आमुष्मिकफलाय सांसारिकफलाय च न इत्यर्थः ।।

।। श्रीशैलबुक्कपट्टण येन्नाच्चान्दासविलिखितेऽध्यायः
श्रीमद्गीताभाष्यार्थरहस्ये पूरि सप्तदशः ।।

* * *

अष्टादशोऽध्यायः

[मोक्षसन्न्यासयोगः]

इत्थं देवासुरविभागोक्तिमुखेन उपादेय विभजनमुक्त्वाऽथ मोक्षसाधनभूतांशविशोधनम् अस्मिन्नध्याये क्रियते । **अर्जुन उवाच** इति । त्यागसन्न्यासयोः पृथक्त्वैकत्वनिर्णयाय च अर्जुनः पृच्छति इत्यर्थः ।

सन्न्यासस्य महावाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ।। १ ।।

अत्र **तत्त्वं** पृथग्वेदितुम् **इच्छामि** इत्यन्वयः । पूर्वत्र पृथक्त्वहेत्वनुक्तेः । एकत्वोक्ति-रूपोत्तराननुगुण्यात् । किन्तु **सन्न्यासस्य** त्यागस्य च **तत्त्वं** याथात्म्यं **वेदितुं** - ज्ञातुम् इच्छामि पृथक्चेदिच्छामि । पृथक्त्वमस्ति चेत्तदपि वेदितुम् इच्छामि इति । अत्र **महाबाहो हृषीकेश केशिनिषूदने**ति सम्बुद्धित्रयेण स्वपक्षतया समर्थितमर्थं शोधयितु संशयं प्रशमयितुं वादिभिः अन्यथा उक्तम्, दूषयितुं च त्वमेव समर्थ इति सूच्यते । **श्रीभगवानुवाच इति ।** उभयोरेकमेव स्वरूपं तच्च ईदृशमिति निर्णेतुं वादिविप्रतिपत्तिं दर्शयन् भगवानुवाच इत्यर्थः ।

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ।। २ ।।

अत्र **कवयो विचक्षणा** इति पदद्वयं न अर्थप्राशस्त्याद्वक्तृगौरवपरम् । किन्तु स्वस्वपक्षोपयुक्तज्ञानतत्तापरम् । तथा च **काम्यानां कर्मणां न्यासं** स्वरूपत्यागं केचित्**कवयः**- पण्डिताः **सन्न्यासं विदुः त्यागं विचक्षणाः** त्यागशब्दार्थविदः केचित्सर्वकर्मफलत्यागं सन्न्यासमिति **विदुः** । अयम्भावः । काम्यानां **ये** स्वरूपत्यागं वदन्ति । तेषाम् अयमाशयः काम्यानाम् अनुष्ठानं हि न नित्यादिवत् अकरणे प्रत्यवायानुक्तेः । किन्तु त्रिवर्गसाधनाय ततश्चापवर्गप्रत्यनीकत्वात् काम्याः क्रियामुमुक्षुभिः न अनुष्ठेया इति । ये सर्वकर्मफलत्यागं वदन्ति । तेषां त्वयमाशयः फलविरोधाद्धि खलु काम्यानां त्यागः । अतः फलमेव त्यज्यतां किं कर्मत्यागेन न च निष्फलस्यानुष्ठानासम्भवः नित्यवदुपपत्तेः इति । एवं च विवादस्य भिन्नविषययोगात् त्यागसन्न्यासशब्दयोः एकार्थत्वावगतेः पृथगर्थत्वशङ्कायाः परिहारोऽर्थ लब्ध इति ।। इत्थम् एकेन प्रकारेण विप्रतिपत्तिमुक्त्वा प्रकारान्तरेणाह -

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ।। ३ ।।

एके मनीषिणः - कोविदाः कापिलाः तदनुसारिणो वैदिकाश्च **कर्म दोषवत्** रागादिदोषवत् अतो बन्धनत्वान्मुमुक्षुणां **त्याज्यं** स्वरूपतस्त्याजम् **इति प्राहुः । यज्ञ-दानतपःकर्म** यज्ञदानतपोरूपं कर्म **न त्याज्यमिति** तु अनुष्ठेयमेव इत्यपरे मनीषिणः प्राहुः इत्यर्थः ।

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधस्संप्रकीर्तितः ।। ४ ।।

हे **भरतसत्तम! तत्र त्यागे** वा दिविप्रतिपन्ने त्यागे विषये **मे निश्चयं शृणु** मत्तः निश्चयं शृण्वित्यर्थः । अत्र मे निश्चयमित्युक्त्या न मतान्तरोक्तिरपि तु **स्वसिद्धान्त इति** दर्शितः । **त्यागो हि** इति । हि प्रसिद्धौ । हे **पुरुषव्याघ्र! त्यागः** सात्त्विकत्यागः त्रिविधः क्रियमाणेषु कर्मसु त्रिप्रकारः **सम्प्रकीर्तितः** निस्संशयं पूर्वमेव दर्शितः । 'मयि सर्वाणि कर्माणि' इति श्लोके इति शेषः । तत्र निराशीः इति कर्मजन्यं फलं मम न स्यादिति फलत्यागः निर्मम इति । मदीयमिदं कर्म न इति कर्मणि ममता त्यागः कर्मविषयस्त्यागः मयि सन्यस्य इति । सर्वेश्वरे कर्तृत्वानुसन्धानेन आत्मनि कर्तृत्वत्यागः कर्तृविषयस्त्यागश्च उक्तः ।

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ।। ५ ।।

यज्ञ दान तपः कर्म - यज्ञप्रभृति वैदिकं **कर्म न त्याज्यं -** कदापि न परित्याज्यम् । किन्तु **तत्** यज्ञादिकं **कर्म** कार्यमेव आप्रयाणात्कर्तव्यमेव । कुतः? चकारोऽनुक्तसमुच्चयार्थः । **यज्ञ-दान तपःप्रभृति** सर्वं वैदिकं कर्म **मनीषिणां** विदुषां **पावनानि** चित्तनैर्मल्यसम्पादकानि मन ईषिणो **मनीषिणः** इति व्युत्पन्नस्य मनीषि **शब्दस्य** प्रयोगात् । मननशीलानाम् इत्यर्थो लभ्यते । मननशब्दस्य च उपासनपर्यवसायित्वात् उपासकानामपि तन्निष्पत्तिविरोधिप्राचीनकर्मनिर्मूलनाय यावज्जीवम् अनुष्ठेयानि इत्युक्तं भवति निश्चयम् । **शृणु** इत्यादिना उक्त एवार्थो निर्दोषत्वाध्यवसायार्थं पुनः दृढीक्रियते ।

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ।। ६ ।।

एतानि यज्ञादीनि **कर्माणि सङ्गं** कर्मणि ममतां **फलानि च त्यक्त्वा कर्तव्यानि इति मे** मम सर्वज्ञस्य **निश्चितं** निर्णीतं **मतं** सिद्धम् न अतस्त्वया संशयित्व्यम् इति भावः । उपासनवदेव अनुष्ठेयत्वबोधनाय । एतान्यपि इत्यपिशब्दः सर्वसम्मतत्त्व बोधनाय उत्तमशब्दः । अथोत्तमत्वमेव प्रदर्शयन् मतान्तरं दूषयति ।।

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ।। ७ ।।

नियतस्य - वर्णाश्रमानुबन्धितया दुस्त्यजस्य **कर्मणः** नित्यनैमित्तिकादि कर्मणः **सन्यासः -** त्यागो **न उपपद्यते ।** 'शरीरयात्रापि च तेन प्रसिद्ध्येत्' इत्यादेरपि सूचनाय **तु** शब्दः **मोहात्**कर्मणो मोहकत्वभ्रमा**त्तस्य** कर्मणः **परित्यागः तामसः परिकीर्तितः ।** तमोजन्य मोहमूलकत्वादिति भावः ।

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ।। ८ ।।

यः - 'अर्थानामार्जने दुःखमि'त्यादि पर्यालोच्य **दुःखं दुःखात्मकम्** इत्येव **कायक्लेशभयात्** कर्मकर्तव्यं **कर्म त्यजेत् स राजसत्यागः कृत्वा त्यागफलं न लभेत् -** लभेत प्राप्नुयादित्यर्थः । अयम्भावः । यद्यपि योगाङ्गत्वात्कर्म कार्यमेव । तथापि तस्य दुःखात्मकद्रव्यार्जनसाध्यत्वात्कायक्लेशकरत्वाच्च मनोऽवसादकरम् । अतः तन्न कार्यं किन्तु 'यथोक्तान्यपि कर्माणि परिभाव्य द्विजोत्तमः । आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्' । इत्युक्तरीत्या ज्ञानाभ्यास एव प्रयत्नं कृत्वा कर्म त्यजति । स ज्ञानोत्पत्तिरूपं त्यागफलं न प्राप्नोति इति । अथ त्यागो हि इत्यादिना स्मारितमेव उद्धृत्य सर्वकार्यस्य यथावस्थितज्ञानमूलतया तस्यैव शास्त्रीयत्त्वम् दृढयति ।।

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागस्सात्त्विको मतः ।। ९ ।।

नियतं - वर्णाश्रमानुबन्धितया दुस्त्यजं **कर्म** नित्यनैमित्तिकात्मकं कर्म **कार्यमित्येव** प्रयोजनम् इत्येव मदाराधनात्मकतया स्वयं प्रयोजनमित्येव इत्यर्थः । **यत् -** यस्मात् **सङ्गं** कर्मणि ममतां **फलं च त्यक्त्वा क्रियते । स त्यागस्सात्त्विकः** सत्वमूलक तज्जन्ययथावस्थित शास्त्रार्थज्ञानमूल इत्यर्थः । तदेव उपपादयति ।।

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी च्छिन्नसंशयः ।। १० ।।

सत्त्वसमाविष्टः । अत एव मेधावी 'धीर्धारणावतीमेधा' इत्यमरः । आचार्योपदिष्टेऽर्थे अप्रच्युतज्ञान इत्यर्थः । अत एव भिन्नसंशयः त्यागी सर्वस्मिन्कर्मणि फलसङ्गकर्तृत्वत्यागवान् । तस्मादकुशलमनिष्टफलसाधनं कर्म **न द्वेष्टि** कुशले स्वर्गस्वाराज्यान् आद्य दृष्टफलसाधने कर्मणि इति विभक्तिविपरिणामेन अनुषङ्गः **न अनुषज्जते** - न अनुषक्तो भवति । यथान्यकर्तृकेऽन्यदीये कर्मणि स्वस्य सम्बन्ध-विरहाद्बाधकाभावनिश्चयेन द्वेषाभावः । तथा ममतारूपसङ्गत्यागेन तत्सम्बन्धविरहात् बाधाभावनिष्टायेन स्वानुष्ठितेप्यकुशलेन द्वेषः त्यक्तब्रह्मव्यतिरिक्तसमस्तफलत्वात्कुशलेऽपि न अनुषङ्ग इति भावः । अतः कर्मणि सङ्गकर्तृत्वफलानां त्याग एव त्यागः न स्वरूपत्याग इत्याह -

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ।। ११ ।।

देहभृता - देहधारणं कुर्वतेत्यर्थः । **अशेषतः** कार्त्स्न्येन **कर्माणि** लौकिकानि वैदिकानि चेत्युक्तं नहि शक्यन्त इत्यर्थः । त्यजनपरत्वेन नपुंसकत्वैकत्वे देहधारणार्था-शनपानादीनां तदर्थत्वेन च पञ्चमहायज्ञादीनाम् अवर्जनीयत्वात् इति भावः । तर्हि 'त्यागेनैके अमृतत्वमानशुः' इति ते उच्यन्तेऽत्राह **यस्तु** इति । **कर्मफलत्यागी** फलशब्दः प्रदर्शकः कर्मसु फलत्यागी ममतात्यागी कर्तृत्वत्यागी । स एव त्यागी इत्यभिधीयत इति ।।

ननु वैदिककर्माण्यपि लौकिककर्मवत्फलेच्छाविरहेऽपि स्वशक्त्यनुरूपं फलं प्रयच्छन्ति । ततश्च मोक्षविरोधिफलत्वेन मुमुक्षूणां कर्मस्वरूपत्याग एव उचित इत्यत आह -

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ।। १२ ।।

अनिष्टं नरकादिफलम् **इष्टं** स्वर्गादि फलं **मिश्रं च** इष्टानिष्टसम्भिन्नं पुत्रपश्वन्नादिफलं च इति । **त्रिविधं कर्मणः फलं** कर्मजन्यं फलम् । **अत्यागिनां** त्यागिनः फलसङ्गकर्तृत्वत्यागिनो भगवदाराधनात्मकतया कर्मानुष्ठायिनः तद्भिन्नानाम् अमुमुक्षूणामित्यर्थः । **प्रेत्य भवति ।** देहोत्तरकालं भवति । प्रेत्य इत्युपलक्षणं कारीर्यादीनां

तस्मिन्नेव देहाभावात् । **न तु सन्न्यासिनां क्वचित्** कर्तृत्वममताफलत्यागिनां तु क्वचिदपि मोक्षविरोधिफलं न जायत इत्यर्थः । इत्थं क्रियमाणेषु कर्मसु उक्तः त्रिविधस्त्याग एव शास्त्रसिद्धः । स एव सन्न्यास इत्युक्तम् । अथ त्रिविधेषु त्यागेषु कर्तृत्वत्यागप्रकारं वदन् भगवति कर्तृत्वानुसन्धानेन आत्मनि कर्तृत्वत्यागप्रकारमाह -

पञ्चैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ।। १३ ।।

संख्या बुद्धिः । यथावस्थिततत्त्वविषया तयाऽनुसंहितः **सांख्यः** । तस्मिन् **कृतान्ते** सिद्धान्ते तत्त्वनिर्णयाय प्रवृत्ते वेदभाग इत्यर्थः । **सर्वकर्मणां सिद्धये** उत्पत्तये **प्रोक्तानि** विशदम् अभिहिताः **एतानि** वक्ष्यमाणानि **पञ्च कारणानि मे** मम सकाशात् निबोध अनुसन्धत्स्व तदेवाह -

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधा च पृथक्चेष्टाः दैवं चैवात्र पञ्चमम् ।। १४ ।।

अधिष्ठीयते अनेन इति **अधिष्ठानम्** । 'कृत्यल्युटो बहुळम्' इति कर्मणि ल्युट् । शरीरम् इत्यर्थः । तथोक्तं कराल-वसिष्ठसंवादे **अधिष्ठानं** क्षेत्रमाहुः इति । **तथा कर्ता** क्षेत्री जीवः **पृथग्विधं कर्म** निष्पत्तौ पृथग्व्यापारं **करणं च** समनस्कं वागादिकर्मेन्द्रियजातं यद्यपि मनसो ज्ञानेन्द्रियत्वम् । तथापि कर्मेन्द्रियव्यापारार्थप्रवृत्तिसाधारण्यात्कर्मेन्द्रियत्वम् अस्ति । तथा च उक्तम् । सांख्यैः उभयाख्यं मनस्संकल्पकमिन्द्रियमिति । अत्र कर्मणां सिद्धये इत्युक्त्या सामान्येन करणशब्देन कर्मेन्द्रियाणां ग्रहणं विविधा च **पृथक्चेष्टाः** प्राणवृत्तिवाचिना चेष्टाशब्देन तद्वृत्तिमान्वायुः विवक्षितः । स च निमेषोन्मेषादि-व्यापारवैविध्यातिविधः । शरीरेन्द्रियाद्यपेक्षया पृथग्भूतश्च । अत्र हेतुकलापे पञ्चमं कारणं मुख्यं कारणं **दैवं** देवः परमात्मा इत्यर्थः । यद्यपि **दैव**शब्दो 'दैवं दिष्टं भागधेयम्' इत्यदृष्टपर्यायतयाऽनुशिष्टः । तथापि परमात्मनि भूयांसः प्रयोगाः सन्ति इति । 'स एवोक्तः तथापि न दैवं केशवात्परम्' 'श्रूयतां परमं दैवं दुर्विज्ञेयम् अथापि च' इति भारते । 'अस्वाधीनं कथं दैवं प्रकारैरभिराध्यत' इति रामायणे । 'आर्षश्चन्दश्च दैवं च ब्राह्मणश्च' इति योगशास्त्रे । 'दैवाधीनं जगत्सर्वम्' इत्यन्यत्र प्रख्यात दैवपरमार्थविदाम् इति । 'धर्मे प्रमाणं समयस्तदीयो वेदाश्च तत्त्वं च तदिष्टदैवम्' इत्यभियुक्तप्रयोगे च ।।

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः ।। १५ ।।

शरीरवाङ्मनोऽभिश्शरीरेण वाचा मनसा च इत्यर्थः । **न्याय्यं -** नीय्यन्ते प्रतिपाद्यन्ते ज्ञातव्यार्था अनेन इति न्याय्यशास्त्रम् । 'तस्मात् अनपेत' इत्यनुशासनाद्यत्प्रत्ययः शास्त्रसिद्धम् इत्यर्थः । **विपरीतं** शास्त्रविप्रतिषिद्धं शास्त्राश्रितं लौकिकम् वा यत्कर्म प्रारभते तस्य **पञ्चैते** अधिष्ठानादयः उक्ताः पञ्च हेतवः ।

ननु पञ्चानां हेतुत्वेपि आत्मा कर्ता इति निर्दिष्टः । तथा च कर्तुरात्मनो कर्तृत्वानुसन्धानं भ्रान्तिरूपमेव स्यात् इत्याशङ्क्य नियन्त्रन्तरनिरपेक्षस्वाभाविक कर्तृत्वभ्रमस्य अनेकाधीनेन अन्यानधीनत्वभ्रमस्य निवारणार्थम् अकर्तृत्वानुसन्धानम् इत्यभिप्रेत्याह -

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ।। १६ ।।

एवं सति प्रधानहेतुभूतपरमात्मानुमतिपूर्वके जीवस्य कर्तृत्वे सति इत्यर्थः । **केवलमात्मानन्तु** तु शब्दः एवकारार्थः । **केवलं** जीवात्मानमेव इत्यर्थः । **कर्तारं पश्यति सः अकृतबुद्धित्वात्** अध्यात्मशास्त्रैः अनिष्पादितबुद्धित्वात् दुर्मतिर्विपरीतबुद्धिस्सन् अपश्यति । यथावस्थितं कर्तारं न पश्यति इत्यर्थः । तदपि दर्शनमयथाभावेन असत्कल्पमिति भावः । स दुर्मतिरित्युक्ते कः तर्हि सुमतिः इति बुभुत्सायाम् अकर्तृत्वानुसन्धानपूर्वकं कर्मकर्तैव सुमतिः इत्यभिप्रयन् तदनुसन्धानस्य प्रयोजनमाह -

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वाऽपि स इमाँल्लोकान्न हन्ति न निबध्यते ।। १७ ।।

यस्य पुरुषस्य **भावः** कर्तृत्वविशेषविषयो मनोवृत्तिविशेषः । **नाहं कृतः** अहं शब्दोऽत्र अहमभिमानलक्षकः अहमभिमानकृतो न भवति इत्यर्थः । अहमेव करोमि इत्येवमभिमानकृतो न भवति इति यावत् । **बुद्धिः यस्य न लिप्यते** यस्य बुद्धिः कर्मणि न लिप्यते मदीयमिदं कर्मेति कर्मणि न अनुषज्यत इत्यर्थः । एतेन कर्मणि ममताकर्तृत्वयोः निर्वृत्त्या तत्फलं न प्राप्नोति इत्युक्तं भवति । **सः** एवंभूतः **इमान् लोकान् हत्त्वापि न हन्ति** हननकर्तृत्वकर्मत्वयोः अभावादिति भावः । **न निबध्यते;** तत्कर्मसाध्यमोक्ष-विरोधि फलान्वयो नेत्यर्थः । अत्र सामान्येन **इमान्लोकान् हत्वाऽपि** इत्युक्तिः । कथं भीष्ममित्युपक्रमगत प्रश्नस्य कैमुत्येन प्रतिक्षेपार्थं सर्वमिदम् अकृत्वाऽनुसन्धानं सत्वनिवृध्यैव भवति इत्यस्य उपादेयतां दर्शयन्कर्मणा तदनुबन्धिज्ञानादिषु च सत्वादिगुणकृतवैषम्यं प्रदर्शयितुं कर्मबोधनाप्रकारमाह -

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ।। १८ ।।

ज्ञानम् अत्र कर्म बोधनार्थत्वात्कर्तव्यकर्म विषयं बोध्यम् । एवं **ज्ञेयं** कर्तव्यं **कर्म परिज्ञाता** तस्य बोद्धा इति कर्मबोधना **त्रिविधा** त्रिप्रकारा कर्मचोदना ज्योतिष्टोमादि कर्मविधिज्ञानादीनां चोदनासम्बन्धित्वमात्रेण प्रकारत्व **कर्मसङ्ग्रहः -** सङ्गृह्यत इति सङ्ग्रहः कर्मैव सङ्ग्रहः तत्र ज्ञेयतया सङ्गृह्यमाणं कर्म इत्यर्थः । **करणं** 'व्रीहिभिः यजेत' इत्यादिभिः विहितं क्रियाकरणः द्रव्यादिकं कर्मक्रियास्वरूपो यागादिः **कर्ता** अनुष्ठाता इति **त्रिविधः** त्रिप्रकारः एवं नियोज्यावस्थया परिज्ञातेति निर्दिष्ट एवानुष्ठात्रवस्थया कर्मशेषतया कर्ता इति निर्दिष्टः । अथ ज्ञानं ज्ञेयं परिज्ञातेत्युक्तां स्त्रीननूद्यगुणभेदाद्भेदमाह -

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ।। १९ ।।

ज्ञानं कर्तव्यविषयज्ञानं **कर्म** अनुष्ठीयमानं कर्म **कर्ता** अनुष्ठाता च यद्यपि पूर्वं परिज्ञातेत्युक्तम् । ज्ञातृत्वकर्तृत्वयोः अवस्थमात्रभेदाज्ज्ञानोक्त्यार्थसिद्धत्वाच्च । **कर्ता** इत्युक्तिः । यद्यपि कर्मसङ्ग्रहप्रदर्शनवेलायां करणमिति द्रव्यादिकमुक्तम् । तथापि ज्ञेयशब्दार्थ कर्मान्तर्गतत्त्वात् न पृथगुक्तिः । **गुणभेदतः** सत्त्वादिगुणभेदात् **त्रिधैव प्रोच्यते । गुणसङ्ख्याने**गुणकार्यगणना यथावत् शृणु **यथावच्छृणु** तादृशमवधानं कुरु ज्ञानादीन्यपि सात्त्विकादिभेदभिन्नानि तानि श्रोतुं सावधानो भव इत्यर्थः ।

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ।। २० ।।

सर्वभूतेषु कर्म चोदनान्तर्गतज्ञानविभजनपरत्वात्प्रकरणस्य भूतशब्दो ब्राह्मणादि-कर्माधिकारिभूतपरः । तथा च **विभक्तेषु** वर्णत आश्रमतश्च **विभक्तेषु** सर्वेषु भूतेषु ब्राह्मणादिषु **अविभक्तम् ।** अत्र स्थितावप्ययविभक्तं ज्ञानैकाकारम् । **एकम् -** एकजातीयं, **भावम् -** आत्मानम्, **अव्ययम् -** विकाररहितं **येन** ज्ञानेन **वीक्षते** कर्माधिकार वेलायाम् **ईक्षते -** विषयीकरोति ।

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ।। २१ ।।

तज्ज्ञानं सात्त्विकं विद्धि पृथक्त्वेन इति यत् ज्ञानं **सर्वेषु भूतेषु** ब्राह्मणादिषु सर्वेषु भूतेषु **नानाभावान्** नानाविधानात्मनः **पृथक्त्वेन** पृथग्विधान् ह्रस्वदीर्घादि पृथक्त्वेन सविकारान् **वेत्ति तज्ज्ञानं राजसं विद्धि** । अयं......रूपं यज्ज्ञानं पुर पूर्वोक्तरीत्याकारमेव आत्मानं विभक्तक्षेत्रादिसम्बन्धेन तद्गतब्राह्मणत्वाज्ज्ञात्वा पीत-नील-दीर्घ-ह्रस्वत्वादिगुणैः फलादिसंयोगविकारैश्च युक्तं जानाति तज्ज्ञानं राजसं विद्धि इत्यर्थः ।

यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहेतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ।। २२ ।।

यत्तु यज्ज्ञानं तु शब्दः पूर्वस्माद्वैलक्षण्याय **एकस्मिन्** परिमितफले **कार्ये** कर्तव्ये भूतप्रेताद्याराधनात्मके कस्मिंश्च क्षुद्रकर्मणि इत्यर्थः । **कृत्स्नवत्** । तत्रेति वतिः कृत्स्नफलसाधनकर्मण इव सक्तम् आहेतुकं प्रेक्षावत्सङ्गहेतुरहितमहैतुकमिति पाठे हैतुकात् अन्यदित्यर्थः । अत्र च अयमेवार्थः । **अतत्वार्थवत्** तत्वार्थाद्भिन्नमतत्वार्थं तद्वत् विषयतया त्वत्परि राजसमिव आत्मनि मिथ्यार्थभूतपृथक्त्वादिविषयम् इत्यर्थः । **अल्पं च** खद्योतप्रकाशवत्स्वरूपत एव अत्यल्पं यत् तत् ज्ञानं तामसं विद्धि । **उदाहृतम्** एवम् कर्तव्यकर्मविषयज्ञानस्य अविभक्तविभक्तत्वादि विशेषित कर्माधिकारस्वरूपानुसन्धानेन गुणतः त्रैविध्यमुक्त्वा अनुष्ठेयस्य कर्मणो गुणतः त्रैविध्यमाह -

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ।। २३ ।।

नियतं स्वस्ववर्णाश्रमोचितं **सङ्गरहितं** - कर्तृत्व-ममताशून्यम् **अरागद्वेषतः कृतं** अकारो निषेधार्थकः । पृथग्भूतः रागद्वेषाभ्यां न कृतम् इत्यर्थः । 'अमानोनाः प्रतिषेध' इति हि उक्तम् । दम्भेन न कृतम् इति भावः । **अफलप्रेप्सुना** फलाभिसन्धिरहितेन भगवदाराधनात्मकतया कार्यमित्येव **यत्कर्म** क्रियते **तत्कर्म सात्त्विकम् उच्यत** इत्यर्थः ।।

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ।। २४ ।।

कामेप्सुना काम्यत इति कामः, **फलं** फलाभिसन्धिमता इत्यर्थः । **साहङ्कारेण वा** वा शब्दश्चार्थः । **अहङ्कार** सहिते न च बह्वायासमिदं कर्म कर्तुम् अहमेव **समर्थ** इत्यभिमानवता इत्यर्थः । **बहुळायासं** यत्कर्म **क्रियते तद्राजसम्** ।।

अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ।। २५ ।।

अनु-पश्चात् बध्यते सम्बध्यत इति अनुबन्धः कर्मारम्भपश्चाद्भावि दुःखं तत् **क्षयः** तत्कालिकार्थविनाशः तं हिंसा तत्र प्राणिपीडां स्वपरगतव्यथां **पौरुषं** स्वात्मनः कर्मसमापनसामर्थ्यं च **अनवेक्ष्य** युक्तिभिः अविचार्य मोहात्परमपुरुषकर्तृत्वस्यापि अज्ञानात् यत्कर्मारभ्यते । तत्कर्म तामसमित्युच्यते ।।

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ।। २६ ।।

सङ्गः - फलापेक्षाय मुक्तो येन स तथोक्तः । **अहं** वदनशीलोऽहंवादी तद्भिन्नो **अनहंवादी ।** अहमेवैतत्कर्म करोमि इति कर्तृत्वाभिमानरहित इत्यर्थः । **धृतिः** धारणं 'धृतिर्धारणधैर्ययोः' इत्यमरः । **उत्साहः -** उद्युक्तचित्तत्वं ताभ्यां **समन्वितः ।** यावत्कर्म-समाप्त्यवर्जनीयदुःखसहनपूर्वकं तन्निष्ठादनोद्योगवान् इत्यर्थः । **सिद्ध्यसिद्ध्योः** क्रियमाणे कर्मणि तदुपयुक्तद्रव्यार्जनादौ च सिद्धे असिद्धे च विकाररहितः । एवंविधो यः **कर्ता स सात्त्विक** इत्यर्थः ।।

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ।। २७ ।।

रागी यशः प्रतिष्ठादिरूपदृष्टफलार्थी **कर्मफल प्रेप्सुः** कर्माधिकारवाक्यगतफलापेक्षी **लुब्धः** उचित द्रव्यव्ययस्वभावरहितः **हिंसात्मकः** काममात्मानं भार्यां पुत्रं वा उपरुन्ध्यान्नत्वेन दानकर्मकरमित्युक्तस्वभावरहित इत्यर्थः । **अशुचिः -** कर्मण्यतासम्पादकशुचित्वेपहितः **हर्षशोकान्वितः -** कर्मणि कृते तत्फलसिद्ध्यसिद्ध्योर्**हर्षशोकवान् राजसः कर्ता ।।**

अयुक्तः प्राकृतः स्तब्धश्शठो नैकृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ।। २८ ।।

युक्तः **कर्मसम्बन्धार्हः** तद्भिन्नः **अयुक्तः** विकर्मस्थ इत्यर्थः । **प्राकृतः** अवेद्यः प्राकृतः **प्रोक्त इत्युक्त लक्षणः ।** शास्त्राध्ययनतदर्थोपदेशादिजनित सात्त्विककर्मानुष्ठानानुगुणधी विशेषरहित **इत्यर्थः ।** **स्तब्धः -** अनारम्भशीलः पूज्येष्वपि त्वरितकर्तव्यप्रमाणादिष्वपि-स्तिमित**स्वभाव इत्यर्थः ।** **शठः -** गूढविप्रियकृत् अभिचारादितामसकर्म द्वारा परेषाम् अनभिव्यक्ततया विप्रियकृत् इत्यर्थः । **नैकृतिकः -** निकृतिर्माया वञ्चनादिव्यापारः स

एव प्रयोजनं यस्य स तथोक्तः । **अलसः** 'श्वः कार्यमद्य कुर्वीत' इत्युक्तकर्तव्यकर्मत्वरारहितः **विषादी** 'विशरणगत्यवसादनेषु' इत्युक्तेः स्यादोवसादः विषादस्त्वत्यन्तावसादः ताच्छील्यं प्रत्ययार्थः । देशकालवैगुण्याच्छोकवस्त्यनुस्मृतेश्च जंनितमनोस्फूर्तिमान् इत्यर्थः । **दीर्घसूत्री** 'सूत्र सूत्रणे' इति धातुः । सूत्रणं चिन्तनं ताच्छील्ये इति प्रत्ययः । चिन्तानुवृत्तिपर-व्यसनकारिकर्मलम्पट इत्यर्थः । एवं विधः**कर्ता तामस उच्यते ।।**

अथ बुद्धेः त्रैविध्यमुच्यते ।

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ।। २९ ।।

बुद्धिः अध्यवसायः **धृतिः** धारणसामर्थ्यं तयोश्च **गुणतः** सत्त्वादितः पृथक्त्वेन विलक्षणत्वेन प्रोच्यमानं **त्रिविधं** सात्त्विकादिभेदेन त्रिप्रकारं **भेदम्** अशेषेण कार्त्स्न्येन **शृणु** । यद्यपि ज्ञानत्रैविध्यमुक्तम् । तथापि अनुष्ठानदशाभाव्यनुसन्धानज्ञानम् । तस्माद्विलक्षणं तद्धेतुतया ततः पूर्वभाविशास्त्रजन्यो अध्यवसायः बुद्धिः इति न पौनरुक्त्यम् । उच्यमानस्य श्रवणार्थत्वेन श्रवणेसिद्धेऽपि **शृण्विति** सावधानत्वार्थं दिग्विजये मानुषदैवधनवत् शमादिधनमपि चेतव्यमित्यभिप्रायेण **धनंजय** इति सम्बोधनम् ।।

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिस्सा पार्थ सात्त्विकी ।। ३० ।।

प्रवृत्तिम् - अभ्युदयसाधनं धर्मं **निवृत्तिं** मोक्षसाधनं धर्मं **कार्याकार्ये** तादृश धर्मद्वयेति कर्तव्यभूतदेशकालावस्थासु **कार्यमकार्यं च भयाभये** - बिभेत्यस्मादिति **भयं** - भयनिमित्तं स्थानं तद्भिन्नमभयं भगवदाज्ञारूपशास्त्रेति वृत्तितदनुवृत्ती**बन्ध** शब्दो मोक्षशब्दश्च तद्याथात्म्यपरौ बन्धयाथात्म्यं मोक्षयाथात्म्यं च इत्यर्थः । **या बुद्धिर्वेत्ति** स्वाच्छन्द्येन विषयी करोति **सा बुद्धिस्सात्त्विकी ।।**

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिस्सा पार्थ राजसी ।। ३१ ।।

यया बुद्ध्या **धर्मं** प्रवृत्तिनिवृत्तिरूपं द्विविधं **धर्मम् अधर्मं** तद्विपरीतं **च कार्यमकार्यं** च **अयथावत्प्रजानाति** अकारो निषेधार्थकः । अमानो न प्रतिषेध इत्युक्तेः । यथावन्न-प्रजानातीत्यर्थः **सा बुद्धिः राजसी ।।**

अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता ।
सर्वार्थान्विपरीतांश्च बुद्धिस्सा पार्थ तामसी ।। ३२ ।।

या बुद्धिः **तमसावृतासीत्** तादात्विकतमोनिरुद्धबोध्या सर्वान्विपरीतान् **मन्यते** । **अधर्मं** धर्ममिति धर्मं च अर्धमं सन्तं च अधर्मसन्तं असन्तं च सतं परं च तत्त्वमपरं अपरं च परम् । एवं सर्वं विपरीतं मन्यत इत्यर्थः ।

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिस्सा पार्थ सात्त्विकी ।। ३३ ।।

यया धृत्या कीदृश्यायोगेन मोक्षसाधनभूतभगवदुपासनेन अप्रयोजनभूतेन **अव्यभिचारिण्य** व्यभिचारः फलान्तरसङ्गः तद्रहितया अपवर्गसाधनभूतं भगवदुपासनं फलत्वेन उद्दिश्यफलान्तरसङ्गरहितया **यया** धृत्या मनः **प्राणेन्द्रियक्रियाः मनः** क्रियासाक्षात्करणं प्राणक्रिया योगविरोधि क्लेशपापाविजयहेतुप्राणायामादि क्रिया इन्द्रियक्रियास्वाध्यायोद्योगमासितेत्याद्युक्ता वागादि क्रियाप्रत्याहारादिगतेन्द्रियान्तरक्रिया च धारयते पुरुष इति शेषः **सा धृतिः सात्त्विकी ।।**

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिस्सा पार्थ राजसी ।। ३४ ।।

फलाकाङ्क्षी राजस धर्मादिविषयकामनावान् पुरुषः **धर्मकामार्थान्** धर्मकामार्तहेतुभूतमनःप्राणेन्द्रियक्रियाः प्रसङ्गेन प्रकृष्टसङ्गेन **यया** धृत्या धारयते **सा धृती राजसी**त्युच्यते ।।

यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिस्सा पार्थ तामसी ।। ३५ ।।

स्वप्नम् इदं पदं सुषुप्तेरपि प्रदर्शकं स्वप्नसुषुप्ती इत्यर्थः । **भयं** भयदप्रबल विरोधि वर्गं **शोकं** शोकक्रोधादिमूलबन्धुवधादिकं **विषादं** विषादप्रदं । वृथावित्तव्ययं, **मदं** दुर्विषयानुभवजनितं, **गर्वं** दुर्मेधास्सन् **यया न विमुञ्चति । यया** धृत्या धारयते **सा तामसीति** ।।

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।

तु शब्दः सुखस्य पूर्वोक्त ज्ञानकर्मकर्त्रादि सम्पाद्यत्वबोधनार्थः । इदानीं **साधन** भेदोक्त्यनन्तरं साध्यभेदोक्त्यपेक्षावसर इत्यर्थः । **मे** मत्तः **त्रिविधं** गुणभेदात्त्रिप्रकारं **शृणु** प्रकृष्टसात्त्विकसुखयोग्यताज्ञापनाय **भरतर्षभ** इति सम्बोधनम् ।

अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ।। ३६ ।।

यत्र यस्मिन्मुखे पुरुषः **अभ्यासात्** आपातमधुरत्वाभावेन पुनः पुनः परिशीलनात् **रमते ।** अत्यन्तादरेण प्रवर्तते । **दुःखान्तं** निखिलस्य सांसारिकदुःखस्यान्तं **च निगच्छति ।** निरतिशयानन्दप्राप्तिमत्यन्तं गच्छति तदेव कथम् इत्युक्तेः आह -

यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ।। ३७ ।।

यत्तत् श्रुत्यादिप्रसिद्धं यत्सुखमग्रेविषमिव **अग्रे** आरम्भकाले **विषमिव आपाततो** विषमिव प्रतिकूलमिव **परिणामे** अभ्यासवशात्फलोन्मुखावस्थायाम् **अमृतोपमम् -** अमृततुल्यं **तत्सुखं सात्त्विकं प्रोक्तम्** तत्किमित्यपेक्षायां भगवदुपासनक्रमभाविसुखम् इति दर्शयितुं तदेव विशिनष्टि । **आत्मबुद्धिप्रसादज**मिति आत्मनो बुद्धिरात्मबुद्धिः विषयत्वं षष्ठ्यर्थः । तस्याः प्रसादः अयोग्यविषयसंसर्गरूपकालुष्यनिवृत्तिः, तस्माज्ज्ञायत इति तथोक्तम् । उपक्रमदशायाम् आयासबहुलं फलोन्मुखावस्थायां विविक्तात्मस्वभावानुभव-जनितमुपासनदशाभावि **सुखं सात्त्विकम्** इत्यर्थः ।।

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिवं तत्सुखं राजसं स्मृतम् ।। ३८ ।।

विषयाणां तत्तदिन्द्रियार्थानाम् अन्नादीनाम् इन्द्रियाणां च संयोगे सम्बन्धे सति यत्तत् प्रसिद्धं यत्सुखम् **अग्रे** अनुभववेळायाम् **अमृतोपमं परिणामे** विपाकावसरे **विषमिव** यद्दृश्यते **तद्राजसम्** इत्यर्थः । अयम्भावः विषयाणाम् अन्नादीनां सुखता क्षुधादि-निमित्ता तदुक्तम् 'अग्रेश्शीतेन तोयस्य तुषा भक्तस्य च क्षुधा । क्रियते सुखकर्तृत्व'मिति । क्षुधादौ निवृत्तेः तद्दुःखमेव तदप्युक्तमेवम् । 'क्षुत्तृष्णोपशंमत्तद्वच्छीताद्युपशमं सुखम् । मन्यते बालबुद्धित्वात् दुःखमेव हि तत्पुनः' ।। इति ।

यदग्रे चानुबन्धे च मुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ।। ३९ ।।

अग्रे - आरम्भदशायाम् **अनुबन्धे** - अनुबध्यते फलम् अस्मिन् इत्यनुबन्धः विपाकावस्था । तस्मिन्यत्सुखं आत्मनो **मोहनं** मोहहेतुः **यथावस्थितवस्त्वप्रकाश-**रूपमोहहेतुत्वात् स्पष्टम् । **आलस्य**मलसत्त्वं तदपि इन्द्रियव्यापारमान्द्यं सम्पाद्यापि

तत्कार्यज्ञानस्यापि मान्द्यं सम्पादयति । मोहहेतुरेव **प्रमादः** अनवधानता तस्य स्वरूपेणैव **मोहहेतुता** स्पष्टा । **तत्तामसमुदाहृतम्** । न च एवमपि सुखस्य तज्जन्यत्वं कथमिति वाच्यम् । आयास विश्रमहेतुतया निद्रायाः सुखहेतुता इन्द्रियव्यापारमान्द्यस्यान्तःक्षोभादिनिवृत्तिद्वारा सुखहेतुता अनवधानस्य तु चित्तैकाग्र्यकल्पनप्रयासनिवृत्तिद्वारा द्रष्टव्या । प्राकृत-गुणातीत-शुद्धसत्त्वमयभगवत्प्राप्तिलक्षणमोक्षात्प्राङ्नियतदेशकालफलभोगैः उच्चावचैः उक्तस्य त्रैगुण्यस्य सर्वैः अपि क्षेत्रज्ञैर्निश्शेषदुस्त्यजत्वकथनमुखेन गुणकार्यप्रकारणं निगमयति ।।

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिस्स्यात् त्रिभिर्गुणैः ।। ४० ।।

देवेषु वा इत्युक्तो **वा** शब्दः अनुक्त मनुष्यादि समुच्चयार्थः । तथा **दिवि** - स्वर्गे देवेषु सत्त्वोत्तरेषु ब्रह्मादिषु **पृथिव्यां** भूमौ मनुष्यादिषु वा **प्रकृतिजैः एभिः** उक्तस्वभावैः मुक्तं सत्त्वं प्राणिजातं न दृश्यते, गुणनिर्मुक्तं; किञ्चिदपि सत्त्वं न इत्यर्थः । इत्थं सर्वेषां संसारिणां गुणत्रयवश्यत्वमुक्तम् । अथ तत्तद्गुणतारतम्यवत् देहयोगिनाम् अधिकारिणां यथाधिकारं शास्त्रैर्विभक्तानि कर्मादीनि विविच्यन्ते ।।

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ।। ४१ ।।

स्वभावः - स्वकीयो भावः । तत्तद्ब्राह्मणादिजन्म हेतुभूतं प्राचीनं कर्म **तत्प्रभवैः गुणैः** सत्त्वादिभिः ब्राह्मणक्षत्रियविशां शूद्राणां च कर्माणि **प्रविभक्तानि** असङ्कीर्णतया विभक्तानि शास्त्रैः इति शेषः । ब्राह्मणादयः एवं गुणकाः तेषां च एतानि **कर्माणि** एता वृत्तय इति विभज्य शास्त्राणि प्रतिपादयन्ति इत्यर्थः । तदेवाह -

शमो दमस्तपश्शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम् ।। ४२ ।।

शमो बाह्येन्द्रियनियमनं, **दमोः** - अन्तरिन्द्रिय नियमनं, **तपः** भोगनियमनरूपः शास्त्रसिद्धः कायक्लेशः, **शौचं** - शुचित्वं, शास्त्रीयकर्मानुष्ठानयोग्यता इत्यर्थः । **क्षान्तिः** - क्षमा; परैः पीडायां कृतायामपि अविकृतचित्तता **आर्जवं** - रुजुत्वं वाङ्मनः यः वृत्तीनाम् ऐक्यरूपं परेषु मनोऽनुगुणबाह्यचेष्टाप्रकाशनम् इत्यर्थः । **ज्ञानं** - परावरतत्त्वयाथात्म्यज्ञानं **विज्ञानं** - तत्तत्वगतासाधारणधर्मपरिज्ञानम् **आस्तिक्यम्** अस्ति मतिः अस्येत्यास्तिकः तस्य भावः आस्तिक्यम् । कृत्स्नं भगवदाराधनात्मकं तदाराधितश्च

भगवान् सकलफलप्रदः स एव परतत्त्वम् इति वैदिकार्थस्य सत्यता निश्चयप्रकर्षः ब्रह्मणः इदं **ब्राह्मं** - ब्रह्मशब्दश्च ब्राह्मणजातिपरः । ब्राह्मणस्य स्वभावजं कर्मैतदित्यर्थः ।

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ।। ४३ ।।

शौर्यम् - शूरस्य भावः, शूरो निर्भयः 'शूरं भीरुं कपिञ्जलम्' इति परस्पर प्रतिकोटित्वनिर्देशात् निर्भयप्रवेशसामर्थ्यम् इत्यर्थः । **तेजः** प्रविष्टस्यापि परैः अनभिभवनीयता **धृतिः** धैर्यं बहुषु प्रतिबन्धकेषु सत्यप्यारब्धस्य समापनसामर्थ्यं, **दाक्ष्यं** - दक्षता स्वकार्यनिर्वहणशक्तिः युद्धे **चाप्यपलायनम्** अपिर्निमित्तसद्भावद्योतकः पलायनद्योतक-निजक्षति निश्चयाप्यपलायनम् इत्यर्थः । **दानं** स्वकीयधनस्य परस्वत्त्वापादनम् **ईश्वरभावः** - ईश्वरत्वं नियन्तृत्वम् इत्यर्थः । दुष्टनिग्रहशिष्टानुग्रहशक्तिः इत्यर्थः । **क्षात्रं** क्षत्रियसम्बन्धि-स्वभाव प्रभवं कर्मेत्यर्थः ।

कृषिगोरक्ष्यवाणिज्यं वैश्यं कर्म स्वभावजम् ।

कृषिः - सस्योत्पादनसमर्थं कर्षणं **गोरक्षं** गवां रक्षा रक्षणं **यस्मिन्कर्मणि** तद्गोरक्षं पशुपालनमित्यर्थः । **गौरक्ष्यम्** इति पाठः गाः रक्षतीति गोरक्षः, **तस्य** कर्म गौरक्ष्यं तस्य पालनं **वाणिज्यं** - वणिजः कर्म 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् धनसञ्चयहेतुभूतं क्रयविक्रयात्मकं कर्म इत्यर्थः । सर्वोऽपि द्वन्द्व इत्येकवद्भावः ।

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ।। ४४ ।।

परिचर्यात्मकं स्वपूर्ववर्णत्रयपरिचर्यात्मकं **शूद्रस्यापि स्वभावजं कर्म** इत्यर्थः । स्वपूर्ववर्णपरिचर्या क्षत्रियवैश्ययोरपि साधारणमिति ज्ञापनाय अपिशब्दः -

' भार्यारतिश्शुचिर्भृत्य भर्ताश्रद्धक्रियान्वितः ।
नमस्कारेण मन्त्रेण पञ्चयज्ञान्नहापयेत्' ।। इति ।
'पृथक्कर्मश्रवणेऽपि शूद्रस्य द्विजशुश्रूषा ।
विप्रसेवैव शूद्रस्य कर्म कीर्त्यते' ।।

इत्युक्तत्वात्परिचर्यात्मकम् इत्युक्तं वर्णविभागो मोक्षशास्त्रे किमर्थम् इत्यत्राह -

स्वे स्वे कर्मण्यभिरतस्संसिद्धिं लभते नरः ।
स्वकर्मनिरतस्सिद्धिं यथा विन्दति तच्छृणु ।। ४५ ।।

स्वे स्वे स्वस्ववर्णसम्बन्धिनि **कर्मणि** पूर्वं विविच्योक्ते **कर्मण्यभिरतः** । आभिमुख्येन स्थितः नरस्संसिद्धिं परमपदप्राप्तिं लभते ।

ननु फलप्रदानसमर्थेन्द्राद्याराधनात्मनां वर्णाश्रमानुबन्धिकर्मणां कथं मोक्षसाधनत्वम् इत्यत - आह - **स्वकर्मनिरत** इति । स्वस्ववर्णाश्रम **कर्मनिरतः सिद्धिं यथा** येन प्रकारेण **विन्दति** तथा तं प्रकारं **शृणु** ।।

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।। ४६ ।।

भूतानां - चेतनाचेतनानाम्, **यतः** - यस्मात् **प्रवृत्तिः** - उत्पत्त्यादिसर्वविध-व्यापारः **येन** - नियन्त्रा परमात्मना **इदं सर्वं ततं** व्याप्तं स्वकर्मणि स्वस्ववर्णानुबन्धिकर्मणा **तमभ्यर्च्य तं** परमात्मनम् **अभ्यर्च्य मानव**स्सिद्धिं **विन्दति** सर्वकारणभूतः **सर्वान्तर्यामी** परमात्मा स्वसृज्यभूतस्वशरीरेन्द्रादिवाचकैश्शब्दैः आम्नायत इति वर्णाश्रमानुबन्धिनां कर्मणां भगवदाराधनात्मकत्वात् मोक्षसाधनत्वं युक्तमेव इति भावः । एवं वर्णाश्रमानुबन्धिधर्माणां स्वरूपेणापरित्याज्यत्वं परप्राप्तिसाधनत्वप्रकारश्च वर्णितः । अथ तेषामेव दैवमेवापर इत्याद्युक्त प्रधानधर्मयोगेन नियमविशेषादियोगेन च कर्मयोगान्तर्भूतानां ज्ञानयोगाधिकारिणाम् अपि अपरित्याज्यत्वं प्रागुक्तं प्रत्यभिज्ञापयति ।।

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।

स्वधर्मपरधर्मशब्दौ न वर्णाश्रमानुबन्धि धर्मपरा ब्राह्मणादेः क्षत्रियादिधर्माणां निषिद्धत्वेन अधर्मतया तदपेक्षया स्वजातिधर्मप्रशंसा योगात् । किन्तु कर्मयोगज्ञानयोग परौ । तथा च **स्वधर्म** इत्यस्य स्वेन उपादातुं योग्यपरत्वं स च कर्मयोग एव प्रकृति-संसृष्टेन पुरुषेण तस्यैव उपादातुं सुरत्वात् । इन्द्रियव्यापाररूपत्वात् कर्मयोगस्य स **विगुणो**ऽपि स्वनुष्ठितात्सम्यक् अनुष्ठितात्पर धर्मादिन्द्रियनिरोधनिपुणपुरुषधर्मात् ज्ञानयोगात् श्रेयान् प्रशस्तः ।। तदेव उपपादयति -

स्वभावनियतं कर्म कुर्वन् नाप्नोति किल्विषम् ।। ४७ ।।

प्रकृतिसंसृष्टस्य स्वभावत एव नियतं **कर्म** कर्मयोगं प्रकृतिसंसर्गस्वाभाव्यादेव इन्द्रियव्यापाररूपकर्मयोगो नियत इत्यर्तः । यथा विषतरुनिम्बमित्रेण्यादि जातानां जन्तूनाम् आहारा इति भावः । **कुर्वन्** अनुतिष्ठन् **किल्बिषं नाऽप्नोति** - अनिष्ट समं संसारं **नाप्नोति** । अप्रमादत्वेन सुकरानुष्ठानत्वात्कर्मयोगस्य ज्ञानयोगस्य तु स प्रमादत्वात् तत्र तत्सम्भावना सम्भवत्येव इति भावः ।।

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ।। ४८ ।।

हे **कौन्तेय! कर्म** - कर्मयोगं **सहजं** - सहजत्वाद्वासनानियतत्वादित्यर्थः । **सदोषमपि** - कायक्लेशरूपदोषाक्रान्तमपि **न त्यजेत् ।** ज्ञानयोगयोग्योऽपि कर्मयोगमेव कुर्यादिति बोधनाय अपि **शब्दः सर्वारम्भाः** कर्मारम्भाज्ञानारम्भाश्च **दोषेण धूमेनाग्निरिव आवृताः** इयान्विशेषः । कर्मयोगः कायक्लेशमात्रस्य सोढव्यत्वात्सुकरः ज्ञानय्रोगस्तु प्रत्यग्विषयान्वेषणेन्द्रियमनोनियमनादि बह्वाया सगर्भत्वात् दुस्सम्पाद इति ।।

असक्तबुद्धिस्सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ।। ४९ ।।

सर्वत्र परमात्मव्यतिरिक्ते सर्वफलसङ्गादौ **असक्तबुद्धिः जितात्मा** - जितमनाः वशीकृतान्तःकरण इत्यर्थः । **विगतस्पृहः** - परमात्मकर्तृत्वानुसन्धानेन स्वात्मनः कर्तृत्वे निर्गताभिलाषः **सन्न्यासेन** त्यागादनन्यत्वेन अध्यायादौ निर्णीतेन **सन्न्यासेन परमां नैष्कर्म्यसिद्धिं** परमात्मध्याननिष्ठाम् **अधिगच्छति** - प्राप्नोति । निर्गतकर्मा निष्कर्मा तस्य भावो **नैष्कर्म्यं** तस्य सिद्धिः इति सर्वेन्द्रियकर्मोपरतेः तस्यामेव भावात् । तस्या एव परमत्वाच्च ।

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ।। ५० ।।

सिद्धिं प्राप्तः पूर्वोक्तनैष्कर्म्य सिद्धिशब्दितां ध्याननिष्ठाप्राप्तः पुरुषः । **यथा** येन प्रकारेण वर्तमानो **ब्रह्म प्राप्नोति** - अधिगच्छति । तथा तत्प्रकारविशिष्टं पुरुषं **मे** मत्तः निबोध निश्चयेन अवधारय 'यत्प्राप्यं तदेव ब्रह्म विशिनष्टि समासेनेति निष्ठेति पर्यवस्यत्यस्मिन् उपायः' ।। इति **निष्ठा ज्ञानस्य** ध्यानात्मकस्य **या निष्ठा** परमप्राप्यम् इत्यर्थः । विधेय निष्ठापेक्षयाय इत्युक्तिः ।

बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ।। ५१ ।।

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो न्रित्यं वैराग्यं समुपाश्रितः।। ५२ ।।

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममश्शान्ती ब्रह्मभूयाय कल्पते ।। ५३ ।।

संशयविपर्ययादिदोषरहितया **बुद्ध्या** यथावस्थितात्मतत्त्व विषयया **बुद्ध्या युक्तः ।** **धृत्या**पूर्वोक्तया सात्त्विक्या धृत्या **आत्मानं** मनः **नियम्य** विषयविमुखम् अवस्थाप्य **शब्दादीन् -** शब्दस्पर्शरूपादीन् **विषयान् त्यक्त्वा** जितेन्द्रियस्यापि विषयसन्निधिः क्षोभहेतुः इति तानसंन्निहितान्कृत्वा इत्यर्थः । **रागद्वेषौ व्युदस्य** तन्निमित्त रागद्वेषौ परिहृत्य विप्रकृष्टेषु तेषु सूक्ष्मसङ्गमपि त्यक्त्वा इत्यर्थः । **विविक्तसेवी** विविक्तशब्दो हरितपरः । परध्यानयोगविरोधिरहित देश इत्यर्थः । **तं** सेवितुं शीलमस्येति । तथा लघ्वाशीनात्यश्नतस्वित्युक्तरीत्यात्यशनानश नररहित इत्यर्थः । **यतानि** नियमितानि **वाक्कायमानसानि** येन स तथोक्तः । प्रणवादि व्यतिरिक्ते वाचः स्थिरासनादिव्यतिरिक्ते कायस्य शुभाश्रयव्यतिरिक्ते मनसश्च प्रवृत्तिं निवर्तयन् इत्यर्थः । **नित्यम्** आप्रयाणात् **ध्यानयोगपरः, वैराग्यं समुपाश्रितः** रागद्वेषप्युदसनेन लब्धं **वैराग्यं समुपाश्रितः** निर्विघ्नमभिवर्धयन् अहं कामनात्मन्यात्माभिमानं **बलं तद्विद्धि** जनकं वासनाबलं **दर्पं** तन्निमित्तं दर्पं हर्षान्तरभाव्यवस्थाविशेषं **कामं क्रोधं परिग्रहं** स्यापि देहधारणार्थं पुनः स्वीकारं **विमुच्य निर्ममः** सर्वेष्वनात्मीयेषु आत्मीयता बुद्धिरहितश्शान्त आत्मानुभवैकसुखः **ब्रह्मभूयाय कल्पते ।** ब्रह्मशब्दोऽत्र परिशुद्धात्मपरः । यथावस्थितं स्वात्मानम् अनुभवति इत्यर्थः । एवं कर्मयोगादिसाध्य प्रत्यगात्मानुभवम् अभिधाय तस्य परभक्त्यधिकारापादकत्वम् आह -

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ।
समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ।। ५४ ।।

ब्रह्मभूतः - ब्रह्मत्वं गतः आविर्भूता परिच्छिन्नज्ञान इत्यर्थः । **प्रसन्नात्मा** क्लेशकर्माद्यैः कल्मषैः अस्पृष्टस्वरूपः **न शोचति** यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यत इत्युक्त रूपोऽवतिष्ठते **न काङ्क्षति ।** 'यं लब्ध्वा च अपरं लाभं मन्यते नाधिकम्' ।। तत इत्युक्तरीत्या मद्व्यतिरिक्तं किमपि प्राप्यं **न कांक्षति । सर्वेषु भूतेषु** द्वेष्येषु मित्रेषु च तुल्यमतिः **पराम्** अत्यर्थप्रियानुभवरूपां **मद्भक्तिं** मयि सर्वेश्वरे भक्तिं 'वेदनं ध्यानविश्रान्तम्' इत्युक्तां **भक्तिं लभते ।** अथ तत्फलमाह -

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ।। ५५ ।।

अहं विधिनिषेधरूपनिरूपकधर्मैः स्वरूपतः सर्वविधानुयायि स्वरूपनिरूपकधर्मैश्च स्वभावतः **योऽस्मि ।** यद्वा स्वरूपतः परत्वव्यञ्जकधर्मैः स्वभावतः सौलभ्यव्यञ्जकधर्मैश्च

योऽस्मि यावानस्मिनिरूपितस्वरूपविशेषकैः ज्ञानशक्त्यादिभिः धर्मैः विभूतिभिश्च यावानास्मि । तत्त्वतः तथा विधं **मां भक्त्या अभिजानाति** - संशयविपर्ययादिराहित्येन जानाति, तत्त्वतो ज्ञात्वा अयं तत्त्वतो जानाति इत्यनुवादः । स च **उपायभूतस्य** तत्त्वज्ञानस्य स्वादुतमतया सुदुर्लभत्वेन आदरातिशयद्योतनाय । तदनन्तरं तत्त्वज्ञानानन्तरं ततः भक्त्यैव **विशते मां** प्रविशति । **तत्त्वतः** स्वरूपस्वभावगुणविभूतिदर्शनोत्तर-कालभाविन्यानन्यया भक्त्या **मां** प्राप्नोति इत्यर्थः । एवम् अनुष्ठितानां भगवदाराधनात्मकानां नित्यनैमित्तिकानां कर्मणां परभक्तिपरज्ञानपरमभक्तिपर्यन्ततत्त्वरूपो विपाक उक्तः । इदानीं काम्यकर्मणामपि तथानुष्ठितानां स एव विपाक इत्याह -

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ।। ५६ ।।

सदा यावज्जीवं **सर्वकर्माण्यपि** न केवलं नित्यादीनि, अपि तु काम्यान्यपि इत्यर्थः । **मद्व्यपाश्रयः** मयि विन्यस्तकर्तृत्वादिकः कुर्वाणश्चेत् मत्प्रादान्मदनुग्रहं प्राप्य **शाश्वतं** - नित्यम् **अव्ययं** पुनरावृत्यसम्पादकं **पदं** - पद्यत इति पदम् प्राप्यं मां **प्राप्नोति** ।

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तस्सततं भव ।। ५७ ।।

चेतसा सर्वाणि कर्माणि **सन्न्यस्य** अध्यात्मचेतसा इत्युक्ताऽध्यात्मचेतसा परशेषत्वादि विशेषितयथावस्थिताऽत्मगोचरया बुद्ध्या इत्यर्थः । **सर्वकर्माणि** सानुबन्धीनि सर्वाणि कर्माणि **मयि सन्न्यस्य** कर्ता कारयिता च भगवानेव इति । **मयि सन्न्यस्य मत्परः** अहमेव फलतया प्राप्य इत्यनुसन्दधानः **बुद्धियोगमुपाश्रित्य** अकर्तृत्वानुसन्धानरूपमिममेव बुद्धियोगम् **उपाश्रित्य सततं** सर्वदा **मच्चित्तो भव** ।।

मच्चित्तस्सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि ।। ५८ ।।

मच्चित्तस्सन् मत्प्रसादात् सांसारिकदुर्गाणि **तरिष्यसि** । एवं नित्यनैमित्तिक-काम्यानां कर्मणां बुद्धिविशेषनियमादियोगेन कर्मयोगशब्दितानां परम्परया परिपूर्णभगवत्प्राप्ति-पर्यन्तविपाकम् उपपाद्य सर्वथा कर्मयोग एव कर्तव्य इति निगमितम् । अथ **तदकरणे** प्रत्यवायमाह -

अथ इति । **त्वं** मया अनुशिष्टस्त्वं **अहङ्कारात्** गर्वात् अहमेव कृत्याकृत्य-विवेकशालीति दुरभिमानान्न **श्रोष्यसि** मदुक्तम् न श्रोष्यसि श्रुत्वा तथाऽनुतिष्ठसि इत्यर्थः । **विनङ्क्ष्यसि -** विनष्टो भविष्यसि अनादिकालप्रवृत्तस्यात्मासत्त्वस्य अनन्तरकालेष्यनुवृत्तिः स्यात् इति भावः । अन्ये हि वक्तारः परिमितविषयं किञ्चिद्वदन्ति तदुक्तानि शास्त्राण्यपि मदाज्ञारूपाण्येव । अहन्तु सर्वाधिकारिणाम् अविहिताहितवेदिता मदुक्ताननुष्ठाने तु तवोत्तारक एव न इति हृदयम् ।

ननु त्वदुक्तकर्मयोगाननुष्ठाने उक्तानिष्टपर्यवसानं; तर्हि युद्धव्यतिरिक्तं कर्मयोगान्तरम् उपदिशेत् इत्यत आह -

यद्यहङ्कारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ।। ५९ ।।

अहङ्कारं हिताहितपरिज्ञानेऽहमेव स्वतन्त्र - इति अभिमानमाश्रित्य **न योत्स्य इति मन्यसे-युध्यस्व -** इति मदुक्तिम् अतिक्रम्य एवं मन्यसे **एष व्यवसायः** स्वातन्त्र्याभिमान गर्भो व्यवसायः । मिथ्यामिथ्या भविष्यति कुत इत्यत्राह - **प्रकृतिः** इति । यतः **प्रकृतिः** गुणमयी मम माया त्वां मन्नियोगातिक्रमवन्तं **नियोक्ष्यति**! युद्धे नियोक्ष्यति । मय्युदासीने प्रकृतिपरवशस्त्वं तेष्वेव प्रवत्स्यसि इति भावः । **प्रकृतेः -** प्रेरकत्वप्रकारमेव दर्शयति ।।

स्वभावजेन कौन्तेय निबद्धस्स्वेन कर्मणा ।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ।। ६० ।।

स्वभावजं शौर्यं शौर्यं तेज इत्यत्र तथोक्तेः । **स्वेन** स्वासाधारणेन क्षत्रिय जात्यसाधारणेन इत्यर्थः । **कर्मणा** युद्धाख्येन **बद्धः** । अत एव **अवशः** गुणाधीनप्रवृत्तितया अस्वतन्त्रः **करिष्यसि -** तत्तत्कर्म करिष्यसि **यत् मोहात्** न श्रोष्यसि - विनङ्क्ष्यसि इति मदुपदिष्टस्य बुध्यनारोहात् **कर्तुं न इच्छसि** । मदुक्तानादरेऽपि प्रकारन्तरेणाऽपि **करिष्यसि** इति बोधनाय अपिशब्दः न इच्छसि करिष्यसि इति बोधनाय अपिशब्दः न इच्छसि करिष्यसि इति वर्तमान भविष्यत्वव्यपदेशयोः तु अयम्भावः । प्राप्तावसरे धर्मबुद्ध्यानुष्ठानं परित्यज्य अतिक्रान्तावसरे परपरिभवनिगळितो गतजलसेतुबन्धं करिष्यसि इति ।। ननु त्वय्युदासीने कथम् अहं प्रयते? तथात्वे कथं तव सर्वहेतुत्वम्? इत्याशङ्क्य सर्वं भूतजातं सर्वेश्वरेण मयैव निर्मितं पूर्वकर्मानुगुण्येन अतो न दोष इति परिहरति -

ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्त्सर्वभूतानि यन्त्रारूढानि मायया ।। ६१ ।।

ईश्वरः - सर्वस्य नियन्ता **सर्वभूतानां** सर्वप्राणिनां **हृद्देशे** - सर्वविधप्रवृत्तिमूल-ज्ञानोदयदेशे **सर्वभूतानि यन्त्रारूढानि मायया** भ्रामयन् तिष्ठति । अत्र **यन्त्र**शब्दः शरीरपरः शरीरं रथमेव च इति रथयन्त्रत्वेन निर्देशात् तस्मिन् हंसो भ्राम्यते ब्रह्म चक्र इति कटाक्षेण भ्रामयन् इत्युक्तम् । तस्मिंश्च अन्यो **मायया सन्निरुद्ध** इत्यर्थ सूचनाय मायया इत्युक्तं 'सर्वस्य चाहं हृदि सन्निविष्टः' इति स्वस्यैव नियन्तृत्वेन माया निवृत्युपायमाह -

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ।। ६२ ।।

तम् - अन्तर्यामितया स्थित्वा प्रशासितारम् आश्रितवात्सल्यविवशन्तम् ईश्वरं **सर्वभावेन** सर्वात्मना ईश्वर इति परोक्षनिर्देशः स्वाज्ञाया दुरतिक्रमत्वबोधनाय स्वतन्त्रेण मया प्रेरितः परतन्त्रः कथं तां निस्तरेदित्यापरःस्वामित्व-नियन्तृत्व-उपदेष्टृत्व-प्राप्यत्व-प्रापकत्वादिसर्वप्रकारैः अयमेवावस्थित इति भावेन **शरणं गच्छ** - उपदेशादिमुखेन गोप्तारं वरय । तन्मायां तं वा अन्यो निवर्तयति इति बोधनायैवकारः । **तत्प्रसादात्** तदनुग्रहात् सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि इत्यनेनैकार्थ्यात् तत्प्रसादादित्यत्र मत्प्रसादादित्यर्थः । **पराम्** उत्कृष्टां शान्तिं सर्वकर्मबन्धो परमं **शान्तेः** परत्वं च निवृत्तजातीय-सामानाधिकरण्यरहितत्त्वं **शाश्वतं** - पुनरावृत्तिरहितं स्थानं **प्राप्स्यसि** । एवम् अर्जुनस्य युद्धप्रोत्साहनव्याजेन सर्वमध्यात्मशास्त्रमुपदिश्य सर्वासु निष्ठासु नित्यकर्मणो दुस्त्यजतया अन्तेऽपि युद्धकर्तव्यत्वमेव स्थापितम् । अथ श्रोतव्यान्तराभावज्ञापनाय प्रक्रान्तनिष्ठात्रयं पुष्कलोपदिष्टतया यथाधिकारम् अनुष्ठेयत्वेन निगमयति ।।

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यत्तरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ।। ६३ ।।

इति इत्थं वक्तव्यांशं सङ्क्षेपेण **ते** अयच्छ्रेयः स्यादिति वादिने प्रपन्नाय शिष्याय **गुह्याद्**गुह्यभूतात् **ज्ञानात् गुह्य**तमम् - अतिरहस्यं ज्ञानमाख्यातम् । अत्र अलौकिक-प्रमाणसिद्धत्वात् **आयुः** धनुर्गान्धर्वशास्त्रादिजन्यज्ञानम् **अगुह्यं** पारलौकिक-स्वर्गादिपुरुषार्थतदुपायविषयं साङ्ख्यशास्त्रमूलं **ज्ञानं गुह्यम्** । इदन्तु वेदान्तनिष्पाद्यं तदुपबृंह्मणभूतैः शास्त्रैः साधितं मुमुक्षुभिः यथाधिकारम् अनुष्ठितम् इति । **गुह्यान्तरम्**

इति भावः । **आख्यातम्** इत्यत्र वक्तव्यान्तराभावव्यञ्जनाय आङ् प्रयोगः । **मया** स्वतस्सर्वज्ञेन हितैषिणा इत्यर्थः । एतदुपदिष्टम् **अशेषेण विमृश्य** स्वाधिकारानुरूपं परामृश्य अनेन सहसैः अपूर्वपरित्यागो नोचित इति सूचितम् । **यथा इच्छसि तथा कुरु ।** तत्तदधिकारानुसारेण उपदिष्टे शास्त्रार्थपर्वसु कर्म ज्ञानभक्तिषु बुद्धिमत्तरस्त्वम् । अस्मिन्पर्वणि ममाधिकार इति परामृश्य परिचितस्य वर्णाश्रमधर्म एव वर्तस्व इत्यर्थः । कर्मयोगादीनां त्रयाणाम् अन्योन्यापेक्षया गुह्यतरत्वमुक्त्वा त्रिषु व्यवहित अव्यवहितोपायविभागेन गुह्यतमत्वाध्यवसायार्थं प्राधान्यात् तत्रैव शास्त्रतात्पर्यातिशयद्योतनार्थमाह -

सर्वगुह्यतमं भूयशृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ।। ६४ ।।

सर्वगुह्यतमम् । सर्वेषु एतेषु **गुह्यतमं** सप्तमीति योगविभागात्समासः इदन्तु ते **गुह्यतमम्** इति । गुह्यतमत्वेन पूर्वमेव उक्तं; भक्तियोगविषयम् इत्यर्थः । **परमं वचः मे** मत्तः **भूयः** पुनः शृणु वाच्यार्थस्य परमत्वात् वचसि परमत्त्वम् ।

'यस्मात् धर्मात्परो धर्मो विद्यते नेह कश्चन ।
अयन्तु परमो धर्मो यद्योगेन आत्मदर्शनम्' ।।

इति वाच्यस्य परमत्वं सिद्धं **दृढमिष्टोऽसि** अत्यर्थं प्रियोऽसि । यथा **गुह्यतमं** प्रकाशनीयम्; तथा प्रीतिविषयोऽसि यत इत्यर्थः । **ततस्ते हितं वक्ष्यामि ।।**

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ।। ६५ ।।

मय्येव मनो यस्य स तथोक्तः । तथा **भव** विषयान्तरवैमुख्यपूर्वकं चित्तं मदेकप्रवणं कुरु इत्यर्थः । अनेन तैलधारावदविच्छिन्नां विगळितवेद्यान्तरां दर्शनसमानाकारां स्मृतिं कुर्विति शिक्षितं । **मद्भक्तः** महनीयविषये प्रीतिर्हि भक्तिः मयि निरतिशयप्रीतिमान् **भव ।** अनेन पूर्वोक्तस्मृतिं निरतिशयप्रियां कुरु इति शिक्षितम् । अथ तस्याः स्मृतेः अन्तरङ्गपरिकरबोधनाय आह - **मद्याजी मां नमस्कुरु** इति । **यजनं पूजनम् -** आराधनं परिपूर्णशेषवृत्तिः इति यावत् । नमनं प्रह्वी भावः । आत्मीयं सर्वं भगवत एव इत्यनुसन्धानम् इत्यर्थः । **एवम्** आराधयन् **इत्थम्** अनुसन्दधानः अत्यर्थ **प्रियाम्** अविच्छिन्नां **मद्विषय**स्मृतिं कुरु इत्यर्थः । एवं वर्तमानो **मामेवैष्यसि** अव्यवधानबोधनार्थमेवकारः; **सत्त्यं** प्रतिजाने सत्यमिति क्रियाविशेषणम् । न तु प्रतिज्ञातव्यविशेषणम् । तथा च

एतत्प्रतिज्ञानं न उपच्छन्दनमात्रम् । अपि तु सत्यं तथा च उक्तं; मयैव द्यौः पतेत् इति । यतस्त्वं **मे प्रियोऽसि** अत्यर्थ प्रियोऽसि 'ज्ञानी त्वात्मैव मे मतम्' इत्युक्तम् । अतो मामेवैष्यसि इत्युक्तं सत्यमेव उक्तमिति जानीहि इत्यर्थः । एवं विस्तरेण सङ्ग्रहेण उक्तानां कर्मयोगादीनां सारतमम् अनुसन्धानविशेषम् उद्धृत्य तत एव मामेवैष्यसि इत्युक्तेष्टप्राप्तेः प्रतिबन्धकभूतानि निष्ठानां निवृत्तिः उच्यते ।।

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।। ६६ ।।

सर्वशब्देन प्रकृतं त्रिकर्मविशेषा उच्यन्ते । तथा च **सर्वधर्मान्** साक्षाद्वा परम्परया वा परमनिश्श्रेयससाधनभूतान् कर्मज्ञान-भक्तियोगान् फलसङ्ग-कर्तृत्वादि त्यागेन **परित्यज्य मामेकं शरणं व्रज ।** शरणशब्दः उपायवाचीसन् कर्तृत्वादेरपि व्यञ्जको भवति । तथा च अयमर्थः । अनधिगतवेदान्ताः स्वात्मनि कर्तृत्वं स्वर्गादौ प्राप्यत्वं कर्मण्युपायत्वं च अभिमत्य प्रवर्तन्ते । तथा न त्वम् अनुसन्धत्स्व इति भावः । एतद्बोधनायैव धर्मशब्दः परीत्युपसर्गश्च अहमुक्तप्रकारेणाराधितः फलप्रदानौपयिकसार्वज्ञ्यसर्वशक्त्यादि-विशिष्टः ते च अनुष्ठितोपायन् **त्वां सर्वपापेभ्यः** मत्प्राप्तिविरोधिभ्यः सर्वेभ्यः पापेभ्यो **मोक्षयिष्यामि ।** अनेन प्रतिबन्धकनिवृत्तिरेव उपायसाध्या स्वरूपाविर्भावलक्षणा भगवत्प्राप्तिस्तु स्वत एव स्यादिति सूचितम् । **मा शुचः -** शोकं मा कृथाः ।

यद्वा - **मन्मनाभव मद्भक्त** इत्यादिना भक्तियोगस्य कर्तव्यतायाम् उक्तायां 'जन्मान्तरसहस्रेषु कृष्णे भक्तिः प्रजायते । विघ्नायुतेन गोविन्दे नृणां भक्तिर्निवार्यत' ।। इत्यादिकं पर्यालोच्य तदारम्भविरोधिस्वसञ्चितपापसञ्चयतः विचिन्त्यपरिमितकालकृतैः प्रायश्चित्तरूपधर्मैर्दुस्तरत्वमपि विचिन्त्य शोचतोऽर्जुनस्य शोकमपनुदति । **सर्व इति । सर्वधर्मान् -** 'धर्मेण पापमपनुदति,' इत्यादिभिः तदारम्भविरोधिपापनिवर्तकत्वेन उक्तान् सर्वान् धर्मान् कृच्छ्रचान्द्रायणवैश्वानरेष्टिपवित्रेष्ट्यादीन् धर्मान्**परित्यज्य -** भक्तियोगारम्भसिद्धये **मामेकं** परमकारुणिकम् आश्रितवात्सल्यैकविवशं **मामेकमेव शरणं प्रपद्यस्व । अहन्त्वा सर्वपापेभ्यो** यथोक्तस्वरूपभक्तारम्भविरोधिभ्यः **मोक्षयिष्यामि मा शुचः** एवं स्वोपदेशेन प्रतिष्ठिततत्त्वविज्ञानस्य अर्जुनस्य कर्तव्यविशेषोपदेशव्याजेन सम्प्रदायविधि सिद्ध्यर्थम् । अस्मिञ्छास्त्रे अधिकारिणो दर्शयति ।

इदं ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ।। ६७ ।।

इदं - शास्त्रं **ते** त्वया **आर्षत्वात्** विभक्तिव्यत्ययः । त्वया **न च वाच्यम्** इत्यन्वयः । न विद्यते तपो यस्य सो **अतपस्कः । अतप्ततपा** इत्यर्थः । तस्मै न वाच्यं न अभक्याय 'यस्य देवे पराभक्तिः' इत्युक्तरीत्या देवे गुरौ च भक्तिरहितायातप्ततपसेऽपि वाच्यम् इत्यर्थः । **न च अशुश्रूषवे प्रब्रूहि** तं, श्रद्धधानाय**मह्यम्** इत्युक्ततया भक्तायाप्य**शुश्रूषवे** न च वाच्यम् इत्यर्थः । शुश्रूषासहितोऽपि **मां योऽभ्यसूयते ।** तस्मै न देयं गुणेषु दोषाविष्करणम् असूयामद्गुणविभूत्यादिषु कथितेषु **यो** दोषमाविष्करोति तस्मै न देयम् इत्यर्थः । क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति **कोप** इति कर्मत्वस्यापि **सद्भावान्माम्** इति द्वितीयाद्वितीयाप्रक्रमानुरोधेन; न चैव ह्यभ्यसूयव इति वक्तव्ये प्रक्रमभङ्गेन विरूपवाक्यकरणम् असूयाया अत्यन्त-परिहरणीयत्वबोधनाय असूयकायान् ऋजव इति । असूयामात्रवति प्रवचननिषेधेऽपि माम् इत्युक्तिः । भगवत्यभ्यसूयाया अत्यन्तपरिहरणीयत्वद्योतनाय; न च वाच्यम् इत्युक्त्या अनधिकारिषु वचने प्रत्यवायो भवेत् इति सूचितम् । सर्वगुणवत्त्वेऽपि भगवत्यसूयवे नैव वाच्यम् इति द्योतनाय अन्ते निवेशः । अथ अधिकारिविशेषेषु वक्तव्यत्वम् । तेषु वचनस्य अपवर्गाख्यफलपर्यन्ततां च आह -

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ।। ६८ ।।

इदं परमं गुह्यम् - इदं शास्त्रं **मद्भक्तेषु - योऽभिधास्यति** मद्भक्तेषु इत्यादिना उक्ता दोषाः परिहृताः भक्त्वेष्विति । सामान्योक्त्या 'श्रावयेच्चतुरो वर्णानि' इत्युक्ताधिकारिषु भक्ता एव विशेषणाधिकारिण इति ज्ञापितम् । **अभिधास्यति** अर्थश्रवणपर्यन्तम् **अभिधास्यति** - व्याख्यस्यति इत्यर्थः । पूर्वस्थयच्छब्दस्य तच्छब्दाकाङ्क्षित्वं स इत्यध्याहार्यं च व्याख्याता । **मयि परां भक्तिं कृत्वाऽहमेवैष्यति ।** अत्र **भक्तिं परां कृत्वा** इत्यनेन व्याख्यानमपि कर्मयोगादिकोटौ भक्तियोगाङ्कुरे निविष्टां परां भक्तिं जनयति इति सूचितम् । **मामेव** इत्यवधारणेन व्याख्यायिनोऽहं क्षुद्रफलं न जानामि इत्यभिप्रेतम् । फलितमाह - **असंशयः** आप्रतिषेधे उक्तेऽर्थे संशयो नेत्यर्थः । स्वशास्त्रव्याख्यानस्य स्वप्राप्तिसाधनत्वे द्वारमाह -

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ।। ६९ ।।

तस्मात् मद्गीता व्याख्यायिनः **अन्यः मनुष्येषु** प्रियकृत्तमः । निरतिशय प्रियाकारी **न च** इतः पूर्वं **नाभूतेन च भविता । तस्मादन्यः प्रियतरो** भुवनाभूवन् न

भवितेत्यर्थः । अत्र 'इदं ते नातपस्काय' इत्ययोग्येष्ववक्तव्यत्वम् । प्रथमम् अभिधाय 'य इदम्' इति योग्येष्वभिधातव्यम् । इति पश्चात् निर्दिष्टं तेन योग्यानां कथनादप्ययोग्येषु कथनम् अनिष्टतमम् इति द्योतनाय इत्थमुपदेष्टुः फलमुक्तम् । अथ शब्दतोऽर्थतश्च गुरुसकाशात् अधिगतस्य फलमुच्यते ।।

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमिष्टस्स्यामिति मे मतिः ।। ७० ।।

धर्म्यं धर्मादनपेतम् **आवयोः इमं संवादं** योऽधिकारी **अध्येष्यते** तेन अध्ययनं कुर्वता अहं **ज्ञानयज्ञेन** चापि अन्ये यजन्तो माम् उपासत इति भक्तियोगप्रकरणोक्तेन भगवदनुसन्धानविशेषरूपज्ञानयज्ञेन **इष्टः** स्याम् इति **मे मतिः** - ममाभिप्रायः अयम्भावः । योऽश्वमेधेन यजते 'य उ चैन देवं वेद यम् यं क्रतुम् अधीते तेन तेनास्येष्टं भवति' इत्यादिषु तत्तन्मखभागाध्ययनस्य तत्तुल्यफलता । तथा अत्रापि ज्ञानयज्ञवत् भगवत्प्रीतिजनकत्वं भगवद्गीताध्ययनस्य इति ।।

श्रद्धावाननसूयुश्च शृणुयादपि यो नरः ।
सोऽपि मुक्तश्शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ।। ७१ ।।

श्रद्धावान् - आस्तिक्यबुद्धिमान् **अनसूयुः मयि** - मद्भक्तेषु वा असूयारहितः चकारः अनुक्तसमुच्चयार्थः । **प्रणिपात** परिप्रश्नसेवादीनामपि ग्रहणं भवति । एतादृशगुणविशिष्टो **यः शृणुयात्** - गुरुसकाशात् इति शेषः । 'आचार्याद्धैव विद्या-विदिता साधिष्ठं प्राप' इति श्रुतिः । **शृणुयात्** इत्युक्त्या प्रस्तुत निरीक्षणादिना ग्रहणं व्यवच्छिद्यते । **सोऽपि मुक्तः** - मद्भक्तिविरोधिसर्वपापेभ्यो मुक्तः । **पुण्यकर्मणां** यथोक्तवर्णाश्रमोचित सत्कर्मानुष्ठानवतां **लोकान्प्राप्नुयात् ।** अत्र शृणुयादपि **इत्यपिशब्दः** श्रवणमात्रस्यैवं फलं किमुतार्थज्ञान इति बोधनात् सोऽपि इति द्वितीयस्तु स्वस्वर्णा-श्रमानुष्ठानरहितोऽपि इत्यर्थः बोधनाय । अथ सर्वज्ञतया विदितार्जुनाशयोऽपि भगवान् इत्यादरेण विस्मरणाय उपदेश साफल्यं जिज्ञासमान इव पृच्छति ।

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोहः प्रणष्टस्ते धनञ्जय ।। ७२ ।।

हे धनञ्जय! एतत् - मत्कथितम् एकाग्रेण चेतसा **त्वया श्रुतं** हे **धनञ्जय! अज्ञानसम्मोहः** अज्ञानहेतुकं **भ्रान्तिं ज्ञानं प्रणष्टः** - प्रकर्षेण नष्टः स मूलं नष्टः । अत्र

त्वं मदीयस्सम्यक् मया श्रावितोऽसि इति बोधनाय प्रथमं प्रार्थ इत्युक्तिः । बाह्यधनादिविजय तदज्ञानजन्यमोहादिजयोऽपि तवेषत्कर इति बोधनाय उत्तरार्धे धनञ्जय इत्युक्तिः । अथ कृतज्ञतां व्यञ्जयन् अर्जुनः श्रुतफलसिद्ध्या वचनं वक्ति । हे अच्युत! आश्रितवात्सल्यविहित त्वत्प्रसादात् तदनुग्रहात् मम **मोहः** स्वरूपविषयः परतत्त्वविषयः उपायविषयः अनुष्ठानविषयश्च सर्वो मोहः नष्टः त्वत्प्रसादात् स्मृतिर्लब्धा आत्मनां प्रकृतिविलक्षणत्वम्, तत्स्वभावरहितत्त्वम्, ज्ञातृतैकस्वभावत्वम्, भगवन्नियाम्यत्वम्, भगवच्छेषत्वज्ञानं परमात्मनश्च, हेयप्रतिभटकल्याणैकतानत्वं, जगत्कारणत्वाश्रितवात्सल्यकृता सर्वं ज्ञानं परावरतत्त्व याथात्म्यज्ञानपूर्वकाहरहरनुष्ठीयमानपरमपुरुषप्रीत्यैकफलनित्यनैमित्तिक काम्यनिषिद्धपरिहारशमदमाद्यात्मगुणनिर्वर्त्य भक्तिरूपतापन्नज्ञानैकलभ्यं वेदान्तवेद्यो वासुदेव एव सर्वमिति ज्ञानं च लब्धम् इत्यर्थः ।

अर्जुन उवाच -

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत ।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ।। ७३ ।।

यद्यपि **स्मृतिर्लब्धा** इत्युक्तम् । न ज्ञानमिति । तथापि उपदेशरूपवाक्येन प्रथमत स्मृतिः **दुर्लभा ।** अनुभवजन्यसंस्कारजन्यत्वात् तस्या अतो ज्ञानम् इत्युक्तम् । स्मृतिशब्दश्च ज्ञानमात्रे प्रयुक्तः 'स नो देवश्शुभया स्मृत्या' इति । अत स्थितोऽस्मिव्यवस्थितोऽस्मि । कीदृशस्सन् **गतसन्देहस्सन्** बन्धुस्नेहकारुण्यप्रवृद्धविपरीतज्ञानमूलात् सर्वस्मा-दवसादाद्विमुक्ततया निस्सन्देहस्थितोऽस्मि । **तव वचनं करिष्ये** युद्धादि कर्मविषयं तव वचनं करिष्ये । **सञ्जय उवाच** इति । 'मामकाः पाण्डवाश्च किमकुर्वत' इति पृष्टवते धृतराष्ट्राय सञ्जयः कृत्स्नमुक्त्वा, इत्थम् उवाच इत्यर्थः ।।

संजय उवाच -

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ।। ७४ ।।

इति - इत्थं **वासुदेवस्य** वसुदेवसूनोः कृष्णस्य महात्मनः **पार्थस्य** महाबुद्धेः तदाश्रितस्य अर्जुनस्य च **संवादम् अश्रौषं** श्रुतवानस्मि । कीदृशमाश्चर्यावहम् । अत **एव रोमहर्षणम् ।** अत्र महात्मनः इत्यनेन 'कृष्णाश्रयाः कृष्णबलाः कृष्णनाथाश्च पाण्डवाः' इति श्लोकार्थः सूचितः ।।

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् ।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतस्स्वयम् ।। ७५ ।।

भगवदवतारभूतव्यासानुग्रहात् **गुह्यतमं परं** सर्वोत्कृष्टं योगाख्यं रहस्यं **श्रुतवान्** दिव्यश्रोत्रलाभेन श्रुतवान् कस्माच्छ्रुतवान् **योगेश्वरात्कृष्णात्** कथयतः साक्षाच्छ्रुतवान् न तु शिष्यादि परम्परया दूरस्थोऽपि व्यासानुग्रहात्प्रत्यक्षमेव श्रुतवान् अद्भुतं रोमहर्षणम् इत्युक्तं स्फुटयति ।।

राजन् संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ।। ७६ ।।

राजन् इति धृतराष्ट्रस्य सम्बोधनम् । पुण्यश्रवणमात्रेण पापहरम् । **अद्भुतं** शब्दतोऽर्थतश्च आश्चर्यावहं **केशव-अर्जुनयोः** इमं **संवादं संस्मृत्य संस्मृत्य मुहुर्मुहुः हृष्यामि ।**

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान् राजन् हृष्यामि च पुनःपुनः ।। ७७ ।।

तच्चेतच्च अर्जुनाय प्रकाशितं हरेः **अत्यद्भुतं रूपं संस्मृत्य संस्मृत्य** यथादृष्टं स्मृत्वा स्मृत्वा हृष्यतो **मे** महान्वि**स्मयो** जायते । **पुनःपुनः हृष्यामि च** अनभिप्रायज्ञस्य तव भगवता अर्जुनाय अध्यात्मोपदेशवैश्वरूप्य प्रकाशनादिभिः पाण्डवविजयसूचकैः **अलम्** सूचितमेव स्पष्टं वदामि इत्याह -

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ।। ७८ ।।

यत्र यस्मिन्पक्षे **योगेश्वरः** कृष्णः **योगानाम्** उच्चावच तत्तच्चेतनाचेतनपदार्थस्वभावानाम् **ईश्वरः** नियन्ता स्वसङ्कल्पायत्तस्वरूपस्थितिप्रवृत्तिभेद इत्यर्थः । **कृष्णः** - वसुदेवसूनुः । **यत्र धनुर्धरः पार्थः तत्र श्रीः** राज्यादिभोग्यसमृद्धिः विजयश्शत्रुनिरासः भूतिवैश्वर्यम् उत्पन्नायाः समृद्धेः उत्तरोत्तराभिवृद्धिरूपं भवनं **नीतिः** । अर्थशास्त्रजन्यकर्तव्यनिश्चय चोदिता धर्माविरुद्धा वृत्तिः **ध्रुवा** निश्चला इति **मम मतिः** - समीचीनबुद्धिः ।।

श्रीशैलबुक्कपट्टण येन्नाचान् दास विलिखितेऽध्यायः ।
श्रीद्गीताभाष्यार्थसङ्ग्रहे अष्टादशोवृत्तः ।।

श्री कृष्णाय नमः

श्रीकृष्णाङ्घ्रिसरोरुहं निमजमथनं
ध्यात्वा तथैवार्जुनम् ।
पूर्वाचार्यपरम्परां नृमृगराट्
ताताख्यदासो नमन् ।।

आनन्दाब्द इषाख्यमासि धवले पक्षे दिने चादिमे ।
गीताभाष्यरहस्यसङ्ग्रहमिमं तत्प्रीतये लीलिखत् ।।

श्रीकृष्णाय वासुदेवाय पार्थसारथये परमपुरुषाय नमः ।
सर्वज्ञसर्वशक्ते करुणासिन्धो जगत्पते ।
कृष्ण त्वत्पादपद्मभक्तिं पाहि पार्थमिव मां च ।।

।। श्रीरस्तु ।।



Academy of Sanskrit Research - An Overview

Academy of Sanskrit Research, (ASR) Melkote, started at the instance of Government of Karnataka is functioning as an autonomous body. The Ministry of Science & Technology, Government of India, New Delhi, has accorded the Academy the Status of a Scientific & Industrial Research Organization (SIRO).

The ASR was set up in Melkote with the specific aim of promoting serious research and scholarship in Indian Systems of Philosophy especially Vedantic Systems, unearthing the valuable knowledge systems available in source books of Sanskrit and making them relevant to the modern world. The Academy also intends to use these knowledge systems for promoting indigenous scientific research using all the modern tools. The Academy is trying to promote the value based knowledge systems to meet the social and cultural challenges that are likely to dominate the societies in the future.

Research Programmes of the Academy

The principal areas of Research that are currently being pursued are:

Oriental Research with special focus on Vedanta Philosophy and its comparative study with other systems of thought and publication of the research results.

Sanskrit & Allied Scientific Research
Knowledge Mining & Engineering in the ancient texts with a focus to develop indigenous science and technology.



IT related Sanskrit Research: Development of software tools for Natural language Processing (NLP) in Indian Languages, using insights and logic available in ancient texts. Also to develop tools for speech synthesis and speech recognition, using Paninian parameters.

Perspective Plan:

*Sanskrit is an unlimited source of knowledge and Ancient Indian Heritage. There is an urgent need for knowledge mining in Sastras for knowledge empowerment of India using our ancient knowledge base, which is different in many ways from the present Western Knowledge Base. Keeping this in mind, The Academy proposes the **Perspective Plan** as summarized below:*

- *To undertake several unique projects like*
  A non conventional approach to Aeronautics
  A non conventional approach to Cryptography.
  A study of Ancient-Indian Materials, Agriculture, Biology etc.
- *To participate in:*
  National Manuscripts Mission of Ministry of Culture, Govt. of India
  Traditional Knowledge Digital Library Project of CSIR
- *To conduct sponsored International and National Seminars and Workshops with themes like*
  - *Philosophy and religion*
  - *Indian Scientific Heritage*
  - *Ancient food Technology*
  - *Materials Sciences in Ancient India*

  Also to organise an International Conference that could mark an extended silver jubilee Celebrations to culminate in the Valedictory Function of the year long Celebrations.
- *To institute Fellowships and visiting Chairs.*
- *To get Enlisted as a Resource Centre of Ministry of Communication and Information Technology, Govt. Of India.*
- *To create a Corpus Fund of Rs. 500,00,000/-.*
- *To make Contributions to the development of the township of Melkote.*
- *To get the Academy accredited as a 'Centre of Excellence'.*
- *To Build Silver Jubilee Memorials.*
  (a) Library Complex (approx. 15,000 Sq.Ft. Area),
  (b) An Auditorium (approx. 3,000 Sq.Ft. Area),
  (c) A Computer Lab.(approx. 3,000 Sq.Ft. Area),
  With an independent power supply - In all estimated to cost around Rs.120,00,000/-.



Proposed Library Complex

Academy of Sanskrit Research
Melkote 571 431, Mandya Dist., Karnataka. INDIA
Tel : +91-8236-299841, 209178,
Tele fax : +91-8236-299981, Email : asrbng@vsnl.com

"Bridging the gap from the past to future through the present"